

GLASGOW.









VEYAKARANABHUSHANASARA.

BY

KOUNDA BHATTA.

EDITED BY

PANDIT TARANATHA TARKAVACHASPATI.



Calcutta:

PRINTED AT THE GANESHA PRESS.

1872.

To be had from Pandit Jibananda Vidyasagara B. A. Govt. Sanskrit College of Calcutta.



वैयाकरण भूषणसारः

श्रीकौण्ड-भट्ट-विरचितः।



राजकीय-संस्कृतविद्यामन्दिराध्यापक श्रीतारानाथ

तर्कवाचस्पति भट्टाचार्य्येण

संस्कृतः।




CALCUTTA.

PRINTED AT THE GANES'A PRESS.

1872.



वैयाकरणभूषणसारः ।



श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम् ।
स्फोटरूपं यतः सर्व्वं जगदेतद्विवर्त्तते ॥
अशेषफलदातारं भवाब्धितरणे तरिम् ।
शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणम् ॥
पाणिन्यादिमुनीन् प्रणम्य पितरं रङ्गोजिभट्टाभिधम्
द्वैतध्वान्तनिवारणादिफलिकां पुंभाववाग्देवताम् ।
ढुण्ढिं गौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान्
सिद्धान्तानुपपत्तिभिः प्रकटये तेषां वचो दूषये ॥

प्रारिप्सितप्रतिबन्धकव्यूहोपशमनाय कृतं श्रीपतञ्जलिस्मरणरूपं मङ्गलं शिष्यशिक्षार्थं निबध्नन् चिकीर्षितं प्रतिजानीते ।

फणिभाषितभाष्याब्धेः शब्दकौस्तुभउद्धृतः ।
तत्र निर्णीतएवार्थः संक्षेपेणेह कथ्यते ॥ १ ॥

उद्धृतइत्यत्र अस्माभिरिति शेषः । भाष्याब्धेः शब्दकौस्तुभउद्धृत इत्युक्तिस्तु शब्दकौस्तुभोक्तानामर्थानामाधुनिकोत्प्रेक्षितत्वनिरासाय । अन्यथा तन्मूलकस्यास्य ग्रन्थ-



वैयाकरणभूषणसारः ।



श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम् ।
स्फोटरूपं यतः सर्व्वं जगदेतद्विवर्त्तते ॥
अशेषफलदातारं भवाब्धितरणे तरिम् ।
शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणम् ॥
पाणिन्यादिमुनीन् प्रणम्य पितरं रङ्गोजिभट्टाभिधम्
द्वैतध्वान्तनिवारणादिफलिकां पुंभाववाग्देवताम् ।
ढुण्ढिं गौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान्
सिद्धान्तानुपपत्तिभिः प्रकटये तेषां वचो दूषये ॥

प्रारिप्सितप्रतिबन्धकव्यूहोपशमनाय कृतं श्रीपतञ्जलिस्मरणरूपं मङ्गलं शिष्यशिक्षार्थं निबध्नन् चिकीर्षितं प्रतिजानीते ।

फणिभाषितभाष्याब्धेः शब्दकौस्तुभउद्धृतः ।
तत्र निर्णीतएवार्थः संक्षेपेणेह कथ्यते ॥ १ ॥

उद्धृतइत्यत्र अस्माभिरिति शेषः । भाष्याब्धेः शब्दकौस्तुभउद्धृत इत्युक्तिस्तु शब्दकौस्तुभोक्तानामर्थानामाधुनिकोत्प्रेक्षितत्वनिरासाय । अन्यथा तन्मूलकस्यास्य ग्रन्थ-

स्याप्याधुनिकोत्प्रेक्षितसारत्वापत्तौ पाणिनीयानामनुपादेयतापत्तेः । तत्र निर्णीतइत्युक्तिरितोऽप्यधिकं जिज्ञासुभिः ग्रन्थकौस्तुभे द्रष्टव्यमिति ध्वनयितुम् ॥ १ ॥

प्रतिज्ञातमाह ।

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ॥ २ ॥

धातुरित्यत्र स्मृतइति वचनविपरिणामेनान्वयः । फलं विक्लित्त्यादि, व्यापारस्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया । उक्तञ्च वाक्यपदीये ।

यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते इति ॥

नच साध्यत्वेनाभिधाने मानाभावः,पचति, पाकः, करोति, कृतिरित्यादौ धात्वर्थावगमाविशेषेऽपि क्रियान्तराकाङ्क्षानाकाङ्क्षयोर्दर्शनस्यैव मानत्वात् । तथा च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपं साध्यत्वम् तद्रूपवत्त्वमसत्त्वभूतत्वम् एतदेवादाय ।

असत्त्वभूतोभावश्च तिङ्पदैरभिधीयते ।

इति वाक्यपदीयमिति द्रष्टव्यम् । अयञ्च व्यापारः फूत्कारत्वाधःसन्तापनत्वयत्नत्वादि-तत्तद्रूपेण वाच्यः । पचतीत्यादौ तत्तत्प्रकारकबोधस्यानुभवसिद्धत्वात् । नच नानार्थतापत्तिः, तदादिन्यायेन बुद्धिविशेषादेः शक्यतावच्छेदकानामनुगमकस्य सत्त्वात् । आख्याते क्रियैकत्वव्यवस्थापि अवच्छे-

दक्षबुद्धिविशेषैक्यमादायैव । उक्तञ्च वाक्यपदीये ।

गुणभूतैरवयवैः समूहः क्रमजन्मनाम् ।

बुद्धा प्रकल्पिताभेदः क्रियेति व्यपदिश्यतइति ॥

धात्वर्थं निरूप्य तिङर्थमाह (आश्रये त्विति)। फलाश्रये व्यापाराश्रये चेत्यर्थः । फलाश्रयः कर्म्म, व्यापाराश्रयः कर्त्ता । तत्र फलव्यापारयोर्धातुलभ्यत्वान्न तिङस्तदंशे शक्तिरन्यलभ्यत्वात् । शक्यतावच्छेदकं चाश्रयत्वं तत्तच्छक्ति विशेषरूपमिति सुबर्थनिर्णये वक्ष्यते । नन्वनयोराख्याता-र्थत्वे किं मानम् प्रतीतेर्लक्षणया, आक्षेपात् प्रथमान्तपदाद्वा सम्भवादिति चेत् अत्रोच्यते ।

"लः कर्म्मणि च भावे चाकर्म्मकेभ्यइति" ।

सूत्रमेव मानम् । अत्र हि चकारात्"कर्त्तरि कृदिति" सूत्रोक्तं कर्त्तरीत्यनुकृष्यते बोधकतारूपां तिबादिशक्तिं तत्स्थानित्वेन कल्पिते लकारे प्रकल्प्य लकाराः कर्म्मणि कर्त्तरि चानेन विधीयन्ते नकारविसर्गादिनिष्ठां कर्म्मकर-णादिबोधकशक्तिमादाय शसादिविधानवत् । नच सूत्रे कर्तृकर्म्मपदे कर्तृत्वकर्म्मत्वपरे तथा च कर्तृत्वं कृतिः, कर्म्म-त्वञ्च फलमेवार्थोऽस्त्विति शङ्क्यम्, फलव्यापारयोर्धातुलभ्य-त्वेन लकारस्य पुनस्तत्र शक्तिकल्पनाऽयोगात् । अथ दर्शना-त्तरीयरीत्याव्यापारस्य धात्वर्थत्वाभावात्तत्र लकारविधिः स्यादिति चेत्तर्हि कृतामपि कर्तृकर्म्मादिवाचित्वं न सिध्येत् । "कर्त्तरि कृदिति" च,"लः कर्म्मणी" त्यनेन तुल्ययोगक्षेमम् ।

अपि च मीमांसकानां कृताभिवाख्यातानामपि कर्तृवाचित्व-मस्तु भावनायाएवाक्षेपेण कर्त्रादिवत्प्रतीतिसम्भवे वाच्यत्वं मास्तु। तथा सति प्राधान्यं तस्या न स्यादिति चेन्न घट-मानयेत्यादावाक्षिप्तव्यक्तेरपि प्राधान्यवदुपपत्तेः। पचती-त्यादौ पाकं करोतीति भावनाया विवरणदर्शनाद्वाच्यत्वमिति चेत् पाकानुकूलव्यापारवतः कर्तुरपि विवरणविषयत्वाविशे-षात्। नच कर्तु र्विवरणं तात्पर्य्यार्थविवरणं पाकं करोती-त्यशब्दार्थकर्मत्वविवरणवत् इतरेतरद्वन्द्वे समुच्चयांशविवरण वद्वा न तदर्थनिर्णायकमिति वाच्यम् भावनायामपि तुल्यत्वात्। किञ्च पचति देवदत्त इत्यत्राभेदान्वयदर्शनात् तदनुरोधेन कर्तु र्वाच्यत्वमावश्यकम् पक्ता देवदत्तइतिवत्। न चाभेद-बोधे समानविभक्तिकत्वं नियामकम् तच्च तत्र नास्तीति वाच्यम् सोमेन यजेत स्तोकं,पचति,राजपुरुषइत्यादावप्यभेद-बोधानापत्तेः। नच लक्षणया कर्तुरुक्तत्वात् सामानाधिकर-ण्यं" पिङ्गाक्ष्यादियौगिकानामपि द्रव्यवाचित्वानापत्तेः। एवं वैश्वदेवीत्यादितद्धितानामपि। "अनेकमन्यपदार्थे" "सास्य देवते" त्यनुशासनेन पिङ्गे अक्षिणी यस्याः, विश्वे देवा देवता अस्या इति विग्रहदर्शनात्प्रधानषष्ठ्यर्थे एव अनुशासन-लाभात्। तथा च "अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणातीति" वाक्ये द्रव्यानुक्तेरारुण्यस्य स्ववाक्योपात्तद्रव्य एवान्वयप्रतिपादकारुण्याधिकरणोच्छेदापत्तिः। द्रव्यवाचक-त्वसाधकमूलयुक्तेः सामानाधिकरण्यस्योक्तरीत्योपपत्तेरिति

प्रपञ्चितं विस्तरेण वृहद्वैयाकरणभूषणे । (तिङः) इति बोधकतारूपा शक्तिस्तिङ्क्ष्वेवेत्यभिप्रेत्येदम् । पदार्थं निरूप्य वाक्यार्थं निरूपयति (फले) इत्यादि। विक्लित्त्यादि फलं प्रति (तिङर्थाः) कर्तृकर्म्मसंख्याकालाः । तत्र कर्तृकर्म्मणी फूलव्यापारयोर्व्विशेषणे, संख्या कर्तृप्रत्यये कर्त्तरि, कर्म्मप्रत्यये कर्म्मणि, समानप्रत्ययोपात्तत्वात् । तथाचाख्यातार्थसंख्याप्रकारकवोधं प्रत्याख्यातजन्यकर्तृकर्म्मोपस्थितिर्हेतुरिति कार्य्यकारणभावः फलितः । नैयायिकादीनामाख्यातार्थसंख्यायाः प्रथमान्तार्थं एवान्वयादाख्यातार्थसंख्याप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति कार्य्यकारणभावोवाच्यः सोपि चन्द्रइव मुखं दृश्यते, देवदत्तोभुक्त्वा व्रजतीत्यादौ चन्द्रत्वार्थयोः आख्यातार्थानन्वयादितराविशेषणत्वघटित इत्यतिगौरवम् । इदमपि कर्तृकर्म्मणोराख्यातार्थत्वे मानमिति स्पष्टं भूषणे । कालस्तु व्यापारे विशेषणम् । तथा हि "वर्त्तमाने लट्" इत्यत्राधिकाराद्धातोरिति लभ्यम् तच्च धात्वर्थं वदत्प्राधान्याद्व्यापारमेव ग्राहयतीति तत्रैव तदन्वयः । नच संख्यावत्कर्तृकर्म्मणोरेवान्वयः शङ्क्यः, अतीतभावनाके कर्त्तरि पचतीत्यापत्तेः अपाक्षीदित्यनापत्तेश्च पाकानारम्भदशायां कर्तृसत्त्वे पक्ष्यतीत्यनापत्तेश्च । नापि फले तदन्वयः फलानुत्पत्तिदशायां व्यापारसत्त्वे पचतीत्यनापत्तेः पक्ष्यतीत्यापत्तेश्चेत्यवधेयम् । न चामवातजड़ीकृतकलेवरस्योत्थानानुकूलयत्नसत्त्वादुत्तिष्ठतीति प्रयोगापत्तिः, परयत्नस्याज्ञानादप्रयो-

गात् । किञ्चिच्चेष्टादिनावगतौ चायमुत्तिष्ठति शक्त्यभावात् फलन्तु न जायतइति लोकप्रतीतेरिष्टत्वात् । एवञ्च तिङर्थो विशेषणमेव भावनैव प्रधानम् । यद्यपि प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमन्यत्र दृष्टं,तथापि"भावप्रधानमाख्यातं सत्वप्रधानानि नामानीति" निरुक्ताद्युक्तवादिसूत्रादिस्थक्रिया प्राधान्यबोधकभाष्याच्च धात्वर्थभावनाप्राधान्यमध्यवसीयते । अपि च आख्यातार्थप्राधान्ये तस्य देवदत्तादिभिः सममभेदान्वयात्प्रथमान्तस्य प्राधान्यापत्तिः । तथा च पश्य मृगोधावतीत्यत्र भाष्यसिद्धैकवाक्यता न स्यात् प्रथमान्तमृगस्य धावनक्रियाविशेष्यस्य दृशिक्रियायां कर्म्मत्वापत्तौ द्वितीयापत्तेः । न चैवम् प्रथमासामानाधिकरण्यात् शत्रु प्रसङ्गः। एवमपि द्वितीयायादुर्व्वारत्वेन पश्य मृगइत्यादिवाक्यस्यैवासम्भवापत्तेः । नच पश्येत्यत्र तमिति कर्म्माध्याहार्य्यम् वाक्यभेदप्रसङ्गात् उत्कटधावनक्रियाविशेषस्यैव दर्शनकर्म्मतयान्वयस्य प्रतिपिपादयिषितत्वात्· अध्याहारे अनन्वयापत्तेश्च । एवञ्च भावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारणमिति नैयायिकोक्तं नादरणीयम् किन्तु आख्यातार्थकर्तृप्रकारकबोधे धातुजन्योपस्थितिर्भावनात्वावच्छिन्नविषयतया कारणमिति कार्य्यकारणभावोद्रष्टव्यः । भावनाप्रकारकबोधं प्रति तु कृज्जन्योपस्थितिवत् धात्वर्थभावनोपस्थितिरपि हेतुः। पश्य मृगोधावति, पचति भवतीत्याद्यनुरोधादिति दिक् । इत्थञ्च पचतीत्यत्रैकाश्रयिका

पाकानुकूला भावना, पचते इत्यत्रैकाश्रयिका या विक्लित्ति-स्तदनुकूला भावनेति बोधः । देवदत्तादिपदप्रयोगे त्वाख्यातार्थकर्त्रादिभिस्तदर्थस्याभेदान्वयः। घटोनश्यतीत्यत्रापि घटाभिन्नाश्रयकोनाशानुकूलोव्यापारइति बोधः । सच व्यापारः प्रतियोगित्वविशिष्टनाशसामग्रीसमवधानम् । अतएव तस्यां सत्यां नश्यति, तदत्यये नष्टः,तद्भाविले नङ्क्ष्यतीति प्रयोगः । देवदत्तोजानातीच्छतीत्यादौ च देवदत्ताभिन्नाश्रयकोज्ञानेच्छाद्यनुकूलोवर्त्तमानो व्यापारइति बोधः स चान्तत आश्रयतैवेति रीत्योह्यम् ॥ २॥

नन्वाख्यातस्य कर्तृकर्म्मशक्तत्वे पचतीत्यत्रोभयबोधापत्तिः कर्तृमात्रबोधवत् कर्ममात्रस्यापि बोधापत्तिरित्यतस्तात्पर्य्यग्राहकमाह ।

लिधौरएगे सप्तमी

फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः ।
व्यापारे शप्श्नमाद्यास्तु द्योतयन्त्याश्रयान्वयम् ॥३॥

तङादयः फले आश्रयान्वयं द्योतयन्ति फलान्वय्याश्रयस्य कर्म्मत्वात्तद्योतकाः कर्म्मद्योतकाः व्यापारान्वय्याश्रयस्य कर्तृत्वात्तद्द्योतकाः कर्तृद्योतकाइति समुदायार्थः । (द्योतयन्ति) तात्पर्य्यं ग्राहयन्ति ॥ ३॥

नन्वेवं "क्रमादमुं नारदइत्यबोधि स" इत्यादौ पच्यते ओदनः स्वयमेवेत्यादौ च व्यभिचारः । कर्म्मणः कर्तृत्वविवक्षायां कर्त्तरि लकारे सति"कर्म्मवत् कर्म्मणा तुल्यक्रिय"इत्यतिदेशेन यगात्मनेपदचिण्चिण्वदिटामतिदेशाद्यगादिसत्त्वेऽपि

कर्त्तुरेव बोधाद्व्यापारे एवाश्रयान्वयाच्च । अबोधीत्यत्रापि बुध्यतेः कर्त्तरि लुङ् तस्य "दीपजने"ति चिण् "चिणोलुगिति" तस्य लुक् इति साधनादित्याशङ्कायामाह ।

उत्सर्गोऽयं कर्म्मकर्तृविषयादौ विपर्य्ययात् ।
तस्माद्यथोचितं ज्ञेयं द्योतकत्वं यथागमम् ॥ ४ ॥

(कर्म्मकर्तृविषयादौ) पच्यते ओदनः स्वयमेवेत्यादौ अत्र ह्योदनाभिन्नाश्रयकः पाकानुकूलोव्यापारइति बोधः । क्रमादित्यादिपदग्राह्यम् अत्र सामान्यविशेषज्ञान-पूर्वकएकतारदविषयकज्ञानानुकूलः क्षणाभिन्नाश्रयकोऽतीतोव्यापारइति बोधः । (यथोचितमिति) सकर्म्मकधातुसमभिव्याहृतभावसाधारणविधिविधेयचिण्यगादिकर्म्म द्योतकमिति भावः ॥ ४ ॥

एवं तिङाद्यन्ते भावनाया अवाच्यत्वं वदतः प्राभाकरादीन् प्रति सूचीकटाहन्यायेन सोपपत्तिकं वाक्यार्थमुपवर्ण्य (फलव्यापारयोरिति) प्रतिज्ञातं धातोर्व्यापारवाचित्वं व्यवस्थापयति ।

व्यापारोभावना सैवोत्पादना सैव च क्रिया ।
कृञोऽकर्म्मकतापत्तेर्न हि यत्नोऽर्थ इष्यते ॥ ५ ॥

पचति पाकमुत्पादयति पाकानुकूला भावना तादृश्युत्पादनेत्यादिविवरणाद्द्रियमाणस्यापि तद्वाचकतेति भावः । व्यापारपदं फूत्कारादीनामयत्नानामपि फूत्कारत्वादिरूपेण वाच्यतां ध्वनयितुमुक्तम् अतएव पचतीत्यत्राधःस-

न्तापनत्व फूत्कारत्वचुल्लुपरिधारणत्वयत्नत्वादिभिर्बोधः सर्व्वं सिद्धः। नचैवमेषां शक्यतावच्छेदकत्वे गौरवापत्त्या कृतित्वमेव तदवच्छेदकं वाच्यम् रथो गच्छति जानातीत्यादौ च व्यापारत्वादिप्रकारकबोधो लक्षणयेति नैयायिकरीतिः साध्वी, शक्यतावच्छेदकत्वस्यापि लक्ष्यतावच्छेदकत्ववद्गुरुणि सम्भवात् तयोर्वैषम्ये बीजाभावात्। नच पचति पाकं करोतीति यत्नार्थकरोतिना विवरणाद्यत्नएवाख्यातार्थं इति वाच्यम्। रथोगमनं करोति बीजादिना अङ्कुरः कृत इति दर्शनात् करोेर्यत्नार्थकताया असिद्धेः। किञ्च भावनाया अवाच्यत्वे घटं भावयतीत्यत्रेव घटोभवतीत्यत्रापि द्वितीया स्यात् नचात्र घटस्य कर्त्तृत्वेन तत्संज्ञया कर्म्मसंज्ञायाबाधान्न द्वितीयेति वाच्यम् अनुगतकर्त्तृत्वस्य त्वन्मते दुर्व्वचत्वेन घटस्याकर्त्तृत्वात्। कृत्याश्रयत्वस्य कारकचक्रप्रयोक्तृत्वस्य वा घटादावभावात्। धात्वर्थानुकूलव्यापाराश्रयत्वस्य च कारकमात्रातिव्यापकत्वात्। अपि च भावनाया अवाच्यत्वे धातूनां सकर्म्मकत्वाकर्म्मकत्वविभाग उच्छिन्नः स्यात्। स्वार्थफलव्यधिकरणव्यापारवाचित्वं स्वार्थव्यापारव्यधिकरणफलवाचकत्वं वा सकर्म्मकत्वं भावनायावाच्यत्वमन्तरेणासम्भवि। अन्यतमत्वं तत्त्वमिति चेन्न एकस्यैवार्थभेदेनाकर्म्मकत्वसकर्म्मकत्वदर्शनात् तदेतदभिसन्धायाह (कृञ)इति। अयं भावः व्यापारावाच्यत्वपक्षे फलमात्रमर्थइति फलितम्। तथा च करोतीत्यादौ यत्नप्रतीतेस्तन्मात्रं वाच्यमभ्युपेयम्। तथा च

यतो प्रयत्नइतिवत् फलस्थानीय यत्नवाचकत्वाविशेषादकर्म्म-कतापत्तिः उक्तरीत्या दुर्व्वारेति । तथा च(नहि यत्नः)इत्यत्र फलस्थानीऽयत्वेनेति शेषः । (कृञः) इति धातुमात्रोपलक्षणं सर्व्वेषामप्यकर्म्मकता सकर्म्मकता वा स्यादिति भावः । अथ वा (व्यापारोभावना)इत्यर्द्धेन व्यापारस्य वाच्यत्वं प्रसाध्य फलांश-स्यापि तत्साधयन् नैयायिकाभ्युपगतं जानातिकृञादेः केव लज्ञानयत्नादि क्रियामात्रवाचित्वं दूषयति (कृञः)इति । अयं भावः फलांशस्यावाच्यत्वे व्यापारएव धात्वर्थः स्यात् । तथा च स्वार्थफलव्यधिकरणव्यापारवाचित्वादिरूपसकर्म्मकत्वो-च्छेदापत्तिः । नच कृञादौ सकर्मकत्वव्यवहारोभाक्तइति नैयायिकोक्तं युक्तम् । व्यवहारस्य भाक्तत्वेऽपि कर्म्मणि लका-रासम्भवात् । न हि तीरे गङ्गापदस्य भाक्तत्वेऽपि तेन स्नानादिकार्य्यं कर्त्तुं शक्यम् । एवञ्च (नहि यत्न) इत्यत्र यत्नमात्रमित्यर्थः ॥ ५ ॥

अतएवाह ।

किन्तूत्पादनमेवातः कर्म्मवत्स्यात् यगाद्यपि ।
कर्म्मकर्त्तर्य्यन्यथा तु न भवेत् तद्दृशेरिव ॥ ६ ॥

(उत्पादनम्) उत्पत्तिरूपफलसहितं यत्नादि कृञर्थंइत्यर्थः । फलस्य वाच्यत्वे युक्त्यन्तरमाह(अतःइत्यादि । यतः कृञोयत्न-मात्रमर्थोनेष्यते (अतः कर्म्मवत्स्यादिति)पदेन कर्म्मवत्कर्म्मणा तुल्यक्रियइति सूत्रं लक्ष्यते । अयमर्थः यतएवास्योत्पादनार्थ-कता अतः पच्यते ओदनः स्वयमेवेतिवत् क्रियते घटः

स्वयमेवेति यगादयोऽप्युपपद्यन्ते। अन्यथा यत्नस्य कर्म्मनिष्ठत्वाभावात्तन्न स्यात् दृश्विवत्। यथा दृश्यते घटः स्वयमेवेति न दर्शनस्य घटावृत्तित्वात्तथा यत्नस्यापीति, तथा प्रयोगानापत्तेरिति॥ ६॥

नन्वेवं कृञादेरिव जानातीत्यादेरपि विषयावच्छिन्नावरणभङ्गादिफलवाचित्वमावश्यकम् अन्यथा सकर्म्मकतानापत्तेः तथा च ज्ञायते घटः स्वयमेवेति किन्न स्यात्। एवं ग्रामोगम्यते स्वयमेवेत्याद्यपीत्याशङ्कां मनसिकृत्याह।

निर्व्वर्त्त्ये च विकार्य्ये च कर्म्मवद्भावइष्यते।
न तु प्राप्ये कर्म्मणीति सिद्धान्तो हि व्यवस्थितः॥७॥

ईप्सितं कर्म्म त्रिविधं निर्वर्त्त्यं विकार्य्यं प्राप्यञ्च। तत्राद्ययोः कर्म्मवद्भावो, नान्त्ये, प्राप्यत्वञ्च क्रियाकृतविशेषानुपलभ्यमानत्वमिति सुबर्थनिर्णये वक्ष्यते। नह्ययं घटः केनचिद्दृष्टो ग्रामोऽयं केनचिद्गतइति शक्यं कर्म्मदर्शनेनावगन्तुम्। घटं करोतीति निर्व्वर्त्त्यं, सोमं सुनोतीति विकार्य्यं च, तज्ज्ञातुं शक्यमिति न तत्प्राप्यम्। तथा च घटादेर्दृश्यादौ प्राप्यकर्म्मत्वान्नोक्तातिप्रसङ्गइति भावः। धातूनां फलावाचकत्वेत्यजिगम्योः पर्य्यायतापत्तिः क्रियावाचकत्वाविशेषात् फलस्योपलक्षणत्वेऽप्येकक्रियायाएव पूर्व्वदेशविभागोत्तरदेशसंयोगजनकत्वादुक्तदोषतादवस्थ्यमित्यपि वदन्ति। तस्मादावश्यकं सकर्म्मकाणां फलवाचकत्वम् अकर्म्मकाणान्तु तन्निर्व्विवादमेव भू सत्तायामित्याद्यनुशासनाच्च।

फलव्यापारौ भवाच्यः

अतएव "द्व्यर्थः पचिरिति" भाष्यं सङ्गच्छतइति दिक् ॥७॥

एवं सिध्यतु फलव्यापारयोर्वाच्यत्वम् किन्तु आख्यातवाच्यैव सा भावनान धातोः, प्राधान्येन प्रतीयमानव्यापारस्य धात्वर्थतायाः "प्रकृतिप्रत्ययोः प्रत्ययार्थप्राधान्यमिति,, न्यायविरुद्धत्वात् "तदागमे हि दृश्यतइति" न्यायविरुद्धत्वाच्च । एवञ्च स्वयुक्ताख्यातार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वम्, आख्यातार्थव्यापाराश्रयत्वञ्च कर्तृत्वं वाच्यमित्यादि वदन्तं मीमांसकम्मन्यं प्रत्याह ।

तस्मात्करोतिर्धातोः स्याद्व्याख्यानं न त्वसौ तिङर्थः ।
पक्ववान् कृतवान्पाकं किं कृतं पक्वमित्यपि ॥ ८ ॥

(तस्मात्) अभिप्रायस्यहेतोः सचेत्थम् । फलमात्रस्य धात्वर्थत्वे ग्रामोगमनवानिति प्रतीत्यापत्तिः संयोगाश्रयत्वात् । फलानुत्पाददशायां व्यापारसत्त्वे पाकोभवतीत्यनापत्तिः, व्यापारविगमे फलसत्त्वे पाकोविद्यतइत्यापत्तिश्च । यत्तु भावप्रत्ययस्य घञादेरनुकूलव्यापारवाचकत्वान्नानुपपत्तिरिति तन्न कर्त्राख्यातवत् "कर्त्तरि कृदि" त्यतएव तद्विधानलाभे भावे विधायकानुशासनवैयर्थ्यापत्ते स्तद्विरोधापत्तेश्च । अथ व्यापारोऽपि धात्वर्थइत्यभ्युपेयमिति चेत्तर्हि धातुतएव सकलव्यापारलाभसम्भवेनाख्यातस्य पृथक्शक्तिकल्पने गौरवमिति । पचतीत्यस्य पाकं करोतीति विवरणात्मा (करोतिःधातोः) एव (व्याख्यानं) विवरणम् अतस्तदपि नाख्यातार्थत्वसाधकमिति भावः मीमांसकोक्तं बाधकमुद्धरन्

स्तुपाष्टिकाऽतिनैकामिति

तन्मतं दूषयति नत्वित्यादिना। नासौ तिङां व्याख्यानम् पक्ववानित्यादावनन्वयापत्तेः। अयं भावः। "प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थप्राधान्यम्"इत्यस्य हि विशेष्यतया प्रकृत्यर्थं प्रकारकबोधं प्रति तदुत्तरप्रत्ययजन्योपस्थितिर्हेतु-रिति कार्य्यकारणभावः फलितः। तथा च पक्ववानित्यत्र पाकः कर्म्मकारकं, क्तवतुप्रत्ययार्थः कर्तृकारकम्। तयोश्चारु-णाधिकरणरीत्या वक्ष्यमाणास्मद्रीत्या चान्वयासम्भवइति प्रकृतिप्रत्ययार्थयोरन्वयनियमस्यैवाभावे क्व? प्राधान्यबोधक उक्तकार्य्यकारणभावः। नच

धात्वर्थयागात्त्यातार्थभावनयोः

सम्बन्धमात्रमुक्तञ्च श्रुत्या धात्वर्थभावयोः।

संबंधविशेष

तदेकांशनिवेशे तु व्यापारोऽस्या न विद्यतेइति॥

भट्टपादोक्तरीत्या सम्बन्धसामान्येन कारकाणामन्वयः शङ्क्यः, योग्यताविरहात् अन्वयप्रयोजकरूपवत्त्वस्य तत्त्वात्। क्रियान्वयित्वमेव हि कारकान्वयितावच्छेदकमिति वक्ष्यते। तदेतदाविष्कर्त्तुं विवरणेन धात्वर्थक्तवत्वर्थयोः कर्म्मत्व-कर्तृत्वे दर्शयति कृतवान् पाकमिति। वस्तुतः प्रत्ययार्थः प्रधानमित्यस्य यः प्रधानं स प्रत्ययार्थ एवेति वा, यः प्रत्य-यार्थः स प्रधानमेवेति वा नार्थः अजा अश्वा छागीत्यत्र स्त्रीप्रत्ययार्थे स्त्रीत्वस्यैव प्राधान्यापत्तेः छाग्यादेरनापत्तेश्च। किन्तूत्सर्गोऽयम् विशेष्यत्वादिना बोधस्तु तथाव्युत्पत्त्यनुरो-धात्। अतएव नैयायिकानां प्रथमान्तविशेष्यकएव बोधः।

न गाढौ नौ लक्षणे प्रतीतिः

लक्षणायामालङ्कारिकाणां शक्यतावच्छेदकप्रकारकएव बोधो

विशेष्याजादिपदार्थसमस्यार्थलाभात्ते न्यभिचारस्स्फुट

त्वात् ... ... व्यभिचारदर्शमति ग्रजाति पू

न नैयायिकादीनाम्। घटः कर्म्मत्वमित्यादौ विपर्य्ययेणापि व्युत्पन्नानां नैयायिकनव्यादीनां बोधो न तद्व्युत्पत्तिरहितानाम् अन्येषां तन्निराकाङ्क्षमेवेत्यादिकं सङ्गच्छते। अतएव "प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्" इत्याह भगवान् पाणिनिः। प्रधानं प्रत्ययार्थं इति वचनं नेत्यनुवर्त्त्यं न कार्य्यम् अर्थस्य अर्थावबोधस्यान्यप्रमाणत्वात् व्युत्पत्त्यनुसारित्वादिति हि तदर्थः। एवं सत्यपि नियामकापेक्षणे "भाव प्रधानमाख्यात" मिति वचनमेव स्मर्य्यतामिति सुधीभिरूह्यम्। "तदागमे हीति" न्यायोविवरणञ्चातिव्याप्तमित्याह (किं कृतं पक्वमिति)। कृत्वा विवरणं प्रतीतिश्च पक्वमित्यत्रापीति, तत्रापि भावना वाच्या स्यादिति भावः। नन्वस्तु तिङ्इव कृतामपि भावना वाच्येत्यत आह अपीति। तथाचोभयसाधारण्येन तत्प्रतीतेरुभयसाधारणो धातुरेव वाचकइति भावः। भवद्रीत्या प्रत्ययार्थत्वात्प्राधान्यापत्तिश्चेति द्रष्टव्यम् ॥ ८ ॥

व्यापारस्य धात्वर्थत्वे साधकान्तरमाह।

किं कार्य्यं पचनीयं चेत्यादि दृष्टं हि कृत्स्वपि।
किञ्च क्रियावाचकतां विना धातुत्वमेव न ॥ ९ ॥

कार्य्यमित्यत्र "ऋहलोर्ण्यदिति" कर्म्मणि ण्यत् पचनीयमित्यादौ चानीयर् आदिना ज्योतिष्टोमयाजी इत्यादौ करणे उपपदे कर्त्तरि णिनिः। एते च क्रियायोगमन्तरेणासन्तस्तद्वाच्यतां बोधयन्ति विना क्रियां कारकत्वासम्भवेन तद्वाचकप्रत्ययस्याप्यसम्भवात्। नच गम्यमानक्रियामादाय

कारकयोगइति भाट्टरीतिर्युक्ता आख्यातेऽपि तथापत्तौ तत्रापि भावनाया वाच्यत्वासिद्ध्यापत्तेः। अथ लिङ्गसंख्यान्वयानुरोधात् कर्त्तुर्वाच्यत्वमावश्यकमिति तेनाक्षेपाद्भावनान्वयः स्यादिति मतम् तर्हि संख्यान्वयोपपत्तये आख्यातेऽपि कर्त्ता वाच्यः स्यात्। पक्ववानित्यादौ कालकारकान्वयानुरोधाद्भावनाया अपि वाच्यत्वस्यावश्यकत्वाच्चेति भावः। अपिना हेत्वन्तरसमुच्चयः तथाहि नखैर्भिन्नोनखभिन्नः हरिणा त्रातोहरित्रात इत्यादौ "कर्त्तृकरणे कृता बहुलमिति" समासो न स्यात् पुरुषोराज्ञो भार्य्या देवदत्तस्य इतिवदसामर्थ्यात्। नचाध्याहृतक्रियाद्वारा सामर्थ्यं वाच्यं दध्योदनः गुड़धाना इत्यादिवत्, अन्यथा तत्रापि" अन्नेन व्यञ्जनं भक्षेण मिश्रीकरणमिति समासो न स्यादिति वाच्यम्। तत्र विध्यानर्थक्यादगत्या तथास्वीकारेऽपि हरित्रातमित्यादौ साक्षाद्धात्वर्थान्वयेनोपपद्यमानस्य कर्तृकरणइत्यस्याक्षेपेण परम्परासम्बन्धे प्रवृत्त्ययोगात्। न चैकस्यां क्रियायामन्वयित्वमेव सामर्थ्यमिति भ्रमम्, असूर्य्यम्पश्येत्यादेरसमर्थसमासत्वानापत्तेः। इष्टापत्तौ कृतः सर्व्वोमृत्तिकयेत्यत्र कृतसर्व्वमृत्तिकइत्यापत्तेः। न चात्र समासविधायकाभावः, (सह सुपा) इत्यस्य सत्त्वात् अन्यथा असमर्थसमासोऽपि विधायकाभावान्न स्यादिति। किञ्च भावनायास्तिङर्थत्वे भावयति घटमितिवत् भवति घटमित्यपि स्यात् धात्वर्थफलाश्रयत्वरूपकर्म्मत्वसत्त्वात् नचाख्यातार्थव्यापाराश्रयत्वेन कर्त्तृत्वात्

तत्संज्ञया कर्म्मसंज्ञायाबाधान्न द्वितीयेति वाच्यम् आख्यातार्थव्यापाराश्रयत्वस्य कर्तृत्वे पाचयति देवदत्तोविष्णुमित्रेणेत्यत्र विष्णुमित्रस्याकर्तृतापत्तौ तृतीयानापत्तेः ग्रामं गमयति देवदत्तोविष्णुमित्रमित्यत्र विष्णुमित्रस्याकर्तृतापत्तेः ग्रामस्य गमिकर्म्मतानापत्तेश्च। तथा च ग्रामाय गमयति देवदत्तोविष्णुमित्रमित्यपि न स्यात्। "गत्यर्थकर्म्मणि द्वितीया चतुर्थ्यौ चेष्टायामनध्वनीति" गत्यर्थकर्म्मण्येव चतुर्थीविधानात्। एतेन णिजन्ते आख्यातार्थं उभयम् तदाश्रयत्वाद्देवदत्तयज्ञदत्तयोः कर्त्तृतेत्यपास्तम्। किञ्च तस्मिन् प्रयोगे आख्यातत्वस्यावश्यकत्वेनाख्यातशून्ये देवदत्तः पक्तेत्यादौ देवदत्तस्याकर्तृतापत्तेरिति दिक्। सूत्रानुपपत्तिमपि मानत्वेन प्रदर्शयन्नुक्तार्थस्य स्वोत्प्रेक्षितत्वं निरस्यति (किञ्चेति) धातुसंज्ञाविधायकम् (भूवादयोधातव) इति सूत्रम्। तत्र भूश्च वाश्चेति द्वन्द्वः। आदिशब्दयोर्व्यवस्थाप्रकारवाचिनोरेकशेषः। ततो भूवौ आदी येषां ते भूवादयः। तथा च भूप्रभृतयो वासदृशा धातवइत्यर्थः। तच्च क्रियावाचकत्वेन, तथा च क्रियावाचकत्वे सति भ्वादिगणपठितत्वं धातुत्वं पर्य्यवसन्नम्। अत्र क्रियावाचित्वमात्रोक्तौ वर्ज्जनादिरूपक्रियावाचके हिरुग्नानेत्यादावतिव्याप्तिरिति भ्वादिगणपठितत्वमुक्तम्॥ ९॥

तावन्मात्रोक्तौ चाह।

सर्व्वनामाव्ययादीनां यावादीनां प्रसङ्गतः।
न हि तत्पाठमात्रेण युक्तमित्याकरे स्फुटम्॥१०॥

गणपठितत्वमात्रोक्तौ सर्व्वनामाव्ययानामपि धातुत्वं स्यात्। तथा च याः पश्यतीत्यादौ, "आतोधातोः" इत्याकार-लोपापत्तिः। ननु लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रह-णान्न सर्व्वनाम्नां ग्रहणं तस्य लाक्षणिकत्वात् इत्यत आह वेत्यादि। अव्यये वा इत्यादावतिप्रसङ्गः। तादृशस्यैव गणेऽपि पाठेन निर्णयासंभवात्। तथा च विकल्पार्थकोवा-तीति प्रयोगः स्यादिति भावः। नच गतिगन्धनार्थनिर्द्दे-शोनियामकः, तस्यार्थानादेशनादिति भाष्यपर्य्यालोचनया आधुनिकत्वलाभात्॥ १०॥

नन्वस्तु क्रियावाचकत्वे सति गणपठितत्वं धातुत्वं क्रिया च धात्वर्थएव न व्यापार इत्याशङ्कां समाधत्ते।

धात्वर्थत्वं क्रियात्वञ्चेद्धातुत्वञ्च क्रियार्थता।
अन्योन्यसंश्रयः स्पष्टस्तस्मादस्तु यथाक्रमम्॥११॥

यदि क्रियात्वं धात्वर्थत्वमेव तर्हि धातुत्वग्रहे तदर्थत्वरू-पक्रियात्वग्रहः क्रियात्वग्रहे च तदवच्छिन्नवाचकत्वघटित-धातुत्वग्रह इत्यन्योन्याश्रयइति ग्रहपदं पूरयित्वा व्याख्येयम्। यथाश्रुतं चान्यान्योऽश्रयस्योत्पत्तौ ग्रहे वाऽप्रतिबन्धकत्वाभ्यु-पगमेनासङ्गत्यापत्तेः। न चान्यतमत्वं धातुत्वं सूत्रादयन्न-त्यस्य वैयर्थ्यापत्तेरित्यभिप्रेत्याह (अस्त्विति) व्यापारसन्तानः क्रिया तद्वाचकत्वे सति गणपठितत्वमित्यर्थः। ननु सत्ता-दीन् फलांशानन्यतमत्वेनादाय तद्वाचकत्वे सति गणपठितत्व लक्षणमुच्यताम्। धात्वर्थत्वात्तेषां क्रियाशब्देन व्यवहारोभा-

ष्यादौ कृतोऽप्युपपत्स्यतइति चेन्न अन्यतममध्ये विकल्पस्यापि विकल्पयतीति प्रयोगानुसारात् प्रवेशावश्यकत्वेन. तदर्थके वेत्यव्यये उक्तरीत्या गणपठितत्वसत्त्वेनातिव्याप्तेरिति ॥११॥

नन्वस्यैव धातुत्वे अस्तीत्यादौ क्रियाप्रतीत्यभावादस्त्यादीनां तद्वाचकानामधातुत्वप्रसङ्गइत्यत आह ।

अस्त्यादावपि धर्म्यंशे भाव्येऽस्त्येव हि भावना ।
अन्यत्राशेषभावात्तु सा तथा न प्रकाशते ॥ १२ ॥

(अस्त्यादौ) अस् भुवीत्यादौ (धर्म्यंशे) धर्म्मिभागे (भाव्ये) भाव्यत्वेन विवक्षिते । (अस्त्येव)प्रतीयतएव । अयमर्थः स ततोगतो न वेति प्रश्ने महता यत्नेनास्तीति प्रयोगे सत्तारूपफलानुकूला भावना प्रतीयतएव उत्पत्त्यादिबोधने तु सुतरां "रोहितोलोहितादासीद्बुन्धुस्तस्य सुतोऽभवदित्यादि" ।

दर्शनात् । किञ्च अत्र भावनाविरहे लड़ादिव्यवस्था न स्यात् तस्याएव वर्त्तमानत्वादिविवक्षायां लड्विधानात् ।

" क्रियाभेदाय कालस्तु संख्या सर्व्वस्य भेदिकेति"

वाक्यपदीयादिति। नन्वेवमस्तीत्यत्र स्पष्टं कुतोन बुद्ध्यतइत्यतआह(अन्यत्रेति) (अशेषभावात्) भावनायाः फलसमानाधिकरणत्वात् । तथा च भावनायाः फलसामानाधिकरण्यं तदस्पष्टत्वे दोषइति भावः। नन्वेवं किं करोतीति प्रश्ने पचतीत्युत्तरस्येवास्तीत्युत्तरमपि स्यादिति चेत् इष्टापत्तेः। आसन्नविनाशं कञ्चिदुद्दिश्य किं करोतीति प्रश्ने अस्तीत्युत्तरस्य सर्व्वसम्मतत्वात् । इतरत्र तु सुस्थतया निश्चिते किं करोतीति

तीति प्रश्नः पाकादिविशेषगोचरएवेत्यवधारणादस्तीति नोत्तरमिति ॥ १२ ॥

ननु भावनायाः फलनियतत्वात् फलाश्रयस्य कर्मत्वात्सर्व्वेषां क्रियावाचकत्वे सकर्म्मकतापत्तिरित्यत आह ।

फलव्यापारयोरेकनिष्ठतायामकर्म्मकः ।
धातुस्तयोर्धर्म्मिभेदे सकर्म्मकउदाहृतः ॥ १३ ॥

(एकनिष्ठतायाम्) एकमात्रनिष्ठतायाम् भिन्नाधिकरणावृत्तितायामिति यावत् तेन गम्यादौ फलस्य कर्तृनिष्ठत्वेऽपि नातिव्याप्तिः।(अकर्म्मकः)यथा भ्वादिः (तयोः)(फलव्यापारयोः) आश्रयभेदे (सकर्म्मकः) इत्यर्थः । उक्तञ्च वाक्यपदीये ।

आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते ।
अन्तर्भावाच्च तेनासौ कर्म्मणा न सकर्म्मकइति ।

(बिभ्रदिति) स्वधारणानुकूलोव्यापारोऽत्रापि गम्यतइति भावः । (तेन कर्म्मणा) सकर्म्मकत्वन्तु (न अन्तर्भावात्) फलांशेन सामानाधिकरण्यसत्त्वादित्यर्थः (आत्मानमिति) जानाति इच्छतीत्यादौ च द्वावात्मानौ शरीरात्मा अन्तरात्मा च । तत्रान्तरात्मा तत्कर्म्म करोति येन शरीरात्मा सुखदुःखे अनुभवतीति "कर्म्मवत्कर्म्मणे"ति सूत्रीयभाष्योक्तरीत्या भिन्नाधिकरणनिष्ठतामादाय सकर्म्मकत्वमवधेयम् ॥ १३ ॥

नन्वसत्वभूतक्रियाया धात्वर्थत्वे पाकइत्यत्रापि तत्प्रत्ययापत्तिः । न चेष्टापत्तिः कृदभिहितोभावो द्रव्यवत् प्रकाशतइति भाष्यविरोधादित्यत आह ।

आख्यातशब्दे भागाभ्यां साध्यसाधनरूपता।
प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः॥ १४॥

(आख्यातशब्दे) पश्य मृगो धावतीत्यादौ। (भागाभ्याम्) तिङन्ताभ्याम् प्रकृतिप्रत्ययभागाभ्यामिति विवरणकारोक्त-मपव्याख्यानम् पचतीत्यत्रापि भागद्वयसत्त्वात् (साध्यसाधनरूपता) यथाक्रमं बोध्या। साध्यत्वं क्रियान्तराकाङ्क्षानु-त्थापकरूपवत्त्वम्। साधनत्वं कारकत्वेनान्वयित्वम्। (स घञादिष्वपीति) प्रकृत्या, साध्यावस्था। प्रत्ययेन साधना-वस्था। इयान्विशेषः। घञाद्युपस्थाप्या लिङ्गसंख्यान्वयिनी कारकत्वान्वयिनी च आख्यातान्तोपात्ता तु नैवम्। तथापि कारकत्वेनान्वयित्वमात्रेण दृष्टान्तदार्ष्टान्तिकतेत्यवधेयम्। नच घञन्ते धातुना तथाभिधाने मानाभावः, ओदनस्य पाकइति कर्म्मषष्ठ्या मानत्वात्। नचाध्याहृततिङन्तक्रि-यान्वयात् षष्ठी "कर्तृकर्म्मणोः कृतीति" कृदन्तेन योगएव तद्विधानात् "न लोकाव्ययनिष्ठाखलर्थ तृनामिति" लादे-शयोगे षष्ठीनिषेधाच्च। एवं रीत्या काष्ठैः पाकइत्यादावपी-ष्टमेव, एवं फलांशोऽपि धातुना असत्वावस्थापन्नएवोच्यते। अतएव स्तोकं पचतीतिवत् स्तोकं पाकइत्युपपद्यतेइति॥१४

एतदेव स्पष्टयति।

साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।
सिद्धभावस्तु, यस्तस्याः स घञादिनिबन्धनः॥१५॥

नच घञादिभिः सिद्धत्वेनाभिधाने मानाभावः, पाक-

इत्युक्ते भवति नष्टावित्याकाङ्क्षोत्थापनस्यैव मानत्वात् धातूपस्थाप्यायां तदसम्भवस्योक्तत्वात् स्तोकः पाकः इत्यनापत्तेश्च। तस्माद्धात्वर्थान्वये स्तोकादिशब्देभ्योद्वितीया घञर्थान्वये प्रथमा पुंल्लिङ्गता चेति तत्सिद्धये घञादेः शक्तिरुपेया। एतेन घञादीनां प्रयोगसाधुतामात्रमिति नैयायिकनव्योक्तमपास्तम्। नच घञन्तशक्त्युपस्थाप्यान्वये स्तोकः पाकइति भवतीति वाच्यम्। घञन्तानुपूर्व्याः शक्ततावच्छेदकत्वे गौरवादनुशासनाच्च घञादेरेव तथाशक्तिकल्पनादिति दिक्। एवञ्च घञ्शक्त्यभिप्रायेण कृदभिहितइति भाष्यमतो न तद्विरोधइति भावः॥ १५॥

ननु कारकाणां भावनान्वयनियमेएव पाकइत्यत्रापि कर्म्मषष्ठ्यनुसारेण भावनाया वाच्यत्वं सिध्येत् सएव कुतइत्याशङ्कां समाधत्ते।

सम्बोधनान्तं कृत्वोऽर्थाः कारकं प्रथमोवतिः।
धातुसम्बन्धाधिकारनिष्पन्नमसमस्तनञ्॥ १६॥

सम्बोधनान्तस्य क्रियायामन्वयः। त्वं ब्रूहि देवदत्तेत्यादौ निघातानुरोधात् "समानवाक्ये निघातयुष्मदस्मदादेशा" इत्यनेन समानवाक्यएव तन्नियमात्। उक्तं हि वाक्यपदीये।

सम्बोधनपदं यच्च तत् क्रियाया विशेषणम्।
व्रजानि देवदत्तेति निघातोऽत्र तथासतीति।
पचति भवति देवदत्तेत्यादौ तु सूत्रभाष्यादिरीत्यैक-

वाक्यतासत्त्वात् स्यादेव निपातः । "तिङ्ङतिङ्इति सूत्रेऽपि" तिङन्तानामप्येकवाक्यतास्वीकारात् । एकतिङ् वाक्यमिति वदतां वार्त्तिककाराणां मते परं न । वस्तुतः एकतिङ्विशेष्यकं वाक्यमिति तदभिप्रायस्य हेलाराजीयादौ वैयाकरणभूषणेऽस्माभिश्च प्रतिपादितत्वात्तन्मतेऽपि भवत्येवेत्यवधेयम् । (कृत्वोऽर्थाः) "क्रियाभ्यावृत्तिगणने कृत्वसुच्"इति क्रियायोगे तत्साधुत्वोक्तेः क्रियाया अभ्यावृत्तिः पुनः पुनः जन्म । तस्मिन् द्योत्ये इति तदर्थात् । (कारकम्) कारके इत्यधिकृत्य तेषां व्युत्पादनात् । कारकशब्दोहि क्रियापरः करोति कर्तृकर्म्मादिव्यपदेशानिति व्युत्पत्तेः । तथाचाग्रिमेष्वपादानादिसंज्ञा विधिषु क्रियार्थककारकशब्दानुवृत्त्या क्रियान्वयिनामेव संज्ञेति भाष्ये स्पष्टम् (प्रथमोवतिः) "तेन तुल्यं क्रिया चेद्वतिः" इति विहितः तत्र यत्तुल्यं सा क्रिया चेदित्युक्तत्वात् । (धातुसम्बन्धाधिकारे) "धातुसम्बन्धे प्रत्यया"इत्यधिकृत्य तेषां विधानात् । (असमस्तनञ्) समासायोग्यः प्रसज्यप्रतिषेधीयोनञित्यर्थः । उत्तरपदार्थान्वयेऽपि समासविकल्पेन पक्षे असमस्तत्वात् यथाश्रुतग्रहणायोगात् । न चासमस्तनञः क्रियान्वये मानाभावः न त्वं पचसि न युवां पचथः चैत्रोन पचति घटोन जायते इत्यादौ क्रियायाएवं निषेधप्रतीतेः । अतएव विद्यमानेऽपि घटे तथा प्रयोगः । तथा च घटोनास्तीत्यत्राप्यस्तित्वाभावएवबोध्यते । नहि घटोन जायते

नास्तीत्यनयोर्धात्वर्थभेदमन्तरेणास्ति विशेषः। तथा च भूतले न घटइत्यत्राप्यस्तीत्यध्याहार्य्यम्। प्रकारतासम्बन्धेन नञर्थविशेष्यकबोधे धातुजन्यभावनोपस्थितेर्हेतुत्वस्य क्लृप्तत्वात्। शेषं नञर्थनिर्णये वक्ष्यते॥ १६॥

तथा यस्य च भावेन षष्ठी चेत्युदितं द्वयम्।
साधुत्वमष्टकस्यास्य क्रियवैवावधार्य्यताम्॥ १७॥

"यस्य च भावेन भावलक्षणम्" इत्यत्र भावनार्थकभावशब्देन तद्योगे साधुत्वाख्यानलाभात् "षष्ठी चानादर"इति तदग्रिमसूत्रेऽपि चकाराद्भावेनेत्यप्यन्वेतीत्यर्थः (साधुत्वमिति) तत्स्वरूपन्तु वक्ष्यते (क्रियवैवेति) अयं भावः। भूवादिसूत्रादिषु प्रायः क्रियाशब्देन भावनाव्यपदेशात्तत्र तस्य साङ्केतिकी शक्तिः फलांशे क्वाचित्कः क्रियतइति यौगिकः प्रयोगः। तथा च संज्ञाशब्दस्यानपेक्षप्रवृत्तत्वेन बलवत्त्वाद्भावनान्वयएव साधुता लभ्यते। अतएव संज्ञाशब्दप्रावल्यात् रथन्तरमुत्तराग्रन्थपठितऋक्ष्वेव गेयम् नतु वेदे तदुत्तरपठ्यमानऋक्ष्विति नवमे निर्णीतम्। किञ्च फलांशोऽपि भावनायां विशेषणं कारकाण्यपि क्वचित्तथाभूतानीति। "गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात् स्यादिति" न्यायेन सर्व्वे सेवका राजानमिव भावनायामेव परस्परनिरपेक्षाअन्वियन्ति। न हि भिक्षुकोऽपि भिक्षुकान्तरं याचितुमर्हति सत्यन्यस्मिन्नभिक्षुकइति न्यायेनापि फलं त्यक्त्वा भावनायामेवान्वियन्तीति मीमांसका अपि मन्यन्ते। एवञ्च विशेष्य-

तथा कारकादिप्रकारकबोधं प्रति धातुजन्यभावनोपस्थिति-र्हेतुरिति कार्य्यकारणभावस्य क्लृप्तत्वात् यत्रापि पक्ता पाक-इत्यादौ भावना गुणभूता तत्रापि क्लृप्तकार्य्यकारणभावा-नुरोधात्तस्यामेवान्वयइत्यवसीयते इत्यादि भूषणे प्रपञ्चि-तम् । केचित्तु भूतले घटः देवदत्तोघटमित्यादावन्वयबो-धाकाङ्क्षानिवृत्त्योरदर्शनान्न तद्व्यतिरेकेण साधुत्वलाभइ-त्याहुः ॥१७ ॥

स्वयमुपपत्तिमाह ।

यदि पक्षे पिबत्यर्थः कारकञ्च नञादिषु ।
अन्वेति त्यज्यतां तर्हि चतुर्थ्यास्मृतिकल्पना ॥ १८ ॥

पर्व्वतोवह्निमान् धूमात् महानसवत् भूतले न घटः । भूतले घटइत्यादिपदात् एवमादिष्वनुशासनविरोधेऽपि यदि साधुत्वमन्वयश्चाभ्युपेयते तर्हि चतुर्थ्या स्मृतिकल्पनापि त्यज्य-तामित्यर्थः । अनुशासनानुरोधतौल्ये अर्द्धजरतीवमयुक्त-मिति भावः ॥ १८ ॥

एवं कर्त्त्रादौ विहितानामिन्यादीनां क्रिययैवान्वय-इत्याह ।

अविग्रहा गतादिस्था यथा ग्रामादिकर्म्मभिः ।
क्रिया सम्बध्यते तद्वत्कृतपूर्व्वादिषु स्थिता ॥ १९ ॥

न विविच्यग्रहोग्रहणं यस्याः सा अविग्रहा गुणीभू-तेति यावत् । तथा च ग्रामं गतइत्यत्र यथा क्तप्रत्ययार्थ-गुणीभूतापि क्रिया ग्रामादिकर्म्मभिः सम्बध्यते तथा

क्तपूर्वी कटमित्यत्रापि गुणभूता इन्यादिभिरित्यर्थः। नच वृत्तिमात्रे समुदायशक्तेर्वक्ष्यमाणत्वात्तत्रान्तर्गता भावना पदार्थैकदेशइति कथं तत्रान्वयइति वाच्यम् नित्यसापेक्षेष्वेकदेशेऽपि "देवदत्तस्य गुरुकुलं" "चैत्रस्य नप्ते"त्यादाविवान्वयाभ्युपगमात्। एवं भोक्तुं पाकः भुक्त्वा पाकइत्यपि द्रष्टव्यम्॥ १९॥

अतिप्रसङ्गमाशङ्क्य समाधत्ते।

क्त्वोऽर्थाः क्त्वातुमुन्न त्स्यु रिति चेत्सन्ति हि क्वचित्।
अतिप्रसङ्गोनोक्त्वाव्योऽभिधानस्य समाश्रयात्॥२०॥

भोक्तुं पाकः भुक्त्वा पाकइत्यादौ "तुमुण्ण्वुलौ क्रियायां क्रियार्थायाम्" "समानकर्तृकयोः पूर्व्वकाल"इति क्रियावाचकोपपदे क्रिययोः पूर्व्वोत्तरकाले विधीयमाना अपि तुमुन्नादयो गुणभुतां तामादाय यथा जायन्ते तथा क्त्वोऽर्थाः अपि स्युः। एकः पाकइत्यत्र"एकस्य सकृच्च"द्वौ पाकौ त्रयश्चत्वारइत्यत्र "द्वित्रिचतुर्भ्यः सुच्"। पञ्चेत्यत्र कृत्वसुच् स्यात्। तथा च सकृत्पाकः द्विः त्रिश्चतुः पाक इत्याद्यापत्तिरिति चेदिष्टापत्तिः द्विवंचनमित्यादिदर्शनात्। अतिप्रसङ्गस्त्वनभिधानान्नेत्याह। अतोति। "नहि वचिरन्तिपरः प्रयुज्यत"इत्याद्यभियुक्तोक्तरीत्या समाधेयमिति भावः। केचित्तु "क्रियाभ्यावृत्तिगणन" इत्यत्र क्रियाग्रहणं व्यर्थं तस्याएवाभ्यावृत्तिसंभवेन सामर्थ्यात्तल्लाभात्। तथा च साध्यमात्रस्वभावक्रियालाभाय तदिति वाच्यम् नच पाकइत्यादौ तादृशीति ना-

तिप्रसङ्गः। द्विर्वचनमिति च द्विःप्रयोगोद्विर्वचनमिति व्युत्पत्त्या "द्विर्वचनेऽचीति" ज्ञापकं वा आश्रित्योपपादनीय-मित्याहुः ॥ २० ॥

ननु सिद्धान्ते बोधकतारूपा शक्तिराख्यातशक्तिग्रहवतां बोधादावश्यकी इति धातोरेव भावना वाच्या नाख्यात-स्येति कथं निर्णय इत्याशङ्कां समाधत्ते।

भेद्यभेदकसम्बन्धोपाधिभेदनिबन्धनम्।
साधुत्वं तदभावेऽपि बोधो नेह निवार्य्यते ॥ २१॥

भेद्यं विशेष्यं भेदकं विशेषणं तयोर्यः सम्बन्धस्तस्य योभेदः तन्निबन्धनं साधुत्वम्। अयमर्थः। व्याकरणस्मृतिः शब्द साधुत्वपरा तत्रैवावच्छेदकतया कल्पधर्म्मस्य शक्तित्वं वदतां मीमांसकानां पुनः शक्तत्वं साधुत्वमित्येकमेवेति तद्रीत्या विचारे साधुत्वनिर्णयएव शक्तिनिर्णयउच्यते। अतिरिक्त-शक्तिवादेऽप्याख्यातानामसाधुता भावनायां स्यादेव तथा च चतुर्थ्यर्थे तृतीयाप्रयोगवद्वात्वर्थभावनायामाख्यातप्र योगे यज्ञे कर्म्मण्यसाधुशब्दप्रयोगात् "नानृतं वदे" दिति निषे-धोल्लङ्घनप्रयुक्तं प्रायश्चित्तं दर्शनान्तरीयव्युत्पत्तिमतां स्या-दिति। ननु त्वन्मते नानृतमिति निषेधः क्रत्वर्थएव न सि-ध्येत् आख्यातेन कर्त्तुरुक्तत्वात् श्रुत्या पुरुषार्थएव स्यात् प्रकरणाद्धि क्रत्वर्थता तच्च श्रुतिविरोधे बाध्यतइति चेन्न तिङर्थस्तु विशेषणमित्यनेन परिहृतत्वात् न हि गुणभूतः कर्त्ता निषेधं स्वाङ्गत्वेन ग्रहीतुमलम्। भावना तु प्रधानं

तं गृहीतुं समर्थेति प्रकरणात् क्रत्वर्थतैव। अस्तु वा क्रतुयुक्तपुरुषधर्म्मः अनुष्ठाने विशेषाभावात् "जञ्जभ्यमानो न ब्रूयान्मयि दक्षक्रतू" इति वाक्योक्तमन्त्रविधिवत् इत्यादि भूषणे प्रपञ्चितम्। नन्वाख्यातस्य भावनायामसाधुत्वे ततस्तद्बोधो न स्यात् साधुत्वज्ञानस्य शब्दबोधहेतुत्वादित्यत आह बोधइति असाधुत्वेऽपि साधुत्वभ्रमाद्बोधोऽस्तु नाम अपभ्रंशवत्। असाधुत्वन्तु स्यादेवेति भावः। वस्तुतः साधुत्वज्ञानं न हेतुस्तद्व्यतिरेकनिर्णयोऽपि न प्रतिबन्धक इत्यसाधुरनुमानेनेत्यत्र वक्ष्यामः॥ २१॥

रङ्गोजिभट्टपुत्रेण कौण्डभट्टेन निर्म्मिते।
पूर्णांभूषणसारेऽस्मिन् धात्वाख्यातार्थनिर्णयः॥

इति वैयाकरणभूषणसारे धात्वर्थाख्यातसामान्यार्थयोर्निरूपणम्।

प्रत्येकं दशलकाराणामर्थं निरूपयति।

वर्त्तमाने परोक्षे श्वोभाविन्यर्थे भविष्यति।
विध्यादौ प्रार्थनादौ च क्रमात् ज्ञेया लडादयः॥२२॥

लड़ादयष्टितः षट् क्रमेणार्थेषु द्रष्टव्याः। तथाहि वर्त्तमानेऽर्थे लट्, "वर्त्तमाने लड़्" इति सूत्रात्। प्रारब्धापरिसमाप्तत्वं भूतभविष्यद्भिन्नत्वं वा वर्त्तमानत्वम्। पचतीत्यादावधिश्रयणाद्यधःश्रयणान्ते मध्ये तदस्तीति भवति लट् प्रयोगः। आत्मास्ति पर्व्वताः सन्तीत्यादौ तत्तत्कालिकीनां

क्रियाणामनित्यत्वात्तद्विशिष्टस्योत्पत्त्यादिकमादाय वर्त्तमानत्वमूह्यम् । उक्तञ्च भाष्ये "इह भूतभविष्यद्वर्त्तमानानां राज्ञां क्रियाः तिष्ठतेरधिकरणमिति" ।

परतोभिद्यते सर्व्वमात्मा तु न विकल्पते ।
पर्व्वतादिस्थितिस्तस्मात्पररूपेण भिद्यतइति ।

वाक्यपदीये च । एवं "तमआसीत्" "तुच्छेनाभ्वपिहितं यदासीत्" । "अहमेकः प्रथममासं वर्त्तामि च भविष्यामि" चेत्यादिश्रुतयोपि योज्याः । तच्च वर्त्तमानत्वादि लडादिभिर्द्योत्यते । क्रियासामान्यवाचकस्य तद्विशिष्टे लक्षणायां लडादेस्तात्पर्य्यग्राहकत्वेनोपयोगात् । अन्वयव्यतिरेकाभ्यां तद्रूपं लडादिवाच्यमेव । अन्यथा प्रत्ययानां वाचकत्वविलोपापत्तिरित्यपि पक्षान्तरम् ।

लिडर्थमाह परोक्षे इति । "परोक्षे लिडिति" सूत्रात् । कालस्तावदद्यतनानद्यतनभेदेन द्विविधः द्विविधोऽपि भूतभविष्यद्रूपः । तत्रानद्यतने भूते परोक्षे लिडित्यर्थः । तेनाद्यतने भूते अनद्यतने भविष्यति भूतेऽप्यपरोक्षे च न लिट् प्रयोगः स्यात् । परोक्षत्वञ्च साक्षात्करोमीत्येताद्दशविषयताशालिज्ञानविषयत्वम् । नच "क्रिया नामेयमत्यन्तापरिदृष्टा पूर्व्वापरीभूतावयवा न शक्या पिण्डीभूता निदर्शयितु"मिति भाष्यात्तस्या अतीन्द्रियत्वेन परोक्षे इत्यव्यावर्त्तकमिति शङ्क्यम् पिण्डीभूतायानिदर्शयितुमशक्यत्वेऽप्यवयवशः साक्षात्करोमीति प्रतीतिविषयत्वसम्भवात् । अन्यथा पश्य

स्मृगीधावतीत्यत्र तस्या दर्शनकर्मता न स्यादिति प्रतिभाति। व्यापाराविष्टानां क्रियानुकूलसाधनानामेवात्र पारोक्ष्यं विवक्षितमतोनोक्तदोषः। अयं पपाचेत्याद्यनुरोधाद्व्यापाराविष्टानामित्यपि वदन्ति। कथं तर्हि "व्यातेने किरणावलीमुदयन" इति स्वक्रियायाः स्वप्रत्यक्षत्वादिति चेत्। असङ्गतमेव। व्यासङ्गादिना स्वव्यापारस्य परोक्षत्वोपपादनेऽपि अनद्यतनातीतत्वयोरभावेन तदर्थकलिड़सम्भवात्।

लुड़र्थमाह। श्वोभाविनीति। अनद्यतने भाविनीत्यर्थः। "अनद्यतने लुड़िति" सूत्रात् यथा श्वोभवितेत्यादौ।

लृड़र्थमाह भविष्यतीति। भविष्यत्सामान्ये इत्यर्थः "लृट् शेषे च" इति सूत्रात्। यथा घटोभविष्यतीत्यादौ। तत्त्वञ्च वर्त्तमानप्रागभावप्रतियोगिसमयोत्पत्तिसत्त्वम्।

लेटोऽर्थमाह विध्यादाविति। "लिङर्थे लेड़िति" सूत्रात्। लिङर्थश्च विध्यादिरिति वक्ष्यते।

लोड़र्थमाह। प्रार्थनेति। आदिना विध्याद्याशिषोगृह्यन्ते। "आशिषि लिङ् लोटौ" "लोट् चे"ति सूत्राभ्यां तथावगमात्। यथा भवतु ते,शिवप्रसादइत्यादौ। एतयोरर्थौलिङर्थएव तयोर्णां समानार्थत्वादिति तन्निर्णयेनैव निर्णयः॥ २२॥

लङादिक्रमेण ङितामर्थमाह।

ह्योभूते प्रेरणादौ च भूतमात्रे लङादयः।
सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृतः॥२३॥

लङर्थमाह। ह्योभूतइति। अनद्यतने भूतइत्यर्थः "अ-

नद्यतने लङिति" सूत्रात्। यथास्य पुत्रोऽभवदित्यादि ।

लिङर्थमाह प्रेरणादाविति । "विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङि"ति सूत्रात् । (विधिः) प्रेरणं भृत्यादेर्निकृष्टस्य प्रवर्त्तनम् । (निमन्त्रणम्) नियोगकरणम् । आवश्यके प्रेरणेत्यर्थः । (आमन्त्रणम्) कामचारानुज्ञा । (अधीष्टम्) सत्कारपूर्व्वकोव्यापारः । एतच्चतुष्टयानुगतप्रवर्त्तनात्वेन वाच्यता लाघवात् । उक्तञ्च ।

अस्ति प्रवर्त्तनारूपमनुरूपं चतुर्ष्वपि ।
तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया ।
न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा ।
विध्यादीनामुपादानं चतुर्णामादितः कृतमिति ।

प्रवर्त्तनात्वञ्च प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वं तच्चेष्टसाधनत्वस्यास्तीति तदेव विध्यर्थः । यद्यप्येतत् कृतिसाध्यत्वस्यापि तज्ज्ञानस्यापि प्रवर्त्तकत्वात्तथापि यागादौ सर्व्वत्र तल्लोकतएव गम्यतइत्यन्यलभ्यत्वान्न तच्छक्यम् । बलवदनिष्टाननुबन्धित्वज्ञानञ्च न हेतुः द्वेषाभावेनान्यथासिद्धत्वात् । आस्तिककामुकस्य नरकसाधनताज्ञानदशायामप्युत्कटेच्छया द्वेषाभावदशायां प्रवृत्तेर्व्यभिचाराच्च । तस्मादिष्टसाधनत्वमेव प्रवर्त्तना । उक्तञ्च मण्डनमिश्रैः ।

पुंसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्त्तकः ।
प्रवृत्तिहेतुं धर्म्मञ्च प्रवदन्ति प्रवर्त्तनामिति ।

प्रपञ्चितं चैतद्वैयाकरणभूषणे । आदिना "हेतुहेतु-

मतोर्लिङ्" "आशिषि लिङ् लोटौ" इत्यादिसूत्रोक्ता हेतुहेतुमद्भावादयो गृह्यन्ते। "योब्राह्मणायावगुरेत्तं शतेन यातयादिति" यथा।

लुङर्थमाह। भूतमात्रे इति। भूतसामान्ये इत्यर्थः। भूतइत्यधिकृत्य "लुङिति" सूत्रात्। तत्र विद्यमानध्वंसप्रतियोगित्वं भूतत्वम्। तच्च क्रियायां निर्बाधमिति विद्यमानेऽपि घटे घटोऽभूदिति प्रयोगः। विद्यमानध्वंसप्रतियोगी घटाभिन्नाश्रयक उत्पत्त्याद्यनुकूलोव्यापार इति बोधः॥ अयमत्र संग्रहः। कालो द्विविधः। अद्यतनोऽनद्यतनश्च। आद्यस्त्रिविधः भूतभविष्यद्वर्त्तमानभेदात्। अन्त्योद्विविधः भूतोभविष्यश्च। तत्र वर्त्तमानत्वे लट्। भूतत्वमात्रे लुङ्। भविष्यत्त्वमात्रे लृट्। हेतुहेतुमद्भावाद्यधिकार्थविवक्षायामनयोर्लिङ्। अनद्यतने भूते तत्त्वेन विवक्षिते लङ्। तत्रैव परोक्षत्वविवक्षयां लिट्। तादृशे भविष्यति लुट् इति द्रष्टव्यः।

लृङर्थमाह। सत्यामिति। क्रियाया अतिपत्तिरनिष्पत्तिः तस्यां गम्यमानायाम्। (भूते भाविनि) हेतुहेतुमद्भावे सति लृङित्यर्थः। "लिङ्निमित्ते लृङ् क्रियातिपत्ताविति" सूत्रात्। लिङोनिमित्तं हेतुहेतुमद्भावादि। यथा सुवृष्टिश्चेदभविष्यत् सुभिक्षमभविष्यत्। वह्निश्चेत्प्राज्वलिष्यत् ओदनमपक्ष्यदित्यादौ। अत्र वह्न्यभिन्नाश्रयकप्रज्वलनानुकूलव्यापाराभावप्रयुक्त ओदनाभिन्नाश्रयकविक्लित्त्य-

नुकूलव्यापाराभाववइति शाब्दबोधइतिरीत्या द्रष्टव्यम् । अयञ्च अर्थनिर्द्देश उपलक्षणम् । अर्थान्तरेऽपि बहुशो-विधानदर्शनात् । प्रसिद्धत्वादेष्वेवार्थेषु शक्तिरन्यत्र लक्षणेति मतान्तररीत्या चोक्तम् एतेषां क्रमनियामकश्चानुबन्ध-क्रमएव । अतएव पञ्चमोलकार इत्यनेन मीमांसकैर्लेट् व्यावर्त्त्यत इति दिक् ॥ २३ ॥

इति वैयाकरणभूषणसारे लकारविशेषार्थनिरूपणम् ।

सुबर्थमाह ।

आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा ।
यथायथं विभक्त्यर्थः "सुपां कर्म्मेति" भाष्यतः ॥ २४ ॥

द्वितीयातृतीयासप्तमीनामाश्रयोऽर्थः । तथाहि "कर्म्मणि द्वितीया" तच्च "कर्त्तुरीप्सिततमम्" क्रियाजन्यफलाश्रयइत्यर्थः क्रियाजन्यफलवत्त्वेन कर्म्मणएव कर्त्तरीप्सिततमत्वात् । "तथा युक्तञ्चानीप्सित"मित्यादिसंग्रहाच्चैवमेव युक्तम् । इप्सितानी-प्सितयोः शाब्दबोधे भानाभावेन संज्ञायामेव तदुपयोगो न तु वाच्यकोटौ तत्प्रवेशः । तथा च क्रियायाः फलस्य च धातु नैव लाभादनन्यलभ्य आश्रयएवार्थः । तत्त्वञ्चाखण्डशक्तिरूप धर्म मवच्छेदकम् । ओदनं पचतीत्यत्र विक्लित्त्याश्रयत्वात्कर्म्मता । घटं करोतीत्यत्रोत्पत्त्याश्रयत्वात् उत्पत्तेर्धात्वर्थत्वात् । जानातीत्यत्रावरणभङ्गरूपज्ञाधात्वर्थफलाश्रयत्वात् । अती-तानागतादिपरोक्षस्थलेऽपि ज्ञानजन्यस्य तस्यावश्यकत्वात् ।

अन्यथा यथा पूर्व्वं न जानामीत्यापत्तेः। अतीतादेराश्रयता च विषयतया ज्ञानाश्रयता नैयायिकानामिव सत्कार्य्यवादिसिद्धान्तसाद्गोपपद्यते इति। उक्तञ्च

तिरोभावाभ्युपगमे भावानां सैव नास्तिता ।
लब्धक्रमे तिरोभावे नश्यतीति प्रतीयतइति ।

ननु चैत्रोग्रामं गच्छतीत्यत्र ग्रामस्येव चैत्रस्यापि क्रियाजन्यग्रामसंयोगरूपफलाश्रयत्वात्कर्मतापत्तौ चैत्रं चैत्रो गच्छतीत्यापत्तिः। प्रयागतः काशीं गच्छति इति चेत् प्रयागं गच्छतीत्यापत्तिश्च क्रियाजन्यसंयोगस्य काश्यामिव विभागस्य प्रयागेऽपि सत्त्वादिति चेन्न ग्रामस्येव चैत्रस्यापि फलाश्रयत्वेऽपि तदीयकर्तृसंज्ञया कर्मसंज्ञाया बाधेन चैत्रश्चैत्रमिति प्रयोगासम्भवात्। द्वितीयोत्पत्तौ संज्ञायाएव नियामकत्वात्। अन्यथा गमयति कृष्णं गोकुलमित्यत्रेव पाचयति कृष्णेनेत्यत्रापि कृष्णपदाद्द्वितीयापत्तेः। शाब्दबोध स्वैंचमित्यत्र स्यादिति चेन्न तथा व्युत्पन्नानामिष्टापत्तेः। त्वष्ट्रे उच्यतां वा प्रकारतासम्बन्धेन धात्वर्थफलविशेष्यकबोधं प्रति धात्वर्थव्यापारानधिकरणाश्रयोपस्थितिर्हेतुरिति कार्य्यकारणभावान्तरम्। प्रकृते चैत्रस्य व्यापारानधिकरणत्वाभावान्न दोषः। प्रयागस्य कर्मत्वन्तु सम्भावितमपि न, समभिव्याहृतधात्वर्थफलशालित्वस्यैव क्रियाजन्येत्यनेन विवक्षणस्य उक्तप्रायत्वात्। नैयायिकास्त्वाद्यदोषवारणाय परसमवेतत्वम् द्वितीयदोषवारणाय धात्वर्थतावच्छेदकत्वं फले विशेषणं

फलावच्छिन्नव्यापारस्य धात्वर्थत्वमितिमतेनेदम् १

तथाव्युत्पन्नानामित्याद्युक्तरीत्येत्यर्थः ९

द्वितीयावाच्यमित्युपाददते परसमवेतत्वं धात्वर्थक्रियाया मन्वेति तथैव कार्य्यकारणभावान्तरकल्पनात्। परत्वमपि द्वितीयया स्वप्रकृत्यर्थापेक्षया बोध्यते। तथाच चैत्रस्तण्डुलं पचति इत्यादौ तण्डुलान्यसमवेतव्यापारजन्यधात्वर्थताव च्छेदकविक्लित्तिशालित्वात्तण्डुलानां कर्म्मता। शाब्दबोधस्तु तण्डुलसमवेतधात्वर्थतावच्छेदकविक्लित्त्यनुकूलतण्डुलान्यस-- मवेतक्रियाजनककृतिमांश्चैत्रइत्याहुः। तन्न रोचयामहे पर- समवेतत्वादेर्गौरवेणावाच्यत्वात्। अतिप्रसङ्गः किं द्वितीया- याः शाब्दबोधस्य वा। नाद्यः। तावद्वाच्यताकथनेऽपि तत्ता- दवस्थ्यात् गमयति कृष्णं गोकुलमितिवत्पाचयति कृष्णं गोपइत्यापत्तेः तण्डुलं पचति चैत्रइतिवत्तण्डुलं पच्यते स्वय- मेवेत्यापत्ते श्वविक्लित्त्यनुकूलतण्डुलान्यसमवेताग्निसंयोगरूप- धात्वर्थाश्रयत्वात्। शाब्दबोधातिप्रसङ्गोऽप्युक्तरीत्यैव निरस्तः। परसमवेतत्वस्य शक्यत्वेऽपि परत्वस्य परसमवेत- त्वस्य च इष्टान्वयलाभायानेकशः कार्य्यकारणभावाभ्युपगमे गौरवतिरत्वादिति स्पष्टं भूषणे। एतच्च सप्तविधम्।

निर्वर्त्यञ्च विकार्य्यञ्च प्राप्यञ्चेति त्रिधा मतम्।
तच्चेप्सिततमं कर्म्म चतुर्द्धान्यत्तु कल्पितम्।
औदासीन्येन यत्प्राप्तं यच्च कर्त्तुरनीप्सितम्।
संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्व्वकमिति

वाक्यपदीयात्।

यदसज्जायते सद्वा जन्मना यत्प्रकाशते।

तन्निर्वर्त्यं विकार्य्यं तु द्विधा कर्म्म व्यवस्थितम्।
प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत्।
किञ्चिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्।
क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते।
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यतइति च तत्रैवोक्तम्।

घटं करोतीत्याद्यम्। काष्ठं भस्म करोतीति, सुवर्णं कुण्डलं करोतीति च द्वितीयम्। घटं पश्यतीत्युदासीनम्। विषं भुङ्क्ते इति द्वेष्यम्। गां दोग्धीति संज्ञान्तरैरनाख्यातम्। क्रूरमभिक्रुध्यतीत्यन्यपूर्व्वकम्॥

कर्त्तृतीयाया आश्रयोऽर्थः। तथाहि "स्वतन्त्रः कर्त्ता" स्वातन्त्र्यञ्च धात्वर्थव्यापाराश्रयत्वम्।

धातुनोक्तक्रिये नित्यं कारके कर्त्तृतेष्यतइति वाक्यपदीयात्। अतएव।

यदा यदीयोव्यापारोधातुनाभिधीयते तदा स कर्त्तेति स्थाली पचत्यग्निः पचति एधांसि पचन्ति तण्डुलः पचते स्वयमेवेत्यादि सङ्गच्छते। नन्वेवं "कर्म्मकर्त्तृव्यपदेशाच्चेति" "सूत्रे" मनोमयः प्राणशरीरइति वाक्यस्थमनोमयस्य जीवत्वे वाक्यशेषे तस्य "एतमितः प्रेत्याभिसम्भवितास्मीति" प्राप्तिकर्म्मत्वकर्त्तृत्वव्यपदेशोविरुद्धइति भगवता व्यासेन निर्णीतं कथं सङ्गच्छताम्। उच्यते जीवस्यैव ज्ञेयत्वे प्राप्तिकर्म्मत्वमपि वाच्यम्। कर्त्तृत्वञ्च तस्य आख्यातेनो

क्तम् । न चैकस्यैकदा संज्ञाद्वयं युक्तम् कर्तृसंज्ञया कर्म्मसंज्ञाया बाधात् । तथाचैतमिति द्वितीया न स्यात् । कर्म्मकर्तृतायाञ्च यगाद्यापत्तिरिति शब्दविरोधद्वारा भवति स भेदहेतुः । एवञ्च व्यापारांशस्य धातुलभ्यत्वादाश्रयमात्रं तृतीयार्थः । कारकचक्रप्रयोक्तृत्वं कृत्याश्रयत्वं वा दण्डः करोतीत्यत्राव्याप्तम् । अयञ्च त्रिविधः । शुद्धः प्रयोजकोहेतुः कर्म्म कर्त्ता च । मया हरिः सेव्यते । कार्य्यते हरिणा । गमयति कृष्णं गोकुलम् । मदभिन्नाश्रयको हरिकर्म्मकसेवनानुकूलो व्यापारः । हर्य्यभिन्नाश्रयकउत्पादनानुकूलोव्यापारः । गोकुलकर्म्मकगमनानुकूल कृष्णाश्रयकव्यापारानुकूलोव्यापारइति शाब्दबोधाः । करणतृतीयायास्त्वाश्रयव्यापारौ वाच्यौ । तथाहि "साधकतमं करणम्" । तमबर्थः प्रकर्षः स चाव्यवधानेन फलजनकव्यापारवत्ता । तादृशव्यापारवत्कारणञ्च करणम् । उक्तञ्च वाक्यपदीये ।

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम् ।
वस्तुतस्तदनिर्द्देश्यं न हि वस्तु व्यवस्थितम् ।
स्थाल्या पच्यतइत्येषा विवक्षा दृश्यते यतइति ।

विवक्ष्यतइत्यनेन सकृदनेकेषां तदभावाद्द्वितीयासप्तम्यादेरवकाशं सूचयति । नचैवं "कर्त्ता शास्त्रार्थवत्त्वा"त् इत्युत्तरमीमांसाधिकरणे "शक्तिविपर्य्ययादिति" सूत्रेणान्तःकरणस्य कर्तृत्वे करणशक्तिविपर्य्ययापत्तिरुक्ता न युज्ये-

तेति वाच्यम्। "तदेतेषां प्राणानां विज्ञानेन विज्ञानमादाय" इति श्रुत्यन्तरे करणतयाऽस्य स्तृतेस्तृत्वार्ता प्रकल्प्य भ्रान्तिविपर्य्ययापत्तिनिष्कर्माषा कलेऽरतीत्यभिप्रायात्। वस्तुतस्तु अभ्युच्चयमात्रमेतदिति "यथा च तक्षोभयथा, इत्यधिकरणे, भाष्य एव स्पष्टम्। इत्यादि प्रपञ्चितं भूषणे। सप्तम्या अप्याश्रयोऽर्थः। "सप्तम्यधिकरणे च" इत्यधिकरणे सप्तमी। तच्च "आधारोऽधिकरणमि" ति सूत्रादाधारः। तच्चाश्रयत्वम्। तत्राश्रयांशः शक्यः तत्त्वमवच्छेदकम्। न चाश्रयत्वमात्रेण कर्मकर्तृकरणानामाधारसंज्ञा स्यात्। स्यादेव यदि ताभिरस्या न बाधःस्यात्। "कारके" इत्यधिकृत्य विहितसप्तम्याः क्रियाश्रय इत्येवं यद्यपि तात्पर्य्यं तथाप्यत्र कर्तृकर्म्मद्वारा तदाश्रयत्वमस्त्येव स्थाल्यादेर्भूतलकटादेश्चेति स्थाल्यां पचति भूतले वसति कटे शेते इत्याद्युपपद्यते। उक्तञ्च वाक्यपदीये।

कर्तृकर्म्मव्यवहितामसाक्षाद्धारयत् क्रियाम्।
उपकुर्व्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्।

एतच्च त्रिविधम्। औपश्लेषिकं वैषयिकमभिव्यापकञ्च। कटे शेते, गुरौ वसति, मोक्षे इच्छास्ति। तिलेषु तैलमिति। एतच्च "संहितायामिति" सूत्रे भाष्ये स्पष्टम्।

अवधिः पञ्चम्यर्थः। अपादाने पञ्चमी। तच्च "ध्रुवमपायेऽपादान" मिति सूत्रात् (अपायः) विश्लेषजनकक्रिया तत्रावधिभूतमपादानमित्यर्थकादवधिभूतमिति भावः। उक्तञ्च

वाक्यपदीये ।

अपाये यदुदासीनं चलं वा यदि वाऽचलम् ।
ध्रुवमेवाऽतदावेशात्तदपादानमुच्यते ।
पततोध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ ।
तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमुच्यते ।
उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्म्मजे ।
विभागे प्रविभक्ते तु क्रिये तत्र व्यवस्थिते ।
मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक् ।

मेषयोः स्वक्रियापेक्षं कर्तृत्वञ्च पृथक् पृथक् इति । अस्यार्थः (अपाये) विश्लेषहेतुक्रियायाम् (उदासीनम्) अनाश्रयः । (अतदावेशात्)तत्क्रियानाश्रयत्वात् । एवञ्च विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वं फलितम् । वृक्षात्पर्णं पततीत्यत्र पर्णस्य तद्वारणाय सत्यन्तम् । धावतोऽश्वात्पततीत्यत्राश्वस्य क्रियाश्रयत्वाद्विश्लेषहेत्विति । कुड्यात्पततोऽश्वात्पततीत्यत्राश्वस्य विश्लेषजनकक्रियाश्रयत्वेऽपि तन्न विरुद्धमित्याह यस्मादश्वादिति । तद्विश्लेषहेतुक्रियानाश्रयत्वे सतीति विशेषणीयमिति भावः । एवमश्वनिष्ठक्रियानाश्रयत्वात्कुड्यादेरपि ध्रुवत्वमित्याह तस्यापीति । उभयकर्म्मजविभागस्थले विभागस्यैक्यात्तद्विश्लेषजनकक्रियानाश्रयत्वाभावात्परस्परान्मेषावपसरतइति न स्यादित्याशङ्क्य समाधत्ते उभावपीति । मेषान्तरेति । यथा निश्चलमेषादपसरद्द्वितीयमेषस्थले निश्चलमेषस्यापरमेषक्रियामादाय ध्रुव-

त्वम् तथात्वापि विभागैक्येऽपि क्रियाभेदादेकक्रियामादाय परस्य ध्रुवत्वमिति । तथा च विश्लेषाश्रयत्वे सति तज्जनक तत्क्रियानाश्रयत्वं तत्क्रियायामपादानत्वं वाच्यम् । क्रिया चात्र धात्वर्थोनतु स्पन्दः । तेन वृक्षकर्म्मजविभागवति वस्त्रे वृक्षाद्वस्त्रं पततीति सङ्गच्छते । वस्तुतो नैतावत्पञ्चम्या वाच्यम् । किन्तु अवधेर्लक्षणमात्रं द्वितीयार्थोक्तरीत्या प्रयोगातिप्रसङ्गस्यासम्भवेन वाच्यकोटौ प्रवेशस्य गौरवेणासम्भवादिति तु प्रतिभाति । न चैवमपि वृक्षात् स्पन्दतइति स्यादिति वाच्यम् आसनाच्चलितः राज्याच्चलितइति वदिष्टत्वात् । एतेन पञ्चमीजन्यापादानत्वबोधे सकर्मकधातुजन्योपस्थितेर्हेतुत्वमिति समाधानाभासोऽप्यपास्तः । नचैवमपि वृक्षात्त्यजतीति दुर्व्वारम् कर्म्मसंज्ञया अपादानसंज्ञाया बाधेन पञ्चम्यसम्भवात् । भ्रमात् कृते तथाप्रयोगे यदि बोधाभावोऽनुभवसिद्धस्तर्हि पञ्चमीजन्यापादानत्वबोधे त्यज्यादिभिन्नधातुजन्यबुद्धेर्हेतुत्वं वाच्यम् ! बलाहकाद्विद्योततइत्यादौ निःसृतेत्यध्याहार्य्यम् । रूपं रसात्पृथगित्यत्र तु बुद्धिपरिकल्पितमपादानत्वं द्रष्टव्यम् । पृथग्विनेति पञ्चमी वा । इदञ्च

निर्द्दिष्टविषयं किञ्चिदुपात्तविषयं तथा ।
अपेक्षितक्रियञ्चेति त्रिधाऽपादानमुच्यतइति ॥

वाक्यपदीयात्त्रिविधम् । यत्र साक्षाद्धातुना गतिर्निर्द्दिश्यते तन्निर्द्दिष्टविषयम् । यथाश्वात्पतति । यत्र धात्व-

त्यागाङ्गं स्वार्थं धातुराह तदुपात्तविषयम् । यथा बलाहकाद्विद्योतते । निःसरणाङ्गे विद्योतने द्युतिर्व्वर्त्तते । अपेक्षिता क्रिया यत्र तदन्यम् । यथा कुतोभवान् ? पाटलिपुत्रात् । अत्रागमनमर्थमध्याहृत्यान्वयः कार्य्यः ।

उद्देश्यश्चतुर्थ्यर्थः तथाहि "सम्प्रदाने चतुर्थी" तच्च "कर्म्मणा यमभिप्रैति स सम्प्रदानमिति" सूत्रात् (कर्म्मणा) करणभूतेन (यमभिप्रैति) ईप्सति तत् कारकं सम्प्रदानमित्यर्थकादुद्देश्यः । इदमेव शेषित्वम् । तदुद्देश्यकेच्छाविषयत्वञ्च शेषत्वमित्येव पूर्व्वतन्त्रे निरूपितम् । अतएव "प्रासनवन्मैत्रावरुणाय दण्डप्रदान"मित्यधिकरणे क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छतीति विहितं दण्डदानं न प्रतिपत्तिः किन्तु चतुर्थीश्रुतार्थकर्म्मेति तत्र निर्णीतम् । रजकाय वस्त्रं ददातीत्यपि खण्डिकोपाध्यायः शिष्याय चपेटं ददातीति भाष्योदाहरणादिष्टमेव । वृत्तिकारास्तु

"सम्यक् प्रदीयते यस्मै तत्सम्प्रदानम्' इत्यन्वर्थसंज्ञया स्वस्वत्वनिवृत्तिपर्य्यन्तमर्थं वर्णयन्तो रजकस्य वस्त्रमित्याहुः । इदञ्च

अनिराकरणात्कर्त्तुस्त्यागाङ्गंकर्म्मणेप्सितम् ।
प्रेरणानुमतिभ्याञ्च लभते सम्प्रदानतामिति ॥

वाक्यपदीयात्त्रिविधम् । सूर्य्यायार्घं ददतीत्याद्यं, नात्र सूर्य्यः प्रार्थयते नानुमन्यते न निराकरोति । प्रेरकम्,

विप्राय गां ददाति । अनुमन्तृ, उपाध्यायाय गां ददाति । अत्र सर्वत्र प्रकृतिप्रत्ययार्थयोरभेदः संसर्गः विभक्तीनां धर्मि वाचकत्वात् । धर्म्मिवाचकत्वे "कर्म्मणि द्वितीयेति" सूत्रस्वर-सभङ्गापत्तेः कर्म्मार्थकतद्धितादौ तथादर्शनाच्च द्वितीयार्थ-कबहुव्रीहौ प्राप्तोदकइत्यादौ धर्म्मिवाचकतालाभाच्च ।

सुपां कर्म्मादयोऽप्यर्थाः संख्या चैव तथा तिङामिति ।

भाष्याच्चेति दिक् । आश्रयस्यापि प्रकृत्यैव लाभान्न विभक्तिवाच्यता । किन्त्वाश्रयत्वमात्रं वाच्यम् । तदेव च तादात्म्येनावच्छेदकम् । करणतृतीयायाश्च व्यापारोऽपि । पञ्चम्याविभागमात्रं, चतुर्थ्याउद्देश्यत्वमात्रम् अतएवाहृत्य-धिकरणमपि न विरुध्यतइत्यभिप्रेत्याह शक्तिरेव वेति । षष्ठ्यामपीति शेषः । "शेषे षष्ठी"ति सूत्रात्तस्याः सम्ब-न्धमात्रं वाच्यम् कारकषष्ठ्यास्तु शक्तिरेवेत्यूह्यम् । "सप्तमीपञ्चम्यौ कारकमध्ये"इतिसूत्रे शक्तिः कारकमिति पक्षस्य भाष्ये दर्शनात् । एवञ्च देवदत्तस्य गौर्ब्राह्म-णाय गेहाद्गङ्गायां हस्तेन मया दीयतइत्यत्र देवदत्त-सम्बन्धिनी या गौस्तदभिन्नाश्रयकत्यागानुकूलो ब्राह्म-णोद्देश्यको गेहनिष्ठविभागजनको गङ्गाधिकरणको हस्त-करणको मन्निष्ठोव्यापारइति बोधः यथायथम् उक्तप्रका-रेण । अत्र मानमुपदर्शयन् घटं जानातीत्यादौ द्वितीया-या विषयतायां लक्षणेति बहुव्याकुलं वदतो नैयायिकादीन् प्रत्याह सुपां कर्म्मेतीति । अयं भावः ।

सुपां कर्म्मादयोप्यर्थाः संख्या चैव तथा तिङाम् ।
प्रसिद्धोनियमस्तत्र नियमः प्रकृतेषु चेति ।

वार्त्तिकतद्भाष्याभ्यां कर्म्मादेर्वाच्यतायास्तन्नियमस्य च लाभः । तथा हि "स्वौजसमौट्" "कर्म्मणि द्वितीया" "द्व्येकयोर्द्विवचनैकवचने" इत्यादेः, "लः कर्म्मणि च" "तिप् तस् झि" "तान्येकवचनद्विवचने"त्यादेरेकवाक्यतया कर्म्मादेस्तत्संख्यायाश्च वाच्यता लभ्यते । तथा तन्नियमस्य द्विविधो लभ्यते । द्वितीया कर्म्मण्येव, तृतीया करणे एवे, त्येवमादिरर्थनियमः । कर्म्मणि द्वितीयैव, करणे तृतीयै,वेत्येवं शब्दनियमश्च । उभयथापि सिद्धनियमविरुद्धं लक्षणादिकमसाधुत्वप्रयोजकमिति यत्रे कर्म्मणि "नानृतं वदे"दिति निषेधविषयोभवत्येवेति स्वेच्छया लक्षणापि विभक्तावप्रयोज्यैव । अतएव "विभक्तौ न लक्षणे"त्यादिर्नैयायिकवृद्धानां व्यवहारइति दिक् ॥ २४ ॥

इति वैयाकरणभूषणसारे सुबर्थनिर्णयः ।

नामार्थनाह ।

एकं द्विकं त्रिकञ्चाथ चतुष्कं पञ्चकं तथा ।
नामार्थाइति सर्व्वेऽमी पक्षाः शास्त्रे निरूपिताः॥२५॥

एकं जातिः लाघवेन तस्याएव वाच्यतौचित्यात् अनेकव्यक्तीनां वाच्यत्वे गौरवात् । नच व्यक्तीनामपि मत्वेकमेकत्वाद्विनिगमनाविरहः । एवं हि एकस्यामेव व्यक्तौ

एकं द्विकमित्यत्र ६

शक्त्यभ्युपगमे व्यक्त्यन्तरे लक्षणायां स्वसमवेताश्रयत्वं संसर्ग इति गौरवम् । जात्या तु स्वाश्रयत्वमेव संसर्गइति लाघवम् । किञ्च विशिष्टवाच्यत्वमपेक्ष्य नागृहीतविशेषणन्याया-ज्जातिरेव वाच्येति युक्तम् । व्यक्तिबोधस्तु लक्षणया एवञ्च तत्र विभक्त्यर्थान्वयोऽप्युपपद्यते इति दिक् । यद्वा केवल-व्यक्तिरेवैकशब्दार्थः केवलव्यक्तिपक्षेण ग्रहणस्यैकशेषस्य चारम्भेण तस्यापि शास्त्रसिद्धत्वात् । युक्तं चैतत् । व्यवहारेण व्यक्तावेव तद्ग्रहणात् । सम्बन्धितावच्छेदकजातेरैक्याच्छक्तिरेकैवेति न गौरवमपि । नचैवं घटत्वमपि वाच्यं स्याच्छक्यतावच्छेदकत्वात्तथा च नागृहीतविशेषणन्यायात्तदेव वाच्यमस्त्विति शङ्क्यम् अकारणत्वेऽपि कारणतावच्छेदकत्ववद्-लक्ष्यत्वेऽपि लक्ष्यतावच्छेदकत्ववत्तथापि सम्भवात् । उक्तञ्च

आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम् ।
शब्दः सुकरसम्बन्धो नच व्यभिचरिष्यतीति ।

वस्तुतस्तु "न ह्याकृतिपदार्थस्य द्रव्यं न पदार्थ"इति भाष्याद्विशिष्टं वाच्यम् । एकमित्यस्य चायमभिप्रायः शक्ति-ज्ञाने विषयतयावच्छेदिका जातिरेव । तथा च घटत्वविशिष्टबोधे घटत्वांशे अन्याप्रकारकघटत्वशक्तिज्ञान-त्वेन हेतुतेति कार्य्यकारणभावइत्यादि प्रपञ्चितं भूषणे । तदेतदभिप्रेत्याह द्विकमिति । जातिव्यक्ती इत्यर्थः पूर्व्वपक्ष-विरोधपरीहारः पूर्ववत् । त्रिकमिति । जातिर्व्यक्तिलिङ्गा-नीत्यर्थः । सत्वरजस्तमोगुणानां साम्यावस्था नपुंसकत्वम् ।

अविवक्ष्यं पुंस्त्वम्। अपचयः स्त्रीत्वं तत्तच्छब्दलिङ्गं वाच्यम्। तमेव विरुद्धधर्ममादाय तटादिशब्दा भिद्यन्ते। केषाञ्चि-दनेकलिङ्गत्वव्यवहारस्तु समानानुपूर्व्वीकत्वेन शब्दानाम-भेदारोपात्। एवञ्च पदार्थपदे पुंस्त्वमेव। व्यक्तिपदे स्त्रीत्व-मेव। वस्तुपदे नपुंसकत्वमेवेति सर्वत्रैवायं पदार्थः, इयं व्यक्तिः। इदं वस्त्विति व्यवहारः तटस्तटी तटमिति चोप-पद्यते। तच्च लिङ्गमर्थपरिच्छेदकत्वेनान्वेतीति पश्वादि-शब्दोक्तं "पशुना स्तौति" पश्वमेत्यादिविधि र्न छाग्यादील-ङ्गत्वेन प्रयोजयतीति विभावनीयम्। नच व्यक्त्यादिशब्दो-क्तलिङ्गस्येव पश्वादिशब्दोक्तस्यापि साधारण्यं ग्राह्यम् व्यक्ति-शब्दस्य नित्यस्त्रीलिङ्गत्वेन तथासम्भवेऽपि पशुशब्दस्य नित्यपुंलिङ्गत्वे प्रमाणाभावात्। "पशुंनप्रायं गुहाचर-न्तम्"। "पश्वे नृभ्यो यथा गवे" इत्यादिवेददर्शनाच्च मीमां-सायां चतुर्थे पशुना यजेतेत्यत्रैकत्वपुंस्त्वयोर्विवक्षितत्वा-न्नानेकपशुभिः पशुस्त्रिया वा याग इति प्रतिपादितत्वाच्च। वस्तुतस्तु विशेषविध्यभावे उप्रत्ययान्तानां पुंस्त्वस्य व्याक-रणे निर्णीतत्वादिदभाष्येऽपि "जसादिषु छन्दसि वावचन" मिति नाभावाभाव इत्युक्तेः पशुशब्दस्य नित्यपुंस्त्वनिर्ण-यात्। प्रकृते "छागोवा मन्त्रवर्णादिति" न्यायेनैव निर्णयः। मन्त्रवर्णे हि "छागस्य वपाया मेदस" इति श्रूयते। तत्र छाग-स्येति छाग्यामसम्भावितमिति भवति ततः पुंस्त्वनिर्णयइति विस्तरेण प्रपञ्चितं भूषणे। (चतुष्कम्) संख्यासहितं त्रिक-

मितरार्थः । (पञ्चकम्) कारकसहितं चतुष्कमितरार्थं । नन्वन्वयव्यतिरेकाभ्यां प्रत्ययस्यैव तद्वाचत्वम् ततएव लिङ्गादीनामुपस्थितौ प्रकृतिवाचकत्वे मानाभावादिति चेत्सत्यम् प्रत्ययवर्ज्जिते दधि पश्येत्यादौ प्रत्ययमजानतोऽपि बोधात्-प्रकृतेरेव वाचकत्वं कल्प्यते । लिङ्गानुशासनस्य प्रकृतेरेव दर्शनाच्चेति । अतएवैषु पक्षेषु न निर्बन्धः प्रत्ययस्यैव वाचकताया युक्तत्वात् ।

द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तय इति ।

वाक्यपदीयेऽपि पक्षद्वयस्य व्युत्पादनात् । शास्त्र इति बहुषु स्थलेषु व्युत्पादनं व्यञ्जयितुम् । प्राधान्यं तु सरूपसूत्रादौ व्यक्तम् ॥ २५ ॥

शब्दस्तावच्छाब्दबोधे भासते ।

न सोऽस्ति प्रत्ययोलोके यः शब्दानुगमादृते ।

अनुविद्धमिव ज्ञानं सर्व्वं शब्देन भासते ।

इत्याद्यानुभविकोक्तिः । विष्णुमुच्चारयेत्यादावर्थोच्चारणासम्भवेन विनाशब्दविषयं शाब्दबोधासङ्गतिश्चेति सोऽपि प्रातिपदिकार्थः । नच लक्षणया निर्व्वाहः । निरूढलक्षणायाः शक्त्यनतिरेकात् जबगडशमुच्चारयेत्यादौ शक्याग्रहेण शक्यसम्बन्धरूपलक्षणाया अग्रहाच्च अज्ञातायाश्च वृत्तेरनुपयोगात् । गाङ्गमुच्चारयेत्यादिभाषाशब्दानुकरणे साधुतासम्प्रतिपत्तेस्तेषां शक्त्यभावेन परनये लक्षणाया असम्भवाच्चेत्यभिप्रेत्य षोढापि क्वचित्प्रातिपदिकार्थइत्याह ।

शब्दोऽपि यदि भेदेन विवक्षा स्यात्तदा तथा।
नोचेच्छ्रोत्रादिभिः सिद्धोऽप्यसावर्थैर्विभासते॥ २६॥

यद्यनुकार्यानुकरणयोर्भेदविवक्षा तदा शब्दोऽपि प्रातिपदिकार्थः। यदि न भेदविवक्षा तदा श्रोत्रादिभिरुपस्थितोऽपि अर्थवद्भासते। अपिर्हेतौ। उपस्थितत्वाद्भासतइत्यर्थः। अयं भावः अनुकार्यानुकरणयोर्भेदेऽनुकार्यस्य पदानुपस्थितत्वात्तत्सिद्धये शक्तिरुपेया। अभेदे प्रत्यक्षे विषयस्य हेतुत्वात् स्वप्रत्यक्षरूपां पदजन्योपस्थितिमादाय शाब्दबोधविषयतोपपत्तिरिति। यद्यप्यतिप्रसङ्गवारणाय वृत्तिजन्यपदोपस्थितिरेव हेतुस्तथाप्यत्राश्रयतया वृत्तिमत्त्वस्य सत्त्वान्नानुपपत्तिः। निरूपकताश्रयतान्यतरसम्बन्धेन वृत्तिमतएव शाब्दबोधविषयत्वं कल्पितइत्यनवद्यम् सम्बन्धस्योभयनिरूप्यत्वात् पदार्थस्येव तद्बोधकत्वेन स्वस्यापि ज्ञानसम्भवाच्चेति। उक्तञ्च वाक्यपदीये।

ग्राह्यत्वं ग्राहकत्वञ्च द्वे शक्ती तेजसो यथा।
तथैव सर्वशब्दानामेते पृथगवस्थिते इति।
विषयत्वमनापन्नैः शब्दैर्नार्थः प्रकाश्यतइति चेति॥२६॥

प्रसङ्गादनुकार्यानुकरणयोरभेदपक्षे साधकमाह।

अतएव गवित्याह भू सत्तायामितीदृशम्।
न प्रातिपदिकं नापि पदं साधु तु तत्स्मृतम्॥२७॥

गवित्ययमाह "भू"सत्तायामित्येवमादयो यतोऽनुकरणशब्दा अनुकार्यान्न भिद्यन्ते अतस्तेषामर्थवत्त्वाभावात्"अर्थव

दध्यातु"रित्याद्यप्रवृत्तौ न प्रातिपदिकत्वम् नापि पदत्वम्। अत्र च साधुत्वमित्युपपद्यते। अन्यथा "प्रत्ययः" "परश्च" "अपदं न प्रयुञ्जीते"ति निषेधादिलङ्घनादसाधुतापत्तिरित्यर्थः ॥२७।

इति वैयाकरणभूषणसारे नामार्थनिर्णयः।

समासान्विभजते।

सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा।
सुबन्तेनेति च ज्ञेयः समासः षड्विधो बुधैः ॥२८॥

(सुपां सुपा) पदद्वयमपि सुबन्तम्। राजपुरुषइत्यादिः। (सुपां तिङा)। पूर्व्वपदं सुबन्तमुत्तरं तिङन्तम्। पर्य्यभूषयत्। "गतिमतोदात्तवता तिङापि समास"इति वार्त्तिकात्समासः। (सुपां नाम्ना) कुम्भकारइत्यादि। "उपपदमतिङि"ति समासः। स च "गतिकारकोपपदानां कृद्भिः समासवचनं प्राक् सुबुत्पत्तेरिति" परिभाषया भवति सुबुत्पत्तेः प्राक्। अत्रोत्तरपदे सुबुत्पत्तेः प्रागित्यर्थः। अन्यथा चर्म्मक्रीतीत्यादौ नलोपानापत्तेः। (सुपां धातुना) उत्तरपदं धातुमात्रं न तिङन्तम्। कटप्रूः आयतस्तुः। "क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घश्चेति वार्त्तिकात्।" 'तिङां तिङा' पिबतखादता। प्रचतभृज्जतेत्यादि। "आख्यातमाख्यातेन क्रियासातत्ये" इति मयूरव्यंसकाद्यन्तर्गणसूत्रात्। 'तिङां सुबन्तेन' पूर्व्वपदं तिङन्तमुत्तरं सुबन्तम्। जहिस्तम्बः। "जहिकर्म्मणा

बहुलमाभीक्ष्ण्ये कर्त्तारञ्चाभिदधातीति" मयूरव्यंसकाद्यन्त-र्गणसूत्रात्। अयं षड्विधोऽपि समासः, "सह सुपा" इत्यत्र योगविभागेन भाष्ये व्युत्पादितः स्पष्टः शब्दकौस्तुभादौ ॥ २८ ॥

स्वयं भाष्यादिसिद्धतद्भेदं व्युत्पाद्य प्राचीनवैयाकरणो-क्तविभागस्याव्याप्त्यादिभिस्तल्लक्षणस्य प्रायिकत्वं दर्शयति ।

समासस्तु चतुर्द्धेति प्रायोवादस्तथापरः ।
योऽयं पूर्वपदार्थादिप्राधान्यविषयः स च ।
भूतपूर्व्वात्तोऽपि रेखागवयादिवदास्थितः ॥२९॥

शब्दस्य नित्यत्वात्सोऽपि व्यवहारोपि ।८

चतुर्धा अव्ययीभावतत्पुरुषद्वन्द्वबहुव्रीहिभेदात् । अयं प्रायोवादः । भूतपूर्व्वः इन्भूः अथतस्तुः वागर्थाविवेत्याद्य-संग्रहात् । तथा पूर्व्वपदार्थप्रधानोऽव्ययीभावः । उत्तरप-दार्थप्रधानस्तत्पुरुषः । उभयपदार्थप्रधानोद्वन्द्वः । अन्यपदार्थ प्रधानोबहुव्रीहिरित्यादि लक्षणमपि प्रायिकम् । उन्मत्त-गङ्गं सूपप्रति अर्द्धपिप्पली द्वित्राः शशकुशपलाशमित्यादौ परस्परव्यभिचारात् । तथाहि उन्मत्तगङ्गमित्यव्ययीभावे पूर्व्वपदार्थप्राधान्याभावादव्याप्तिः अन्यपदार्थप्राधान्याद्ब-हुव्रीहिलक्षणातिव्याप्तिश्च । "अन्यपदार्थे च संज्ञायामिति" समासात् । सूपप्रतीत्यव्ययीभावे उत्तरपदार्थप्राधान्यात्त-त्पुरुषलक्षणातिव्याप्तिरव्ययीभावाव्याप्तिश्च । "सुपः प्रतिना मात्रार्थे" इति समासः । अर्द्धपिप्पलीति तत्पुरुषे पूर्व्वपदार्थ-प्राधान्यसत्त्वादव्ययीभावातिव्याप्तिस्तत्पुरुषाव्याप्तिश्च । "अर्द्धं

नपुंसकमिति" समासात्। एवं पूर्व्वकाय इत्यादौ द्रष्टव्यम्। द्वित्रादिति बहुव्रीहावुभयपदार्थप्राधान्यात् द्वन्द्वातिव्याप्तिः र्बहुव्रीह्यव्याप्तिश्च। शशकुशपलाशमित्यादिद्वन्द्वे समाहारान्यपदार्थप्राधान्याद्बहुव्रीह्यतिव्याप्ति र्द्वन्द्वाव्याप्तिश्च स्यादिति भावः। सिद्धान्ते त्वव्ययीभावाधिकारपठितत्वमव्ययीभावत्वमित्यादि द्रष्टव्यम्। असम्भवश्चैषामित्याह। भीतपूर्व्वादित्यादि। रेखागवयादि निष्कलाङ्गूलादेर्वास्तवपक्षलक्षणत्ववदेतेषामपि न सामासलक्षणत्वम्। बोधकता तु तद्वदेव स्यादिति भावः॥ २९॥

ननु पूर्व्वपदार्थप्राधान्यादि समासे सुवचम्। तथाहि "समर्थः पदविधिरिति" सूत्रे भाष्यकारैरनेकधोक्तेष्वपि पक्षेषु जहत्स्वार्थाजहत्स्वार्थपक्षयोरेवैकार्थीभावव्यपेक्षारूपयोः पर्य्यवसानं लभ्यते। तत्राजहत्स्वार्थपक्षे उक्तव्यवस्था नासम्भविनीत्याशङ्कां मनसिकृत्याह।

जहत्स्वार्थाऽजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा।
भेदः संसर्गउभयं वेति वाच्य व्यवस्थितम्॥ ३०॥

जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था। पदे वर्णवद्वृत्तौ पदानामानर्थक्यमित्यर्थः। अयं भावः, समासशक्त्यैव राजविशिष्टपुरुषभानसम्भवे न राजपुरुषपदयोरपि पुनस्तद्बोधकत्वं कल्प्यम् वृषभयावकादिपदेषु वृषादिपदानामिव। अन्यथा राजपदेन विग्रहवाक्यइव राज्ञः स्वातन्त्र्योपस्थितिसत्त्वात् ऋद्धस्य राज्ञः पुरुषइत्यत्रेव ऋद्धस्य

राजपुरुषइत्यस्याप्यापत्तेरिति । अजहदिति न जहति पदानि स्वार्थं यस्यां सा अजहत्स्वार्था । अयमभिप्रायः राजपुरुषादिसमासादौ नातिरिक्ता शक्तिः कल्पकाभावात् क्लृप्तराजादिपदादेवार्थोपस्थितिसम्भवे तत्कल्पनस्य गौरवपराहतत्वाच्च । क्लृप्तशक्तित्यागोऽप्यप्रामाणिकः कल्प्येत । तथाचाकाङ्क्षादिवशात् क्लृप्तशक्त्यैव विशिष्टार्थबोधः । अयमेव व्यपेक्षापक्षो मतान्तरत्वेन भाष्यकारैरुक्तः । नचात्र मते समासे ऋद्धस्येति विशेषणान्वयापत्तिः । "सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणयोगो नेति" वार्त्तिकात् । तथाचैतन्मतवादिनां पूर्व्वोत्तरपदार्थसत्त्वात्पूर्वपदार्थप्रधानइत्यादिव्यवस्था सूपपदेति भावः । प्रसङ्गाद्वृत्तिभेदमपि निरूपयति । ते पुनरिति । द्वे अपि वृत्ती त्रिविधे वाच्यत्रैविध्यात् । वाच्यमेवाह । भेदइत्यादि । भेदः अन्योन्याभावः । तथा च राजपुरुषइत्यादावराजकीयभिन्नइति बोधः । अस्यावाच्यत्वे च राजपुरुषः सुन्दरइतिवद्राजपुरुषोदेवदत्तस्य चेत्यपि स्यात् । वाच्यत्वे तद्विरोधान्नैवं प्रयोग इति भावः । राजसम्बन्धवानित्येव शाब्दभानं भेदस्तूत्तरकालमुपतिष्ठतइत्याशयेनाह संसर्गइति । विनिगमनाविरहादन्यस्वामिकेऽपि राजपुरुषइत्यादिप्रयोगापत्तिश्च मनसिकृत्योभयं वाच्यमित्याह । उभयं वेति । तथा चाराजकीयभिन्नोराजसम्बन्धवांश्चायमिति बोधः ॥ ३० ॥

व्यपेक्षावादस्यैव युक्तिभाष्यविरुद्धत्वात्तन्मूलकः पूर्वपदार्थप्रधान इत्याद्युत्सर्गोऽप्ययुक्तः। किन्तु रेखागवयन्यायेनोत्सर्गोऽपि परम्परयैव बोधकइत्याशयेन समाधत्ते।

समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्।
बहूनां वृत्तिधर्म्माणां वचनैरेव साधने।
स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रितः॥ ३१॥

समासइति वृत्तिमात्रोपलक्षणम्। "समर्थः पदविधि-रि"त्यत्र पद मुद्दिश्य योविधीयते समासादिः स समर्थः विग्रहवाक्याभिधानशक्तः सन् साधुरिति सूत्रार्थस्य भाष्याल्लाभात्। पदोद्देश्यकविधित्वञ्च कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपासु पञ्चस्वपि वृत्तिष्वस्त्येव। विशिष्टशक्त्यस्वीकर्त्तॄणां मते दूषणं शक्तिसाधकमेवेत्याशयेनाह पङ्कजशब्दवदिति। पङ्कजनिकर्त्तुरपि योगादेवोपस्थितौ तत्रापि समुदायशक्तिर्न सिध्येत्। नच पद्मत्वरूपेणोपस्थितये सा कल्प्यतइति वाच्यम् चित्रग्वादिपदेऽपि स्वामित्वेनोपस्थितये तत्कल्पनावश्यकत्वात्। लक्षणयैव तथोपस्थितिरिति चेत् पङ्कजपदेऽपि सा सुवचा। एवं रथकारपदेऽपि तथा च "वर्षासु रथकारोऽग्निमादधीते"त्यत्रापि विना लक्षणां क्लृप्तयोगेन ब्राह्मणादिविषयतयैवोपपत्तौ तत्कल्पनां कृत्वा जातिविशेषस्याधिकारित्वं प्रकल्प्यापूर्व्वकल्पनमयुक्तं स्यादिति भावः। साधकान्तरमाह बहूनामिति वृत्ते र्धर्म्मा विशेषणलिङ्गसंख्याद्ययोगादयस्तेषां वचनैरेव साधने

गौरवमित्यर्थः। अयं भावः विशिष्टशक्त्यस्वीकारे राज्ञः पुरुषइत्यत्रेव राजपुरुषइत्यत्रापि स्याद्विशेषणाद्यन्वयः राजपदेन स्वतन्त्रोपस्थितिसत्त्वात्। विभाषावचनञ्च समासनियमवारणाय कार्य्यमिति। ननु "सविशेषणानामिति" वचनान्न विशेषणाद्यन्वयः विभाषावचनञ्च कृतमेवेत्याशङ्कां समाधत्ते वचनैरेवेति। न्यायसिद्धमेव सूत्रम्। व्यपेक्षाविवक्षायां वाक्यस्यएकार्थीभावे समासस्येति स्वभावतएव प्रयोगनियमसम्भवात्। सविशेषणेत्यपि विशिष्टशक्तौ राज्ञः पदार्थैकदेशतयान्वयासम्भवात् न्यायसिद्धमिति भावः। अतएव व्यपेक्षापक्षमुद्भाव्य अथैतस्मिन् व्यपेक्षायां सामर्थ्ये योऽसावेकार्थीभावकृतो विशेषः स वक्तव्यइति भाष्यकारेण दूषणमप्युक्तम्॥ ३१॥

तथा धवखदिरौ, निष्कौशाम्बिर्गोरथो घृतघटो गुड़धानाः केशचूड़ः सुवर्णालङ्कारो द्विदशाः सप्तपर्ण इत्यादावितरेतरयोगादिक्रान्तयुक्तपूर्णमिश्रसङ्घातविकारसुच्प्रत्ययलोपो,वीप्साद्यर्थोवाचनिको वाच्यइत्यतिगौरवं स्यादिति। दूषणान्तरमाह।

चकारादिनिषेधोऽथ बहुव्युत्पत्तिभञ्जनम्।
कर्त्तव्यं ते न्यायसिद्धं त्वस्माकं तदिति स्थितिः॥ ३२॥

आदिना घनश्यामः हंसगमनइत्यादाविवादीनां पूर्व्वोक्तानाञ्च संग्रहः। दूषणान्तरमाह। बहुव्युत्पत्तिभञ्जनमिति। अयमाशयः चित्रगुरित्यत्र स्वाम्यादिप्रतीतिरनुभव-

सिद्धा। नच तत्र लक्षणा प्राप्तोदकोग्राम इत्यादौ तदसम्भवात्। प्राप्तिकर्तृभिन्नमुदकमित्यादिबोधोत्तरं तत्सम्बन्धिग्रामलक्षणायामप्युदककर्तृकप्राप्तिकर्म्मग्रामइत्यर्थालाभात्। प्राप्तेति क्तप्रत्ययस्यैव कर्त्रर्थकस्य कर्मणि लक्षणेति चेत्तर्हि समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरुदकाभिन्नप्राप्तिकर्म्मेति स्यात्। अन्यथा समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिभङ्गापत्तेः प्राप्तेर्धात्वर्थतया कर्तृतासम्बन्धेन भेदेनोदकस्य तत्रान्वयासम्भवाच्च। अन्यथा देवदत्तः पचतइत्यत्र कर्तृतासम्बन्धेन देवदत्तस्यान्वयसम्भवेनानन्वयानापत्तेः। अथोदकाभिन्नकर्तृका प्राप्तिरिति बोधोत्तरं तत्सम्बन्धिग्रामो लक्ष्यतइति चेन्न प्राप्तेर्धात्वर्थतया क्तार्थकर्तारं प्रति विशेष्यताया असम्भवात्। प्रकृतिप्रत्यययोः प्रत्ययार्थप्राधान्यमिति व्युत्पत्तेः। प्राप्तपदे प्राप्तेर्विशेष्यत्वे तस्याएव नामार्थत्वेनोदकेन सममभेदान्वयापत्तेश्च। एवमूढरथः उपहृतपशुः उद्धृतौदना बहुपाचिकेत्यादावपि द्रष्टव्यम्। अत्र हि रथकर्म्मकवहनकर्त्ता, पशुकर्म्मकोपहरणोद्देश्यः, ओदनकर्म्मकोद्धरणावधिः बहुपाककर्त्रधिकरणमिति बोधाभ्युपगमात्। अतिरिक्तशक्तिपक्षे च घटत्वविशिष्टे घटपदस्येवोदककर्तृकप्राप्तिकर्म्मत्वविशिष्टे प्राप्तोदकइत्यादिसमुदायशक्त्यैव निर्व्वाहइति भावः॥ ३२॥

साधकान्तरमाह।

अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना।

क्लृप्तत्यागश्चास्ति तव तत्किं शक्तिं न कल्पयेः ॥३३॥

अयं भावः चित्रगुरित्यादिषु चित्रगवस्वाम्यादिप्रतीतिर्न विना शक्तिमुपपद्यते। नच तत्र लक्षणा सा हि न चित्रपदे चित्रस्वामी गौरिति बोधापत्तेः नापि गोपदे गोस्वामी चित्र इत्यन्वयबोधापत्तेः। गवादिमात्रस्य लक्ष्यैकदेशत्वेन तत्र चित्रादेरन्वयायोगात्। नच चित्राभिन्ना गौरिति शक्त्युपस्थाप्ययोरन्वयबोधोत्तरं तादृशगोस्वामी गोपदेन लक्ष्यते इति वाच्यम्। गोपदस्य चित्रपदस्य वा विनिगमनाविरहेण लक्षकत्वासम्भवात्। नच गोपदे साक्षात् सम्बन्धएव विनिगमकइति वाच्यम्। एवमपि प्राप्तोदकः कृतविश्व इत्याद्यषष्ठ्यर्थबहुव्रीहौ विनिगमकाप्राप्तेः। यौगिकानां कर्त्राद्यर्थकतया साक्षात्सम्बन्धाविशेषात्। नच पदद्वये लक्षणेति नैयायिकोक्तं युक्तम् बोधावृत्तिप्रसङ्गात्। नच परस्परं तात्पर्य्यग्राहकत्वादेकस्यैवैकदा लक्षणा न द्वयोरिति न बोधावृत्तिरिति वाच्यम् एवमपि विनिगमनाविरहतादवस्थ्येन लक्षणायाश्चासम्भवात्। नच चरमपदे एव सा प्रत्ययार्थान्वयानुरोधात् प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तेरिति वाच्यम् एवं हि बहुव्रीह्यसम्भवापत्तेः "अनेकमन्यपदार्थ" इत्यनेकसुबन्तानामन्यपदार्थप्रतिपादकत्वे तद्विधानात्। किञ्च एवं सति घटादिपदेष्वपि चरमवर्ण एव वाचकताकल्पना स्यात् पूर्व्ववर्णानां तात्पर्य्यग्राहकत्वे नोपयोगसम्भवात्। एवं सति चरमवर्ण-

मात्रश्रवणेऽर्थ बोधापत्तिरिति चेदत्राप्युदकपदमात्रश्रवणा-दर्थ प्रत्ययापत्तिस्तुल्येत्यन्यत्र विस्तरः। एवञ्च अषष्ठार्थ-बहुव्रीहौ (व्युत्पत्त्यन्तरकल्पना) उक्तयुक्तेः अगत्या शक्त्यन्तर-कल्पनेत्यर्थः (क्लृप्तत्यागः)इत्यस्य क्लृप्तशक्त्योपपत्तिरिति व्युत्प-त्तित्यागश्च (तवास्ति) (तत्किम्) सर्व्वत्र समासे शक्तिं न कल्प-येरिति वाक्यार्थः। यत्तु व्यपेक्षावादिनो नैयायिकमीमांसका-दायः न समासे शक्तिः राजपुरुषइत्यादौ राजपदादेः सम्ब-न्धिलक्षणयैव राजसम्बन्ध्यभिन्नः पुरुषइति बोधोपपत्तेः। अतएव राज्ञः पदार्थैकदेशतया न तत्र शोभनस्येत्यादि-विशेषणान्वयः। नवा घनश्यामोनिष्कौशाम्बिर्गोरथइत्या-दौइवादिप्रयोगापत्तिः उक्तार्थतया इवक्रान्तादिपदप्रयोगास-म्भवात्। न वा "विभाषेति" सूत्रावश्यकत्वम् लक्षणया राज-सम्बन्ध्यभिन्नइति बुबोधयिषायां समासस्य, राजसम्बन्ध-वानिति बुबोधयिषायां विग्रहस्येत्यादिप्रयोगनियमसम्भ-वात्। नापि पङ्कजपदप्रतिवन्दी शक्तिसाधिका तत्रावयव-शक्तिमजानतोपि बोधात्। नच शक्त्यग्रहे लक्षणया तेभ्यो-विशिष्टार्थप्रत्ययः सम्भवति। अतएव राजादिपदशक्त्यग्रहे राजपुरुषश्चित्रगुरित्यादौ न बोधः। नच चित्रगुरित्यादौ लक्षणासम्भवेऽप्यषष्ठ्यर्थबहुव्रीहौ लक्षणाया असम्भवः बहुव्यु-त्पत्तिभञ्जनापत्तेरिति वाच्यम् प्राप्तोदकइत्यादावुदकपदे एव लक्षणास्वीकारात्। पूर्व्वपदस्य यौगिकत्वेन तल्लक्ष-णाया धातुप्रत्ययतदर्थज्ञानसाध्यतया विलम्बितत्वात्। प्रत्य-

यानां सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्त्यनुरोधाच्च । घटादिपदे चातिरिक्ता शक्तिः कल्प्यमाना विशिष्टे कल्प्यते। विशिष्टस्यैव सङ्केतितत्वात्। बोधकत्वस्यापि प्रत्येकं वर्णेष्वसत्त्वात्। प्रकृते चात्यन्तसन्निधानेन प्रत्ययार्थान्वयसौलभ्यायोत्तरपदे एव सा कल्प्यतइति विशेषः स्वोक्तञ्च घटादिपदेष्वपि चरमवर्णस्यैव वाचकत्वं मीमांसकम्मन्येरित्याहुः। अत्रोच्यते। समासे शक्तिस्वीकारे तस्य प्रातिपदिकसंज्ञादिकं न स्यात् अर्थवत्त्वाभावात् "अर्थवदधातुरप्रत्ययः प्रातिपदिकमि"त्यस्याप्रवृत्तेः। नच "कृत्तद्धितसमासा"श्चेत्यत्र समासग्रहणात् सा, तस्य नियमार्थतया भाष्यसिद्धताया वैयाकरणभूषणे स्पष्टं प्रतिपादितत्वात्। समासवाक्ये शक्त्यभावेन शक्यसम्बन्धरूपलक्षणाया अप्यसम्भवेन लाक्षणिकार्थवत्त्वस्याप्यसम्भवात्। अथ तिप्तस्झि इत्यारभ्य ङ्योस्सुबिति तिप्प्रत्याहारोभाष्यसिद्धः तमादायातिप्प्रातिपदिकमित्येव सूत्र्यताम् कृतमर्थवदादिसूत्रद्वयेन । समासग्रहणञ्च नियमार्थमस्तु तथा च सुप्तिङन्तभिन्नं प्रातिपदिकमित्यर्थात्समासस्यापि सा स्यादिति चेत्तथापि प्रत्येकं वर्णेषु संज्ञावारणायार्थवत्त्वावश्यकत्वेन समासाव्याप्तितादवस्थ्यमेव। तथा च प्रातिपदिकसंज्ञारूपं कार्य्यमेवार्थवत्त्वमनुमापयति धूमइव वह्निम्। किञ्चैवं चित्रगुमानयेत्यादौ कर्म्मत्वाद्यनन्वयापत्तिः प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः विशिष्टोत्तरमेव प्रत्ययोत्पत्तेर्विशिष्टस्यैव प्रकृ-

तित्वात्। यत्तु सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्ति-रेव कल्प्यतइति तन्न उपकुम्भं अर्द्धपिप्पलीत्यादौ पूर्व्व-पदार्थे विभक्त्यर्थान्वयेन व्यभिचारात्। नच तत्रापि सन्निधानमेव आनुशासनिकसन्निधेर्विवक्षितत्वात् तथा च यत्पदोत्तरं यानुशिष्टा सा तदर्थगतं स्वार्थं बोधयति। समासे च समस्यमानपदोत्तरमेवानुशासनमिति वाच्यम्। अर्थवत्सूत्रेण विशिष्टस्यैव विभक्त्यनुशासनात्। अथ प्रकृति-त्वाश्रये विभक्त्यर्थान्वयइत्येव कल्प्यतइति चेत्तर्हि पङ्कज-मानय दण्डिनं पश्य शूलिनं पूजयेत्यादौ पङ्कदण्डशूलेष्वा-नयनदर्शनपूजनादेरन्वयप्रसङ्गात् अघटमानयेत्यत्र घटे-प्यानयनान्वयापत्तेश्च। नच दण्डादीनां विशेषणतया न तत्रानयनाद्यन्वयः। पाकान्नीलः धर्म्मात्सुखी इत्यादौ पाक-धर्म्मादिहेतुताया रूपसुखादावनन्वयप्रसङ्गात्। यच्च प्रकृ-त्यर्थत्वं तज्जन्यज्ञानविषयत्वमात्रं तच्चात्राविरुद्धमिति तन्न घटं पश्येत्यत्र घटपदात्समवायेनोपस्थिताकाशवारणाय वृत्त्या प्रकृत्यर्थत्वस्यावश्यकत्वात्। अथ प्रत्ययप्राग्वर्त्तिपदजन्योप-स्थितिविशेष्यत्वं प्रकृत्यर्थत्वमिति चेन्न गामानयति कृष्णोद-ण्डेनेत्यत्र कृष्णे तृतीयार्थान्वयप्रसङ्गात्। अथ समस्यमान-पदार्थबोधकत्वं समासोत्तरविभक्तेः कल्प्यतइति चेन्न अक्लृप्त-कल्पनां क्लृप्तव्युत्पत्तित्यागञ्चापेक्ष्य समुदायशक्तिकल्पनस्यैव युक्तत्वादिति दिक्। अपि च समासे विशिष्टशक्त्यस्वीकारे राजपुरुषश्चित्रगुः नीलोत्पलमित्यादौ सर्व्वत्रानन्वयप्रसङ्गः।

राजपदादेः सम्बन्धिनि लक्षणायामपि तण्डुलः पचतीत्यादौ कर्म्मत्वादिसंसर्गेण तण्डुलादेः पाकादावन्वयवारणाय प्रातिपदिकार्थप्रकारकबोधं प्रति विभक्तिजन्योपस्थितेर्हेतुताया आवश्यकत्वात् पुरुषादेस्तथात्वाभावात्। तण्डुलः शुभ्रइत्यादौ च प्रातिपदिकार्थकप्रथमार्थौ तण्डुलादेस्तस्य च शुक्ले अभेदेनैवान्वयः। शुभ्रेण तण्डुलेनेत्यादौ च विशेषणविभक्तिरभेदार्था पार्ष्णिकोवान्वय इति नातिप्रसङ्गः। तथा च समासे परस्परमन्वयासम्भवादावश्यिकैव समुदायस्य तादृशे विशिष्टार्थे शक्तिः। किञ्च राजपुरुषइत्यादेः सम्बन्धिनि सम्बन्धे वा लक्षणा। नाद्यः राज्ञः पुरुषइति विवरण विरोधात् समानार्थकवाक्यस्यैव विग्रहत्वात्। अन्यथा तस्माच्छक्तिनिर्णयोन स्यात्। नान्त्यः राजसम्बन्धरूपः पुरुषइति बोधप्रसङ्गात् विरुद्धविभक्तिरहितप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरित्यादि प्रपञ्चितं वैयाकरणभूषणे। अतएव "वषट्कर्त्तुः प्रथमभक्ष" इत्यत्र न भक्षमुद्दिश्य प्राथम्यविधानं युक्तम् एकप्रसरत्वभङ्गापत्तेरिति तृतीये, "अङ्गैः स्विष्टकृतं यजती"त्यत्राङ्गानुवादेन न त्रित्वविधानं युक्तम् एकप्रसरत्वभङ्गापत्तेरिति दशमे च निरूपितं सङ्गच्छते। सङ्गच्छते चारुणाधिकरणारम्भः। अन्यथा "अरुणया एकहायन्या पिङ्गाक्ष्या सोमं क्रीणाती"त्यत्रारुणपदवदितरयोरपि एकत्वादिगुणमात्रवाचकतया अमूर्त्तत्वात् क्रीणातौ करणत्वासम्भवस्य तुल्यत्वादारुण्यस्यैव वाक्याङ्गदशङ्काया असम्भ-

वादिति प्रपञ्चितं भूषणे। तस्मात्समासशक्तिपक्षो जैमिनीयैरवश्याभ्युपेय इत्यास्तां विस्तरः॥ ३३॥

राजपुरुष इत्यादौ राजा चासौ पुरुषश्चेत्येव विग्रहः। चित्रगुरित्यादौ च चित्राणां गवामयमित्येव समानार्थानुरोधात्। यद्यपि प्रथमान्तानामेव बहुव्रीहिरिति" शेषोबहुव्रीहिरिति सूत्राल्लभ्यते इति प्रथमान्तं पक्षे वाक्यं चित्रागावोयस्येत्येवं सम्भवत्येव। षष्ठीति समासविधानाद्राज्ञः पुरुषइति च पक्षे वाक्यम्। तथापि तस्य न विग्रहत्वम् भिन्नार्थत्वात् किन्तूक्तस्यैवेति मीमांसकाः। तान् प्रसङ्गान्निरस्यति।

आख्यातं तद्धितकृतोर्यत्किञ्चिदुपदर्शकम्।
गुणप्रधानभावादौ तत्र दृष्टोविपर्ययः॥ ३४॥

तद्धितकृतोर्यत्किञ्चिदर्थबोधकम् विवरणमाख्यातं तत्र विपर्ययोदृष्टः। तथा हि। आक्षिकः कुम्भकार इत्यत्राक्षकरणकव्यापाराश्रयः कुम्भोत्पत्त्यनुकूलव्यापाराश्रय इति बोधः। अक्षैर्दीव्यति कुम्भं करोतीत्यत्राक्षकरणिका देवनानुकूला भावना कुम्भोत्पत्त्यनुकूला भावनेति बोधः। कृत्प्रत्यये कारकाणामाख्याते च भावनायाः प्राधान्यं वदतोमीमांसकस्यापीति गुणप्रधानभावांशव्यत्यासो न विवरणत्वबाधकइति नात्र पाक्षिकस्य चित्रागावोयस्येत्यादेर्विग्रहत्वे बाधकमस्तीति भावः॥ ३४॥

नन्वस्तूक्तरीत्या सर्वत्र समासे शक्तिरस्तु च तथा विग्रहस्तथापि षष्ठीतत्पुरुषकर्मधारययोः शक्तिमत्त्वाविशेषानि-

षादस्थपत्यधिकरणसिद्धान्तसिद्धिर्न स्यात् इत्यत आह ।

पर्यवस्यच्छाब्दबोधाविदूरप्राक्क्षणस्थिते ।
शक्तिग्रहेऽन्तरङ्गत्ववहिरङ्गत्वचिन्तनम् ॥ ३५ ॥

पर्य्यवस्यंश्चासौ शाब्दबोधश्च तस्मादविदूरश्चासौ प्राक्-क्षणश्च । तदानीन्तनलाघवमादायाधिकरणाविरोधइत्यर्थः । अयं भावः निषादस्थपतिपदं समासशक्तिपक्षे निषादरूपे निषादानाञ्च स्थपतौ निषादस्वामिके पुरुषान्तरे चेत्येवं सर्व्वत्र शक्तत्वान्नानार्थकम् । तथा च "नानार्थे तात्पर्य्याद्विशेषावगति"रिति न्यायेन तत्कल्पनायां पदद्वये पूर्व्वोपस्थितार्थे एवोपस्थित्यादिलाघवात् तत्कल्पनमिति । परेषामपि सति तात्पर्य्ये यष्टीः प्रवेशयेतिवल्लक्षणायादुर्व्वारत्वात्तात्पर्य्यमेव कल्पकोटौ अवशिष्यतइति दिक् ॥ ३५ ॥

इति वैयाकरणभूषणसारे समासशक्तिनिरूपणम् ।

शक्तिप्रसङ्गादस्याः स्वरूपमाह ।

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।
अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ॥ ३६ ॥

इन्द्रियाणां चक्षुरादीनां स्वविषये चाक्षुषादिषु घटादिषु यथानादिर्योग्यता तदीयचाक्षुषादिकारणता तथा शब्दानामपि अर्थैः सह तद्बोधकारणतैव योग्यता सैव शक्तिरित्यर्थः । ननु न बोधकारणत्वमनादिभूतं शक्तिः आधुनिकदेवदत्तादिपदे तदभावात् अन्यथा पित्रादिसङ्केताज्ञा-

नेऽप्यन्वयबोधप्रसङ्गः लाक्षणिकातिव्याप्तेश्चेति सङ्केतज्ञान-मपि हेतुर्वाच्यः। तथाचावश्यकत्वात्स एव शक्तिरस्तु स चाधुनिके पित्रादेर्गवादौ चेश्वरस्येति चेत् अत्रोच्यते सङ्केतोन स्वरूपेण हेतुः अगृहीतशक्तिकादर्थबोधप्रसङ्गात्। नापि सामान्यतोज्ञातः प्रमेयत्वादिना तज्ज्ञानेऽपि बोधप्रसङ्गात्। नापि सङ्केतत्वेन तज्ज्ञानं हेतुः गवादिपदेष्वीश्वरादेः सङ्केतत्वेन तज्ज्ञानशून्यानां लौकिकमीमांसकादीनां तदर्थबोधजनकत्वग्रहवतामेव बोधेन व्यभिचारात्। न चार्थधीजनकतावच्छेदकत्वेन तज्ज्ञानं हेतुः ततोऽपि लाघवेनार्थधीजनकत्वेनैव हेतुतायामस्मत्पक्षसिद्धेः। न चाधुनिकदेवदत्तादौ सङ्केतज्ञानादेव बोधेनास्य व्यभिचारः। तत्रापीदं पदमेनमर्थं बोधयत्वितीच्छाग्रहे पदे तदर्थबोधकत्वस्यावगाहनेन व्यभिचाराभावात्। नच स्वातन्त्र्येण बोधकताज्ञानं कारणं वाच्यम् अन्यथा नेदं तद्धीजनकमिति जानतोऽस्माच्छब्दादयमर्थो बुद्धोऽनेनेति जानतस्तद्ग्रहापत्तेरिति वाच्यं नेदं तद्धीजनकमिति ग्रहवतोबाधेन पदे परग्रहं जानतोपि तद्ग्रहासम्भवात्। अन्यथा भ्रान्तिज्ञस्यापि भ्रान्तत्वापत्तेरिति। इदञ्चार्थधीजनकत्वं पित्रादिसङ्केतज्ञानात् गृह्यते अतस्तज्ज्ञानात्पूर्व्वं न बोधः। नापि लाक्षणिकोच्छेदापत्तिरिष्टत्वात् शक्तिग्राहकव्यवहारस्य मुख्यलक्ष्यसाधारण्यात्। किञ्च प्रत्यक्षादिजन्योपस्थितेः शाब्दबोधानङ्गत्वात् शाब्दबोधं प्रति शक्तिजन्योपस्थितेर्ल-

क्षणाजन्योपस्थितेश्च कारणत्वं वाच्यम्। तथा च कार्य्य कारणभावद्वयकल्पने गौरवं स्यात्। अस्माकं पुनः शक्तिजन्योपस्थितत्वेनैव हेतुतेति लाघवम्। अपि च लक्षणावृत्तिस्वीकारे कार्य्यकारणभावस्य प्रत्येकं व्यभिचारः। शक्तिजन्योपस्थितिं विनापि लक्षणाजन्योपस्थितितः शाब्दबोधात्। न चाव्यवहितोत्तरत्वसम्बन्धेन तत्तदुपस्थितिमत्त्वं कार्य्यतावच्छेदकं तत्तदुपस्थितित्वञ्च कारणतावच्छेदकम् अनन्तकार्य्यकारणभावप्रसङ्गात्। किञ्च पदार्थोपस्थितिं प्रत्यपि शक्तिज्ञानत्वेन लक्षणाज्ञानत्वेन च हेतुतेति व्यभिचारो गौरवञ्च प्राग्वदेव द्रष्टव्यम्। नचेदं पदमेतदर्थबोधकमिति शक्तिज्ञानकार्य्यकारणभावकल्पनेऽपि तत्तदर्थभेदेनानेककार्य्यकारणभावकल्पने गौरवम् तवापि समानम् परस्परव्यभिचारवारणायाव्यवहितोत्तरत्वघटितत्वे च सुतरामिति वाच्यम्, शक्तिभ्रमानुरोधेन तत्तत्पदतत्तदर्थभेदेन कार्य्यकारणभावानन्त्यस्य तवापि साम्यात्। लक्षणाकार्य्यकारणभावकल्पनागौरवं परं तवातिरिच्यते। अथ वृत्तिजन्योपस्थितित्वेनैव शाब्दबोधहेतुता वृत्तिज्ञानत्वेन च पदार्थोपस्थितिकारणतेत्येवं मया वाच्यमिति चेन्न शक्तिलक्षणान्यतरत्वस्य शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थसम्बन्धत्वस्य वा वृत्तित्वस्य कारणतावच्छेदकत्वात् शक्तित्वमपेक्ष्य गौरवात् शाब्दबोधहेतुतावच्छेदकपदार्थोपस्थितिहेतुवृत्तेरज्ञाने तद्घटितकार्य्यकारणभावग्रहस्यासम्भवात्।

अथ ममापि शक्तिज्ञानत्वेनैव हेतुता शक्यसम्बन्धरूपलक्षणायां शक्तेरपि प्रवेशादिति चेन्न। शक्तिज्ञानपदार्थोपस्थित्योः कार्य्यकारणभावे समानविषयत्वस्यावश्यकत्वात्। अन्यथा गङ्गातीरयोः सम्बन्धाग्रहवतो गङ्गापदशक्तिं जानतोपि गङ्गायां घोष इति वाक्यात्तीरबोधप्रसङ्गः शक्तिज्ञानस्य हेतोः सत्त्वात्। अपिच घटमानयेति वाक्यं हस्तिनञ्च स्मरतो घटपदादिभ्योघटादेः गजाद्धस्तिपकस्य च समूहालम्बनस्मरणवतो घटानयनवद्धस्तिपकस्यापि शाब्दबोधापत्तिः समूहालम्बनरूपायां पदार्थोपस्थितौ पदजन्यत्व सत्त्वात्। तथा च विषयतया शाब्दबोधं प्रति तदंशविषयकवृत्तिजन्योपस्थितिर्हेतुरिति वाच्यम् एवञ्च लक्षणाया अपि शक्तिज्ञानत्वेन हेतुत्वमसम्भवीति। एतेन शक्तिप्रयोज्यैवोपस्थितिर्हेतु रिति न लक्षणाज्ञाने कार्य्यकारणभावान्तरं ममापीति परास्तम् प्रयोज्यत्वस्यानतिप्रसक्तस्य दुर्व्वचत्वाच्चेत्यादि विस्तरेण प्रपञ्चितं भूषणे॥ ३६॥

नन्वेवं भाषादितोबोधदर्शनाद्बोधकतारूपा शक्तिस्तत्रापि स्यात् तथा च साधुतापि स्यात्। शक्तत्वस्यैव साधुताया व्याकरणाधिकरणे प्रतिपादनादित्याशङ्कां द्विधा समाधत्ते। नापभ्रंशे शक्तिनिषेध

असाधुरनुमानेन वाचकः कैश्चिदिष्यते।
वाचकत्वाविशेषे वा नियमः पुण्यपापयोः॥ ३७॥

(असाधुः अनुमानेन)साधुशब्दमनुमाय वाचकः बोधकः

गम्यादि:

केश्चिदिष्यते । तथा च लिम्पिवत्तेषां साधुस्मरणएवोपयोगो नतु साक्षात्तद्वाचकत्वमतोन साधुत्वमिति भावः । उक्तं हि वाक्यपदीये । ..

ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः ।
तादात्म्यमुपगम्यैव शब्दार्थस्य प्रकाशकाः ।
न शिष्टैरनुगम्यन्ते पर्य्याया इव साधवः ।
न यतः स्मृतिशास्त्रेण तस्मात्साक्षादवाचकाः ।
अम्बाम्बेति यथा बालः शिक्षमाणः प्रभाषते ।
अव्यक्तं तद्विदां तेन व्यक्ते भवति निर्णयः ।
एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते ।
तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते इति ।

नन्वपभ्रंशानां साक्षाद्वाचकत्वे किं मानम् शक्तिकल्पकव्यवहारादेस्तुल्यत्वादिति चेत्तत्तद्देशभेदभिन्नेषु तेषु तेषु शक्तिकल्पने गौरवात् । नच पर्य्यायतुल्यता शङ्क्या तेषां सर्व्वदेशेष्विकत्वाद्विनिगमनाविरहेण सर्व्वत्र शक्तिकल्पना न हि अपभ्रंशे तथा, अन्यथा भाषाणां पर्य्यायतया गणनापत्तेः । एवञ्च शक्तत्वमेवास्तु साधुत्वमिति नैयायिकमीमांसकादीनां मेतेनैव द्रष्टव्यम् । इदानीं स्वमतमाह । वाचकत्वाविशेषे वेति । अयं भावः । अपभ्रंशानामशक्तत्वे ततोबोधएव न स्यात् । नच साधुस्मरणात्ततो बोधः तानविदुषां पामराणामपि बोधात् तेषां साधोरबोधाच्च । नच शक्तिभ्रममात्तेभ्योबोधः । बोधकत्वस्याबाधेन तद्ग्रहस्याभ्रमत्वात् ।

ईश्वरेच्छा शक्तिरिति मतेऽपि सम्भावितविषयित्वात्तस्या बाधाभावात्। शक्तेः पदपदार्थविशेषघटिताया भ्रमासम्भावाच्चेति। उक्तञ्च वाक्यपदीये।

पारम्पर्य्यादपभ्रंशा विगुणेष्वभिधातृषु।
प्रसिद्धिमागता येषु तेषां साधुरवाचकः।
दैवी वाग्व्यवकीर्णेयमशक्तैरभिधातृभिः।
अनित्यदर्शिनान्त्वस्मिन्वादे बुद्धिविपर्य्ययइति।

(अवाचकः) अबोधकः (बुद्धिविपर्य्ययः) एते एव वाचका नान्ये इति विपर्य्यय इत्यर्थः। किञ्च विनिगमनाविरहाद्भाषायामपि शक्तिः। नच तासां नानात्वं दोषः। संस्कृतवन्महाराष्ट्रभाषायाः सर्व्वत्रैकत्वेन प्रत्येकं विनिगमनाविरहतादवस्थ्यात्। किञ्चानुपूर्व्वी पदेऽवच्छेदिका सा च पर्य्यायेष्विव भाषायामप्यन्यान्यैवेति कस्तयोर्विशेषइति विभाव्यं सूरिभिः। तथा च संस्कृतवद्भाषायाः सर्व्वत्रैकत्वेन प्रत्येकं शब्दाः शक्ताएव। नच पर्य्यायतया भाषाणां गणनापत्तिः साधूनामेव कोषादौ विभागाभिधानात्। नन्वेवं साधुता तेषां स्यादित्यत आह। नियमइति। पुण्यजननबोधनाय साधूनां, साधुभिर्भाषितव्यमिति विधिः पापजननबोधनाय नासाधुभिरिति निषेधः। तथा च पुण्यजननयोग्यत्वं साधुत्वम्। पापजननयोग्यत्वमसाधुत्वम्। तत्र जनकतावच्छेदिका च जातिः। तज्ज्ञापकञ्च कोषादि व्याकरणादि च। एवमेव च राजसूयादेर्ब्राह्मणे फलाजनकत्ववत्स्वादिशब्दानां

नाम्नादौ साधुत्वमिति सङ्गच्छते। आधुनिकदेवदत्तादिनाम्नामपि द्व्यच्चरमित्यादिभाष्येण व्युत्पादितत्वात्साधुत्वम्। एवञ्च यः शब्दोयदर्थे व्याकरणे व्युत्पादितः स तत्र साधुरिति पर्य्यवसितम्। गौणानां गुणे व्युत्पादनात्तत्पुरस्कारेण प्रवृत्तौ साधुत्वमेव। आधुनिकलाक्षणिकानान्त्वसाधुत्वमिष्टमेव। अतएव ब्राह्मणाय देहीत्यर्थे ब्राह्मणं देहीत्यादिकं लक्षणयापि न साधुइत्यादि विस्तरेण प्रपञ्चितं भूषणे॥ ३७॥

अतिरिक्तशक्तिग्रहोपायमाह ।

सम्बन्धिशब्दे सम्बन्धो योग्यता प्रति योग्यता ।
समयाद्योग्यतासंविन्मातापित्रादियोग्यवत् ॥३८॥

(सम्बन्धः)विषयः (योग्यतां प्रति) सम्बन्धिशब्दं प्रति योग्यताविषय इति समयात् योग्यतासंवित् शक्तिग्रहः घटपदमत्र योग्यमेतत्सम्बन्धीति व्यवहारात्सा ग्राह्येत्यर्थः॥ ३८॥

इति वैयाकरणभूषणसारे शक्तिनिर्णयः ।

नञर्थमाह ।

नञ्समासे चापरस्य प्राधान्यात्सर्वनामता।
आरोपितत्वं नञ्द्योत्यं नह्यसोऽप्यतिसर्ववत् ॥३९॥

नञ्समासे अपरस्य उत्तरपदार्थस्य प्राधान्यात्सर्वनामता सिध्यतीति शेषः। अतएव आरोपितत्वमेव नञ्-

द्योत्यमित्यभ्युपेयमिति शेषः । अयं भावः असर्व्व इत्यादावारोपितः सर्व्वइत्यर्थे सर्व्वशब्दस्य प्राधान्याबाधात्सर्व्वनामता सिद्ध्यति । अन्यथा अतिसर्व्वइत्यत्रेव सा न स्यात् । घटोनास्तीत्यादावभावविषयकबोधे तस्य विशेष्यतायाएव दर्शनात् । अस्मद्रीत्या च स आर्थोबोधो मानसः । तथाचासर्वस्मै इत्याद्यसिद्धिप्रसङ्गइति । अत्र चारोपितत्वमारोपविषयत्वम् आरोपमात्रमर्थो विषयत्वं संसर्गइति निष्कर्षः । द्योत्यत्वोक्तिर्निपातानां द्योतकत्वमभिप्रेत्य ॥ ३९ ॥

घटोनास्ति अत्राह्मण इत्यादावारोपबोधस्य सर्व्वानुभवविरुद्धत्वात्पचान्तरमाह ।

अभावोवा तदर्थोऽस्तु भाष्यस्य हि तदाशयात् ।
विशेषणं विशेष्योवा न्यायतस्त्ववधार्य्यताम् ॥ ४० ॥

तदर्थोनञर्थः । अर्थपदं द्योत्यवाच्यत्वपक्षयोस्साधारण्येन कीर्त्तनाय । भाष्यस्येति । तथा च नञ्सूत्रे महाभाष्यम् । निवृत्तपदार्थकइति । निवृत्तं पदार्थोयस्य नपुंसके भावे क्त इति क्तः अभावार्थकइत्यर्थः । यत्तु निवृत्तः पदार्थोयस्मिन्नित्यर्थः सादृश्यादिनाध्यारोपितब्राह्मण्यः क्षत्रियादयोऽर्था यस्येत्यर्थइति कैयटः तन्न आरोपितब्राह्मण्यस्य क्षत्रियादेरनञ्वाच्यत्वात् । अन्यथा सादृश्यादेरपि वाच्यतापत्तेः । यत्तु

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिता इति ।

पठिता अब्राह्मणः अपापम् अनश्वः अनुदरा कन्या अपशवोवा अन्ये गोऽश्वेभ्यः अधर्म इत्युदाहरन्ति तत्त्वार्थिकार्थमभिप्रेत्येति स्पष्टमन्यत्र। विशेषणमिति प्रतियोगिनीति शेषः। तथाचा सर्व्वपदे सर्व्वनामसंज्ञा। "अनेकमन्यपदार्थे" "सेव्यतेऽनेकयासन्नतापाङ्गया" इत्यादावेकशब्दार्थप्राधान्यादेकवचननियमः। अब्राह्मण इत्यादावुत्तरपदार्थं प्राधान्यात्तत्पुरुषत्वम्। अत्वं भवसि अनहं भवामीत्यादौ पुरुषवचनादिव्यवस्था चोपपद्यते अन्यथा त्वद्भावोमद्भावइतिवद्भावांशे युष्मदस्मदोरन्वयेन युष्मत्सामानाधिकरण्यस्य तिङ्व्वसत्त्वात्पुरुषव्यवस्था न स्यात्। अस्मन्मते च भेदप्रतियोगित्वद्भिन्नाश्रयिका भवनक्रियेत्यन्वयात्सामानाधिकरण्यं नानुपपन्नमिति भावः। विशेष्योवेति प्रतियोगिनीति शेषः। अयं भावः। गौणत्वेऽपि नञ्समासे "एतत्तदोः सुलोपोऽकोरनञ्समासे हलीति" ज्ञापकात्सर्व्वनामसंज्ञा नानुपपन्ना। असः शिव इत्यत्र सुलोपवारणायानञ्समासइति हि विशेषणम्। नच तत्र तच्छब्दस्य सर्व्वनामतास्ति गौणत्वात्। अकोरित्यकच्व्यावृत्त्या सर्व्वनाम्नोरेव तत्र ग्रहणलाभात्तथाचानञ्समासइति ज्ञापकं सुवचम्। अनेकमन्यपदार्थे इत्यादावेकवचनं विशेष्यानुरोधात्। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यतोऽनुवर्त्तमानसुब्ग्रहणात् विशेष्यमेकवचनान्तमेव। किञ्चानेकशब्दात् द्विवचनोपादाने बहूनां, बहुवचनोपादाने

द्वयोःबहुव्रीहिर्न सिध्येदित्युभयसंग्रहायैकवचनं जात्यभिप्रायमौत्सर्गिकं वा सेव्यतेऽनेकयेत्यत्रापि योषयेति विशेष्यानुरोधात्प्रत्येकं सेवनान्वयबोधनाय चैकवचनं न त्त्तरपदार्थप्राधान्यप्रयुक्तम् । अतएव पतन्त्यनेके जलधेरिवोर्मयइत्यादिकमपि सूपपादम् । अत्वं भवसीत्यादौ युष्मदस्मद्भिन्ने लक्षणा नञ् द्योतकः तथा च भिन्ने न युष्मदर्थेन तिङः सामानाधिकरण्यात्पुरुषव्यवस्था । त्वद्भिन्नाभिन्नाश्रयिका भवनक्रियेति शाब्दबोधः । एवं त्वंनपचसि इत्यत्र त्वद्भिन्नाश्रयकपाकानुकूलभावनाभावः । घटोनास्तीत्यत्र घटाभिन्नाश्रयकास्तित्वाभाव इति रीत्या बोधः असमस्तनञः क्रियायामेवान्वयात् । सचाभावोऽत्यन्ताभावत्वान्योन्याभावत्वादिरूपेण शक्यः तत्तद्रूपेण बोधादित्याद्यन्यत्र बिस्तरः ॥ ४० ॥

इति वैयाकरणभूषणसारे नञर्थनिर्णयः ।

प्रादयोद्योतकाश्चादयोवाचका इति नैयायिकमतमयुक्तम् वैषम्ये वीजाभावादिति ध्वनयन्निपातानां द्योतकत्वं समर्थयते ।

द्योतकाः प्रादयो येन निपाताश्चादयस्तथा ।
उपास्येते हरिहरौ लकारोदृश्यते यथा ॥ ४१ ॥

येन हेतुना प्रादयोद्योतकास्तेनैव हेतुना चादयोनिपाता स्तथा द्योतका इत्यर्थः । अयं भावः । ईश्वरमनु-

भवतीत्यादावनुभवादिः प्रतीयमानो न धात्वर्थः भवतीत्यत्राप्यापत्तेः। नोपसर्गार्थः तथा सत्य प्रकृत्यर्थतया तत्राख्यातार्थानन्वयापत्तेः प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः अनुगच्छतीत्यादौ अनुभावादिप्रत्ययापत्तेश्च । न विशिष्टार्थः गौरवात् । तथा च धातोरेव विद्यमानत्वादि वाचकस्यास्तु लक्षणा उपसर्गस्तात्पर्य्यग्राहक इत्यस्तु । तथा च तात्पर्य्यग्राहकत्वमेव द्योतकत्वमिति । तच्च चादिष्वपि तुल्यम् चैत्रमिव पश्यतीत्यादौ सादृश्यविशिष्टं चैत्रपदलच्यम् इवशब्दस्तात्पर्य्यग्राहक इत्यस्य सुवचत्वादिति। स्वयं युक्त्यन्तरमाह । उपास्येते इति । अत्र ह्युपासना किमुपसर्गार्थः विशिष्टस्य धातुमात्रस्य वा । नाद्यः तथा सति स्वार्थफलव्यधिकरणव्यापारवाचकत्वरूपसकर्मकत्वस्यास्धातोरुपासनारूपफलवाचकत्वाभावादनापत्तेस्ततः कर्म्मणि लकारोन स्यात् । न द्वितीयः गौरवात् । तृतीये त्वागतं द्योतकत्वं तात्पर्य्यग्राहकत्वलाभात् इति भावः । दृश्यते इत्यत्र कर्म्मणीति शेषः ॥ ४१ ॥

तच्चादिष्वपि तुल्यमित्याह ।

तथान्यत्र निपातेऽपि लकारः कर्म्मवाचकः ।
विशेषणाद्ययोगोऽपि प्रादिवच्चादिके समः ॥ ४२ ॥

(अन्यत्र) साक्षात्क्रियते अलङ्क्रियते उरीक्रियते शिवइत्यादौ अत्रापि धातोस्तत्तदर्थे कर्म्मणि लकारसिद्ध्यर्थं तत्तदर्थवाचकत्वं वाच्यमित्युपसर्गवद्द्योतकत्वममीषामपी-

त्यर्थः। यद्यपि कृधातोः सकर्म्मकत्वमस्त्येव तथाप्येष्वर्थेषु सकर्म्मकता न स्यात्। अन्यथा वायुर्व्विकुरुते सैन्धवा-विकुर्व्वतइत्यत्रापि स्यादिति भावः। अथोपासनासाक्षा-त्कारादि निपातार्थोऽस्तु "साक्षात्प्रत्यक्षतुल्ययोरि"ति कोष-स्वरसात् तदनुकूलोव्यापारएव धात्वर्थोऽस्तु स्वस्वयुक्त-निपातान्यतरार्थफलव्यधिकरणव्यापारवत्त्वं सकर्म्मकत्वमपि सुवचमिति दृष्टान्तदार्ष्टान्तिकावयुक्ताविति नेदं साधक-मिति चेन्न। नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयासम्भ-वेननिपातधात्वर्थयोरन्वयासम्भवात्। अन्यथा तण्डुलः पच-तीत्यत्रापि कर्म्मतया तण्डुलानां धात्वर्थेऽन्वयापत्तेरिति। किञ्च प्रादीनां वाचकत्वे भूयान् प्रकर्षः कौटशोनिश्चय इति-वद्ब्रूयान् प्र, कौटशोनिरित्यपि स्यात्। अस्मन्मते प्रादेरनर्थ-कत्वान्न तदन्वय इत्यतएव द्योतकता तेषां स्यादिति। साधकान्तरमभिप्रेत्याह। विशेषणेति। शोभनः समुच्च-योद्रष्टव्य इतिवच्छोभन स्व द्रष्टव्यइत्यस्यापत्तेस्तुल्यसमाधे-यत्वादिति भावः। अपि च निपातानां वाचकत्वे प्रातिपदि-कार्थयोर्विना षष्ठ्यादिकं भेदेनान्वयासम्भवः। अन्यथा राजा पुरुष इत्यस्य राजसम्बन्धी पुरुषइत्यप्यापत्तेरित्य-भिप्रेत्याह आदीति। धवखदिरयोः समुच्चयइतिवद्धवस्य च खदिरस्य चेत्येव स्यादिति भावः॥ ४२॥

ननु प्रातिपदिकार्थयोरभेदान्वयबोधे विभक्तिजन्यो-पस्थिति र्हेतुरिति कार्य्यकारणभावो निपातातिरिक्तविषय-

एवेति नोक्तदोष इत्याशङ्क्याह ।

पदार्थः सदृशान्वेति विभागेन कदा च न ।
निपातेतरसङ्कोचे प्रमाणं किं विभावय ॥ ४३ ॥

(सदृशा) सदृशेन समानाधिकरणेनेति यावत् । (अन्वेति) अभेदेनेति शेषः । (विभागेन) असदृशेन । असमानाधिकरणेनेति यावत् । अयमर्थः समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्ति र्निपातातिरिक्तविषयेति कल्पने मानाभावोगौरवञ्च । अस्माकं निपातानां द्योतकत्वादन्वयएव नास्तीति नायं दोषः अतएव घटोनास्तीत्यादौ घटपदं तत्प्रतियोगिके लाक्षणिकमिति नैयायिकाः ॥४३ ॥

अपि च निपातानां वाचकत्वे काव्यादावन्वयोन स्यादिति साधकान्तरमाह ।

शरैरुस्रैरिवोदीच्यान् उद्धरिष्यन् रसानिव ।
इत्यादावन्वयोन स्यात्सुपाञ्च श्रवणं ततः ॥ ४४ ॥

अत्रोस्रसदृशैः शरैः रससदृशानुदीच्यानुद्धरिष्यन्नित्यर्थः । अयञ्चोस्रादिशब्दानां तत्सदृशपरत्वे इवशब्दस्य द्योतकत्वे सङ्गच्छते । अन्यथा प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिविरोधः । तथाहि । उस्रैरिति करणे तृतीया । न चोस्रोऽत्र करणम् इवार्थसदृशस्य करणत्वेऽपि तस्य करणत्वं नानेन बोधयितुं शक्यम् अप्रकृत्यर्थत्वात् । इवशब्दस्य चासत्वार्थकतया तदुत्तरतृतीयाया असम्भवात् । सम्भवे वा श्रवणप्रसङ्गात् । उस्रपदोत्तरतृतीयानन्वयप्रसङ्गा

चेत्याह। सुपां चेति। सुपां श्रवणञ्चेत्यर्थः। चकारादुत्त-पदोत्तरतृतीयानन्वयः समुच्चीयते इत्यादावित्यादिपदात्-"वागर्थाविव सम्पृक्तौ पार्व्वतीपरमेश्वरौ वन्दे" इत्यत्र वागर्थ-योर्वन्दिकर्मत्वाभावात्तदुत्तरद्वितीयाया अनन्वयः इवार्थस्य कर्म्मत्वान्वयबोधासम्भवश्च संगृह्यते। यदि च विशेषणविभक्ति रभेदार्था साधुत्वमात्रार्था वा तदापि इवशब्दस्य वाचक-त्वेऽनन्वयएव उत्तसदृशशराणां समानाधिकरणपदोपस्था-प्यतया भेदेनान्वयायोगात्। बाधादभेदेनापि न सः नह्युत्ता भिन्नसदृशाभिन्नः शरइत्यर्थो द्रष्टव्यः॥ ४४॥

ननु त्वन्मते अब्राह्मणइत्यादौ तत्पुरुषलक्षणाव्याप्त्या-पत्तिः पूर्वपदस्यानर्थकत्वेनैवोत्तरपदार्थप्राधान्याभावात् उपसर्गस्यार्थवत्त्वाभावेन प्रातिपदिकत्वाभावाद्विभक्तिश्च त-तोन स्यादित्यत आह।

नञ् समासे चापरस्य द्योत्यं प्रत्येव मुख्यता।
द्योत्यमेवार्थमादाय जायन्ते नामतः सुपः॥ ४५॥

नञ्समासादौ योत्तरपदप्रधानता सा द्योत्यमर्थमादा-यैव। तमेवार्थमादायार्थवत्त्वात्प्रातिपदिकत्वमित्यर्थः। वस्तुतः अव्ययादाप्सुपइति ज्ञापकात्सुबुत्पत्तिः। "निपात-स्यानर्थकस्येति" वार्त्तिकाद्वा प्रातिपदिकत्वम्। "कृत्तद्धित-समासा" श्चेत्यनुक्तसमुच्चयार्थकचकारेण निपातानां संग्रह-इति वा बोध्यम्। तस्मात् युक्तं निपातानां द्योतकत्वम्। उक्तञ्चाकृत्यधिकरणवार्त्तिके।

चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः ।
क्रियते संशयोत्पत्तेर्नोपसर्गनिपातयोः ॥
तयोरर्थाभिधाने हि व्यापारो नैव विद्यते ।
यदर्थद्योतकौ तौ तु वाचकः स विचार्य्यत इति ।
उपसर्गेण धात्वर्थो बलादन्यः प्रतीयते ।
प्रहाराहारसंहारविहारपरिहारवदिति ।

अत्रोपसर्गपदं निपातोपलक्षणम् । धातुपदं पदान्तरस्येति बोध्यम् ॥ ४५ ॥

नन्वन्वयव्यतिरेकाभ्यां निपातानां तदर्थवाचकत्वमेव युक्तम् बोधकतारूपशक्तेरबाधात् । किञ्चोक्तरीत्या पचतीत्यादौ धातोरेव कर्तृविशिष्टभावनायां लक्षणास्तु तात्पर्यग्राहकत्वमात्रं तिङादेः स्यादित्यरुचेः पक्षान्तरमाह ।

निपातानां वाचकत्वमन्वयव्यतिरेकयोः ।
युक्तं वा न तु तद्युक्तं परेषां मतमेव नः ॥ ४६ ॥

एवं धात्वर्थप्रातिपदिकार्थयोर्भेदेनान्वयबोधोन व्युत्पन्न इति निपातातिरिक्तविषयं, समानाधिकरणप्रातिपदिकार्थयोरभेदेनान्वय इत्यपि तथैवगत्या कल्पनीयमिति भावः । न त्विति । नैयायिकोक्तं प्रादिचाद्योर्वैषम्यमित्यर्थः । यत्तु सर्व्वेषां निपातानां वाचकत्वेऽर्थवत्सूत्रेणैव तेषां प्रातिपदिकत्वसम्भवात् "निपातस्यानर्थकस्येति" विधिर्वैयर्थ्यम् । सर्व्वेषां द्योतकत्वे चानर्थकस्येति व्यर्थम् । तथा च केचिद्द्योतकाः केचिद्वाचका इत्यभ्युपेयमिति तन्न एवं हि चादयो द्योतकाः

प्रादयोवाचका इति वैपरीत्यावारणात् । सर्व्वथानर्थकानां पादपूरणमात्रार्थमुपात्तानां संग्रहाय वार्त्तिकारम्भस्य कैयटादौ स्पष्टत्वात् तस्य प्रत्याख्यातत्वाच्च । परेषामिति बहुवचनं मीमांसकसंग्रहाय । केवलचशब्दात् समुच्चयाबोधाच्चकारश्रवणे तद्बोधाच्चकारएव तद्वाचकोन द्योतकः । किञ्च द्योतकत्वे पदान्तराणां तत्र शक्तिः कल्प्या चकारादेर्द्योतकत्वशक्तिश्च कल्प्येति गौरवं स्यादिति हि समुच्चयाधिकरणे स्थितम् तदपि न युक्तमिति भावः । तथा हि अन्वयव्यतिरेकौ तात्पर्य्यग्राहकत्वेनाप्युपयुक्तौ घटादिपदानामेव समुच्चिते लक्षणा तात्पर्य्यग्राहकः प्रकरणादिवच्चादिरिति स्वीकारान्न शक्तिद्वयकल्पनापि । अस्माकं लक्षणाग्रहदशायां बोधात्तत्कार्य्यकारणभाव आवश्यकः एवं शक्तिग्रहस्यापीति पक्षद्वयेऽपि कल्प्यान्तराभावेन गौरवाभावादुभयमपि युक्तमित्यभिमतम् । अतएव

स वाचकोविशेषाणां सम्भवात् द्योतकोऽपि वेति ।

वाक्यपदीयं सङ्गच्छते । दर्शनान्तररीत्या वाचकत्वमेव द्योतकत्वमेव वेति नियमस्तु न युक्तइति ध्वयन्नाह सतमेव न इति ॥ ४६ ॥

पर्य्यवसितमुपसंहरन्नाह ।

निपातत्वे परेषां यत्तदस्माकमिति स्थितिः ।
व्यापकत्वाक्कृत्तायास्तवच्छेदकमिष्यते ॥ ४७ ॥

परेषां यन्निपातत्वम् असत्त्वार्थकत्वे सति चादिगण-

पठितत्वं शक्तिसम्बन्धेन निपातपदवत्त्वञ्चोपाधिर्जातिर्वा तदेवास्माकमपि । परन्तु सामान्यधर्म्मे प्रमाणानां पक्षपाताच्छक्तता द्योतकता वा तदवच्छेदेनैव कल्प्यत इति नैयायिकोक्तं प्रादिचाद्योर्वैषम्यमयुक्तमित्यर्थः । (व्यापकत्वात्) सामान्यत्वात् । शक्ततायाइत्युपलक्षणं द्योतकताया वेत्यपि द्रष्टव्यम् ॥ ४७ ॥

इति वैयाकरणभूषणसारे निपातानां द्योतकत्वादिनिर्णयः ।

भावप्रत्ययार्थमाह ।

कृत्तद्धितसमासेभ्योमतभेदनिबन्धनम् ।
त्वतलोरर्थकथनं टीकायां हरिणा कृतम् ॥४८॥

"कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानं भावप्रत्ययेनान्यत्र रूढाभिन्नरूपाव्यभिचरितसम्बन्धेभ्य" इति वार्त्तिकवचने मीमांसकादीनां भ्रममपाकुर्व्वन्नाह टीकायामिति भर्तृहरिणा महाभाष्यटीकायामित्यर्थः । त्वतलोरिति भावप्रत्ययमात्रोपलक्षणम् । अयमर्थः । समासादौ शक्तिः कल्प्यमाना राजादिसम्बन्धविशिष्टे कल्प्यतइत्युक्तम् । तथा च तदुत्तरभावप्रत्ययः सम्बन्धं वदतीत्यर्थः । एतदपि भेदः संसर्ग उभयं वेत्युक्तेषु भेदपक्षे न सम्भवतीत्यत आह मत भेदेति पक्षभेदेनेत्यर्थः । एवञ्च राजपुरुषत्वम् औपगवत्वं पक्तृत्वम् इत्यादौ स्वस्वामिभावसम्बन्धः । अपत्यापत्यवत्सम्बन्धः

क्रियाकारकभावसम्बन्धइत्यन्वयबोधः। औपगवादावव्यभिचरितसम्बन्धे तु अर्थान्तरवृत्तिस्तद्धित उदाहार्य्यः। दामोदरत्वं कृष्णसर्पत्वमित्यादौ जातिविशेषेण बोधादाह अन्यत्रेति रूढेरभिन्नरूपादव्यभिचरितसम्बन्धेभ्यस्त्वान्यत्रे-त्यर्थः। रूढ़िरुक्ता। द्वितीयं यथा शुक्लत्वम् अत्र तदस्यास्त्यस्मिन्निति "मतुपोगुणवचनेभ्यो मतुपोलुगिष्ट"इति लुप्तत्वात्तद्धितान्तत्वेऽपि घटः शुक्ल इत्यभेदप्रत्ययाद्गुणस्यैव प्रकारत्वेन भानं जायते तृतीये सतोभावः सत्तेति अत्र जाताविव प्रत्ययइति दिक्॥ ४८॥

दण्डीत्यादौ प्रकृत्यर्थविशिष्टद्रव्यमात्रवाचकता तद्धितस्येति वदन्तं मीमांसकम्मन्यं प्रत्याह।

अत्रार्द्धजरतीयं स्यात् दर्शनान्तरगामिनाम्।
सिद्धान्ते तु स्थितं पक्षद्वयं त्वादिषु तच्छृणु॥ ४९॥

(अत्र) भावप्रत्ययविषये। तथा हि दामोदरत्वं घटत्वमित्यादौ भावप्रत्ययस्य सम्बन्धानभिधायकत्वेन मीमांसकानां दण्डित्वमित्यादिष्वपि तदभिधानं न स्यात्। प्रकृतिजन्यबोधे प्रकारः प्रकृत्यर्थसमवेतोहि तदुत्तरभावप्रत्ययेनाभिधीयते। अन्यथा घटत्वमित्यत्र द्रव्यत्वादेर्द्दण्डित्वमित्यादौ दण्डादेश्च तदुत्तरभावप्रत्ययवाच्यतापत्तेः। नच तन्मते दण्डीत्यादिबोधे सम्बन्धः प्रकारः। यत्तु

यदा स्वसमवेतोऽत्र वाच्योनास्ति गुणोऽपरः।
तदा गत्यन्तराभावात्सम्बन्धोवाच्य आश्रितइति।

तत्र इत्यादेः सम्बन्धिवाचकत्वेनोपपत्तावगत्यभावात् । प्रपञ्चितं चैतदादावेव वैयाकरणभूषणे ननु तवापीदं वैषम्यं कथमित्यत आह सिद्धान्ते त्विति ॥ ४९ ॥

तौ पचावाह ।

प्रयोगोपाधिमाश्रित्य प्रकृत्यर्थे प्रकारताम् ।
धर्म्ममात्रं वाच्यमिति यद्वा शब्दपरा अमी ॥
जायन्ते तज्जन्यबोधप्रकारे भावसंज्ञिते ॥ ५० ॥

प्रयोगे उपाधिं निमित्तं प्रकृत्यर्थे प्रकारताम् प्रकारतया भासमानं धर्म्मं वाच्यतया आश्रित्य त्वादयो जायन्ते प्रकृतिजन्यबोधप्रकारस्त्वाद्यर्थइति यावत् । ननु घटत्वमित्यत्र प्रकारत्वात्तदुत्तरभावप्रत्ययेन घटत्वत्वस्यापि वाच्यता स्यादित्यत्रेष्टापत्तिमाह धर्म्ममात्रमिति नत्वत्र लघुगुरुविचारइत्यभिप्रायः तत्तद्व्यक्तिविशिष्टब्रह्मसत्ताया एव घटत्वघटत्वत्वादिरूपत्वात् ।

सम्बन्धिभेदात्सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ।
तां प्रातिपदिकार्थञ्च धात्वर्थञ्च प्रचक्षते ।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयइति वाक्यपदीयात् । उक्तञ्च "तस्य भावस्त्वतलाविति" सूत्रे वार्त्तिककारैः "यस्य गुणस्य भावाद्द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलाविति" । (यस्य गुणस्य) विशेषणतया भासमानस्य (भावात्) आश्रयत्वात् (द्रव्ये) विशेष्ये (शब्दनिवेशः) शब्द-

प्रवृत्तिः तस्मिन् वाच्ये त्वतलावित्यर्थः। तथा च रूपादिशब्देभ्योजातौ, शुक्लाणुदीर्घमहदादिभ्यो गुणे, पाचकादिशब्देभ्यः क्रियायां, घटादिशब्देभ्योजातौ, प्रत्ययः रूपादिशब्दानां जातिप्रकारकबोधजनकत्वात्। पाचकादिशब्दानां क्रियाप्रकारकबोधजनकत्वे तस्यां प्रत्ययः। संसर्गप्रकारकबोधजनकत्वमिति मते च संसर्गे इति व्यवस्था सूपपादेति भावः। तत्र जातिवाचकानां व्यक्तयएव शक्यतावच्छेदिकाः। तथा च घटत्वमित्यत्र घटवृत्तिरसाधारणोधर्म्म इत्यादि द्रष्टव्यम्। पक्षान्तरमाह यद्वेति "यद्वा सर्व्वे भावाः स्वेनार्थेन भवन्ति स तेषां भाव" इति वार्त्तिकोक्तौ यद्वाशब्दस्तत्सूचनप्रयोजनकोऽपि (भवन्ति) वाचकत्वेन प्रवर्त्तन्ते इति भावाः शब्दाः (स्वेन रूपेणार्थेन) (भवन्ति) प्रवर्त्तन्ते अतः (स तेषां भावः) प्रवृत्तिनिमित्तमित्यर्थः। अयं भावः। अर्थवच्छब्दोऽपि द्रव्ये प्रकारः हरिहरनलेक्ष्वाकुयुधिष्ठिरवशिष्ठादिशब्देभ्यस्तत्तद्वाच्यः कश्चिदासीदितिशब्दप्रकारकबोधस्य सर्व्वसिद्धत्वात्। अन्यथा वनौषधिवर्गादेर्नागरिकान् प्रत्यबोधकत्वापत्तेः। एवमेवाप्रसिद्धार्थकपदेष्वनुभवः सर्व्वसिद्धः नतु घटादिपदेष्विव तत्तज्जात्यादिरूपेण। तथा चोभयमवच्छेदकम्। यस्य तथा शक्तिग्रहस्तस्य जात्यादिरूपेणैवोपस्थितिः। पदप्रकारकः शक्तिग्रहस्तु विशिष्य नापेक्षितः किन्तु इदं पदं क्वचिच्छक्तं साधुपदत्वादित्यादिरूप एवापेक्ष्यते इति विशिष्याग्रहीतशक्तिकेभ्यस्तथैव

बोधः। तथा च शब्दोऽपि त्वप्रत्ययार्थइति प्रपञ्चितं भूषणे ॥ ५० ॥

इति वैयाकरणभूषणसारे त्वादिभावप्रत्ययार्थविचारः ।

साऽस्य देवतेत्यत्र देवताविशिष्टं देयं प्रत्ययार्थः । ऐन्द्री वैश्वदेवी इत्यादौ इन्द्रादेर्देवतात्वोपस्थापकान्तराभावात् तेन रूपेणोपस्थितये शक्तिकल्पनावश्यकत्वात् । अतएव

आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः ।
आमिक्षापदसान्निध्यात्तस्यैव विषयार्पणमिति ।
केवलाद्देवतावाची तद्धितोऽग्नेः समुच्चरन् ।
नान्ययुक्तोऽग्निदैवत्यं प्रतिपादयितुं क्षमइति च

मीमांसकैरप्युक्तमित्याशयेनाह ।

प्रत्ययार्थस्यैकदेशे प्रकृत्यर्थो विशेषणम् ।
अभेदश्चात्र संसर्ग आग्नेयादावियं स्थितिः ।
देवतायां प्रदेये च खण्डशः शक्तिरस्तु वा ॥ ५१ ॥

(एकदेशे) देवतारूपे । तच्च विशेषणमभेदेनेत्याह अभेदश्चेति । ननु देवतायाः प्रत्ययार्थैकदेशत्वान्न प्रकृत्यर्थस्य तत्राभेदेनाप्यन्वय इत्याशयेनाह देवतायामिति । तथा च पदार्थैकदेशतैव नास्तीति भावः ॥ ५१ ॥

नन्वग्न्यादिदेवस्य प्रकृत्यैव लाभान्न तत्र शक्तिः कल्प्या नच देवतात्वरूपेणोपस्थितये सा कल्प्यते प्रकृतेर्लक्षणयैव

तथोपस्थितिसम्भवात् । उपसर्गाणां द्योतकत्वनये प्रजपतीत्यत्र प्रकृष्टजपवदित्यभिप्रेत्याह ।

प्रदेय एव वा शक्तिः प्रकृतेस्त्वस्तु लक्षणा ।
देवतायां निरूढेति सर्वे पक्षा अमी स्थिताः ॥ ५२ ॥

नचैन्द्रं दधीत्यादौ द्रव्यस्य पदान्तराल्लाभात्कुतः पुनः प्रत्ययस्य तत्र शक्तिः कल्प्यतइति वाच्यम् पदान्तराश्रवणेऽपि तत्प्रतीतेः ऐन्द्रं दधीति सामानाधिकरण्याच्च । अन्यथाख्यातस्यापि कर्तृकर्मवाचित्वं न स्यात् । मीमांसकानां पुनः प्रत्ययस्य देवतात्वमेवार्थोऽस्तु । द्रव्यं पदान्तराल्लभ्यतएवेति आख्यातस्य कर्तृवद्वाचित्वं मास्त्विति कुतोन शक्यते वक्तुमिति दिक् । देवतायां देवतात्वरूपेण निरूढेति अनुपपत्तिज्ञानापूर्वं [illegible] वा [illegible] भावः ॥ ५२ ॥

अनयैव रीत्यान्यत्राप्यवधेयमित्याह ।

क्रीडायां णस्तदस्यास्तीत्यादावेषैव दिक् स्मृता ।
वस्तुतो वृत्तिरेवेति नात्रातीव प्रयत्यते ॥ ५३ ॥

"तदस्यां प्रहरणमिति क्रीड़ायां ण" इत्यत्र प्रहरणविशिष्टा क्रीड़ा प्रहरणक्रीड़ेतिक्रीड़ामात्रं वार्थः । आदिना "सोऽस्य निवासः" "सास्मिन् पौर्णमासीति" "तदस्यास्त्यस्मिन् इति मतुप्" इत्यादिकं संगृह्यते । वृत्तिमात्रेऽतिरिक्तशक्तेः "समर्थः पदविधि" रिति सूत्राल्लाभादुक्तोविचारः शास्त्रान्तरैः सह तद्गीत्यैवोक्तः आरोपितप्रकृतिप्रत्ययार्थमादाय

वा। वस्तुतो विविष्टशक्त्यैवार्थोपस्थितिरित्याह वस्तुत इति ॥ ५३ ॥

इति वैयाकरणभूषणसारे देवताप्रत्ययार्थनिर्णयः ।

वृत्तिप्रसङ्गात्तत्राभेदैकत्वसंख्या प्रतीयतइति सिद्धान्तं दृष्टान्तेनोपपादयति ।

अभेदैकत्वसंख्याया वृत्तौ भानमिति स्थितिः ।
कपिञ्जलालम्भवाक्येत्वित्वं न्यायाद्यथोच्यते ॥ ५४ ॥

संख्याविशेषाणामविभागेन सत्त्वम् अभेदैकत्वसंख्या । उक्तञ्च वाक्यपदीये ।

यथौषधिरसाः सर्वे मधुन्याहितशक्तयः ।
[illegible] संख्यां तां तादृशीं विदुरिति ।

परित्यक्तविशेषं वा संख्यासामान्यं तत् । उक्तञ्च

भेदानां वा परित्यागात्संख्यात्मा स तथाविधः ।
व्यापाराज्जातिभागस्य भेदापोहेन वर्त्तते ।
अगृहीतविशेषेण यथा रूपेण रूपवान् ।
प्रख्यायते न शुक्लादि भेदापोहस्तु गम्यते इति ।

अस्याः वृत्तौ समासादौ भानं न्यायसिद्धमिति शेषः । इति मतस्थितिर्वैयाकरणानाम् । अयं भावः । राजपुरुष इत्यादौ राज्ञोराज्ञोः राज्ञां वायं पुरुषइति जिज्ञासा जायते । विशेषजिज्ञासायां सामान्यरूपेण तत्प्रतीतिः शब्दादावश्यकी अतस्तस्यां शक्तिरिति । तस्याएकत्वेन प्रतीतौ न्यायमाह

कपिञ्जलेति। बहुत्वगणनायां त्रित्वस्यैव प्रथमोपस्थितत्वात् तद्रूपेणैव भानवदेकत्वस्य, सर्व्वतः प्रथमोपस्थितत्वमस्तीति भावः। वस्तुतस्तु जिज्ञासैव नानुभवसिद्धा। तथात्वे वा ज्ञानेच्छयोः समानप्रकारकत्वेन हेतुहेतुमद्भावात्तत्तद्रूपेणैव वाच्यता स्यादिति ध्येयम्॥ ५४॥

इति वैयाकरणभूषणसारे अभेदैकत्वसंख्यानिरूपणम्।

संख्याप्रसङ्गादुद्देश्यविधेययोः संख्याविवक्षाविवक्षे निरूपयति।

लक्ष्यानुरोधात्संख्यायास्तन्त्रातन्त्रे मते यतः।
पश्वेकत्वादिहेतूनामाश्रयणमनाकरम्॥ ५५॥

अहं समार्ष्टीत्यत्रोद्देश्यग्रहगतमेकत्वमविवक्षितमिति-वन्नास्माकमुद्देश्यविशेषणाविवक्षानियमः धातोरित्येकत्वस्य विवक्षितत्वात्।

उत्पद्येत समस्तेभ्यो धातुभ्यः प्रत्ययो यदि।
तदा सर्वं विशिष्येत द्वन्द्वोत्पन्नस्तुवर्थवदिति।

शब्दान्तराधिकरणे भट्टपादैरभिधानाच्च। "आर्द्धधातुकस्येड्वलादे"रित्यत्रानुवाद्यार्द्धधातुकविशेषणस्य वलादित्वस्य विवक्षितत्वाच्च। एवं पशुना यजेत इतिवत् विधेयविशेषणं विवक्षितम्, इत्यपि न "रदाभ्यां निष्ठातोनः पूर्व्वस्य च दः" इत्यत्र नकारद्वयविधानानापत्तेः। तथाच भिन्नइत्यत्र नकारद्वयलाभो न स्यात्। "आद्गुणः" इत्यत्रैकत्वविवक्षये-

वोपपत्तौ एकः पूर्व्वपरयोरित्येकग्रहणवैयर्थ्यापत्तेश्चेति भावः । शब्दार्थस्तु संख्याया लक्ष्यानुरोधात्तन्त्रातन्त्रे यतोमते अतः पक्षे कत्वाधिकरणोक्तहेतूनामाश्रयणं नास्मत्सिद्धान्तसिद्धमिति । आदिना ग्रहैकत्वसंग्रहः ॥ ५५ ॥

ननु विधेयविशेषणविवक्षा आवश्यकी । अन्यथा अनन्तनकाराद्यापत्तेः । एकः पूर्व्वपरयोरित्यत्रैकग्रहणञ्च स्थानिभेदादिवारणायेत्यभिप्रेत्याह ।

विधेये भेदकं तन्त्रमन्यतोऽनियमो न हि ।
ग्रहैकत्वादिहेतूनामाश्रयणमनाकरम् ॥ ५६ ॥

(भेदकम्) विशेषणम् (तन्त्रम्) विवक्षितम् विधेयविशेषणं विवक्षितमित्यस्तु तथाप्यन्यतः अनुवाद्यस्य नियमो नहि क्वचित्तन्त्रं क्वचिन्नेत्यर्थः । ग्रहैकत्वादौ योहेतुः वाक्यभेदादिस्तस्यात्राश्रयणमनाकरम् । एकत्वविशिष्टं धातुं वलादित्वविशिष्टमार्द्धधातुकञ्चोद्दिश्य प्रत्ययेड़ागमादेर्विधिसम्भवादिति भावः ॥ ५६ ॥

नन्वेवं भिन्नइत्यत्र नकारद्वयलाभेन स्यादित्यत आह ।

रदाभ्यां वाक्यभेदेन नकारद्वयलाभतः ।
क्षतिर्नैवास्ति तन्त्रत्वे विधेये भेदकस्य तु ॥ ५७ ॥

चकारसूचितं "निष्ठातस्य नः, पूर्वस्य दकारस्य च न इति" वाक्यभेदमादाय नकारद्वयलाभइत्यर्थः ॥ ५७ ॥

इति वैयाकरणभूषणसारे संख्याविवक्षानिर्णयः ।

क्त्वाप्रत्ययादेरर्थं निरूपयति।

अव्ययकृतइत्युक्तेः प्रकृत्यर्थे तुमादयः।
समानकर्तृकत्वादि द्योत्यमेषामिति स्थितिः ॥५८॥

तुमादयः तुमुन्नादयः (प्रकृत्यर्थे) भावे। आदिना क्त्वादेः संग्रहः। भावे इत्यत्र मानमाह अव्ययकृतइति। "अव्ययकृतो-भावे" इति वार्त्तिकादित्यर्थः। ननु "समानकर्तृकयोः पूर्व-काले" इत्यादिसूत्राणां का गतिस्तत्राह समानकर्तृकत्वा द्योति। अयं भावः भोक्तुं पचति भुक्त्वा व्रजतीत्यादावेक-वाक्यता सर्वसिद्धा भोजनपाकक्रिययोर्विशेषणविशेष्यभाव-मन्तरेणानुपपन्ना अन्यथा भुङ्क्ते व्रजतीत्यादावप्येकवाक्य-तापत्तेः। तथा च तयोर्विशेषणविशेष्यभावनिरूपकः संसर्गो जन्यत्वं सामानाधिकरण्यं, पूर्वोत्तरभावो व्याप्यत्व-ञ्चेत्यादिरनेकविधः। तथा च भोक्तुं पचति भुक्त्वा तृप्तः इत्यादौ भोजनजनिका पाकक्रिया, भोजनजन्या तृप्तिरिति बोधः। अतएव जलपानानन्तर्यस्य तृप्तौ सत्त्वेऽपि पीत्वा तृप्तइति न प्रयोगः। सामानाधिकरण्यस्यापि संसर्गत्वे-नार्थात्समानकर्तृकत्वमपि लभ्यम्। भुक्त्वा व्रजतीत्यादौ पूर्वो-त्तरभावः सामानाधिकरण्यञ्च संसर्गइति भोजनसमानाधि-करणा तदुत्तरकालिकी व्रजनक्रियेति बोधः। अधीत्य तिष्ठति, मुखं व्यादाय स्वपितीत्यादावध्ययनव्यादानयोरभा-वकाले अप्रयोगात् यदा यदास्य स्थितिः स्वापश्च तदा तदा-ध्ययनं मुखव्यादानञ्चेति कालविशेषावच्छिन्नव्याप्यत्वबोधा-

समानकर्तृकयोरर्थयोर्मध्ये पूर्वकालविशिष्टार्थवृत्तिधातोः क्त्वेत्यर्थः ॥
२ पूर्वं भुंक्ते पश्चाद् व्रजतीति त्वत्र क्त्वाप्रत्ययमाशंक्य स्वशब्देनोपात्तत्वा-
त्परिहृतं भाष्ये पूर्वशब्दस्य पूर्वकालार्थेन तु धातोस्तत्र इति
रितितद्दर्थी

भाष्यप्रतीकमादाय
व्याकोद्दापाना

इत्याप्यत्वं सामानाधिकरण्यञ्च संसर्गः । एवञ्चान्यलभ्यत्वाद्
सूत्रात्तेषां वाच्यत्वलाभ इति युक्तमव्ययकृतोभावे इति ।
एवञ्च प्रकृत्यर्थक्रिययोः संसर्गे तात्पर्यग्राहकत्वरूपं द्योत-
कत्वं क्त्वादीनाम् । अतएव "समानकर्तृकयोरिति" सूत्रे
स्वशब्देनोपात्तत्वान्नेति भाष्यप्रतीकमादाय पौर्वापर्यकाले
द्योत्ये क्त्वादिर्विधीयते न तु विषये इति भाव इति कैयटः ।
यत्तु समानकर्तृकयोरिति सूत्रात्समानकर्तृकत्वं क्त्वावाच्यम्
अन्यथौदनं पक्त्वाहं भोक्ष्ये इत्यत्र मयेति तृतीयाप्रसङ्गः ।
न चाख्यातेन कर्तुरभिधानान्नेति वाच्यम् भोजनक्रिया-
कर्तुरभिधानेऽपि पाकक्रियाकर्तुस्तदभावात् अनभिहिते
भवतीति पर्युदासाश्रयणात् । अतएव प्रासादे आस्ते इत्यत्र
प्रसादनक्रियाधिकरणस्याभिधानेऽप्यस्तिक्रियाधिकरणस्यान
भिधानात् सप्तमीति भाष्ये स्पष्टम् । तस्मात् क्त्वाप्रत्ययस्य
कर्तृवाचित्वमावश्यकमिति तन्न सूत्रात्तस्य वाच्यत्वालाभात् ।
समानकर्तृकयोः क्रिययोः पूर्वकाले क्त्वा इत्येव तदर्थात्
अन्यथा समानकर्तरीत्येव सूत्रन्यासः स्यात् । तृतीया-
पादनन्तु आख्यातार्थक्रियायाः प्रधानभूतायाः कर्तुरभि-
धानात्प्रधानानुरोधेन गुणे कार्यप्रवृत्तेर्न सम्भवति । उक्तञ्च
वाक्यपदीये ॥

प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक् ।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते ।
प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते ।

यथा गुणे तथा तद्वदनुक्तापि प्रतीयते इति।

किञ्चान्यथा कर्म्मणोऽपि क्त्वार्थतापत्तिः पक्वोदनो मया भुज्यतइत्यत्र द्वितीयायाः प्रकारान्तरेणावारणादित्यास्तां विस्तरः॥ ५८॥

इति वैयाकरणभूषणसारे क्त्वाद्यर्थनिर्णयः।

सिद्धान्तनिष्कर्षमाह।

वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः।
साधुशब्देऽन्तर्गता हि बोधका न तु तत्स्मृताः॥५९॥

यद्यपि वर्णस्फोटः पदस्फोटोवाक्यस्फोटः अखण्डपदवाक्यस्फोटौ वर्णपदवाक्यभेदेन त्रयो जातिस्फोटा इत्यष्टौ पक्षाः सिद्धान्तसिद्धा इति वाक्यग्रहणमनर्थकं दुरर्थकञ्च तथापि वाक्यस्फोटातिरिक्तानामन्येषामप्यवास्तवत्वबोधनाय तदुपादानम्, एतदेव ध्वनयति अतिनिष्कर्षइति। (मतस्थितिः) वैयाकरणानां महाभाष्यकारादीनाम्। तत्र क्रमेण सर्वान् तान् निरूपयन् वर्णस्फोटं प्रथममाह साधुशब्दे इति। साधुशब्दान्तर्गता वाचका न वेति विप्रतिपत्तिः। विधिकोटिरन्येषां, नेति वैयाकरणानां, साधुशब्दे पचति राम इत्यादिप्रयुज्यमानेऽन्तर्गतास्तिब्विसर्गादय एव (बोधकाः) वाचकाः तेषामेव शक्तत्वस्य प्राग्व्यवस्थापितत्वात्। न तु तैः स्मृताः लादयः स्वादयश्चेत्यर्थः॥ ५९॥

ये तु प्रयोगान्तर्गतास्तिब्विसर्गादयोन वाचकाः तेषां

निष्प्रयोजन... तदुपादाने ... स्फोटातिरिक्तानां ... मसंग्रहापत्ति... तिभावः

बहुत्वेन शक्त्यानन्त्यापत्तेः एधाञ्चक्रे ब्रह्मेत्यादावादेशलुगादेरभावरूपस्य बोधकत्वासम्भवाच्च । किन्तु तैः स्मृता लकाराः स्वादयश्च वाचकाः लत्वस्य जातिरूपतया शक्ततावच्छेदकत्वौचित्यात् अव्यभिचाराच्च आदेशानां भिन्नतया परस्परव्यभिचारित्वात् "लः कर्म्मणी" त्याद्यनुशासनानुगुणाच्च । न ह्यादेशेष्वर्थवत्ताबोधकमनुशासनमुपलभामहे इत्याहुः । तान् स्वसाधकयुक्तिभिर्निराचष्टे ।

व्यवस्थितेर्व्यवहृतेस्तद्धेतुन्यायतस्तथा ।
किञ्चाख्यातेन शक्ताद्यैर्लडेव स्मार्य्यते यदि ।
कथं कर्त्तुरवाच्यत्ववाच्यत्वे तद्विभावय ॥ ६० ॥

व्यवस्थानुरोधात्प्रयोगान्तर्गताएव वाचका न तु तैः स्मृता इत्यर्थः । तथा हि पचतीत्यादौ लकारमविदुषां बोधान्न तस्य वाचकत्वम् । नच तेषां तिङ्क्षु शक्तिभ्रमाद्बोधः, तस्य भ्रमत्वे मानाभावात् आदेशिनामपि तत्तद्वैयाकरणैः स्वेच्छया भिन्नानामभ्युपगमात् कः शक्तः कोनेति व्यवस्थानापत्तेश्च । सर्वेषां शक्तत्वे गौरवं व्यभिचारश्चास्त्येव । आदेशानां प्रयोगान्तर्गततया नियतत्वाद् युक्तं तेषां शक्तत्वम् । तथाचादेशिस्मरणकल्पना नेति लाघवम् । साधकान्तरमाह व्यवहारस्तावच्छक्तिग्राहकेषु मुख्यः । स च श्रूयमाणः तिङादिष्वेवेति तएव वाचका इत्यर्थः । किञ्च तद्धेतुन्यायतइति । लकारस्य बोधकत्वे, सु० लइत्यतोऽपि बोधः स्यात् । तादृशबोधे पचतीति समभिव्याहारोऽपि कारण-

मिति चेत्तर्ह्यविश्वकत्वादस्तु तादृशसमभिव्याहारस्यैव वाचकत्वशक्तिः। अन्यथा लकारस्य वाचकत्वं समभिव्याहारस्य कारणत्वञ्चेत्युभयं कल्प्यमिति गौरवं स्यात्। तथा च तादृशसमभिव्याहारः समभिव्याहृता वर्णा वेत्यत्र विनिगमकाभावात्प्रयोगान्तर्गता वर्णा वाचका इति सिध्यतीति भावः। सति च लकारस्यैव वाचकत्वे कृत्तिङोः कर्तृभावनावाचकत्वव्यवस्था त्वत्सिद्धा न स्यादित्याह किञ्चेति आदेशानां वाचकत्वे तिङ्त्वेन भावनायां, शानजादिना कर्त्तरि शक्तिरित्युपपद्यते विभागइति भावः। नच शानजादौ कृतिर्लकारार्थः आश्रयः शानजर्थइत्यस्तु "कर्त्तरि कृदि" त्यनुशासनादिति शङ्क्यम् स्वान्यर्थेन निराकाङ्क्षतया शानजादौ कर्त्तरीत्यस्याप्रवृत्तेः। अन्यथा घञादावपि प्रवर्त्तेत ॥ ६० ॥

देवदत्तः पचमानइत्यादिसामानाधिकरण्यानुरोधाच्छानचः कर्त्ता वाच्यः स्यादित्याशङ्क्याह।

तरबाद्यन्ततिङ्क्ष्वस्ति नामता कृत्स्विव स्फुटा।
नामार्थयोरभेदोऽपि तस्मात्तुल्योऽवधार्य्यताम् ॥६१॥

पचतितरां मैत्रः पचतिकल्पं मैत्रइत्यादिषु नामार्थत्वाभेदान्वययोः सम्भवएवेति कर्तृवाचकता स्यादिति भावः। नच पचतिकल्पमित्यत्र सामानाधिकरण्यानुरोधात्कर्त्तरि लक्षणा, पचमान इत्यत्राप्याप्रवृत्तेरिति। लः कर्म्मणीत्यनुशा-

सनश्च लाघवाय कल्पिते लकारे कर्त्रादिवाचित्वं कल्पितमादायेत्युक्तम् ॥ ६१ ॥

इति वर्णस्फोटनिरूपणम् ।

अथादेशा वाचकास्तेत्पदस्फोटस्ततः स्फुटः ।

एवमादेशानां वाचकत्वे सिद्धे पदस्फोटोऽपि सिद्धएवेत्याह अथेत्यादि । (आदेशाः) तिब्विसर्गादयः । अयं भावः । समभिव्याहृतवर्णानां वाचकत्वे सिद्धे तादृशवर्णसमभिव्याहाररूपपदस्य वाचकता सिध्यति प्रतिवर्णमर्थस्मरणस्यानुभवविरुद्धत्वात् प्रत्येकवर्णानामर्थवत्त्वे प्रातिपदिकत्वापत्तौ "नलोपः प्रातिपदिकान्तस्ये" त्यादिभिर्धनं वनमित्यादौ नलोपाद्यापत्तेश्च । एतच्च, चरमवर्णएव वाचकत्वशक्तिः शक्तोर्व्यासज्यवृत्तित्वे मानाभावात् पूर्वपूर्ववर्णानुभवजन्यसंस्काराश्चरमेणार्थधीजनने सहकारिणइति न तन्मात्रोच्चारणादर्थधीरिति वर्णस्फोटवादिनां मतान्तरस्य दूषणायोक्तम् । रामोऽस्तीति वक्तव्ये राइत्यनन्तरं घटिकोत्तरमकारोच्चारणेऽर्थबोधापत्त्या तादृशानुपूर्व्याएव शक्ततावच्छेदकत्वौचित्यादिति दिक् ॥ ६१ ॥

सुप्तिङन्तं पदमिति पारिभाषिकपदस्य वाचकत्वस्वीकर्तृणां मतमाह ।

घटेनेत्यादिषु न हि प्रकृत्यादिभिदा स्थिता ॥६२॥
वस्तसादाविवेहापि सम्प्रमोहोहि दृश्यते ॥ ६२ ॥

घटेनेत्यादौ घटे इति प्रकृतिर्नेति प्रत्ययः घटइति प्रकृ-

तिरेनेति प्रत्ययइतिविभागस्य "सर्वे सर्वपदादेशाइति" स्वीकारे विशिष्य प्रकृतिप्रत्यययोर्ज्ञानासम्भवान्न वाचकत्वमित्यर्थः। वैयाकरणैर्विभागः सुज्ञेय इत्यतो दृष्टान्तव्याजेनाह वस्नसादाविति। "बहुवचनस्य वस्नसाविति" समुदायस्यादेशविधानान्नात्र तद्विभागः सम्भवतीत्यर्थः॥ ६२॥॥

सुप्तिङन्तचयरूपवाक्यस्यापि तदाह। वाचकत्वं

हरेऽवेत्यादि दृष्ट्वा च वाक्यस्फोटं विनिश्चिनु॥६३॥
अर्थे विशिष्य सम्बन्धाग्रहणं चेत्समं पदे॥
लक्षणादधुना चेत्तत्पदेऽर्थेऽप्यस्तु तत् तथा॥६४॥

हरेव विष्णोवेत्यादौ पदयोः "एङः पदान्तादतीत्येकादेशे सति न तद्विभागः सुज्ञानः। तथा च प्रत्येकपदाज्ञानेऽपि समुदायशक्तिज्ञानाच्छाब्दबोधात्समुदायेऽप्यावश्यिका शक्तिः एवञ्च प्रकृतिप्रत्ययेषु विशिष्याज्ञायमानेष्वपि समुदायव्युत्पत्त्या बोधात्तत्राप्यावश्यिकैव शक्तिरिति भावः। वस्तुतः पदैः पदार्थबोधवद्वाक्येन वाक्यार्थबोध इति पदार्थशक्तिः पदेष्विव वाक्यार्थशक्तिर्वाक्येऽभ्युपेयेति पदस्फोटवाक्यस्फोटौ व्यवस्थितौ। अन्यथा घटः कर्मत्वमानयनं कृतिरित्यादौ तादृशव्युत्पत्तिरहितस्यापि बोधप्रसङ्गः। घटमानयेत्यत्रेव पदार्थानामुपस्थितौ, सत्यपि तात्पर्यज्ञाने बोधाभावाच्च। तत्रैव घटकर्मकमानयनमिति बोधे घटार्थकप्रातिपदिकोत्तरकर्मत्ववाचकविभक्तेस्ततोधातोस्तत आख्यातस्य समभिव्याहारः कारणमिति कार्यकारणभावज्ञानवतोबो-

वाक्यशक्त्यन भ्युपगमे ६

घटमानयेत्यत्रैव २

वाक्यार्थबोधजनकत्वरूपवाक्यशक्तिज्ञानरहितस्यापीत्यर्थः ५

धात्तज्ज्ञानमपि हेतुरिति चेत्तर्हि सिद्धो वाक्यस्फोटः । घटादिपदार्थबोधे बोधकतारूपपदशक्तिज्ञानकार्यकारणभावस्येव विशिष्टवाक्यार्थबोधे पदसमभिव्याहाररूपवाक्यनिष्ठबोधकतारूपवाक्यशक्तिज्ञानस्यापि हेतुत्वकल्पनात् । अर्थोपस्थापकज्ञानविषयशब्दवृत्तिज्ञानकारणत्वस्यैव शक्तित्वात् । युक्तं चैतत् विषयतासम्बन्धेन शाब्दबोधमात्रे वृत्तिज्ञानस्य लाघवेन हेतुत्वसिद्धेः । विवेचितञ्चैतद्भूषणे । ननु वाक्यार्थस्यापूर्वत्वात्कथं तत्र शक्तिग्रहइत्याशङ्क्याह अर्थं इति वाक्यस्येति शेषः । वाक्यस्य वाक्यार्थे विशिष्य शक्त्यग्रहणञ्चेत्तर्हि पदेऽपि समम् । पदे एवान्वयांशे शक्तिरिति पक्षेऽपि तद्ग्रहासम्भवस्तुल्यइत्यर्थः । यदि च पदशक्तिः पदार्थांशे ज्ञाता अन्वयांशे अज्ञातोपयुज्यतइति कुञ्जशक्तिवादः तदा ममापि वाक्यशक्तिरज्ञातैवोपयुज्यतइति वादाभ्युपगमस्तुल्यइति भावः । ननु वृद्धव्यवहारं पश्यतो मनसा पदार्थवद्वाक्यार्थेऽपि तद्ग्रहइति चेत्तुल्यमित्याह लक्षणादिति । लक्ष्यते तर्क्यतेऽनेनेति लक्षणं मनस्तस्मात्, अपिपदं पदोत्तरं बोध्यम् । पदेऽपि लक्षणात्तद्ग्रहश्चेत्तर्ह्यस्तु वाक्येऽपीति शेषः । वस्तुतस्तु समुदितार्थे विशिष्टवाक्यस्यैव प्रथमं तद्ग्रहः । आवापोद्वापाभ्यां परं प्रत्येकं तद्ग्रहइति बोध्यम् ॥ ६२ ॥ ६४

इयमेव मीमांसकानां वेदान्त्येकदेशिनाञ्च गतिरित्याह ।

सर्वत्रैव हि वाक्यार्थो लक्ष्यएवेति ये विदुः।
भाट्टास्तेऽपीत्थमेवाऽऽह लक्षणाया ग्रहे गतिम्॥६५॥

भाट्टाइति तदनुयायिनां वाचस्पतिकल्पतरुप्रभृतीनामुपलक्षणम्। स्पष्टमन्यत्। ननूक्तपक्षद्वयमनुपपन्नम् उत्पत्तेरभिव्यक्तेर्वैकदा असम्भवेन वर्णसमूहरूपपदज्ञानासम्भवात्। तथा च सुतरां तत्समूहरूपवाक्यज्ञानासम्भवइति चेन्न उत्तरवर्णप्रत्यक्षसमये अव्यवहितोत्तरत्वसम्बन्धेनोपस्थितपूर्व्वपूर्ववर्णवत्त्वं तथा तदुत्तरप्रत्यक्षकाले उपस्थितविशिष्टतद्वर्णवत्त्वं तस्मिन् सुग्रहमिति तादृशानुपूर्व्वीघटितपदत्वस्यैव वाक्यत्वस्य सुग्रहत्वात्॥६५॥ इति ५५ वाक्यस्फोटनिरूपणम्

इदानीमखण्डपक्षमाह॥

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।
वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन॥६६॥

पदे पचतीत्यादौ न वर्णाः नातो वर्णसमूहः पदमिति भावः। दृष्टान्तव्याजेनाह वर्णेष्विति। एकारौकारऋकारादि वर्णेषु अवयवाः प्रतीयमाना अपि यथा नेत्यर्थः। क्वचित् इवेत्येव पाठः। एवं वाक्येऽप्याह, वाक्यादिति, पदानामपि वाक्याद्विवेकोभेदोनास्तीत्यर्थः। अयं भावः। वाक्यं पदं चाखण्डमेव न तु वर्णसमूहः, अनन्तवर्णकल्पने मानाभावात्। तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगनिष्ठं तत्तद्वर्णजनकताया व्यञ्जकताया वावच्छेदकं वैजात्यमादायैव ककारो गकारइत्यादिप्रतीतिवैलक्षण्यसम्भवात्। स्पष्टं हि

भामत्यां "तारत्वादि,वायुनिष्ठं वर्णेष्वारोप्यत"इत्युक्तं देवताधिकरणे। नचैवं वायुसंयोगएव वाचकोऽपि किं न? स्यादिति वाच्यम् प्रत्यक्षोपलभ्यमानककारादेरेव वाचकत्वस्यानुभवसिद्धत्वात्। तथा च वाचकत्वानुपपत्त्या तदेवेदं पदं तदेवेदं वाक्यं सोऽयं गकारइति प्रतीत्या च स्फोटोऽखण्डः सिध्यति॥ एतेन गौरित्यादौ गकारौकारविसर्गादिव्यतिरेकेण स्फोटाननुभवात् श्रूयमाणवर्णानामेव वाचकत्वमस्तीत्यपास्तम् तेषां स्फोटातिरिक्तत्वाभावात्। यत्तु वर्णानां प्रत्येकं वाचकत्वे प्रत्येकादर्थबोधापत्तिः। समुदायस्य तु क्रमवतामाशुतरोत्पन्नानां तथैवाभिव्यक्तानां वा ज्ञानमसम्भाव्यमेव। पूर्वपूर्ववर्णानुभवसंस्कारसहकारिणैकदा समूहालम्बनरूपसकलज्ञानसम्भवस्तु सरोरसः जरा राजनदीदीनादिसाधारणइत्यतिप्रसङ्गइति स्फोट एवाखण्डो नादाभिव्यङ्ग्यो वाचकइति कैयटः। तत्तुच्छम् पदज्ञानसम्भवस्योपपादितत्वात्। वर्णानां प्रत्येकं व्यञ्जकत्वं, समुदितानां वेत्यादिविकल्पग्रासाच्च। ननु त्वन्मतेऽप्येष दोषः तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगानां प्रत्येकं व्यञ्जकत्वं, समुदितानां वेति विकल्पस्य सद्भावादिति चेत्, उच्यते प्रत्येकमेव संयोगा अभिव्यञ्जकाः परन्तु केचित् गत्वेन केचिदौत्वेन केचिद्विसर्गत्वेनेत्यनेकैः प्रकारैः। अतएव वर्णानां तदतिरेकास्वीकारोऽप्युपपद्यते। एवञ्चाव्यवहितोत्तरत्वसम्बन्धेन घत्वं टकारे गृह्यते, एतादृशपदज्ञानकारणताया

अविवादात् परं त्वव्यवहितोत्तरत्वं स्वज्ञानाधिकरणक्षणोत्पत्तिकज्ञानविषयत्वं वाच्यम्। अतएव घज्ञानानन्तरटज्ञानविषयत्वरूपानुपूर्वीत्यादि नैयायिकवृद्धानां व्यवहारः। एवञ्च न कश्चिद्दोषः। एतेन पर्य्यायस्थलेष्वेकएव स्फोटो नाना वा। नाद्यः घटपदे एव गृहीतशक्तिकस्य कलशादेर्बोधप्रसङ्गात्। नच तत्पर्य्यायाभिव्यक्ते शक्तिग्रहस्तत्पर्य्यायश्रवणेऽर्थधीहेतुरिति वाच्यम् एवं सति प्रतिपर्य्यायं शक्तिग्रहावश्यम्भावेन तत्तत्पर्य्यायगतशक्तिग्रहहेतुताया उचितत्वात्। तथा सति शक्तिग्रहत्वेनैव हेतुत्वे लाघवात्। अन्यथा तत्पर्य्यायाभिव्यक्तगतशक्तिग्रहत्वेन तत्त्वे गौरवात्। न द्वितीयः अनन्तपदानां तेषां शक्तिश्चापेक्ष्य क्लृप्तवर्णेष्वेव शक्तिकल्पनस्य लघुत्वादिति परिमलोक्तमपास्तम्। पर्य्यायेष्वनेकशक्तिस्वीकारस्य सर्व्वसिद्धत्वात् तदवच्छेदकानुपूर्व्याः प्रागुपपादनादिति दिक्। शब्दकौस्तुभे तु वर्णमालायां पदमिति प्रतीतेर्वर्णातिरिक्तएव स्फोटः अन्यथा कपालातिरिक्तघटाद्यसिद्धिप्रसङ्गश्चेति प्रतिपादितम्॥ ६६॥

नन्वेवं शास्त्राप्रामाण्यप्रसङ्गः पदस्याखण्डत्वात्। शास्त्रस्य च प्रकृतिप्रत्ययाभ्यां पदव्युत्पादनमात्रार्थत्वादित्याशङ्कां समाधत्ते।

पञ्चकोषादिवत्तस्मात् कल्पनैषा समाश्रिता।
उपेयप्रतिपत्त्यर्थी, उपाया अव्यवस्थिताः॥ ६७॥

उपेयप्रतिपत्त्यर्था इत्यन्तेनान्वयः। अयं भावः यथा

भृगुवल्ल्यां, "भृगुर्वै वारुणिर्वरुणं ब्रह्म पृष्टवान्, स उवाच अन्नमिति" तस्योत्पत्त्यादिकं बुद्धा पृष्टे प्राणमनोविज्ञानानन्दात्मकपञ्चकोषोत्तरं "ब्रह्म पुच्छं प्रतिष्ठेति" त्येयं ब्रह्म प्रतिपादितं तत्र कोषपञ्चकव्युत्पादनं शुद्धब्रह्मबोधनाय। यथा वा आनन्दवल्लीस्थपञ्चकोषव्युत्पादनं वास्तवशुद्धब्रह्मबोधनाय। एवं प्रकृतिप्रत्ययादिव्युत्पादनं वास्तवस्फोटव्युत्पादनायैवेति। ननु प्रत्यक्षस्य स्फोटस्य श्रवणादितोऽपि बोध सम्भवान्न शास्त्रं तदुपायइत्यत आह उपाया इति। उपायस्योपायान्तरादूषकत्वात्। तथा च व्याकरणाभ्यासजन्यज्ञाने वैजात्यं कल्प्यते मन्त्रजन्यमिवार्थस्मरणे, वेदान्तजन्यमिव ब्रह्मज्ञाने, तस्य च ज्ञानस्य यज्ञादीनामन्तःकरणशुद्धाविव शरीरादिशुद्धापवुयोगः साक्षात्परम्परया वा स्वर्गमोक्षादिहेतुत्वञ्च। तदुक्तं वाक्यपदीये।

तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।
पवित्रं सर्व्वविद्यानामधिविद्यं प्रकाशते।
इदमाद्यं पदस्थानं सिद्धिसोपानपर्व्वणाम्।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः।
अत्रातीतविपर्यासः केवलमनुपश्यतीति।

न चालीकया प्रकृतिप्रत्ययकल्पनया कथं वास्तवस्फोटबोधः तस्या अलीकत्वासिद्धेर्वक्ष्यमाणत्वात्। एवं रेखागवयन्याय आदिना गृह्यते॥ ६७॥

ननु स्फोटस्य वर्णजातीनाञ्च नित्यतया ककार उत्पन्न-

इति न स्यात्। वायुसंयोगनिष्ठजातिः स्फोटे भाने कादिप्रतीतीनां भ्रमत्वापत्तेश्चेत्यत आह।

कल्पितानामुपाधित्वं स्वीकृतं हि परैरपि।
स्वरदैर्घ्याद्यपि ह्यन्ये वर्णेभ्योऽन्यस्य मन्वते॥ ९७॥

स्वीकारस्थलमाह स्वरदैर्घ्याद्यपीति। आदिनोत्पत्तिविनाशसंग्रहः। उदात्तत्वादि न वर्णनिष्ठम् तस्यैकत्वात् नित्यत्वाच्च तस्य स एवायमिति प्रत्यभिज्ञानात्। न च गत्वावच्छिन्नप्रतियोगिताकभेदाभावस्तद्विषयः व्यक्त्यंशाभेदस्यापि भासमानस्य विना बाधकं त्यागायोगात्। नचोत्पत्तिप्रतीतिर्बाधिका प्रागसत्त्वे सत्त्वरूपाया उत्पत्तेर्वर्णेष्वनुभवविरुद्धत्वात्। अतएव वर्णमुच्चारयतीति प्रत्ययो न तूत्पादयतीति प्रत्ययो व्यवहारश्च। उच्चरितत्वञ्च ताल्वोष्ठसंयोगादिजन्याभिव्यक्तिविशिष्टत्वम्। किञ्च व्यञ्जकध्वनिनिष्ठोत्पत्त्यादेः परम्परया वर्णनिष्ठत्वविषयत्वेनाप्युपपत्तेर्न सातिरिक्तवर्णसाधिका। परम्परया वर्णनिष्ठत्वाभ्युपगमाच्च न भ्रमत्वम्। साक्षात्सम्बन्धांशे भ्रमत्वमिष्यते। तदपि सोऽयमित्यत्र व्यक्त्यभेदांशे तव भ्रमत्ववत्तुल्यम्। परन्तु ममातिरिक्तवर्णतत्प्रागभावध्वंसकल्पना नेति लाघवमतिरिच्यते। न च वर्णस्थले ध्वनिसत्त्वे मानाभावः तदुत्पादकमहाद्यभावेन तदसम्भवश्चेति वाच्यम् ककाराद्युच्चारणस्थले तत्तत्स्थानस्य जिह्वाया ईषदन्तरपाते वर्णानुत्पत्तेश्च दर्शनाज्जिह्वाभिघातजवायुकण्ठसंयोगादेर्ध्वनिजनकत्वकल्पनात् ध्वन्युत्पत्ते-

तस्य च वर्णोत्पत्तिस्थलेऽपि सत्त्वात्तत्रैव प्रतिबध्यप्रतिबन्धक-भावकल्पना निष्प्रामाणिकी स्यादिति गौरवं विपरीतम् । एवं परस्परविरोधादुदात्तत्वानुदात्तत्वह्रस्वत्वदीर्घत्वादिकमपि न वर्णनिष्ठं युक्तमिति तेषामभिप्रायः । एवञ्चोत्पत्त्यादिप्रतीतीनां तत्प्रमात्वस्य च निर्व्वाहः परेषामपि समान इति प्रतिबन्धेवोत्तरमिति भावः ॥ ६७ ॥

इत्थं पञ्चव्यक्तिस्फोटाः । जातिस्फोटमाह ।

शक्यत्वइव शक्तत्वे जातेर्लाघवमीक्ष्यताम् ।
औपाधिकोवा भेदोऽस्तु वर्णानां तारमन्दवत् ॥६८॥

अयं भावः । वर्णास्तावदावश्यकाः उक्तरीत्या च सोऽयं गकार इति वद् योऽयं गकारः श्रुतः सोऽयं हकार इत्यपि स्यात् स्फोटस्यैकत्वात् गकारोऽयं न हकार इत्यनापत्तेश्च । किञ्च स्फोटे गत्वाद्यभ्युपेयं न वा । आद्ये तदेव गकारोऽस्तु वर्णनित्यतावादिभिरतिरिक्तगत्वानङ्गीकारात् । तथा चातिरिक्तस्फोटकल्पन एव गौरवम् । अन्त्ये गकारादिप्रतीतिविरोधः । वायुसंयोगवृत्ति ध्वनिवृत्ति वा वैजात्यमारोप्य तथा प्रत्यय इति चेन्न प्रतीतेर्विना बाधकं भ्रमत्वासम्भवात् अस्तु वा वायुसंयोग एव गकारोऽपि तस्यातीन्द्रियत्वं दोष इति चेद्धर्मवदुपपत्तेरिति कृतं स्फोटेन । तस्मात्सन्त्येव वर्णाः । परन्तु न वाचकाः गौरवात् । आकृत्यधिकरणन्यायेन जातेरेव वाच्यत्ववद्वाचकत्वस्यापि युक्तत्वाच्च । इदं हरिपदमित्यनुगतप्रतीत्या हर्य्युपस्थितित्वाव-

च्छेदेन हरिपदज्ञानत्वेन हेतुत्वात्तदवच्छेदकतया च जाति
विशेषस्यावश्यकल्पनत्वात् । न च वर्णानुपूर्व्यैव प्रतीत्यव-
च्छेदकत्वयोर्निर्वाहः घटघटत्वादेरपि संयोगविशिष्टकृदा
आकारादिभिश्चान्यथासिद्ध्यापत्तेः । तस्मात्सा जातिरेव
वाचिका तादात्म्येनावच्छेदिका चेति । ननु सरोरस
इत्यादौ जात्योः सत्त्वादर्थभेदबोधोन स्यादित्यत आह
औपाधिकी वेति । वा त्वर्थे उपाधिरानुपूर्वी सैव जाति-
विशेषाभिव्यञ्जिकेति भेदः कारणीभूतज्ञानस्येति नाति-
प्रसङ्ग इति भावः । उपाधिप्रयुक्तज्ञानवैलक्षण्ये दृष्टान्तमाह
वर्णानामिति ॥ ६८ ॥

ननु जातेः प्रत्येकं वर्णेष्वपि सत्त्वात् प्रत्येकादर्थबोधः
स्यादित्यत आह ।

अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोटइति स्मृता ।
कैश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ॥ ६९ ॥

अनेकाभिर्वर्णव्यक्तिभिरभिव्यञ्जैव जातिः स्फोटइति
स्मृता योगार्थतया बोधिकेति यावत् । एतेन स्फोटस्य
नित्यत्वात्सर्वार्थबोधापत्तिरित्यपास्तम् । अयं भावः यद्यपि
वर्णस्फोटपक्षे कथितदोषोऽस्ति तथापि पदवाक्यपक्षयोर्न;
तत्र तस्या व्यासज्यवृत्तित्वस्य धर्मिग्राहकमानसिद्धत्वा-
दिति कैश्चिद्व्यक्तयोध्वनय एव ध्वनिवर्णयोर्भेदाभावादि-
त्यभ्युपेयन्तेइति शेषार्थः । उक्तं हि काव्यप्रकाशे "बुधै-
र्वैयाकरणैः प्रधानीभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य
ध्वनिरिति व्यवहारः कृत" इति ॥ ६९ ॥

ननु का सा जातिस्तत्राह ।

सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ ।
सत्यं यत्तत्र सा जातिरसत्या व्यक्तयो मताः ॥ ७० ॥

(प्रतिभावम्) प्रतिपदार्थम् । सत्यांशोजातिः असत्या व्यक्तयः । तत्तद्व्यक्तिविशिष्टं ब्रह्मैव जातिरिति भावः । उक्तञ्च कैयटेन "असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं द्रव्यशब्दवाच्यमित्यर्थ इति"। "ब्रह्मतत्त्वमेव शब्दस्वरूपतया भातीति" च । कथं तर्हि ब्रह्मदर्शने च गोत्वादिजातेरप्यसत्त्वादनित्यत्वम्, आत्मैवेदं सर्वमिति श्रुतिवचनादिति कैयटः सङ्गच्छताम् ? अविद्या आविद्यिकोधर्मविशेषोवेति पक्षान्तरमादायेति द्रष्टव्यम् ॥ ७० ॥

तमेव सत्यांशं स्पष्टयति ।

इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वं निरञ्जनम् ।
ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः ॥ ७१ ॥

अयं भावः "नामरूपे व्याकरवाणीति" श्रुतिसिद्धा द्वयी सृष्टिः तत्र रूपस्येव नाम्नोऽपि तदेव तत्त्वम् । प्रक्रियांशस्त्वविद्याविजृम्भणमात्रम् । उक्तञ्च वाक्यपदीये ।

शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते ।
समारम्भस्तु भावानामनादि ब्रह्म शाश्वतमिति ।

ब्रह्मैवेत्यनेन "अत्रायं पुरुषः स्वयं ज्योतिः" "तमेव भान्तमनुभाति सर्वं" "तस्य भासा सर्वमिदं विभातीति" श्रुतिसिद्धं स्वपरप्रकाशत्वं सूचयन् स्फुटत्यर्थोऽस्मादि-

ति स्फोट इति यौगिकस्फोटशब्दाभिधेयत्वं सूचयति। निर्विघ्नप्रचयायान्ते मङ्गलं स्तुतिरूपमाह। पूर्णात्मने इत्यादिना॥ ७१॥

अशेषफलदातारमपि सर्वेश्वरं गुरुम्।
श्रीमद्भूषणसारेण भूषये शेषभूषणम्॥

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणरङ्गोजिभट्टात्मजकौण्डभट्टकृते वैयाकरणभूषणसारे स्फोटवादः।

समाप्तोयं ग्रन्थश्च।

वैयाकरणसिद्धान्तो वङ्गे भङ्गमुपेयिवान्।
ग्रन्थोऽयं मुद्रितोभूयः श्रीतारानाथशर्म्मणा।

पत्रं ३३ पंक्तिः। उच्यतां चाद्वितीयाश्रयप्रकारकबोधं प्रति धात्वर्थ
व्यापारव्यधिकरणस्य धातुजन्योपस्थितिर्हेतुरिति कार्यकारणभाव

THE FOLLOWING IS THE LIST OF
PROFESSOR TARKAVACHASPATI'S
WORKS & PUBLICATIONS.

	Rs.	As.
1. Asubodham Vyakaranam.	3	4
2. Dhaturupadarsha.	2	,,
3. Sabdastoma Mahanidhi. ...	10	,,
4. Sidhantakoumudi with Sarala. ...	11	,,
5. Sidhantavindusara. ...	,,	8
6. Tuladanadipadhati. ...	4	,,
7. Gaya Shradhadipadhati. ...	1	,,
8. Sabdartharatna. ...	,,	12
9. Vakyamanjari. ...	,,	4
10. Vrittaratnakara and Chhandomanjari with notes.	,,	10
11. Venisanhara with a Commentary. ...	1	,,
12. Mudrarakshasa. Ditto	1	8
13. Ratnavali Ditto	1	8
14. Malavikagnimitra. Ditto	1	8
15. Dhananjayavijaya. Ditto	,,	4
16. Mahaviracharita. Ditto	1	8
17. Sankhyatatwakoumudi. Ditto	2	8
18. Veiyakarana Bhusanasara. ...	2	,,
19. Lilavati	,,	12
20. Vijaganita. ...	1	,,
21. Sishupalabadha with Mallinatha.	6	,,
22. Kiratarjuniya. Ditto ...	2	8
23. Kumarasambhava Purvakhandam. Ditto ...	1	,,
24. Kumarasambhava Uttarakhandam. ...	,,	8
25. Panini Sutras. ...	,,	12
26. A comprehensive Sanscrit Dictionary (In the Press)	60	,,
27. Kadambari with a commentary.	1	,,

28. Rajaprasasti.	,,	2
29. Gayitri.	...	
30. Anumanachintamanididhiti.	2	8
31. Sarvadarshanasangraha.	2	,,
32. Bhaminibilasha with notes.	1	,,
33. Hitopodesha with notes.	1	,,
34. Bhasha parichheda and Muktavali. ...	1	,,
35. A discourse on the Hindu polygamy. ...	,,	4
36. Dashakumaracharita with notes. ...	1	8
37. Paribhashendusekhara.	1	8
38. Kavikalpadruma.	,,	8
39. Chakradatta.	2	8
40. Unadisutra with a commentary.	2	,,
41. Medini Kosha.	2	8
42. Panchatantra of Vishnusharma.	2	8
43. Bidwanmodatarangini.	,,	8
44. Madhayachampu.	,,	6
45. Tarkasangraha with an English translation. ...	,,	8
46. Prasannaraghava of Jayadeva.	1	8
47. Vivekachuramani.	,,	6
48. Kavyasangraha (complete work.) ...	5	,,
49. Linganushashana with a commentary. ...	,,	4
50. Ritusanhara with a commentary. ...	,,	6
51. Vikramorvashi with a commentary. ...	1	8
52. Vasantatilaka.	,,	6

Apply to Pandit Jibananda Vidyasagara B. A.

The 15th June 1872.

Govt. Sanskrit College.
CALCUTTA.

॥ श्रीः ॥

श्रीविश्वनाथो विजयते ॥

पूर्वमीमांसार्थसंग्रहः ॥

श्रीलौगाक्षिभास्कररचितः ॥

भरद्वाजोपनामकनारा-
यणशास्त्रिणा संशोधितः

बाबूअविनाशीलालसम्मत्या पण्डित-
हरिशङ्करेण काश्यामार्य्ययन्त्रालये
मुद्रितः ॥

करनघण्टा वा कचौरीगली बाबूलाल
गुमाश्ते की दुकान पर पोथी मिलेगी ॥

सं १९३९ बि० ॥

वेदप्रतिपाद्यत्वे सति प्रयोजनवत्वे सत्यर्थवत्त्वं धर्मत्वम्॥ + ॥

यागादिरेव धर्मः । तल्लक्षणं वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्म इति । प्रयोजनेतिव्याप्तिवारणाय प्रयोजनवदिति । भोजनादावतिव्याप्तिवारणाय वेदप्रतिपाद्य इति । अनर्थफलकत्वादनर्थभूते श्येनादावतिव्याप्तिवारणायार्थ इति । न च चोदनालक्षणोऽर्थो धर्म इति सौत्रलक्षणविरोधः चोदनापदस्य विधिरूपवेदैकदेशपरत्वादिति वाच्यम् । तत्रापि चोदनापदस्य वेदमात्रपरत्वात् । वेदस्य सर्वस्य धर्मतात्पर्यवत्त्वेन धर्मप्रतिपादकत्वात् । स च यागादिः । यजेत स्वर्गकाम इत्यादिवाक्येन स्वर्गमुद्दिश्य पुरुषं प्रति विधीयते । तथा हि यजेतेत्यत्रास्त्यंशद्वयं यजिधातुः प्रत्ययश्च । प्रत्ययेऽप्यस्त्यंशद्वयमाख्यातत्वं लिङ्त्वं च । तत्राख्यातत्वं दशलकारसाधारणं लिङ्त्वं पुनर्लिङ्मात्रे । उभाभ्यामप्यंशाभ्यां भावनैवोच्यते । भावना नाम भवितुर्भवनानुकूलो भावयितुर्व्यापारविशेषः । सा द्विधा । शब्दभावना अर्थभावना चेति । तत्र पुरुषप्रवृत्त्यनुकूलो भावयितुर्व्यापारविशेषः

शाब्दी भावना। सा च लिङंशेनोच्यते। लिङ्श्रवणेनायं मां प्रवर्तयति मत्प्रवृत्त्यनुकूलव्यापारवानितिनियमेन प्रतीतेः। यद्यस्माच्छब्दान्नियमेन प्रतीयते तत्तस्य वाच्यं यथा गामानयेत्यस्मिन्वाक्ये गोशब्दस्य गोत्वम्। स च व्यापारविशेषो लौकिकवाक्ये पुरुषनिष्ठोऽभिप्रायविशेषः। वैदिकवाक्ये तु पुरुषाभावाल्लिङादिशब्दनिष्ठ एव। अत एव शब्दभावनेतिव्यवह्रियते। सा च भावनांशत्रयमपेक्षते। साध्यं साधनमितिकर्तव्यतां च। किं भावयेत्केन भावयेत्कथं भावयेद् इति। तत्र साध्याकाङ्क्षायां वक्ष्यमाणांशत्रयोपेता आर्थीभावना साध्यत्वेनान्वेति एकप्रत्ययगम्यत्वेन समानाभिधानश्रुतेः। संख्यानामेकप्रत्ययगम्यत्वेप्ययोग्यत्वान्न साध्यत्वेनान्वयः। साधनाकाङ्क्षायां लिङादिज्ञानं करणत्वेनान्वेति तस्य च करणत्वं न भावनोत्पादकत्वेन तत्पूर्वमपि तस्याः शब्दे सत्वात् किं तु भावनाज्ञापकत्वेन शब्दभावनाभाव्यनिर्वर्तकत्वेन वा। इति कर्तव्यताकाङ्क्षायामर्थवादज्ञाप्यप्राशस्त्यमिति कर्तव्यतात्वेनान्वेति। प्रयोजनेच्छाजनितक्रियाविषयव्यापार आर्थीभावना। सा चाख्यातत्वांशेनोच्यते। आख्यातसामान्यस्य व्यापारवा-

भवतिचप्रयाजादिफलत्वेनास्मन्वयः यागेन स्वर्गं कुर्यादिति नतः कथमि
यंभावाकांक्षायां प्रयाजादिभिरुपकारं संपाद्येति कथंभावाकांक्षापूरण

चित्वात् । साप्यंशत्रयमपेक्षते । साध्यं साधनमि-
तिकर्तव्यतां च । किं भावयेत्केन भावयेत्कथं भा-
वयेद् इति । तत्र साध्याकाङ्क्षायां स्वर्गादिफलं सा-
ध्यत्वेनान्वेति । साधनाकाङ्क्षायां यागादिः कर-
णत्वेनान्वेति । *इतिकर्तव्यताकाङ्क्षायां प्रयाजा-
द्यङ्गजातमितिकर्तव्यतात्वेनान्वेति ॥ अथ को-
वेद इति चेदुच्यते । अपौरुषेयं वाक्यं वेदः ॥ स-
च विधिमन्त्रनामधेयनिषेधार्थवादभेदात्पञ्चविधः ।
तत्राज्ञातार्थज्ञापको वेदभागो विधिः । स च
तादृशप्रयोजनवदर्थविधानेनार्थवान्यादृशं चार्थं-
प्रमाणान्तरेणाप्राप्तं विधत्ते । यथाग्निहोत्रं जु-
हुयात्स्वर्गकाम इतिविधिर्मानान्तरेणाप्राप्तस्वर्ग-
प्रयोजनवद्धोमं विधत्ते अग्निहोत्रहोमेन स्वर्गं भा-
वयेदिति वाक्यार्थबोधः । यत्र कर्म मानान्तरेण
प्राप्तं तत्र तदुद्देशेन गुणमात्रं विधत्ते । यथा द-
ध्ना जुहोतीत्यत्र होमस्याऽग्निहोत्रं जुहुयादित्यनेन
प्राप्तत्वाद्धोमोद्देशेन दधिमात्रविधानं दध्ना होमं
भावयेदिति । यत्र तूभयमप्राप्तं तत्र विशिष्टं विध-
त्ते । यथा सोमेन यजेतेत्यत्र सोमयागयोरप्राप्तत्वा-
त्सोमविशिष्टयागविधानं सोमपदेम त्वर्थलक्षणा-
या सोमवता यागेनेष्टं भावयेदिति वाक्यार्थबो-
धः । न चोभयविधाने वाक्यभेदः प्रत्येकमुभय-

...कर्मस्वरूपबोधकोत्पत्तिवाक्यान्तराभावेनैकस्य वाक्यस्योभयविधित्व...
श्रितं कर्मणः स्वरूपबोधनमन्तरेण तस्य फलसम्बन्धबोधनानुपपत्यात सैव
विधिताश्रयणादिति +

स्याविधानात् किं तु विशिष्टस्यैकस्यैव विधाना-
त्। न च ज्योतिष्टोमेन स्वर्गकामो यजेतेतिवि-
धिना प्राप्तयागोद्देशेन सोमरूपगुणविधानमेवा-
स्तु सोमेन यागं भावयेदिति किं मत्वर्थलक्षणये-
तिवाच्यम्। तस्याधिकारविधित्वेनोत्पत्तिविधि-
त्वासंभवात्। ननूद्भिदा यजेत पशुकाम इत्यस्येव
ज्योतिष्टोमेनेत्यस्याप्युत्पत्यधिकारविधित्वमस्त्वि-
ति चेन्न। दृष्टान्ते उत्पत्तिवाक्यान्तराभावेनान्य-
थानुपपत्त्या तथात्वाश्रयणात्। किं च ज्योति-
ष्टोमेनेत्यस्योभयविधित्वेनैव यागस्तस्य फलसंब
न्धोपि बोधनीय इति सुदृढो वाक्यभेदस्तद्वरं सो-
मपदेन मत्वर्थलक्षणया विशिष्टविधानम्॥ स
च विधिश्चतुर्विधः। उत्पत्तिविधिर्विनियोगविधि-
रधिकारविधिः प्रयोगविधिश्चेति। तत्र कर्मस्वरू-
पमात्रबोधको विधिरुत्पत्तिविधिः। यथाग्निहोत्रं
जुहोतीति। अत्र च विधौ कर्मणः करणत्वेनान्वयः
अग्निहोत्रहोमेनेष्टं भावयेदिति। ननु यागस्य द्वे रू-
पे द्रव्यं देवता च तथा च रूपाश्रवणे अग्निहोत्रं जु-
होतीति कथमुत्पत्तिविधिः अग्निहोत्रशब्दस्य तु
तत्प्रख्यन्यायेन नामधेयत्वादितिचेन्न। रूपाश्रवणे-
प्यस्योत्पत्तिविधित्वात्। अन्यथा रूपश्रवणाद्दध्ना
जुहोतीत्ययमेवोत्पत्तिविधिः स्यात्। तथा चाग्नि-

होवं जुहोतीतिवाक्यमनर्थकं स्यात्। अङ्गप्रधानसंबन्धबोधको विधिर्विनियोगविधि:। यथा दध्ना जुहोतीति। स हि तृतीयया प्रतिपन्नाङ्गभावस्य दध्नो होमसंबन्धं विधत्ते दध्ना होमं भावयेदिति। गुणविधौ हि धात्वर्थस्य साध्यत्वेनान्वय: क्वचिदाश्रयत्वेनापि यथा दध्नेन्द्रियकामस्य जुहुयादित्यत्र दधिकरणत्वेनेन्द्रियं भावयेत्। तच्च किंनिष्ठमित्याकाङ्क्षायां संनिधिप्राप्तहोम आश्रयत्वेनान्वेति। एतस्य विधे: सहकारिभूतानि षट् प्रमाणानि॥ श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यारूपाणि॥ एतत्सहकृतेनानेन विधिनाङ्गत्वं परोद्देशप्रवृत्तकृतिसाध्यत्वरूपं पारार्थ्यापरपर्यायं ज्ञाप्यते। तत्र निरपेक्षो रव: श्रुति:, सा च त्रिधा, विधात्री अभिधात्री विनियोक्त्री च, तत्राद्या लिङाद्यात्मिका, द्वितीया व्रीह्यादिश्रुति:। यस्य च शब्दस्य श्रवणादेव संबन्ध: प्रतीयते सा विनियोक्त्री। सापि त्रिधा विभक्तिरूपा एकाभिधानरूपा एकपदरूपा चेति। तत्र विभक्तिश्रुत्या अङ्गत्वं यथा व्रीहिभिर्यजेतेति तृतीयाश्रुत्या व्रीहीणां यागाङ्गत्वम्। तदपि पुरोडाशप्रकृतितया यथा पशोर्हृदयादिरूपहवि: प्रकृतितया यागाङ्गत्वमरुणया एकहायन्या गवा सोमं क्रीणातीत्यत्रान्वये

अत्र स्वरशनाख्या मंत्रस्य द्वितीयपाऽगल्ये

(७)

आरुण्यस्यापि तृतीयाश्रुत्या क्रयाङ्गत्वं तदपि गोरूपद्रव्यपरिच्छेदद्वारा न तु साक्षादमूर्तत्वात्। व्रीहीन्प्रोक्षतीति प्रोक्षणस्य व्रीह्यङ्गत्वं द्वितीयाश्रुत्या तच्च प्रोक्षणं न व्रीहिस्वरूपार्थं तस्य तेन विनाप्युपपत्तेः किं त्वपूर्वसाधनत्वप्रयुक्तं व्रीहीनप्रोक्ष्य यागानुष्ठानेऽपूर्वानुपपत्तेः, एवं सर्वेष्वङ्गेष्वपूर्वप्रयुक्तमङ्गत्वं बोध्यम्। एवमिमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्त इत्यत्र द्वितीयाश्रुत्या मन्त्रस्याश्वाभिधान्यङ्गत्वम्। यदाहवनीये जुहोतीत्याहवनीयस्य होमाङ्गत्वं सप्तमीश्रुत्या। एवमन्योपि विभक्तिश्रुत्या विनियोगो ज्ञेयः। पशुना यजेतेत्यत्रैकत्वपुंस्त्वयोः समानाभिधानश्रुत्या कारकाङ्गत्वं यजेतेत्याख्याताभिहितसंख्यायां ~~शार्थभावनाङ्गत्वं समानाभिधानश्रुतेरेकपद~~-एकशब्दरूप-प्रत्ययश्रुत्या यजेतेति एकपदश्रुत्या च यागाङ्गत्वम्। नचामूर्तायास्तस्याः कथं भावनाङ्गत्वं वाच्यम्। कर्तृपरिच्छेदद्वारा तदुपपत्तेः। कर्ता चाक्षेपलभ्यः आख्यातेन हि भावनोच्यते सा च कर्तारं विनानुपपन्ना इति तमाक्षिपति। सेयं श्रुतिर्लिङ्गादिभ्यः प्रबला। लिङ्गादिषु न प्रत्यक्षो विनियोजकः शब्दोस्ति किं तु कल्प्यः यावच्च तैर्विनियोजकः कल्प्यते तावत्प्रत्यक्षया श्रुत्या विनियोगस्य कृतत्वेन तेषां कल्पकत्वप्र-

ह्यैर्व्याहतत्वात्। अत एव ऐन्द्र्या लिङ्गा नेन्द्रोपस्थानार्थत्वं किं तु ऐन्द्र्या गार्हपत्यमुपतिष्ठते इत्यत्र गार्हपत्यमिति द्वितीयाश्रुत्या गार्हपत्योपस्थानार्थत्वम्। शब्दसामर्थ्यं लिङ्गम्। यथाहुः सामर्थ्यं सर्वशब्दानां लिङ्गमित्यभिधीयते। सामर्थ्यं रूढिरेव तेन समाख्यातो नाभेदः यौगिकशब्दसमाख्यातो रूढ्यात्मकलिङ्गशब्दस्य भिन्नत्वात्। तेन बर्हिर्देवसदनं दामीति मन्त्रस्य कुशलवनाङ्गत्वं न तूलपादिलवनाङ्गत्वं तस्य बर्हिर्दामीतिलिङ्गात्तल्लवनं प्रकाशयितुं समर्थत्वात्। एवमन्यत्रापि लिङ्गाद्विनियोगो द्रष्टव्यः। तदिदं लिङ्गं वाक्यादिभ्यो बलवत्। अत एव स्योनं ते सदनं करोमि इति मन्त्रस्य पुरोडाशसदनकरणाङ्गत्वं सदनं करोमीति लिङ्गात् न तु वाक्यात्॥ समभिव्याहारो वाक्यम्। समभिव्याहारस्य साध्यत्वादिवाचकद्वितीयाद्यभावेपि वस्तुतः शेषशेषिवाचकयोः पदयोः सहोच्चारणम्। यथा यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति। अत्र पर्णताजुह्वोः समभिव्याहारादेव पर्णताया जुह्वङ्गत्वम्। न चानर्थक्यमन्यथापि जुह्वाः सिद्धत्वादिति वाच्यम्। जुहूशब्देन तत्साध्यापूर्वं लक्षणास्वीकारात् तथा च वाक्यार्थः पर्णतया अवत्तह-

स्रुक्स्रुवादिभिराज्यहविधारणद्वारेणोपक्रियत इति भावः +

विधारणद्वारा जुह्वपूर्वं भावयेदिति। एवं च पर्ण-तया यदि जुहूः क्रियते तदैव तत्साध्यमपूर्वं भवति नान्यथेति गम्यते इति न पर्णताया वैयर्थ्यम्। अतस्तद्धविर्धारणद्वारेतिचावश्यं वक्तव्यमन्यथा स्रुवादिष्वपि पर्णतापत्तेः। सेयं पर्णता अनारभ्याधीतापि सर्वप्रकृतिष्वेवान्वेति न विकृतिषु तत्र च चोदकेनापि तत्प्राप्तिसम्भवात् पौनरुक्त्यापत्तेः। यत्र समग्राङ्गोपदेशः सा प्रकृतिः। यथा दर्शपौर्णमासादिः तत्प्रकरणे सर्वाङ्गपाठात्। यत्र न समग्राङ्गोपदेशः सा विकृतिः यथा सौर्यादिः। तत्र कतिपयाङ्गानामतिदेशेन प्राप्तत्वात्। अनारभ्य विधिः सामान्यविधिः। तदिदं वाक्यं प्रकरणादिभ्यो बलवद् अत एवेन्द्राग्नी इदं हविर्जुषेतामित्यादेरेकवाक्याद्दर्शाङ्गत्वं न तु प्रकरणाद् दर्शपूर्णमासाङ्गत्वम्॥ उभयाकाङ्क्षाप्रकरणम्। यथा प्रयाजादिषु समिधो यजतीत्यादौ वाक्ये फल विशेषस्यानिर्देशात् समिद्यागेन भावयेदिति बोधानन्तरं किमिति उपकार्याकाङ्क्षायां दर्शपूर्णमासवाक्येपि दर्शपूर्णमासाभ्यां स्वर्गं भावयेदितिबोधानन्तरं कथमित्युपकारकाकाङ्क्षा इत्थं चोभयाकाङ्क्षायां यथा प्रयाजादीनां दर्शपूर्णमासाङ्गत्वम्। तच्च प्रकरणं द्विविधम्। महाप्र-

करणमवान्तरप्रकरणं चेति। मुख्यभावनासम्बन्धि-प्रकरणं महाप्रकरणम्। तेन च प्रयाजादीनां दर्शपूर्णमासाङ्गत्वम्। एतच्च प्रकृतावेवोभयाकाङ्क्षायाः सम्भवान्न तु विकृतौ तत्र प्रकृतिवद्विकृतिः कर्तव्येत्यतिदेशेन कथम्भावाकाङ्क्षाया उपशमेनापूर्वाङ्गानामप्युभयाकाङ्क्षया विनियोगसम्भवात्। तस्मादपूर्वाङ्गानां स्थानादेव विकृत्यर्थत्वमिति। अङ्गभावनासम्बन्धि प्रकरणमवान्तरप्रकरणम्। तेन चाभिक्रमणादीनां प्रयाजाद्यङ्गत्वम्। तच्च सन्दंशेन ज्ञायते तदभावे चाविशेषात् सर्वेषां फलभावनाकथम्भावेन ग्रहणप्रसङ्गेन प्रधानाङ्गत्वापत्तेः। एकाङ्गानुवादेन विधीयमानयोरङ्गयोरन्तरालविहितत्वं सन्दंशः यथाभिक्रमणे। तं हि समानयत उपभृतस्तेजो वा इत्यादिना प्रयाजानुवादेन किञ्चिदङ्गं विधाय तदनन्तरमपि प्रयाजानुवादेन यस्यैवं विदुषः प्रयाजा इज्यन्ते प्रैभ्यो लोकेभ्यो भ्रातृव्यान्नुदते अभिक्रामं जुहोत्यभिजित्यै यो वै प्रयाजानां मिथुनं वेदेत्यादि किञ्चिदङ्गं विधीयते। अतः प्रयाजाङ्गमध्येऽभिहितमभिक्रमणं तदङ्गप्रयाजैरपूर्वं कृत्वा यागोपकारं भावयेदिति ज्ञायते कथमेभिरपूर्वं कर्तव्यमिति कथम्भावाकाङ्क्षायाः सत्वात्। सा

च सन्दंशपठितैरभिक्रमणादिभिः शाम्यति । न-
चाङ्गभावनायां कथं भावनाकाङ्क्षाभावः भा-
नासाम्येन तत्रापि तत्सम्भवात् । तदिदं प्रक
णां क्रियाया एव साक्षाद्विनियोजकं द्रव्यगुणा
स्तु तद्द्वारा । तथा हि यजेत स्वर्गकाम इत्यत्र
लभावनायां कथं भावाकाङ्क्षायां सन्निधिपठितै
श्रूयमाणफलकं क्रियाजातमुपकार्याकाङ्क्षयेतिक-
र्तव्यतात्वेनान्वेति क्रियाया एव लोके कथं भा-
वाकाङ्क्षायामन्वयदर्शनात् । न हि हस्तेन कुठारेण
छिन्द्यादित्यत्र कथंभावाकाङ्क्षायामुच्चार्यमाणोऽ-
पि हस्तोन्वेति किन्तु हस्तेनोद्यम्य निपात्येति
उद्यमननिपातने एव हस्तश्च तद्द्वारेणान्वेति इति
सार्वजनीनमेतत् ॥ इदं च स्थानादिभ्यो बलवत् ।
अत एवाक्षैर्दीव्यति राजन्यमिति देवनादयो धर्मा
अभिषेचनीयसन्निधौ पठिता अपि स्थानान्न तदङ्गं
किं तु प्रकरणाद्राजसूयाङ्गमिति ॥ देशसामान्यं
स्थानम् ॥ तद्द्विविधम् । पाठसादेश्यमनुष्ठानसा-
देश्यं चेति । स्थानं क्रमश्चेत्यनर्थान्तरम् । ...त्यो-
देश्यमपि द्विविधम् । यथासंख्यपाठः ...रूपेण्यु-
न्निधिपाठश्चेति । तत्रैन्द्राग्नमेका... । तदेवं नि-
पेद् वैश्वानरं द्वादशकपालं ...धः ॥ प्रयोगप्राशु-
...

प्रथम ... द्वितीयस्य वैश्वानरेष्टियागस्य ... इत्यादि द्वितीयमंग मित्यर्थः

ज्यानुवाक्यामन्त्राणां यथासंख्यं प्रथमस्य प्रथमं द्वि-
तीयस्य द्वितीयमित्येवं रूपो विनियोगो यथासं-
ख्यपाठात्। प्रथमपठितमन्त्रस्य हि कैमर्थ्याकाङ्क्षा-
याम् प्रथमतो विहितं कर्मैव प्रथममुपतिष्ठते समा-
नदेशत्वात्। एवं द्वितीयमन्त्रस्यापि वैकृताङ्गानुवा-
केन विहितानां संदंशपतितानां विकृत्यर्थत्वं सं-
निधिपाठात्। यथाऽऽमनहोमानां, तेषां हि कैमर्थ्या-
काङ्क्षायां फलंविकृत्यपूर्वमेव भाव्यत्वेन सम्बध्यते
उपस्थितत्वात्। स्वतन्त्रफलकत्वे विकृतिसन्निधि-
पाठानर्थक्यापत्तेः। पशुधर्माणामग्नीषोमीयार्थत्व-
मनुष्ठानसादेश्यात्। औपवसथ्येऽह्नि अग्नीषोमीयः
पशुरनुष्ठीयते तस्मिन्नेव दिने ते धर्माः पठ्यन्ते
अतस्तेषां कैमर्थ्याकाङ्क्षायामनुष्ठेयत्वेनोपस्थितं
तदपूर्वमेव भाव्यत्वेन सम्बध्यते। तच्च, स्थानं स-
माख्यातः प्रबलम्। अत एव शुन्धध्वमिति मन्त्रः सान्ना-
य्यपात्रे पाठसादेश्यात् न तु पौरोडाशिक-
मध्येऽभिधा पुरोडाशपात्राङ्गत्वम्। समा-
याग्नोपकार ... सा च द्विविधा। वैदिकी
कर्तव्यमिति ...

यजुर्वेदविहितानां पदार्थानामध्वर्युकर्तृकत्वम्

चमस इति वैदिकसमाख्यया, अध्वर्योस्तत्तत्पदार्थाङ्गत्वं लौकिक्याध्वर्यवमिति समाख्ययेति संक्षेपः। तदेवं निरूपितानि संक्षेपतः श्रुत्यादीनि षट् प्रमाणानि। एतत्सहकृतेन विनियोगविधिना समिदादिभिरुपकृत्य दर्शपूर्णमासाभ्यां यजेतेत्येवंरूपेण यानि नियोज्यन्ते तान्यङ्गानि द्विविधानि सिद्धरूपाणि क्रियारूपाणि चेति। तत्र सिद्धानि जातिद्रव्यसंख्यादीनि। तानि च दृष्टार्थान्येव। क्रियारूपाणि च द्विविधानि गुणकर्माणि प्रधानकर्माणि च। एतान्येव सन्निपत्योपकारकाणि आराडुपकारकाणीति चोच्यन्ते। कर्माङ्गद्रव्याद्युद्देशेन विधीयमानं कर्म सन्निपत्योपकारकम्। यथावघातप्रोक्षणादि, तच्च दृष्टार्थमदृष्टार्थं दृष्टादृष्टार्थं चेति। तत्र दृष्टार्थमवघातादि, अदृष्टार्थं प्रोक्षणादि, दृष्टादृष्टार्थं पशुपुरोडाशादि। तद्धि द्रव्यत्यागांशेनादृष्टं देवतोद्देशेन च देवतास्मरणं दृष्टं करोति। द्रव्याद्यनुद्दिश्य केवलं विधीयमानं कर्म आराडुपकारकम्। यथा प्रयाजादि। आराडुपकारकं च परमापूर्वोत्पत्तावेवोपयुज्यते। संनिपत्योपकारकं तु द्रव्यदेवतासंस्कारद्वारा यागस्वरूपेऽप्युपयुज्यते। इदमेव चाश्रयिकर्मेत्युच्यते। तदेवं निरूपितः संक्षेपतो विनियोगविधिः॥ प्रयोगप्राशु-

भावबोधको विधिः प्रयोगविधिः॥ स चाङ्गवाक्यैकवाक्यतापन्नः प्रधानविधिरेव। स हि साङ्गप्रधानमनुष्ठापयन् विलम्बे प्रमाणाभावादविलम्बापरपर्यायं प्रयोगप्राशुभावं विधत्ते। न च तदविलम्बेपि प्रमाणाभाव इतिवाच्यम्। विलम्बे त्वङ्गप्रधानविध्येकवाक्यतावगतत त्साहित्यानुपपत्तिः। विलम्बेन क्रियमाणयोः पदार्थयोरिदमनेन सहकृतमिति साहित्यव्यवहाराभावात्। स चाविलम्बो नियते क्रमे आश्रीयमाणे भवति अन्यथा हि किमेतदनन्तरमेतत्कर्तव्यमेतदनन्तरं चेति प्रयोगविच्छेपापत्तेः। अतः प्रयोगविधिरेव स्वविधेयप्रयोगप्राशुभावसिध्यर्थं नियतं क्रममपि पदार्थविशेषणतया विधत्ते। अत एवाङ्गानां क्रमबोधको विधिः प्रयोगविधिरित्यपि लक्षणम्। तत्र क्रमो नाम विततिविशेषः पौर्वापर्यरूपो वा। तत्र षट् प्रमाणानि श्रुत्यर्थपाठस्थानमुख्यप्रवृत्त्याख्यानि। तत्र क्रमपरं वचनं श्रुतिः। तच्च द्विविधं केवलक्रमपरं तद्विशिष्टपदार्थपरं चेति। तत्र वेदिं कृत्वा वेदिं करोतीति केवलक्रमपरं वेदिकरणादेर्वचनान्तरप्राप्तत्वात्। वषट्कर्तुः प्रथमभक्ष इति तु क्रमविशिष्टपदार्थपरम्। एकप्रसरताभङ्गभयेन भक्षानुवादेन क्रममात्रस्य विधातुमशक्य

(Handwritten marginal and interlinear notes: एकवाक्यतमाऽवगत; सर्वसंदेहे नाऽनुष्ठानं कोऽपत्तेः; वितानरूपः तनुविस्तारे; कुशशुद्धिं; उरंगुलपर; तगर्तं; शेषम्॥; एकवाक्यता-१८; १३। वषट्कर्तुः...विशिष्ट संबन्धाभिन्नःप्रथमविशिष्टभक्षः; तथाचानेन विहितभक्षानुवादेन प्रथमशब्देन...; ...स्यादितिभावः। १२८)

त्वात्। सेयं श्रुतिरितरप्रमाणापेक्षया बलवती तेषां वचनकल्पनद्वारा क्रमप्रमाणत्वात्। अत एवाश्विनग्रहणस्य पाठक्रमात्तृतीयस्थाने ग्रहणप्रसक्तावाश्विनो दशमो गृह्यत इति वचनाद् दशमस्थानेग्रहणमित्युक्तम्। यत्र प्रयोजनवशेन क्रमनिर्णयः सोऽर्थक्रमः। यथाग्निहोत्रं जुहोति यवागूं पचतीत्यग्निहोत्रयवागूपाकयोः। अत्र हि यवाग्वा होमार्थत्वेन तत्पाकः प्रयोजनवशेन पूर्वमनुष्ठीयते सचायं पाठक्रमाद्बलवान्। यथापाठं ह्यनुष्ठाने क्रमप्रयोजनबाधे अदृष्टार्थत्वं स्यात्। न हि होमानन्तरं क्रियमाणस्य पाकस्य किंचिद् दृष्टं प्रयोजनमस्ति। पदार्थबोधकवाक्यानां यः क्रमः स पाठक्रमः। तस्माच्च पदार्थानां क्रम आश्रियते येन हि क्रमेण वाक्यानि पठितानि तेनैव क्रमेणाधीतान्यर्थप्रत्ययं जनयन्ति। यथाप्रत्ययं च पदार्थानामनुष्ठानम्। स च पाठो द्विविधः। मन्त्रपाठो ब्राह्मणपाठश्चेति। तत्राग्नेयाऽग्नीषोमीययोस्तत्तद्------ याज्यानुवाक्यानां पाठाद्यः क्रम आश्रीयते स मन्त्रपाठात्। स चायं मन्त्रपाठो ब्राह्मणपाठाद्बलीयानऽनुष्ठाने ब्राह्मणवाक्यापेक्षया मन्त्रपाठस्यान्तरङ्गत्वात्। ब्राह्मणवाक्यं हि प्रयोगाद्बहिरेवेदं कर्तव्यमित्यवबोध्य कृतार्थम्। मन्त्राः

पुनः प्रयोगकाले व्याप्रियन्ते अनुष्ठानक्रमस्य स्म-
रणक्रमाधीनत्वात् तत्क्रमस्य च मन्त्रक्रमाधीन-
त्वाद् अन्तरगो मन्त्रपाठ इति प्रयाजानां समि-
धो यजति तनूनपातं जयति इत्येवं विधिपाठ-
क्रमाद्यः क्रमः स ब्राह्मणपाठक्रमात्। यद्यपि ब्रा-
ह्मणवाक्यान्यर्थं विधाय कृतार्थानि तथापि प्रया-
जादीनां क्रमस्मारकान्तरस्याभावात्तान्येव क्रम-
स्मारकत्वेन स्वीक्रियन्ते॥ स्थानं नामोपस्थितिः॥
यस्य हि देशे योनुष्ठीयते तत्पूर्वतने पदार्थे कृते
स एव पूर्वमुपस्थितो भवति इति युक्तं तस्य प्र-
थममनुष्ठानम्। अत एव सांद्यस्क्रे अग्नीषोमीयस-
वनीयानुबन्ध्यानां सवनीयदेशे साहानुष्ठाने कर्त-
व्ये आदौ सवनीयपशोरनुष्ठानमितरयोः पश्चात्त-
स्मिन्देशे आश्विनग्रहणानन्तरं सवनीयस्यैव प्र-
थममुपस्थितेः। तथा हि ज्योतिष्टोमे त्रयः पशु-
यागाः अग्नीषोमीयः सवनीयः अनुबन्ध्यश्चेति।
ते च भिन्नदेशाः। अग्नीषोमीय औपसथ्येन्हि।
सवनीयः सुत्याकाले। अनुबन्ध्यस्त्वन्ते। सांद्यस्क्रो
नाम सोमयागविशेषः। स चाव्यक्तत्वाज्ज्योति-
ष्टोमविकारः अतस्ते त्रयोपि पशुयागाः सांद्य-
स्क्रे चोदकप्राप्ताः। तेषां च तत्र साहित्यं श्रुतं
सह पशूनालभतइति। तच्च साहित्यं सवनीय-

देशे तस्य प्रधानप्रत्यासत्तेः स्थानातिक्रमणासाम्याच्च। सवनीयदेशे त्वनुष्ठानेऽग्नीषोमीयानुबन्ध्ययोः स्वस्वस्थानातिक्रमो भवति। अग्नीषोमीयदेशेनुबन्ध्यदेशे वानुष्ठाने त्रयाणामपि स्वस्वस्थानातिक्रमः तथा च प्रकृतावाश्विनग्रहं कृत्वा त्रिवृता यूपं परिवीय सवनीयं पशुमुपाकरोति इत्याश्विनग्रहणानन्तरं सवनीयो विहित इति साद्यस्क्रेप्याश्विनग्रहणे कृते सवनीय एवोपस्थितो भवतीति युक्तम्। तस्य स्थानात्प्रथममनुष्ठानमितरयोस्तु पश्चादित्युक्तम्॥ प्रधानक्रमेण योऽङ्गानां क्रमः स मुख्यक्रमः। येन हि क्रमेण प्रधानानि क्रियन्ते तेनैव क्रमेण तेषामङ्गान्यनुष्ठीयन्ते तदा सर्वेषामङ्गानां स्वैः स्वैः प्रधानैः तुल्यव्यवधानं भवति व्युत्क्रमेणानुष्ठाने केषां चिदङ्गानां स्वैः प्रधानैरत्यन्तमव्यवधानं केषां चिदत्यन्तं व्यवधानं स्यात् तच्चायुक्तं प्रयोगविध्युपगतसाहित्यबाधापत्तेः। अतः प्रधानक्रमोपि अङ्गक्रमे हेतुः। अत एव प्रयाजशेषेणादावाग्नेयहविषोभिघारणं पश्चादैन्द्रस्य दध्नः आग्नेयैन्द्रयागयोः पौर्वापर्यात्। एवं च द्वयोर्द्वयोरभिघारणयोः स्वस्वप्रधानेन तुल्यमेकान्तरितं व्यवधानं भवति व्युत्क्रमेणाभिघारणे तु आग्नेयहविरभिघारणाग्-

मन्त्रपाठ

ययागयोरत्यन्तमव्यवधानमैन्द्रदध्यभिघारणैन्द्र-यागयोर्व्यन्तरितं व्यवधानं तच्चायुक्तमेव । स च मुख्यक्रमः पाठक्रमाद्दुर्बलः । मुख्यक्रमो हि प्रमाणान्तरसापेक्षप्रधानक्रमप्रतिपत्तिसापेक्षतया विलम्बितप्रतिपत्तिकः । पाठक्रमस्तु निरपेक्षस्वाध्यायपाठक्रममात्रसापेक्षतया न तथेति बलवान् । सचायं मुख्यक्रमः प्रवृत्तिक्रमाच्च बलवान् प्रवृत्तिक्रमे हि द्वितीयादिपदार्थानां प्रथमानुष्ठितक्रमापेक्षा बहूनामङ्गानां प्रधानविप्रकर्षात् । मुख्यक्रमे तु संनिकर्षात्।सहप्रयुज्यमानेषु प्रधानेषु सन्निपातिनामङ्गानामावृत्त्यानुष्ठाने कर्तव्ये द्वितीयादिपदार्थानां प्रथमानुष्ठितपदार्थक्रमाद्यः क्रमः स प्रवृत्तिक्रमः । यथा प्राजापत्यपशुवङ्गेषु प्राजापत्या हि वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्तीतिवाक्येन तृतीयानिर्देशात्सेतिकर्तव्यताका एककालत्वेन विहिता-स्तेषां तदङ्गानां चोपाकरणनियोजनप्रभृतीनां साहित्यं संपाद्यं, तच्च प्राजापत्यपशूनां सम्प्रतिपन्नदेवताकत्वेन युगपदनुष्ठानादुपपद्यते । तदङ्गानां चोपाकरणादीनां युगपदनुष्ठानमशक्यमतस्तेषां साहित्यमव्यवहितानुष्ठानात् सम्पाद्यं तच्चैकस्योपाकरणं विधायापरस्योपा-

करणं विधेयम् । एवं नियोजनादिकमपि । तथा च प्राजापत्येषु कस्माच्चित्पशोरारभ्य एकं सर्वं सर्वत्रानुष्ठाय द्वितीयादिपदार्थः तेनैव क्रमेणानुष्ठेयः स प्रवृत्तिक्रमः । सोयं श्रुत्यादिभ्यो दुर्बलः । तदेवं संक्षेपतो निरूपितः षड्विधक्रमनिरूपणेन प्रयोगविधिः ॥ कर्मजन्यफलस्वाम्यबोधको विधिरधिकारविधिः ॥ कर्मजन्यफलस्वाम्यं कर्मजन्यफलभोक्तृत्वम् । स च यजेत स्वर्गकाम इत्यादिरूपः। स्वर्गमुद्दिश्य यागं विदधतानेन स्वर्गकामस्य यागजन्यफलभोक्तृत्वं प्रतिपाद्यते। यस्याहिताग्नेरग्निर्गृहान्दहेत्सोग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेदित्यादिनाग्निदाहादौ निमित्ते कर्म विदधता निमित्तवतः कर्मजन्यपापक्षयरूपफलस्वाम्यं प्रतिपाद्यते। एवमहरहः सन्ध्यामुपासीतेत्यादिना शुचिविहितकालजीविनः संध्योपासनजन्यप्रत्यवायपरिहाररूपफलस्वाम्यं बोध्यते । तच्च फलस्वाम्यं तस्यैव योधिकारविशिष्टः । अधिकारश्च यद्विधिवाक्येषु पुरुषविशेषणत्वेन श्रूयते । यथा काम्ये कर्मणि फलकामना। नैमित्तिके कर्मणि निमित्तनिश्चयः। नित्ये सन्ध्योपासनादौ शुचिविहिततत्कालजीवित्वम् । अत एव राजा राजसूयेन

स्वाराज्यकामो यजेतेत्यनेन विधिवाक्येन स्वाराज्यमुद्दिश्य विदधतापि न स्वाराज्यमात्रकामस्य तत्फलभोक्तृत्वं प्रतिपाद्यते किं तु राज्ञः सतः। स्वाराज्यकामस्यैव राजत्वस्यापि अधिकारिविशेषणत्वेन श्रवणात्। क्वचित्तु पुरुषविशेषणत्वेनाश्रुतमप्यधिकारिविशेषणम्। यथाध्ययनविधिसिद्धविद्याक्रतुविधीनामर्थज्ञानापेक्षणीयत्वेनाध्ययनविधिसिद्धार्थज्ञानवन्तं प्रत्येव प्रवृत्तेः। एवमग्निसाध्यकर्मसु आधानसिद्धाग्निमत्तामग्निसाध्यकर्मणामन्यपेक्षत्वेन तद्विधीनामाधानसिद्धाग्निमन्तं प्रत्येव प्रवृत्तेः। एवं सामर्थ्यमप्याख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणीति समर्थं प्रत्येव विधिप्रवृत्तेः। तदेवं निरूपितो विधिः॥ प्रयोगसमवेतार्थस्मारका मन्त्राः॥ तेषां च तादृशार्थस्मारकत्वेनैवार्थवत्त्वं न तु तदुच्चारणमदृष्टार्थं सम्भवति दृष्टफलकत्वे अदृष्टकल्पनाया अन्याय्यत्वात्। न च दृष्टस्यार्थस्मरणस्य प्रकारान्तरेणापि सम्भवान्मन्त्राम्नानं व्यर्थमितिवाच्यम्। मन्त्रैरेव स्मर्तव्यमिति नियमविध्याश्रयणात्॥ नानासाधनसाध्यक्रियायामेकसाधनप्राप्तावप्राप्तस्यापरसाधनस्य प्रापको विधिर्नियमविधिः॥ यथाहुः, विधिरत्यन्तमप्राप्तौ नियमः पा-

चिके सति। तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥ अस्यार्थः प्रमाणान्तरेणाप्राप्तस्य प्रापको विधिरपूर्वविधिः । यथा यजेत स्वर्गकाम इत्यादि। स्वर्गार्थकयागस्य प्रमाणान्तरेणाप्राप्तस्यानेन विधानात् । पक्षे अप्राप्तस्य प्रापको विधिर्नियमविधिः । यथा व्रीहीनवहन्तीत्यादिः। कथमस्य पक्षेऽप्राप्तप्रापकत्वमिति चेदित्थम् । अनेन ह्यवघातस्य वैतुष्यार्थत्वं न प्रतिपाद्यतेऽन्वयव्यतिरेकसिद्धत्वात् किं तु नियमः स चाप्राप्तांशपूरणम् । वैतुष्यस्य हि नानोपायसाध्यत्वाद् यदावघातं परित्यज्य उपायान्तरं गृहीतुमारभते तदावघातस्याऽप्राप्तत्वेन तद्विधाननामकमप्राप्तांशपूरणमेवानेन विधिना क्रियते। अतश्च नियमविधावप्राप्तांशपूरणात्मको नियम एव वाक्यार्थः। पक्षे अप्राप्तावघातविधानमिति यावत् ॥ उभयोश्च युगपत् प्राप्तावितरव्यावृत्तिपरो विधिः परिसंख्याविधिः ॥ यथा पञ्च पञ्चनखा भक्ष्या इति । इदं हि वाक्यं न पञ्चनखभक्षणपरं तस्य रागतः प्राप्तत्वात् नापि नियमपरं पञ्चनखापञ्चनखभक्षणस्य युगपत्प्राप्ते पक्षेऽप्राप्त्यभावात् । अत इदमपञ्चनखभक्षणनिवृत्तिपरमिति भवति परिसंख्याविधिः । सा च द्विविधा । श्रौती ला-

क्षणिकी चेति। तत्राह्व ह्येवावयन्तीति श्रौती परिसंख्या। एवकारेण पवमानातिरिक्तस्तोत्रव्यावृत्तेरभिधानात्। पञ्च पञ्चनखा भक्ष्या इति तु लाक्षणिकी। इतरनिवृत्त्यवाचकपदाभावात्। अत एवैषा त्रिदोषग्रस्ता। दोषत्रयं च श्रुतहानिरश्रुतकल्पना प्राप्तबाधश्चेति। तदुक्तम्। श्रुतार्थस्य परित्यागादश्रुतार्थस्य कल्पनात्। प्राप्तस्य बाधादित्येव परिसंख्या त्रिदूषणेति। श्रुतस्य पञ्चनखभक्षणस्य हानाद् अश्रुताया अपञ्चनखभक्षणनिवृत्तेः कल्पनात् प्राप्तस्य चापञ्चनखभक्षणस्य बाधनादिति। अस्मिंश्च दोषत्रये दोषद्वयं शब्दनिष्ठं, प्राप्तबाधस्त्वर्थनिष्ठ इति दिक्। येषां तु प्रयोगसमवेतार्थस्मारकत्वं न सम्भवति तदुच्चारणस्यानन्यगत्याऽदृष्टार्थकत्वं कल्प्यत इति नानर्थक्यमिति। नामधेयानां च विधेयार्थपरिच्छेदकतयार्थवत्त्वम्। तथा हि उद्भिदा यजेत पशुकाम इत्यत्र उद्भिच्छब्दो यागनामधेयं तेन चाभिधेयार्थपरिच्छेदः क्रियते। तथा हि अनेन वाक्येनाप्राप्तत्वात् फलोद्देशेन यागो विधीयते। यागसामान्यस्याविधेयत्वाद् यागविशेषे इत्यपेक्षायामुद्भिच्छब्दादुद्भिद्रूपो याग इति विज्ञायते। उद्भिदा यागेन पशुं भावयेदि-

त्वत्र सामानाधिकरण्येन नामधेयान्वयात् । नामधेयत्वं च निमित्तचतुष्टयात् । मत्वर्थलक्षणाभयाद्वाक्यभेदभयात्तत्प्रख्यशास्त्रात् तद्व्यपदेशादिति । तत्रोद्भिदा यजेत पशुकामः इत्यत्र उद्भिच्छब्दस्य यागनामधेयत्वं मत्वर्थलक्षणाभयात् । तथा हि न तावदनेन वाक्येन फलं प्रति यागविधानं तं प्रति च गुणविधानं युज्यते वाक्यभेदापत्तेः । उद्भिच्छब्दस्य गुणसमर्पकत्वे च यागस्याप्यप्राप्तत्वाद् गुणविशिष्टकर्मविधानं वाच्यम् । उद्भिद्वता यागेन पशुं भावयेदिति विशिष्टविधौ मत्वर्थलक्षणेत्युक्तमेव । चित्रया यजेत पशुकाम इत्यत्र चित्रापदस्य कर्मनामधेयत्वं वाक्यभेदभयात् । तथा हि न तावदत्र गुणविशिष्टयागविधानं सम्भवति दधि मधु पयो घृतं धाना उदकं तण्डुलाः तत्संसृष्टं प्राजापत्यमित्यनेन गुणस्य विहितत्वात् तद्विशिष्टयागविध्यनुपपत्तेः । यागस्य फलसम्बन्धे गुणसबन्धे च विधीयमाने वाक्यभेदः । तस्माच्चित्राशब्दः कर्मनामधेयम् । तथा च चित्रायागेन पशुं भावयेदिति सामानाधिकरण्येनान्वयात् न वाक्यभेदः । प्रकृतेऽनेकद्रव्यत्वेन चित्राशब्दस्य वाच्यत्वेनोपपत्तिः । अग्निहोत्रं जुहोतीत्यत्राग्निहोत्रशब्दस्य कर्मनामधे-

यत्वं तत्प्रख्यशास्त्रात्। तस्य गुणस्य प्रख्यापकस्य शास्त्रस्य विद्यमानत्वाद् अग्निहोत्रशब्दः कर्मनामधेयमिति यावत्। नन्वयं गुणविधिरेव कुतो नेतिचेन्न। यद्यग्नौ होत्रमस्मिन्निति सप्तमीसमासमाश्रित्य होमाधारत्वेनाग्निरूपो गुणो विधेयस्तदा यदाहवनीये जुहोति इत्यनेनैवाग्नेः प्राप्तत्वात्तद्विधानानर्थक्यम्। अग्नये होत्रमिति चतुर्थीसमासमाश्रित्य अग्निदेवतारूपगुणोनेन विधीयते इति चेन्न। तद्देवतायाः शास्त्रान्तरेण प्राप्तत्वात्। किं तच्छास्त्रान्तरमितिचेद्यदग्नये च प्रजापतये च सायं जुहोतीति केचित्। अपरे त्वग्निर्ज्योतिर्ज्योतिरग्निस्वाहेतिमन्त्रवर्ण एवाग्निरूपदेवताप्रापकः। नन्वग्नेर्मान्त्रवर्णिकत्वे प्रजापतिदेवतया बाधः स्यात् मन्त्रवर्णस्य चतुर्थीतो दुर्बलत्वात् यथाहुः तद्धितेन चतुर्थ्या च मन्त्रवर्णाच्च वा पुनः। देवताया विधिस्तत्र दुर्बलं तु ततः परमितिचेन्न। यदग्नये च प्रजापतये च सायं जुहोतीत्यत्र न केवलप्रजापतिविधानं किं तु मन्त्रवर्णप्राप्तमग्निमनूद्य तत्समुच्चितप्रजापतेः एवं च न बाधः केवलप्रजापतिविधानाभावात्। न चात्र समुच्चितोभयविधानमेव कथं नेतिवाच्यम्। समुच्चितोभय-

विधानापेक्षयान्यतः प्राप्तमग्निमनूद्य तत्समुच्चि-
तप्रजापतिमात्रविधाने लाघवात्। एवं च प्रया-
जेषु समिधादिदेवतानां समिधः समिधो ग्न-
आज्यस्य व्यन्त्वित्यादिमन्त्रवर्णेभ्यः प्राप्तत्वात् स-
मिधो यजतीत्यादिषु समिधादिशब्दः तत्प्रख्य-
शास्त्रात्कर्मनामधेयः॥ श्येनेनाभिचरन्यजेतेत्यत्र
श्येनशब्दस्य कर्मनामधेयत्वं तद्व्यपदेशात्। तेन
व्यपदेशादुपमानात्तदन्यथानुपपत्तेरिति यावत्।
तथा हि यद्विधेयं तस्य स्तुतिर्भवति। यद्यत्र श्ये-
नो विधेयः स्यात्तदार्थवादैः तस्यैव स्तुतिः का-
र्या। यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्-
तं भ्रातृव्यं निपत्यादत्ते इत्यनेनार्थवादेन श्येनः
स्तोतुं न शक्यः श्येनोपमानेनार्थान्तरस्तुतेः क्रि-
यमाणत्वात्। न च श्येनोपमानत्वेन स एव स्तो-
तुं शक्यते उपमानोपमेयभावस्य भिन्ननिष्ठत्वात्।
यदा तु श्येनसंज्ञको यागो विधीयते तदार्थवा-
देन श्येनोपमानेन तस्य स्तुतिः कर्तुं शक्यतइति
श्येनशब्दः कर्मनामधेयं तद्व्यपदेशादिति। उत्पत्ति
शिष्टगुणवलीयस्त्वमपि पञ्चमं नामधेयनिमि-
त्तमिति क्वचित् यथा वैश्वदेवेन यजेतेत्यादौ।
अत्रोत्पत्तिशिष्टाग्न्यादीनां बलीयस्त्वाद् वैश्वदेव-
शब्दस्य विश्वेदेवदेवताविधायकत्वं न संभवतीति तस्येति पं०न:१

कर्मनामधेयत्वम् । वस्तुतस्तु तत्प्रख्यशास्त्रादेवास्य कर्मनामधेयत्वं प्रकृतयागे विश्वेदेवरूपगुणसंप्रतिपन्नशास्त्रस्यार्थवादरूपस्यैव सत्त्वात्। यद्विश्वेदेवाः समयजन्त तद्वैश्वदेवस्यवैश्वदेवत्वम् ॥

पुरुषनिवर्तकं वाक्यं निषेधः निषेधकवाक्यानामनर्थहेतुक्रियानिवृत्तिजनकत्वेनैवार्थवत्त्वात् । तथा हि यथा विधिः प्रवर्तनां प्रतिपादयन् स्वप्रवर्तकत्वनिर्वाहार्थं विधेयस्य यागादेरिष्टसाधनत्वमाक्षिपन् पुरुषं तत्र प्रवर्तयति तथा न कलञ्जं भक्षयेदित्यादिनिषेधोपि निवर्तनं प्रतिपादयन् स्वनिवर्तकत्वनिर्वाहार्थं निषिध्यस्य कलञ्जभक्षणस्य परानिष्टसाधनत्वमाक्षिपन्पुरुषं ततो निवर्तयति। ननु निषेधवाक्यस्य कथं निवर्तनाप्रतिपादकत्वमिति चेदुच्यते। न तावदत्र धात्वर्थस्य नञर्थेनान्वयः अव्यवधानेपि तस्य प्रत्ययार्थभावनोपसर्जनत्वेनोपस्थितेरन्यत्रान्वेति अन्यथा राजपुरुषमानयेत्यादावपि राज्ञः क्रियान्वयापत्तेः। अतः प्रत्ययार्थस्यै व नञर्थेनान्वयः तत्रापि नाख्यातत्वांशवाच्यार्थभावनायाः तस्या लिङ्शब्दवाच्यप्रवर्तनोपसर्जनत्वेनोपस्थितेः किं तु लिङ्शब्दवाच्यशब्दभावनायास्तस्याः सर्वापेक्षया प्रधानत्वात् । नञस्त्वेवं स्वभावो यत्स्वसमभिव्याहृत-

*अर्थभावनायाः॥ शब्दभावना विशेषणत्वेन तस्याप्रधानत्वेनोपस्थितेः *तस्याः शब्दभावनायाः

(५) प्रवर्त्तयतीति प्रवर्त्तना प्रतीतिव न्निषेधवाक्य श्रवणेऽपि ये मा निवर्त्तयतीति निवर्त्तनाप्रतीतिः

पदार्थविरोधिबोधकत्वम्। यथा घटो नास्तीत्यादौ अस्तीतिसमभिव्याहृतो नञ् घटसत्त्वविरोधि घटासत्त्वं गमयति। तदिह लिङ्समभिव्याहृतो नञ् लिङर्थप्रवर्तनाविरोधिनीं निवर्तनामेव बोधयति। विधिवाक्यश्रवणे चायं मां प्रवर्तयतीतिप्रतीतेः। तस्मान्निषेधवाक्यस्थले निवर्तनैव वाक्यार्थः। यदा तु प्रत्ययार्थस्य तत्रान्वये बाधकं तदा धात्वर्थस्यैव तत्रान्वयः। तच्च बाधकं द्विविधम्। तस्य व्रतमित्युपक्रमो विकल्पप्रसक्तिश्च। तत्राद्यं नेक्षेतोद्यन्तमादित्यमित्यादौ तस्य व्रतमित्युपक्रमस्य तद्वाक्यपाठात्। तथा चात्र पर्युदासाश्रयणम्। तत्र हि व्रतशब्दस्य कर्तव्यार्थे रूढत्वात्तस्य व्रतमित्यत्र स्नातकस्य व्रतानां कर्तव्यत्वेनोपक्रमात्। किं तत्कर्तव्यमित्याकाङ्क्षायां नेक्षेतोद्यन्तमादित्यमित्यादिना कर्तव्यार्थ एव प्रतिपादनीयः अन्यथा पूर्वोक्तैर्वाक्ययोरेकवाक्यत्वं न स्यात्। तथा च नञर्थेन न प्रत्ययार्थान्वयः कर्तव्यार्थानवबोधात्। विध्यर्थप्रवर्तनाविरोधिनिवर्तनाया एव तादृशनञा बोधानात् तस्याश्च कर्तव्यार्थत्वाभावात्। तस्मान्नेक्षेतेत्यत्र नञा धात्वर्थविरोध्यनीक्षणसंकल्प एव लक्षणया प्रतिपाद्यते तस्य कर्तव्यत्वसंभवात्। आदित्यविषयकानीक्षण-

- प्रत्ययार्थस्य नञर्थेनान्वये तेन मानेत्यर्थ
- स्नातकव्रतस्य प्रक्रिया तदनु उद्यन्तमादित्यमीक्षणम् इत्यादि
- व्रतशब्दस्य कर्तव्ये रूढत्वात् यं
- न निवोधप्र... आदित्यार्थः

* तस्य व्रतमिति पूर्ववाक्येनानुष्ठेयं किंचिद्वोध्यतेऽत्र तेनेक्षेते त्यनेनानुष्ठेयस्यैवार्थस्य अनीक्षणसंकल्पस्य विधेयत्वात् ... ॥

संकल्पेन भावयेदिति वाक्यार्थः। तत्र भाव्याकाङ्क्षायामेतावता हैनसा विमुक्तो भवतीति वाक्यशेषावगतःपापक्षयो भाव्यतयान्वेति। एवं च पूर्वोत्तरयोरेकवाक्यत्वं निर्वहत्येव। नचात्र धात्वर्थविरोधिनः पदार्थान्तरस्यापि संभवात्कथमनीक्षणसंकल्पस्यैव भावनान्वय इतिवाच्यम्। तस्य कर्तव्यताभावेन प्रकृते भावनान्वयायोग्यत्वात्। द्वितीयं यजतिषु ये यजामहं करोति नानुयाजेषु इत्यादौ। अत्र विकल्पप्रसक्तौ च पर्युदासाश्रयणात्। तथा हि यद्यत्र वाक्ये नञर्थे प्रत्ययार्थान्वयः स्यात्तदानुयाजेषु ये यजामहं इति मन्त्रस्य प्रतिषेधः स्यात् अनुयाजेषु येयजामहं न कुर्यादिति। स च प्राप्तिपूर्वकत्वात्प्राप्तस्यैव प्रतिषेधात् प्राप्तिश्च यजतिषु येयजामहं करोतीतिशास्त्रादेव वाच्या शास्त्रप्राप्तस्य च प्रतिषेधे विकल्प एव न तु बाधः प्राप्तिमूलरागस्यैव तन्मूलशास्त्रस्य शास्त्रान्तरेण बाधायोगात्। न च पदे जुहोतीति विशेषशास्त्रेणाहवनीये जुहोतीतिशास्त्रस्येव नानुयाजेष्वित्यनेन यजतिषु येयजामहं करोतीत्यस्य बाधः स्यादितिवाच्यम्। परस्परनिरपेक्षयोरेव शास्त्रयोर्बाध्यबाधकभावात् पदशास्त्रस्य हि स्वार्थविधानार्थमाहवनीयशास्त्रस्यानपेक्षणान्निरपेक्षत्वं, प्रकृते तु

निषेधशास्त्रस्य निषेध्यप्रसक्त्यर्थं यजतिषु येयजामहंइत्यस्यापेक्षणान्न निरपेक्षत्वम्। तस्माच्छास्त्रविहितस्य शास्त्रान्तरेण प्रतिषेधे विकल्प एव। स च न युक्तः विकल्पे शास्त्रस्य पाक्षिकाप्रामाण्यसंपातात्। न हि अनुयाजेषु येयजामहमित्यस्यानुष्ठानेनानुयाजेष्वित्यस्य प्रामाण्यं संभवति व्रीहियागानुष्ठाने यवशास्त्रस्येव हिरदृष्टकल्पना च स्यात् विधिप्रतिषेधयोरपि पुरुषार्थत्वात्। अतो नात्र प्रतिषेधाश्रयणं किं तु नञोनुयाजसंबन्धमाश्रित्य पर्युदासस्यैवेत्थं चानुयाजव्यतिरिक्तेषु यजतिषु येयजामहमितिमन्त्रं कुर्यादितिवाक्यार्थबोधः। नञोनूयाजव्यतिरिक्ते लाक्षणिकत्वात्। एवं च न विकल्पः। अत्र च वाक्ये येयजामहंइति न विधीयते यजतिषु येयजामहमित्यनेनैव च प्राप्तत्वात् किं तु सामान्यशास्त्रप्राप्तयेयजामहंइत्यनुवादेन तस्यानुयाजव्यतिरिक्तविषयत्वं विधीयते। यद्यजतिषु येयजामहं करोतीति तदनुयाजव्यतिरिक्तेष्वेवेति। नन्वेवं सामान्यशास्त्रप्राप्तस्य विशेषे संकोचनरूपादुपसंहारात्पर्युदासस्य भेदो न स्यादितिचेन्न। उपसंहारो हि तन्मात्रसंकोचार्थः। यथा पुरोडाशं चतुर्धा करोतीतिसामान्यप्राप्तचतुर्धाकरणमाग्नेयं चतुर्धा करोतीतिविशेषादाग्ने-

विधिवन्निषेधस्याप्यदृष्टपुरुषार्थसंपादकत्वात्

यपुंडाग्रमात्रे संकोच्यते । पर्युदासस्तु तदन्यमात्रसंकोचार्थः इति ततो भेदात् । कुत्र चिद्विकल्पप्रसक्तावप्यनन्यगत्या प्रतिषेधाश्रयणम् । यथा नातिरात्रे षोडशिनं गृह्णातीत्यादौ । अत्र हि अतिरात्रे षोडशिनं गृह्णातीति शास्त्रप्राप्तषोडशिग्रहणस्य निषेधाद् विकल्पप्रसक्तावपि न पर्युदासाश्रयणमसंभवात् । तथा हि यद्यत्र षोडशिपदार्थेन नञर्थान्वयस्तदातिरात्रे षोडशिव्यतिरिक्तं गृह्णातीतिवाक्यार्थबोधः स्यात् स च न संभवति । अतिरात्रे षोडशिनं गृह्णातीति प्रत्यक्षविधिविरोधात् । यदि चातिरात्रपदार्थेनान्वयस्तदातिरात्रव्यतिरिक्ते षोडशिनं गृह्णातीतिवाक्यार्थबोधः स्यात्सोपि न संभवति तद्विधिविरोधात् । अतोत्रानन्यगत्या शास्त्रप्राप्तषोडशिग्रहणस्यैव निषेधः । न च विकल्पप्रसक्तिस्तस्याप्यपेक्षणीयत्वात् । इयांस्तु विशेषः । यद्विकल्पादेकप्रतिषेधेपि प्रतिषिध्यमानस्य नानर्थहेतुत्वं विधिनिषेधोभयस्यापि क्रत्वर्थत्वात् । यत्र तु न विकल्पः प्राप्तिश्च रागत एव प्रतिषेधस्य पुरुषार्थः तत्र प्रतिषिध्यमानस्यानर्थहेतुत्वम् । यथा न कलञ्जं भक्षयेदित्यादौ कलञ्जभक्षणादेः । तत्र भक्षणनिषेधस्यैव पुरुषार्थत्वात् । न च तत्र दीक्षितो न

होमादीनामनुष्ठानस्य पुरुषार्थत्वेपि क्रत्वनु
ष्ठानकाले पुरुषार्थतात्तत्तेषामनुष्ठानस्यमव
त्पनर्थहेतुत्वमिति भावः ॥३॥

ददाति न जुहोतीत्यादौ शास्त्रप्राप्तदानहोमादीनां निषेधाद्विकल्पापत्तिरितिवाच्याम्। स्वतः-पुरुषार्थभूतदानहोमादीनां निषेधस्य पुरुषार्थत्वाभावेपि निषिध्यमानस्य क्रत्वनर्थहेतुत्वात्। यथा ऋतौ स्वस्त्रीगमनादेः। तन्निषेधस्य क्रत्वर्थत्वेन तस्य क्रतुवैगुण्यसंपादकत्वात्॥ प्राशस्त्यनिन्दान्यतरपरं वाक्यमर्थवादः॥ तस्य च लक्षणया-प्रयोजनवदर्थपर्यवसानम्। तथा हि अर्थवादवाक्यं हि स्वार्थप्रतिपादने प्रयोजनाभावाद्विधेयनिषेध्ययोः प्राशस्त्यनिन्दितत्वे लक्षणया प्रतिपादयति। स्वार्थमात्रपरत्वे आनर्थक्यप्रसङ्गादाम्नायस्य क्रियार्थत्वात्। नचेष्टापत्तिः। स्वाध्यायोध्येतव्य इति अध्ययनविधिना सकलवेदाध्ययनं कर्तव्यमिति बोधयता सर्ववेदस्य प्रयोजनवदर्थपर्यवसायित्वं सूचयतोपात्तत्वेनानर्थक्यानुपपत्तेः। स हि द्विविधः। विधिशेषो निषेधशेषश्चेति। तत्र वायव्यं श्वेतमालभेत भूतिकाम इत्यादिविधिशेषस्य वायुर्वै क्षेपिष्ठा देवतेत्यादौ विधेयार्थप्राशस्त्यबोधनतयार्थवत्त्वम्। बर्हिषि रजतं न देयमित्यादिनिषेधशेषस्य सोरोदीयदरोदीत्तद्रुद्रस्य रुद्रत्वमित्यादेर्निषेधस्य निन्दितत्वबोधकतयार्थवत्त्वम्। न च प्राशस्त्यादिबोधस्य निष्प्रयोजनत्वे-

न नार्थवादस्यार्थवत्त्वमितिवाच्यम् । आलस्या-दिवशादप्रवर्तमानस्य पुंसः प्रवृत्त्यादिजनकत्वेन तद्बोधस्योपयोगात् । स पुनस्त्रिधा । तदुक्तं विरोधे गुणवादः स्यादनुवादोऽवधारिते । भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मत इति ॥ अस्यार्थः । प्रमाणान्तरविरोधे सत्यर्थवादो गुणवादः । यथा आदित्यो यूप इत्यादि । यूपे आदित्याभेदस्य प्रत्यक्षबाधितत्वादादित्यवदुज्ज्वलत्वरूपगुणोऽनेनलक्षणया प्रतिपाद्यते । प्रमाणान्तरावगतार्थबोधकोऽनुवादः । यथा अग्निर्हिमस्य भेषजम् इत्यत्र हिमविरोधित्वस्याग्नौ प्रत्यक्षावगतत्वात् । प्रमाणान्तरविरोधतत्प्राप्तिरहितार्थबोधकोऽर्थवादो भूतार्थवादः । यथेन्द्रो वृत्राय वज्रमुदयच्छदित्यादि । एवं च यजेत स्वर्गकाम इत्यादिनिखिलवेदस्य साक्षात्परम्परया वा यागादिधर्मप्रतिपादकत्वं सिद्धम् । सोयं धर्मो यदुद्दिश्यविहितस्तदुद्देशेन क्रियमाणस्तद्धेतुः । ईश्वरार्पणबुध्या क्रियमाणस्तु निःश्रेयसहेतुः । न च तदर्पणबुध्यानुष्ठाने प्रमाणाभावः । यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणमिति भगवद्गीतासुमृतेरेव प्रमाणत्वात् ।

प्रथमाध्यायस्य तृतीयपादे
स्मृतिपाद इत्येवं प्रसिद्धे +

स्मृतिचरणे तत्प्रामाण्यस्य श्रुतिमूलकत्वेन व्यवस्थापनादितिशिवम् ॥

बालानां सुखबोधाय भास्करेण सुमेधसा ।
रचितोयं समासेन जैमिनीयार्थसंग्रहः ॥

इति श्रीमहोपाध्यायलौगाक्षिभास्करविरचितं पूर्वमीमांसार्थसंग्रहनामकं प्रकरणम् ॥

॥ श्रीमद्गुरुवरचरणारविन्दार्पणमस्तु ॥

:*:—:*:*:—:*:

कदाचनस्तरीरसि नेन्द्रस्स्यक्तिदाशुषे पश्चाऽऐन्द्री भो इन्द्रकदाचि
पिद्यातको न भवसि किन्त्वाङ्गतिंदतवतेयजमानायप्रीयसेतस्याएवम
स्वर्गफलिका यागकरणिका प्रयाजादीतिकर्तव्यताकायाऽर्थीभ
तादृशार्थीभावनाफलिका लिङ्ज्ञानकरणिकाऽर्थवादज्ञाप्यप्राश
तिकर्तव्यताकाशाब्दीभावना स्वर्गकामोयजेतेतिवाक्यस्यशाब्दवे

साङ्ख्यतत्त्वकौमुदी ।

ईश्वरकृष्णकृतकारिकाव्याख्या
षड्दर्शनटीकाकृद्वाचस्पतिमिश्र
विरचिता ।



कलिकातानगरे
श्रीयुतभुवनचन्द्रवसाकसंस्थापित संवाद
ज्ञानरत्नाकरयन्त्रे तद्द्वारैव,
मुद्रितः प्रकाशितश्च ।
निमतलाघाट ष्ट्रीट ८ नम्बर भवन ।
इंराजी १८७७ ।

विज्ञापनम्।

कलिकाताराजधान्यां श्रीयुतबाबुभुवनचन्द्रवसाक संस्थापित संवादज्ञानरत्नाकराख्ययन्त्रे तद्द्वारैवदेवनागराक्षरे मुद्रितपुस्तक विवरणम्।

निमतलाघाटष्ट्रीट ८ संख्यक भवन।

संस्कृतम्।

वैद्यशास्त्र।

मुक्तावलि	॥)
परिभाषा प्रदीप	॥)
सटीक द्रव्यगुण	१)
चक्रदत्त	२)
शार्ङ्गधर	१)
चरक संहिता १म खण्ड इइते ८म खण्ड पर्य्यन्त	५)
वाग्भट्ट सूत्रस्थान	१)
निदान सटीक	२)
भैषज्यरत्नावलि सम्पूर्ण	५)
सुश्रुत सम्पूर्ण	२॥)
प्रयोगचिन्तामणि १ खण्ड	॥)
लोलिम्बराज	१)

सांख्य।

सांख्यतत्त्वकौमुदी	॥)

ज्योतिष्।

सूर्य्यसिद्धान्त	१॥)

न्याय।

खण्डनखण्डखाद्य	२)
शब्दशक्तिप्रकाशिका	१)
तत्त्वचिन्तामणि	=)
भाषापरिच्छेद	।=)
कुसुमाञ्जलि	।)
तत्त्वोपस्कार	=)

छन्दशास्त्र।

छन्दमञ्जरी	।)
पिङ्गल	१॥)

अलङ्कार

साहित्यदर्पण	१)
चन्द्रालोक	=)

तत्त्वकौमुदी ।



अजामेकां लोहितशुक्लकृष्णां
बह्वीः प्रजाः सृजमानां नमामः ।
अजा ये तां जुषमाणां भजन्ते
जहत्येनां भुक्तभोगां नुमस्तान् ॥ १ ॥

कपिलाय महामुनये मुनये शिष्याय तस्य चासुरये ।
पञ्चशिखाय तथेश्वरकृष्णायैतान् नमस्यामः ॥

इह खलु प्रतिपित्सितमर्थं प्रतिपादयन् प्रतिपादयिताऽवधेयवचनोभवति प्रेक्षावताम्, अप्रतिपित्सितन्तु प्रतिपादयन्नायं लौकिको नापि परीक्षक इति प्रेक्षावद्भिरुन्मत्तवदुपेक्ष्येत । स चैषां प्रतिपित्सितोऽर्थो यो ज्ञातः सन् परमपुरुषार्थाय कल्पत इति प्रारिप्सितशास्त्रविषयज्ञानस्य परमपुरुषार्थसाधनहेतुत्वात्तद्विषयजिज्ञासामवतारयति ।

दुःखत्रयाभिघाताज्जिज्ञासा तदवघातके हेतौ ।
दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात् ॥ १ ॥

एवं हि शास्त्रविषयो न जिज्ञास्येत यदि दुःखं नाम जगति न स्यात्, सद्वा न जिहासितं, जिहासितं वाऽशक्य-

क्यसमुच्छेदम्, अशक्यसमुच्छेदता च द्वेधा दुःखस्य नित्यत्वाद्वा तदुच्छेदोपायापरिज्ञानाद्वा, शक्यसमुच्छेदत्वेऽपि च शास्त्रविषयस्य ज्ञानस्यानुपायत्वाद्वा सुकरस्योपायान्तरस्य सद्भावाद्वा। तत्र न तावत् दुःखं नास्ति, नाप्यजिहासितमित्यत उक्तं दुःखत्रयाभिघातादिति। दुःखानां त्रयं दुःखत्रयं तत् खलु आध्यात्मिकमाधिभौतिकमाधिदैविकञ्च तत्राध्यात्मिकं द्विविधं शारीरं मानसञ्च। शारीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तं, मानसं कामक्रोधलोभमोहभयेर्ष्याविषादविषयविशेषादर्शननिबन्धनम्। सर्वं चैतदान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम्। बाह्योपायसाध्यञ्च दुःखं द्वेधा आधिभौतिकमाधिदैविकञ्च तत्राधिभौतिकं मानुषपशुपक्षिसरीसृपस्थावरनिमित्तम्। आधिदैविकं यक्षराक्षसविनायकग्रहावेशनिबन्धनम्। तदेतत् प्रत्यात्मवेदनीयं दुःखं रजःपरिणामभेदो न शक्यते प्रत्याख्यातुम्। तदनेन दुःखत्रिकेणान्तःकरणवर्त्तिना चेतनाशक्तेः प्रतिकूलतयाभिसम्बन्धोऽभिघात इति। एतावता प्रतिकूलवेदनीयत्वं जिज्ञासाहेतुरुक्तः। यद्यपि न सन्निरुध्यते दुःखं तथापि तदभिभवः शक्यः कर्त्तुमित्युपरिष्टान्निवेदयिष्यते। तस्मादुपपन्नं तदपघातके हेताविति। तस्य दुःखत्रयस्यापघातकस्तदपघातक उपसर्जनस्यापि बुद्ध्या समाकृष्टस्य तदा परामर्शः। अपघातकश्च हेतुः शास्त्रप्रतिपाद्यो नान्य इत्याशयः।

अत्राशङ्कते दृष्टे सापार्था चेदिति। अयमर्थः

अस्तु दुःखत्रयं, जिज्ञासितञ्च तद्भवतु, भवतु च तत् प्रकयहानं, सहताच्च शास्त्रगम्य उपायस्तदुच्छेत्तुम्, तथाप्यत्र प्रेक्षावतां न युक्ता जिज्ञासा दृष्टस्यैवोपायस्य तदुच्छेदकस्य सुकरस्य विद्यमानत्वात्। तथा च लौकिकानामाभाणकः अर्के (क्के) चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्। दृष्टस्यार्थस्य संसिद्धौ को विद्वान् यत्नमाचरेदिति। सन्ति चोपायाः शतशः शारीरदुःखप्रतीकारायेषत्कराः भिषजां वरैरुपदिष्टाः, मानसस्यापि सन्तापस्य प्रतीकाराय मनोज्ञस्त्रीपानभोजनविलेपनवस्त्रालङ्कारादिविषयप्राप्तिरुपायः सुकरः एवमाधिभौतिकदुःखस्य नीतिशास्त्राभ्यासकुशलतानिरत्ययस्थानाध्यासनादिः प्रतीकारहेतुरीषत्करः। तथाधिदैविकस्यापि दुःखस्य मणिमन्त्रौषधाद्युपयोगः सुकरः प्रतीकारोपाय इति।

निराकरोति नेति कुतः, एकान्तात्यन्ततोऽभावात् एकान्तो दुःखनिवृत्तेरवश्यम्भावः अत्यन्तो निवृत्तस्य दुःखस्य पुनरनुत्पादस्तयोरेकान्तात्यन्तयोरभाव, एकान्तात्यन्ततोऽभाव इति। षष्ठीस्थाने सार्व्वविभक्तिकस्तसिल्। एतदुक्तं भवति, यथा विधिरसायनादिकामिनीनीतिशास्त्राभ्यासमन्त्राद्युपयोगेऽपि तस्य तस्याध्यात्मिकादेर्दुःखस्य निवृत्तेरदर्शनादनैकान्तिकत्वं, निवृत्तस्यापि पुनरुत्पत्तिदर्शनादनात्यन्तिकत्वमिति सुकरोऽप्यैकान्तिकात्यन्तिकदुःखनिवर्त्तने दृष्ट उपाय इति न अपार्था जिज्ञासेत्यर्थः। यद्यपि दुःखममङ्गलं तथापि तत्परीहारार्थत्वेन

तदवघातो मङ्गलमेवेति युक्तं शास्त्रादौ तत्कीर्त्तनमिति॥ १ ॥

स्यादेतत् मा भूद्दृष्ट उपायो, वैदिकस्तु ज्योतिष्टोमादिः संवत्सरपर्य्यन्तः कर्म्मकलापस्तापत्रयमेकान्तमत्यन्तञ्चापनेष्यति, श्रूयते हि "स्वर्गकामोयजेतेति," स्वर्गश्च "यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतञ्च तत् सुखं स्वःपदास्पदमिति" दुःखविरोधी सुखविशेषः। स च स्वर्गः स्वसत्तया समूलघातमवहन्ति दुःखं, न चैष क्षयी तथा हि श्रूयते "अपाम सोमममृता अभूमेति" तदपक्षये कुतोऽस्यामृतत्वसम्भवः। तस्माद्वैदिकस्योपायस्य तापत्रयप्रतीकारहेतोर्मुहूर्त्तयामाहोरात्रमाससंवत्सरादिनिर्वर्त्तनीयतयानेकजन्मपरम्परायाससम्पादनीयाद् विवेकज्ञानादीषत्करत्वात् पुनरप्यपार्था जिज्ञासा इत्याशङ्क्याह।

दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः।
तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्॥२॥

गुरुपाठादनुश्रूयते इत्यनुश्रवो वेदः एतदुक्तं भवति श्रूयत एव परं न तु केनचित् क्रियत इति तत्र भवः आनुश्रविक इति तत्र प्राप्तो ज्ञात इति यावत् आनुश्रविकोऽपि कर्म्मकलापो दृष्टेन तुल्यो वर्त्तत इति ऐकान्तिकात्यन्तिकदुःखप्रतीकारानुपायत्वस्योभयत्रापि तुल्यत्वात्। यद्यपि चानुश्रविक इति सामान्येनाभिहितं तथापि

कर्म्मकलापाभिप्रायो द्रष्टव्यः विवेकज्ञानस्याप्यानुश्रविकत्वात् तथाच श्रुयते "आत्मा वा अरे ज्ञातव्यः" प्रकृतितो विवेक्तव्यः "न स पुनरावर्त्तते" इति। अस्यां प्रतिज्ञायां हेतुमाह स ह्यविशुद्धिक्षयातिशययुक्तः अविशुद्धिः सोमादियागस्य पशुवीजादिबधसाधनता यथाह स्म भगवान् पञ्चशिखाचार्य्यः "स्वल्पसङ्करः सपरिहारः सप्रत्यवमर्ष" इति। स्वल्पसङ्करः ज्योतिष्टोमादि जन्मनः प्रधानापूर्व्वस्य स्वल्पेन पशुहिंसादिजन्मनानर्थहेतुना अपूर्वेण सङ्करः सपरिहारः कियतापि प्रायश्चित्तेन परिहर्त्तुं शक्यः। अथ प्रमादतः प्रायश्चित्तमपि नाचरितं प्रधानकर्म्मविपाकसमये च पच्यते तथापि यावदसावनर्थं सूते तावत् सप्रत्यवमर्षः प्रत्यवमर्षेण सहिष्णुतया सह वर्त्तत इति कृष्यन्ते हि पुण्यसम्भारोपनीतस्वर्गसुधामहाह्रदावगाहिनः कुशलाः पापमात्रोपपादितां दुःखवह्निकणिकाम्।

न च "मा हिंस्यात् सर्व्वाभूतानीति" सामान्यशास्त्रं विशेषशास्त्रेण "अग्नीषोमीयं पशुमालभेतेत्यनेन" वाध्यत इति युक्तं विरोधाभावात् विरोधे हि वलीयसा दुर्बलं बाध्यते। नचेहास्ति कश्चित् विरोधः भिन्नविषयत्वात्। तथा हि "मा हिंस्यादिति" निषेधेन हिंसाया अनर्थहेतुभावो ज्ञाप्यते न त्वक्रत्वर्थत्वमपि "अग्नीषोमीयं पशुमालभेते"त्यनेनतु पशुहिंसायाः क्रत्वर्थत्वमुच्यते न त्वनर्थहेतुत्वाभावस्तथा सति वाक्यभेदप्रसङ्गात् न चानर्थ-

हेतुत्वकृतूपकारकत्वयोः कश्चिदस्ति विरोधः। हिंसा हि पुरुषस्य दोषमावक्ष्यति क्रतोश्चोपकरिष्यति। क्षयातिशयौ च फलगतावप्युपाये उपचरितौ। क्षयित्वञ्च स्वर्गादेः सत्त्वे सति कार्य्यत्वादनुमितमिति। ज्योतिष्टोमादयः स्वर्गमात्रस्य साधनं, वाजपेयादयस्तु स्वाराज्यस्येत्यतिशययुक्तत्वम्। परसम्पदुत्कर्षो हीनसम्पदं पुरुषं दुःखाकरोतीति। "अपाम सोमममृता अभूमेति" चामृतत्वाभिधानं चिरस्थेमानमुपलक्षयति यदाहुः "आभूतसंप्लवं स्थानममृतत्वं हि भाष्यत" इति अतएव च श्रुतिः "न कर्म्मणा न प्रजया न धनेन त्यागेनैके अमृतत्वमानशुः"। "परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति"। तथा, "कर्म्मणा मृत्युमृषयो निषेदुः प्रजावन्तो द्रविणमीहमानाः"। तथा, "परे ऋषयो मनीषिणः परं कर्म्मभ्योऽमृतत्वमानशु" रिति। तदेतत्सर्वमभिप्रेत्याह तद्विपरीतः श्रेयान् तस्मादानुश्रविकाद्दुःखापघातकादुपायात् सोमादेरविशुद्धादनित्यसातिशयफलाद्विपरीतो-विशुद्धो हिंसादिसङ्कराभावान्नित्यनिरतिशयफलोऽसकृदपुनरावृत्तिश्रुतेः। न च कार्य्यत्वेनानित्यता फलस्य युक्ता भावकार्य्यस्य तथात्वात् दुःखप्रध्वंसस्य तु कार्य्यस्यापि तद्वैपरीत्यात्। न च दुःखान्तरोत्पादः कारणाप्रवृत्तौ कार्य्यानुत्पादात् विवेकज्ञानोपजननपर्य्यन्तत्वाच्च कारणप्रवृत्तेः एतच्चोपरिष्टादुपपादयिष्यते। अक्षरार्थस्तु तस्मादानुश्रविकाद्दुःखापघातकाद्धेतोर्विपरीतः सत्त्वपुरुषान्यता-

प्रत्ययः तत्साक्षात्कारोदुःखाभिघातकोहेतुः अतएव श्रेयान् आनुश्रविको हि वेदविहितत्वान्मात्रया दुःखाभिघातकत्वाच्च प्रशस्यः सत्वपुरुषान्यताप्रत्ययोऽपि प्रशस्यः तदनयोः प्रशस्ययोर्मध्ये सत्व पुरुषान्यता प्रत्ययः श्रेयान्। कुतः पुनरस्योत्पत्तिरित्यत उक्तं व्यक्ताव्यक्तज्ञविज्ञानात् व्यक्तञ्चाव्यक्तञ्च ज्ञश्च व्यक्ताव्यक्तज्ञाः तेषां विज्ञानं विवेकेन ज्ञानम्। व्यक्तज्ञानपूर्व्वकमव्यक्तस्य तत्कारणस्य ज्ञानं तयोश्च पारार्थ्येनात्मा परो ज्ञायतइति ज्ञानक्रमेणाभिधानम्। एतदुक्तं भवति श्रुतिस्मृतीतिहासपुराणेभ्योव्यक्तादीन् विवेकेन श्रुत्वा शास्त्रयुक्त्या च व्यवस्थाप्यदीर्घकालादरनैरन्तर्य्यसत्कारसेविताद्भावनामयाद्विज्ञानमिति तथाच वक्ष्यति "एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्। अविपर्य्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञान" मिति ॥ २॥

तदेवं प्रेक्षावदपेक्षितार्थत्वेन शास्त्रारम्भं समाधाय शास्त्रमारभमाणः श्रोतृबुद्धिसमवधानाय तदर्थं संक्षेपतः प्रतिजानीते।

मूलप्रकृतिरविकृतिर्महदाद्याःप्रकृतिविकृतयःसप्त
षोड़शकस्तुविकारोनप्रकृतिर्नविकृतिःपुरुषः॥३॥

संक्षेपतो हि शास्त्रार्थस्य चतस्रोविधाः कश्चिदर्थः प्रकृतिरेव, कश्चिदर्थोविकृतिरेव कश्चित् प्रकृतिविकृतिरेव, कश्चिदनुभयरूप इति। तत्र का प्रकृतिरेवेत्यत उक्तम् मूलप्रकृतिरविकृतिरिति प्रकरोतीति प्रकृतिः प्रधानं सत्व-

रजस्तमसां साम्यावस्था सा अविकृतिः प्रकृतिरेवेत्यर्थः कस्मादित्यत उक्तम् मूलेति मूलञ्चासौ प्रकृतिश्चेति मूलप्रकृतिः विश्वस्य कार्य्यसंघातस्य सा मूलं नतस्या मूलान्तरमस्ति अनवस्थाप्रसङ्गात् न चानवस्थायां प्रमाणमस्तीति भावः। कतमाः पुनः प्रकृतिविकृतयः कियत्यश्चेत्यत उक्तम् महदाद्याः प्रकृतिविकृतयः सप्तेति॥ प्रकृतयश्च ता विकृतयश्च ता इति। तथाहि महत्तत्त्वमहङ्कारस्य प्रकृतिर्विकृतिश्च मूलप्रकृतेः, एवमहङ्कारतत्त्वं तन्मात्राणामिन्द्रियाणाञ्च प्रकृतिर्विकृतिश्च महतः। एवं पञ्चतन्मात्राणि भूतानामाकाशादीनां प्रकृतयोविकृतयश्चाहङ्कारस्य। अथ का विकृतिरेव कियती चेत्यतउक्तं षोड़शकस्तु विकार इति षोड़शसंख्यापरिमितोगणः षोड़शकः तुशब्दोऽवधारणे भिन्नक्रमश्च पञ्च महाभूतान्येकादशेन्द्रियाणि चेति षोड़शको गणो विकार एव न प्रकृतिरिति। यद्यपि च पृथिव्यादीनामपि गोघटवृक्षादयो विकाराः एवं तद्विकारभेदानां दध्यङ्कुरादयस्तथापि गवादयो बीजादयो वा न पृथिव्यादिभ्यस्तत्त्वान्तरं तत्त्वान्तरोपादानत्वञ्च प्रकृतित्वमिहाभिमेतमिति न दोषः सर्व्वेषां गोघटादीनां स्थूलतेन्द्रियग्राह्यता च समेति न तत्त्वान्तरत्वम्। अनुभयरूपमुक्तं तदाह न प्रकृतिर्न विकृतिः पुरुष इति एतच्च सर्व्वमुपरिष्टादुपपादयिष्यते॥ ३॥

तमिममर्थं प्रामाणिकं कर्त्तुमभिमताः प्रमाणभेदा

लक्षणीयाः न च सामान्यलक्षणमन्तरेण शक्यं विशेषलक्षणं कर्त्तुमिति प्रमाणसामान्यं तावल्लक्षयति।

दृष्टमनुमानमाप्तवचनं च सर्व्वप्रमाणसिद्धत्वात्।
त्रिविधम्प्रमाणमिष्टम्प्रमेयसिद्धिः प्रमाणाद्धि ॥४॥

अत्र च प्रमाणमिति समाख्या लक्ष्यपदं तन्निर्वचनञ्च लक्षणम् प्रमीयतेऽनेनेति निर्वचनात् प्रमां प्रति करणत्वं गम्यते। असन्दिग्धाविपरीतानधिगतविषया चित्तवृत्तिर्बोधश्च फलं प्रमा तत्साधनम्प्रमाणमिति। एतेन संशयविपर्य्ययस्मृतिसाधनेषु प्रमाणेषु न प्रसङ्गः। संख्याविप्रतिपत्तिं निराकारोति त्रिविधमिति तिस्रो विधा अस्य प्रमाणसामान्यस्य त्रिविधमिति न न्यूनं नाप्यधिकमित्यर्थः। विशेषलक्षणानन्तरञ्चैतदुपपादयिष्यामः। कतमाः पुनस्ता विधा इत्यत आह दृष्टमनुमानमाप्तवचनं चेति एतच्च लौकिकप्रमाणाभिप्रायम् लोकव्युत्पादनार्थत्वाच्छास्त्रस्य तस्यैवात्राधिकारात्। आर्षन्तु विज्ञानं योगिनामूर्द्ध्वस्रोतसां न लोकव्युत्पादनायालमिति सदपिनाभिहितमनधिकारात्। स्यादेतत् मा भून्न्यूनम्, अधिकन्तु कस्मान्न भवति, सङ्गिरन्ते हि वादिन उपमानादीन्यपि प्रमाणानीत्यत आह सर्व्वप्रमाणसिद्धत्वादिति एष्वेव दृष्टानुमानाप्तवचनेषु सर्व्वेषां प्रमाणानां सिद्धत्वादन्तर्भावादित्यर्थः। एतच्चोपपादयिष्याम इत्युक्तम्। अथ प्रमेयव्युत्पादनाय प्रवृत्तं शास्त्रं कस्मात् प्रमाणं समान्यतोविशेषतश्च लक्षयतीत्यत आह प्रमेयसिद्धिः

प्रमाणाद्भवतीति सिद्धिः प्रतीतिः। सेयमार्य्या अर्थक्रमानुरोधेन पाठक्रममनादृत्यैवं व्याख्याता॥ ४॥

सम्प्रति प्रमाणविशेषलक्षणावसरे प्रत्यक्षस्य प्रमाणेषु ज्येष्ठत्वात्तदधीनत्वाच्चानुमानादीनां सर्व्ववादिनामविप्रपत्तेश्च तदेव तावल्लक्षयति।

प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम्।
तल्लिङ्गलिङ्गिपूर्व्वकमाप्तश्रुतिराप्तवचनन्तु॥ ५॥

अत्र दृष्टमिति लक्ष्यनिर्द्देशः परिशिष्टन्तु लक्षणं समानासमानजातीयव्यवच्छेदो लक्षणार्थः। अवयवार्थस्तु विषिन्वन्ति विषयिणमनुबध्नन्ति स्वेन रूपेण निरूपणीयं कुर्व्वन्तीति यावत् विषयाः पृथिव्यादयः सुखादयश्चास्मदादीनामविषयाश्च तन्मात्रलक्षणा योगिनामूर्द्ध्वस्रोतसाञ्च विषयाः विषयं विषयं प्रति वर्त्तते इति प्रतिविषयमिन्द्रियं वृत्तिश्च सन्निकर्षः अर्थसन्निकृष्टमिन्द्रियमित्यर्थः तस्मिन्नध्यवसायस्तदाश्रितइत्यर्थः अध्यवसायश्च बुद्धिव्यापारो ज्ञानम्। उपात्तविषयाणामिन्द्रियाणां वृत्तौ सत्यां बुद्धेस्तमोऽभिभवे सति यः सत्त्वसमुद्रेकः सोऽध्यवसायइति वृत्तिरिति ज्ञानमिति चाख्यायते इदं तावत् प्रमाणम्। अनेन यश्चेतनाशक्तेरनुग्रहस्तत् फलं प्रमाबोधः। बुद्धितत्त्वं हि प्राकृतत्वादचेतनमिति तदीयोऽध्यवसायोऽप्यचेतनो घटादिवत्, एवं बुद्धितत्त्वस्य सुखादयोऽपि परिणामभेदा अचेतनाः। पुरुषस्तु सुखाद्यननुषङ्गी चेतनः

सोऽयं बुद्धितत्त्ववर्त्तिना ज्ञानसुखादिना तत्प्रतिबिम्बित-स्तच्छायापत्त्या ज्ञानसुखादिमानिव भवतीति चेतनोऽनु-गृह्यते चितिच्छायापत्त्या चाचेतनापि बुद्धिस्तदध्यवसायो-ऽपिचेतन इव भवतीति। तथा च वक्ष्यति "तस्मात्तत्सं-योगादचेतनं चेतनावदिव लिङ्गम्। गुणकर्त्तृत्वेऽपि तथा कर्त्तेव भवत्युदासीन" इति। अत्राध्यवसायग्रहणेन संशयं व्यवच्छिनत्ति संशयस्य अनवस्थितग्रहणेना निश्चितरूप-त्वात् निश्चयोऽध्यवसाय इत्यनर्थान्तरम्। विषयग्रहणेन चासद्विषयं विपर्य्ययमपाकरोति प्रतिग्रहणेन चेन्द्रियार्थ-सन्निकर्षसूचनादनुमानस्मृत्यादयः पराकृता भवन्ति। तदेवं समानासमानजातीयव्यवच्छेदकत्वात् प्रतिविषया-ध्यवसायदृष्टिं दृष्टस्य सम्पूर्णं लक्षणम्। तन्त्रान्तरे तैर्थि-कानां लक्षणान्तराणि तु न दूषितानि विस्तरभयादिति।

नानुमानम्प्रमाणमिति वदता लौकायतिकेन अप्रति-पन्नः सन्दिग्धो विपर्य्यस्तो वा पुरुषः कथं प्रतिपद्येत नच पुरुषान्तरगता अज्ञानसन्देहविपर्य्यासाः शक्याः अर्व्वाग्दृशा प्रत्यक्षेण प्रतिपत्तुम्, नापि मानान्तरेण, अनभ्युपगमात् अनवधृताज्ञानसंशयविपर्य्यासस्तु यं कञ्चित् पुरुषं प्रति प्रवर्त्तमानोऽनवधेयवचनतया प्रेक्षावद्भिरुन्मत्तवदुपेक्ष्येत। तदनेनाज्ञानादयः परपुरुषवर्त्तिनोऽभिप्रायभेदाद् वचन-भेदलिङ्गादनुमातव्या इत्यकामेनाप्यनुमानम्प्रमाणमभ्युपे-तव्यम्। तत्र प्रत्यक्षकार्य्यत्वादनुमानं प्रत्यक्षानन्तरं निरू-पणीयम् तत्रापि सामान्यलक्षणपूर्व्वकत्वाद्विशेषलक्षणस्ये-

त्वनुमानसामान्यं तावल्लक्षयति लिङ्गलिङ्गिपूर्व्वकमिति लिङ्गं व्याप्यं लिङ्गि व्यापकं, शङ्कितसमारोपितोपाधि निराकरणेन वस्तुस्वभावप्रतिबद्धं व्याप्यं, येन च प्रतिबद्धं तद्व्यापकम्। लिङ्गलिङ्गिग्रहणेन च विषयवाचिना विषयिणं प्रत्ययमुपलक्षयति धूमादि व्याप्यो वह्निर्व्यापक इति यः प्रत्ययस्तत्पूर्व्वकम्। लिङ्गिग्रहणञ्चावर्त्तनीयं तेन लिङ्गमस्यास्तीति पक्षधर्म्मताज्ञानमपि दर्शितं भवति। तद्व्याप्यव्यापकभावपक्षधर्म्मताज्ञानपूर्व्वकमनुमानमिति अनुमानसामान्यं लक्षितम्। अनुमानविशेषान् तन्त्रान्तरे, लक्षितान् स्मारयति त्रिविधमनुमानमाख्यातं तदिति तद्सामान्यतो लक्षितमनुमानं विशेषतस्त्रिविधम् "पूर्व्ववत्, शेषवत्, सामान्य तोदृष्टञ्च"। तत्र प्रथमं तावत् द्विविधं वीतमवीतञ्च अन्वयमुखेन प्रवर्त्तमानं विधायकं वीतम्। व्यतिरेकमुखेन प्रवर्त्तमानं निषेधकमवीतम्। तत्रावीतम् शेषवत् शिष्यते परिशिष्यते इति शेषः सएव विषयतया यस्यास्त्यनुमानज्ञानस्य तच्छेषवत्। यदाहुः प्रसक्तप्रतिषेधेऽन्यत्राप्रसङ्गाच्छिष्यमाणे सम्प्रत्ययः परिशेष, इति। अस्य चावीतस्य व्यतिरेकिण उदाहरणमग्रेऽभिधास्यते। वीतञ्च द्वेधा पूर्व्ववत्, सामान्यतोदृष्टञ्च। तत्रैकं दृष्टस्वलक्षणसामान्य विषयं यत् तत् पूर्व्ववत्, पूर्वं प्रसिद्धं दृष्टस्वलक्षणसामान्यमिति यावत् तदस्य विषयत्वेनास्त्यनुमानज्ञानस्येति पूर्व्ववत् यथा धूमाद्वह्नित्वसामान्य विशेषः पर्व्वतेऽनुमीयते तस्य च वह्नित्वसामान्य विशेषस्य स्वलक्षणो

वह्निविशेषो दृष्टो रसवत्याम्। अपरञ्च वीतं सामान्यतोदृष्टम् अदृष्टस्वलक्षणसामान्यविषयं यथेन्द्रियविषयमनुमानम् अत हि रूपादिज्ञानानां क्रियात्वेन करणवत्त्वमनुमीयते। यद्यपि करणत्वसामान्यस्य छिदादौ वास्यादि स्वलक्षणमुपलब्धं तथापि यज्जातीयस्य रूपादिज्ञाने करणवत्त्वमनुमीयते तज्जातीयस्य करणस्य न दृष्टं स्वलक्षणं प्रत्यक्षेण, इन्द्रियजातीयं हि तत् करणं, न चेन्द्रियत्वस्य सामान्यस्य स्वलक्षणमिन्द्रियविशेषः प्रत्यक्षगोचरोऽर्वाग्दृशां यथा वह्नित्वसामान्यस्य स्वलक्षणं वह्निः। सोऽयं पूर्ववतः सामान्यतोदृष्टात् सत्यपि वीतत्वेन तुल्यत्वे विशेषः। अत्र च दृष्टं दर्शनं सामान्यत इति सामान्यस्य, सार्वविभक्तिकस्तसिल्। अदृष्टस्वलक्षणसामान्यविशेषस्य दर्शनं सामान्यतोदृष्टमनुमानमित्यर्थः। सर्वञ्चैतदस्माभिर्न्यायवार्त्तिकतात्पर्य्यटीकायां व्युत्पादितं नेहोक्तं विस्तरभयादिति।

प्रयोजकवृद्धशब्दश्रवणसमनन्तरम् प्रयोज्यवृद्धप्रवृत्तिहेतुज्ञानानुमानपूर्व्वकत्वाच्छब्दार्थसम्बन्धग्रहणस्य, स्वार्थसम्बन्धज्ञानसहकारिणश्च शब्दस्यार्थप्रत्यायकत्वादनुमानपूर्व्वकत्वमित्यनुमानानन्तरं शब्दं लक्षयति आप्तश्रुतिराप्तवचनन्त्विति तत्राप्तवचनमिति लक्ष्यनिर्द्देशः परिशिष्टं लक्षणम् आप्ता प्राप्ता युक्तेति यावत् आप्ता चासौ श्रुतिश्चेति आप्तश्रुतिः श्रुतिर्वाक्यजनितं वाक्यार्थज्ञानं तच्च स्वतःप्रमाणम् अपौरुषेयवेदवाक्यजनितत्वेन सकल-

दोषाशङ्काविनिर्मुक्तत्वेन युक्तं भवति एवं वेदमूलस्मृतीतिहासपुराणवाक्यजनितमपि ज्ञानं युक्तम् आदिविदुषश्च कपिलस्य कल्पादौ कल्पान्तराधीतश्रुतिस्मरणसम्भवः। सुप्तप्रबुद्धस्येव पूर्वेद्युरवगतानामर्थानामपरेद्युः। तथा चावट्यजैगीषव्यसंवादे भगवान् जैगीषव्यो दशमहाकल्पवर्त्तिजन्मस्मरणमात्मन उवाच "दशसु महाकल्पेषु विपरिवर्त्तमानेन मये" त्यादिना ग्रन्थसन्दर्भेण। आप्तग्रहणेन चायुक्ताः शाक्यभिक्षुनिर्ग्रन्थकसंसारमोचकादीनामागमाभासा निराकृताः भवन्ति। अयुक्तत्वञ्चैतेषां विगानात् छिन्नमूलत्वात् प्रमाणविरुद्धार्थाभिधानात्। कैश्चिदेव च म्लेच्छादिभिः पुरुषापसदैः पशुप्रायैः परिग्रहाद्बोध्यम्। तुशब्देनानुमानाद्व्यवच्छिनत्ति वाक्यार्थो हि प्रमेयो न तु तद्धर्मो वाक्यं येन तत्र लिङ्गं भवेत्। न च वाक्यं वाक्यार्थं बोधयत्सम्बन्धग्रहणमपेक्षते अभिनवकविविरचितस्य वाक्यस्यादृष्टपूर्वाननुभूतचरवाक्यार्थबोधकत्वादिति।

एवं प्रमाणसामान्यलक्षणेषु तद्विशेषलक्षणेषु च सत्सु यानि प्रमाणान्तराण्युपमानादीन्यभ्युपेयन्ते प्रतिवादिभिस्तान्युक्तलक्षणेषु प्रमाणेषु अन्तर्भवन्ति। तथाहि उपमानं तावत् यथा गौस्तथा गवय इति वाक्यं तज्जनिता धीरागम एव। योऽप्ययं गवयशब्दो गोसदृशस्य वाचक इति प्रत्ययःसोऽप्यनुमानमेव, यो हि शब्दो यत्र वृद्धैः प्रयुज्यते सोऽसति वृत्त्यन्तरे तस्य वाचको गोशब्दो गोत्वे यथा,

प्रयुज्यते चैवं गवयशब्दो गोसदृशे इति तस्यैव वाचक इति ज्ञानमनुमानमेव। यत्तु गवयस्य चक्षुःसन्निकृष्टस्य गोसादृश्यज्ञानं तत् प्रत्यक्षम्। अतएव स्मर्य्यमाणायां गवि गवयसादृश्यज्ञानं प्रत्यक्षम् नह्यन्यत् गवि सादृश्यमन्यच्च गवये, भूयोऽवयवसामान्ययोगो हि जात्यन्तरवर्त्ती जात्यन्तरे सादृश्यमुच्यते सामान्ययोगश्चैकः स चेद्गवये प्रत्यक्षो गव्यपि तथेति नोपमानस्य प्रमेयान्तरमस्ति यत्र प्रमाणमुपमानं भवेदिति न प्रमाणान्तरमुपमानम्।

एवमर्थापत्तिरपि न प्रमाणान्तरं तथाहि जीवतश्चैत्रस्य गृहाभावदर्शनेन वहिर्भावस्यादृष्टस्य कल्पनमर्थापत्तिरभिमता वृद्धानां साप्यनुमानमेव। यदा खलु व्यापकः सन्नेकत्र नास्ति तदान्यत्रास्ति यदा व्यापकएकत्रास्ति तदान्यत्र नास्तीति सुकरःस्वशरीरे एव व्याप्तिग्रहः। तथाच सतो गृहाभावदर्शनेन लिङ्गेन वहिर्भावदर्शनमनुमानमेव। न च चैत्रस्य क्वचित्सत्त्वेन गृहाभावः शक्योऽपह्नोतुं येनासिद्धोगृहाभावोवहिर्भावे न हेतुः स्यात्। न च गृहाभावेन वा सत्त्वमपह्नूयते येन सत्त्वमेवानुपपद्यमानमात्मानं न वहिरवस्थापयेत् तथाहि चैत्रस्य गृहासत्त्वेन सत्त्वमात्रं वा विरुध्यते, गृहसत्त्वं वा। न तावद्यत्र क्वचन सत्त्वस्यास्ति विरोधो गृहासत्त्वेन, भिन्नविषयत्वात्। देशसामान्येन गृहविशेषाक्षेपोऽपि पाक्षिक इति समानविषयकतया विरोध इति चेन्न प्रमाणनिश्चितस्य

गृहेऽसत्त्वस्य पाक्षिकतया सांशयिकेन गृहसत्त्वेन प्रति-क्षेपायोगात्।

नापि प्रमाणनिश्चितोऽगृहाभावः पाक्षिकस्य गृह-सत्त्वं प्रतिक्षिपन् सत्त्वमात्रमपि प्रतिक्षेप्तुं, सांशयिकत्वं वापनेतुमर्हतीतियुक्तं गृहावच्छिन्नेन चैत्राभावेन गृह-सत्त्वं विरुद्धत्वात् प्रतिक्षिप्यते न तु सत्त्वमात्रं तस्य तत्रौ-दासीन्यात्।

तस्मात् गृहाभावेन लिङ्गेन सिद्धेन सतो बहिर्भावो-ऽनुमीयत इति युक्तम्। एतेन विरुद्धयोः प्रमाणयो-र्विषयव्यवस्थया अविरोधापादनमर्थापत्तेर्विषयइति परा-स्तम् अवच्छिन्नानवच्छिन्नयोर्विरोधाभावात्। उदाहर-णान्तराणि चार्थापत्तेरेवमेवानुमानेऽन्तर्भावनीयानीति। तस्मान्नानुमानात् प्रमाणान्तरमर्थापत्तिरिति सिद्धम्।

एवमभावोऽपि प्रत्यक्षमेव नहि भूतलस्य परिणाम-विशेषात् कैवल्यलक्षणात् अन्यो घटाभावो नाम, प्रति-क्षणपरिणामिनो हि सर्व्वे एव भावाः ऋते चितिशक्तेः। स च परिणामभेद ऐन्द्रियिकइति नास्ति प्रत्यक्षाद्यन-वरुद्धो विषयो यत्राभावाख्यं प्रमाणान्तरमभ्युपेयमिति।

सम्भवस्तु यथा खार्य्यां द्रोणाढ़कप्रस्थाद्यवगमः स चा-नुमानमेव खारीत्वं हि द्रोणाद्यविनाभूतं प्रतीतं खार्य्यां द्रोणादिसत्त्वमवगमयतीति।

यच्चानिर्द्दिष्टप्रवक्तृकं प्रवादपारम्पर्य्यमात्रम् "इति होचुर्वृद्धा" इत्यैतिह्यं यथा इह वटे यक्षः प्रतिवसतीति,

न तत् प्रमाणम् अनिर्द्दिष्टप्रवक्तृकत्वेन सांशयिकत्वात् आप्तप्रवक्तृकत्वनिश्चये त्वागम इत्युपपन्नं त्रिविधम् प्रमाणमिति ॥ ५ ॥

एवन्तावद्व्यक्ताव्यक्तज्ञलक्षणप्रमेयसिद्ध्यर्थं प्रमाणानि लक्षितानि। तत्र व्यक्तं पृथिव्यादि, स्वरूपतः घटपटोपललोष्टाद्यात्मना पांशुलपादको हालिकोऽपि प्रत्यक्षतः प्रतिपद्यते, पूर्व्ववता चानुमानेन धूमादिदर्शनात् वह्न्यादीति तद्व्युत्पादनाय मन्दप्रयोजनं शास्त्रमिति दुरधिगममनेन व्युत्पादनीयम्। तत्र यत् प्रमाणं यत्र समर्थं तद् उक्तलक्षणेभ्यः प्रमाणेभ्यो निष्कृष्य दर्शयति।

सामान्यतस्तुदृष्टादतीन्द्रियाणांप्रतीतिरनुमानात्।
तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम्॥६॥

तुशब्दः प्रत्यक्षपूर्व्ववद्भ्यां विशिनष्टि। सामान्यतोदृष्टादनुमानादध्यवसायादतीन्द्रियाणां प्रधानपुरुषादीनाम् प्रतीतिः प्रतिपत्तिश्चितिच्छायापत्तिर्बुद्धेरध्यवसायः। इत्यर्थः। उपलक्षणञ्चैतत् शेषवत इत्यपि द्रष्टव्यम्। तत् किं सर्व्वेष्वतीन्द्रियेषु सामान्यतोदृष्टमेव प्रवर्त्तते तथाच यत्र तन्नास्ति महदाद्यारम्भक्रमे स्वर्गापूर्व्वदेवतादौ च तेषामभावः प्राप्तइत्यत आह तस्मादपीति तस्मादपीत्येतावतैव सिद्धे चकारेण शेषवतइत्यपि समुच्चितमिति ॥ ६ ॥

स्यादेतत्। यथा गगनकुसुमकूर्म्मरोमशशविषाणादिषु

प्रत्यक्षमप्रवर्त्तमानं तदभावमवगमयति एवं प्रधानादिष्वपि, तत् कथं तेषां सामान्यतोदृष्टादिभ्यः सिद्धिरित्यत आह।

अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात्
सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहाराच्च॥ ७

अनुपलब्धिरिति वक्ष्यमाणं सिंहावलोकितन्यायेनानुषञ्जनीयम् यथा उत्पतन् वियति पतत्त्री अतिदूरतया सन्नपि प्रत्यक्षेण नोपलभ्यते, सामीप्यादित्यत्राप्यतिरनुवर्त्तनीयः यथा लोचनस्थमञ्जनमतिसामीप्यान्न दृश्यते, इन्द्रियघातोऽन्धत्वबधिरत्वादिः। मनोऽनवस्थानात् यथा कामाद्युपहतमनाः स्फीतालोकमध्यवर्त्तिनमिन्द्रियसन्निकृष्टमप्यर्थं न पश्यति। सौक्ष्म्यात् यथा इन्द्रियसन्निकृष्टं परमाण्वादि प्रणिहितमना अपि न पश्यति। व्यवधानात् कुड्यादिव्यवहितं राजदारादि न पश्यति। अभिभवात् यथा अहनि सौरीभिर्भाभिरभिभूतं ग्रहनक्षत्रमण्डलं न पश्यति। समानाभिहारात् यथा तोयदविमुक्तानुदविन्दून् जलाशये न पश्यति। चकारोऽनुक्तसमुच्चयार्थः तेनानुद्भवोऽपि संगृहीतः तद्यथा क्षीराद्यवस्थायां दध्याद्यनुद्भवान्न दृश्यते। एतदुक्तम्भवति न हि प्रत्यक्षनिवृत्तिमात्राद्वस्त्वभावो भवति अतिप्रसङ्गात् तथाहि गृहाद्बहिर्निर्गतो गृहजनमपश्यंस्तदभावं निश्चिनुयात् न त्वेवम्। अपि तु योग्यप्रत्यक्षनिवृत्तेरभावं निश्चिनोति न च प्रधानपुरुषादी-

नामस्ति प्रत्यक्षयोग्यतेति न तन्निवृत्तिमात्रात्तदभावनिश्चयो युक्तः प्रामाणिकानामिति ॥ ७ ॥

कतमत् पुनरेषु कारणमप्रधानादीनामनुपलब्धावित्यत आह।

सौक्ष्म्यात्तदनुपलब्धिर्नाभावात्कार्यतस्तदुपलब्धेः।
महदादि तच्च कार्यं प्रकृतिसरूपं विरूपं च ॥ ८॥

यथाभावादेव सप्तमरसवदेषामनुपलब्धिः कस्मान्न भवतीत्यत आह नाभावात्, कुतः, कार्य्यतस्तदुपलब्धेः तदिति प्रधानम्परामृशति। पुरुषोपलब्धौ तु प्रमाणं वक्ष्यति "संघातपरार्थत्वादिति"। दृढतरप्रमाणावधारिते हि प्रत्यक्षमप्रवर्त्तमानमयोग्यत्वान्न प्रवर्त्तत इति कल्प्यते सप्तमस्तु रसो न प्रमाणेनावधारित इति न तत्र प्रत्यक्षयोग्यता शक्याध्यवसातुमिति भावः। किन्नु पुनस्तत् कार्य्यं यतः प्रधानानुमानमित्यत आह महदादि तच्च कार्य्यम्। एतच्च यथा गमकं तथोपरिष्टादुपपादयिष्यते। तस्य च कार्य्यस्य विवेकज्ञानोपयोगिनी सारूप्यवैरूप्ये आह प्रकृतिसरूपं विरूपञ्च। एते चोपरिष्टाद्विभजनीये इति॥ ८॥

कार्य्यात्कारणमात्रं गम्यते। सन्ति चात्र वादिनां विप्रतिपत्तयः। केचिदाहुरसतः सज्जायत इति, एकस्य सतो विवर्त्तः कार्य्यजातं न वस्तु सदित्यपरे। अन्ये तु सतोऽसज्जायत इति। सतः सज्जायते इति वृद्धाः। तत्र पूर्व्वस्मिन् पक्षत्रये प्रधानं न सिध्यति। सुखदुःखमोह-

भेदवत्स्वरूपपरिणामशब्दाद्यात्मकत्वं हि जगत्कारणस्य, प्रधानत्वं सत्त्वरजस्तमःस्वभावत्वम्। यदि पुनरसतः सज्जायेत असन्निरुपाख्यं कारणं कथं सुखादिरूपशब्दाद्यात्मकं स्यात् सदसतोस्तादात्म्यानुपपत्तेः। अथैकस्य सतो विवर्त्तः शब्दादिप्रपञ्चस्तथापि सतः सज्जायत इति न स्यात्। नचाद्वयस्य प्रपञ्चात्मकत्वमपि त्वप्रपञ्चस्य प्रपञ्चात्मकतया प्रतीतिर्भ्रम एव। येषामपि कणभक्षाक्षचरणादीनां सतएव कारणादसतोजन्म तेषामपि सदसतो रेकत्वानुपपत्तेर्न कार्य्यात्मकं कारणमिति न प्रधानसिद्धिः अतः प्रधानसिद्ध्यर्थं प्रथमं तावत्सत्कार्य्यं प्रतिजानीते।

असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्य्यम् ॥९॥

सत्कार्य्यं कारणव्यापारात् प्रागपीति शेषः। तथाच न सिद्धसाधनं नैयायिकनयैरुद्भावनीयम्। यद्यपि वीजमृत्पिण्डादिप्रध्वंसानन्तरमङ्कुरघटाद्युत्पत्तिरुपलभ्यते तथापि न प्रध्वंसस्य कारणत्वमपि तु भावस्यैव वीजाद्यवयवस्य। अभावात्तु भावोत्पत्तौ तस्य सर्व्वत्र सुलभत्वात्सर्व्वत्र सर्व्वकार्य्योत्पादप्रसङ्ग इत्यादि न्यायवार्त्तिकतात्पर्य्यटीकायामभिहितमस्माभिः। प्रपञ्च प्रत्ययश्चासति बाधके न शक्योमिथ्येति वक्तुमिति। कणभक्षाक्षचरणमतमवशिष्यते। तत्रेदं प्रतिज्ञातं सत्कार्य्यमिति। अत हेतु-

आह असदकरणात् असच्चेत्कारणव्यापारात् पूर्वं कार्य्यं, नास्य सत्त्वं केनापि कर्त्तुं शक्यं न हि नीलं शिल्पिसहस्रेणापि शक्यं पीतं कर्त्तुम्। सदसत्त्वे घटस्य धर्म्माविति चेत् तथाप्यसति धर्म्मिणि न तस्य धर्म्म इति सत्त्वं तदवस्थमेव तथा च नासत्त्वम् असम्बद्धेनातदात्मना वाऽसत्त्वेन कथमसन् घटः। तस्मात्कारणव्यापारादूर्द्धमिव ततः प्रागपि सदेव कार्य्यमिति। कारणाच्चास्य सतोऽभिव्यक्तिरेवावशिष्यते। सतश्चाभिव्यक्तिरुपपन्ना। यथा पीडनेन तिलेषु तैलस्य अवघातेन धान्येषु तण्डुलानां, दोहनेन सौरभेयीषु पयसः। असतः करणे तु न निदर्शनं किञ्चिदस्ति। न खल्वभिव्यज्यमानं चोत्पद्यमानं वा क्वचिदसद्दृष्टम्। इतश्च कारणव्यापारात् प्राक् सदेव कार्य्यमित्याह उपादानग्रहणात् उपादानानि कारणानि तेषां ग्रहणं कार्य्येण सम्बन्धः उपादानैः कार्य्यस्य सम्बन्धादिति यावत्। एतदुक्तं भवति। कार्य्येण संबद्धं कारणं कार्य्यस्य जनकं सम्बन्धश्च कार्य्यस्यासतो न सम्भवति तस्मात्सदिति। स्यादेतत् असम्बद्धमेव कारणैः कस्मात्कार्य्यं न जन्यते तथाचासदेवोत्पत्स्यतेऽत आह सर्व्वसम्भवाभावात्। असम्बद्धस्य जन्यत्वे असम्बद्धत्वाविशेषेण सर्वं कार्य्यजातं सर्वस्माद्भवेत् नचैतदस्ति तस्मान्नासम्बद्धमसम्बद्धेन जन्यते अपि तु संबद्धं संबद्धेन जन्यते इति। यथाहुः साङ्ख्यवृद्धा असत्त्वे नास्ति सम्बन्धः कारणैः सत्त्वसङ्गिभिः। असंबद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिरिति। स्यादेतत् असम्बद्धमपि

तदेव तत् करोति यत्र यत्कारणं शक्तं शक्तिश्च कार्यदर्शनादेवागम्यते अतो नाव्यवस्थेति अत आह शक्तस्य शक्यकरणात्। सा शक्तिः शक्तकारणाश्रया सर्वत्र वा स्याच्छक्ये वा। सर्वत्र चेत्तदवस्थैवाव्यवस्था शक्ये चेत्कथमसति शक्ये तत्रेति वक्तव्यम्। शक्तिभेद एव स तादृशो यतः किञ्चिदेव कार्यं जनयेन्न सर्वमिति चेत् हन्त भोः शक्तिविशेषः कार्य्यसम्बद्धो वा स्यादसम्बद्धो वा, सम्बद्धत्वे नासता सम्बन्ध इति सत्कार्य्यम् असम्बद्धत्वे सैवाव्यवस्थेति सुष्ठूक्तं शक्तस्य शक्यकरणादिति। इतश्च सत्कार्यमित्याह कारणभावाच्च कार्य्यस्य कारणात्मकत्वात् न हि कारणाद्भिन्नं कार्यं कारणञ्च सदिति कथं तदभिन्नं कार्यमसद्भवेत्। कार्यस्य कारणाभेदसाधकानि च प्रमाणानि न पटस्तन्तुभ्योभिद्यते तद्धर्मत्वात् इह यद्यतो भिद्यते तत्तस्य धर्म्मो न भवति। यथा गौरश्वस्य। धर्म्मश्च पटस्तन्तूनां तस्मान्नार्थान्तरम् उपादानोपादेयभावाच्च नार्थान्तरत्वं तन्तुपटयोः, ययोरर्थान्तरत्वं न तयोरुपादानोपादेयभावः यथा घटपटयोः उपादानोपादेयभावश्च तन्तुपटयोः तस्मान्नार्थान्तरत्वमिति। इतश्च नार्थान्तरत्वं तन्तुपटयोः संयोगाप्राप्त्यभावात् पदार्थान्तरत्वे हि संयोगो दृष्टो यथा कुण्डबदरयोः अप्राप्तिर्वा यथा हिमवद्विन्ध्ययोः नचेह संयोगाप्राप्ती तस्मान्नार्थान्तरत्वमिति। इतश्च पटस्तन्तुभ्यो न भिद्यते गुरुत्वान्तरकार्य्याग्रहणात् इह यद्यस्माद्भिन्नं तस्मात्तस्य गुरुत्वान्तरकार्यं दृश्यते यथैकपलिकस्य स्वस्ति-

कस्य यो गुरुत्वकार्योऽवनतिविशेषस्ततो द्विपलिकस्य स्वस्तिकस्य गुरुत्वकार्य्योऽवनतिविशेषोऽधिकः न च तथा तन्तुगुरुत्वकार्यात् पटगुरुत्वस्य कार्यान्तरं दृश्यते तस्माद्-भिन्नस्तन्तुभ्यः पट इति। तान्येतान्यवीतान्यभेदसाधनानि। तदेवमभेदे सिद्धे तन्तवएव तेन तेन संस्थानभेदेन परिणताः पटः, न तन्तुभ्योऽर्थान्तरं पटः। स्वात्मनि क्रियानिरोधबुद्धिव्यपदेशार्थक्रियाक्रियाव्यवस्थाभेदाश्च नैकान्तिकं भेदं साधयितुमर्हन्ति एकस्मिन्नपि तत्तद्विशेषाविर्भावतिरोभावाभ्यामेतेषामविरोधात्। यथाहि कूर्मस्याङ्गानि कूर्मशरीरे निविशमानानि तिरोभवन्ति निःसरन्ति चाविर्भवन्ति न तु कूर्मतस्तदङ्गान्युत्पद्यन्ते प्रध्वंसन्ते वा एवमेकस्या मृदः सुवर्णस्य वा घटमुकुटादयोविशेषा निःसरन्त आविर्भवन्त उत्पद्यन्त इत्युच्यन्ते न पुनरसतामुत्पादः सतां वा निरोधः। यथाह भगवान् कृष्णद्वैपायनः नासतोविद्यते भावो नाभावो विद्यते सत इति। यथा कूर्मः स्वावयवेभ्यः सङ्कोचिविकाशिभ्योन भिन्नः एवं घटमुकुटादयोऽपि मृत्सुवर्णादिभ्यो न भिन्नाः। एवञ्चेत् तन्तुषु पटइति व्यपदेशो यथेह वने तिलका इत्युपपन्नः। न चार्थक्रियाभेदोऽपि भेदमापादयति एकस्यापि नानार्थक्रियादर्शनात् यथैक एव वह्निर्दाहकः प्रकाशकः पाचकश्चेति। नाप्यर्थक्रियाव्यवस्था वस्तुभेदे हेतुः तेषामेव समस्तव्यस्तानामर्थक्रियाव्यवस्थादर्शनात् यथा प्रत्येकं विष्टयो वर्त्मदर्शनलक्षणामर्थक्रियां कुर्व्वन्ति न तु शिबि-

कावहनं मिलितास्तु शिविकां वहन्ति एवं तन्तवः प्रत्येकं प्रावरणमकुर्व्वाणा अपि मिलिताः आविर्भूतपटभावाः प्रावरिष्यन्ति। स्यादेतत्। आविर्भावः पटस्य कारणव्यापारात् प्राक् सन्नसन्वा असंश्चेत् प्राप्तं तर्ह्यसत उत्पादनम्। अथ सन्, कृतं तर्हि कारणव्यापारेण, न हि सति कार्य्ये कारणव्यापारप्रयोजनं पश्यामः। आविर्भावे चाविर्भावान्तरकल्पनेऽनवस्थाप्रसङ्गः। तस्मादाविर्भूतपटभावास्तन्तवः क्रियन्त इति रिक्तं वचः। अथासदुत्पद्यत इत्यस्यापि मते केयमसदुत्पत्तिः सती असती वा, सती चेत् कृतं तर्हि कारणैः असती चेत्तस्या अप्युत्पत्त्यन्तरमित्यनवस्था। अथोत्पत्तिः पटान्नार्थान्तरम् अपि तु पटएवासौ तथापि यावदुक्तं भवति पटइति तावदुक्तं भवत्युत्पद्यतइति। ततश्च पटइत्युक्ते उत्पद्यतइति न वाच्यं पौनरुक्त्यात् विनश्यतीत्यपि न वाच्यं उत्पत्तिविनाशयोर्युगपदेकत्र विरोधात्। तस्मादियं पटोत्पत्तिः स्वकारणसमवायो वा स्वसत्तासमवायो वा उभयथापि नोत्पद्यते अथ च तदर्थानि कारणानि व्यापार्य्यन्ते एवं सत एव पटादेराविर्भावाय कारणापेक्षेत्युपपन्नम्। न च पटरूपेण कारणानां सम्बन्धः, तद्रूपस्याक्रियात्वात् क्रियासम्बन्धित्वाच्च कारकाणाम् अन्यथा कारणत्वाभावात्। तस्मात् सत्कार्य्यमिति पुष्कलम्॥ ९॥

तदेवं प्रधानसाधनानुगुणं सत्कार्य्यमुपपाद्य यादृशं तत्

प्रधानं साधनीयं तादृशमादर्शयितुं विवेकज्ञानोपयोगिनी व्यक्ताव्यक्तसारूप्यवैरूप्ये तावदाह।

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥१०॥

व्यक्तं हेतुमत् हेतुः कारणं तद्वत्। यस्य च यो हेतुस्तस्य तमुपरिष्टाद्वक्ष्यति. अनित्यं विनाशि तिरोभावीति यावत्। अव्यापि सर्वं परिणामिनं न व्याप्नोति कारणेन हि कार्य्यमाविष्टं, न कार्य्येण कारणम्। न च बुद्ध्यादयः प्रधानं वेविषन्तीत्यव्यापकाः। सक्रियं परिस्पन्दवत् तथाहि बुद्ध्यादयउपात्तमुपात्तं देहं त्यजन्ति देहान्तरञ्चोपाददतइति तेषां परिस्पन्दः शरीरपृथिव्यादीनाञ्च परिस्पन्दः प्रसिद्ध एव। अनेकं प्रतिपुरुषं बुद्ध्यादीनां भेदात् पृथिव्याद्यपि शरीरघटादिभेदेनानेकमेव। आश्रितं स्वकारणे आश्रितं बुद्ध्यादिकार्य्यम्। अभेदेऽपि हि कथञ्चिद्भेदविवक्षया आश्रयाश्रयिभावः। यथेह वने तिलकाइत्युक्तम्। लिङ्गं प्रधानस्य। यथाच्चैते बुद्ध्यादयः प्रधानस्य लिङ्गं तथोपरिष्टाद्वक्ष्यति। प्रधानन्तु प्रधानस्य नलिङ्गं पुरुषस्य लिङ्गं भवदपीति भावः। सावयवम् अवयवनमवयवः मिथःसंश्लेषोमिश्रणं संयोग इति यावत् अप्राप्तिपूर्व्विका प्राप्तिः संयोगः तेन सह वर्त्ततइति सावयवं तथाहि पृथिव्यादयः परस्परं संयुज्यन्ते एवमन्येऽपि नतु प्रधानस्य बुद्ध्यादिभिः संयोगस्तादात्म्यात् नापि सत्वरजस्तमसां परस्परं

संयोगः अप्राप्तेरभावात् । परतन्त्रं बुद्ध्यादि, बुद्ध्या स्वकार्य्येऽहङ्कारे जनयितव्ये प्रकृत्यापूरणमपेक्ष्यते अन्यथा क्षीणा सती नालमहङ्कारं जनयितुमिति व्यवस्थितिः । एवमहङ्कारादिभिरपि स्वकार्य्यजनने इति । सर्वं स्वकार्यै प्रकृत्यापूरणमपेक्षते तेन प्रकृतिं परामपेक्षमाणं कारणमपि स्वकार्य्योपजनने परतन्त्रं व्यक्तम् । विपरीतमव्यक्तं व्यक्तात्, अहेतुमन्नित्यं व्यापि निष्क्रियम् । यद्यप्यव्यक्तस्यास्ति परिणामलक्षणा क्रिया तथापि परिस्पन्दो नास्ति । एकमनाश्रितमलिङ्गमनवयवं स्वतन्त्रमव्यक्तम् ॥ १० ॥

तदनेन प्रबन्धेन व्यक्ताव्यक्तयोर्वैधर्म्म्यमुक्तम् । सम्प्रति तयोः साधर्म्यं पुरुषाच्च वैधर्म्यमाह ।

त्रिगुणमविवेकिविषयःसामान्यमचेतनंप्रसवधर्म्मि व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥११॥

त्रिगुणं त्रयो गुणाः सुखदुःखमोहा अस्येति त्रिगुणं तदनेन सुखादीनामात्मगुणत्वं पराभिमतमपाकृतम् । अविवेकि यथा प्रधानं न स्वतो विविच्यते एवं महदादयोऽपि न प्रधानाद्विविच्यन्ते तदात्मकत्वात् । अथ वा सम्भूयकारित्वमविवेकः । न हि किञ्चिदेकं पर्य्याप्तं स्वकार्यै, अपि तु सम्भूय, तत्र नैकस्मात्कस्यचित्केनचित्सम्भवतीति । ये त्वाहुर्विज्ञानमेव हर्षविषादमोहशब्दाद्याकारं न पुनरितोऽन्य तद्धर्मेति तान् प्रत्याह विषय इति विषयो ग्राह्यो विज्ञानाद्बहिरिति यावत् अतएव सामान्यं साधारणं

घटादिवत् अनेकपुरुषैर्गृहीतमिति यावत् विज्ञानाकारत्वे त्वसाधारण्याद्विज्ञानानां वृत्तिरूपाणां तेऽप्यसाधारणाः स्युः विज्ञानं यथा परेण न गृह्यतेपरबुद्धेरप्रत्यक्षत्वादित्यभिप्रायः। तथा च नर्तकीभ्रूलताभङ्गे एकस्मिन् बहूनां प्रतिसन्धानं युक्तम् अन्यथा न स्यादिति भावः। अचेतनं सर्वएव प्रधानबुद्ध्यादयोऽचेतनाः न तु वैनाशिकवच्चैतन्यं बुद्धेरित्यर्थः। प्रसवधर्मि-प्रसवरूपो धर्मो यः सोऽस्यास्तीति प्रसवधर्मि प्रसवधर्मेति वक्तव्ये मत्वर्थीयः प्रसवधर्मस्य नित्ययोगमाख्यातुं सरूपविरूपपरिणामाभ्यां न कदाचिदपि वियुज्यत इत्यर्थः। व्यक्तवत्तथाव्यक्तोऽतिदिशति तथा प्रधानमिति यथा व्यक्तं तथा प्रधानम्। ताभ्यां वैधर्म्यं पुरुषस्याह तद्विपरीतः पुमान्। स्यादेतत् अहेतुमत्त्वनित्यत्वादि प्रधानसाधर्म्यमस्ति पुरुषस्य, एवमनेकत्वं व्यक्तसाधर्म्यं तत्कथमुच्यते तद्विपरीतः पुमानित्यत आह तथा चेति चकारोऽप्यर्थः यद्यप्यहेतुमत्त्वादिसाधर्म्यं तथाप्यत्रैगुण्यादिवैपरीत्यमस्त्येवेत्यर्थः॥११॥

त्रिगुणमित्युक्तं तत्र के ते त्रयोगुणाः किञ्च तल्लक्षणमित्यत आह।

प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः
अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः॥१२

गुणा इति परार्थाः सत्त्वं लघु प्रकाशकमित्यत्र च

सत्त्वादयः क्रमेण निर्दिश्यन्ते। तदनागतावेक्षणेन तन्त्र-युक्त्या वा प्रीत्यादीनां यथासंख्यं वेदितव्यम्। एतदुक्तं भवति प्रीतिः सुखं प्रीत्यात्मकः सत्त्वगुणः, अप्रीतिर्दुःखम् अप्रीत्यात्मको रजोगुणः, विषादो मोहः विषादात्मकस्तमो-गुण इति। ये तु मन्यन्ते न प्रीति दुःखाभावादतिरिच्यते एवं दुःखमपि न प्रत्यभावादन्यदिति तान्प्रीत्यात्मग्रहणम्। नेतरेतराभावाः सुखादयः अपि तु भावाः आत्मशब्दस्य भाववचनत्वात् प्रीतिरात्मा भावो येषां ते प्रीत्यात्मानः। एवमन्यदपि व्याख्येयम्। भावरूपता चैषामनुभवसिद्धा परस्पराभावात्मकत्वे तु परस्पराश्रयापत्तेरेकस्याप्यसिद्धे-रुभयासिद्धिरिति भावः। स्वरूपमेषामुक्त्वा प्रयोजनमाह प्रकाशप्रवृत्तिनियमार्थाः अत्रापि यथासंख्यमेव। रजः प्रवर्त्तकत्वात्सर्वत्र लघु सत्त्वं प्रवर्त्तयेत् यदि तमसा गुरुणा न नियम्येत। तमोनियतन्तु क्वचिदेव प्रवर्त्तयतीति भवति तमोनियमार्थम्। प्रयोजनमुक्त्वा क्रियामाह अन्योन्याभि-भवाश्रयजननमिथुनवृत्तयश्च वृत्तिः क्रिया सा च प्रत्येकम-भिसम्बध्यते। अन्योन्याभिभववृत्तयः एषामन्यतमेनार्थव-शादुद्भूतेनान्यदभिभूयते। तथाहि सत्त्वं रजस्तमसी अभि-भूय शान्तामात्मनो वृत्तिं प्रतिलभते एवं रजः सत्त्वत-मसी अभिभूय घोराम्, एवं तमः सत्त्वरजसी अभिभूय मूढामिति। अन्योन्याश्रयवृत्तयः। यद्यप्याधाराधेयभावेन नान्यार्थो घटते तथापि यदपेक्षया यस्य क्रिया स तस्या-श्रयः तथाहि सत्त्वं प्रवृत्तिनियमावाश्रित्य रजस्तमसी

प्रकाशेनोदकरोति, रजः प्रकाशनियमावाश्रित्य प्रवृत्त्यं-तरयोः, तमः प्रकाशप्रवृत्ती आश्रित्य नियमेनेतरयो-रिति। अन्योन्यजननवृत्तयः अन्यतमोऽन्यतमं जनयति जननञ्च परिणामः स च गुणानां सदृशरूप अतएव न हेतुमत्त्वं तत्त्वान्तरस्य हेतोरभावात्। नाप्यनित्यत्वं तत्त्वा-न्तरे लयाभावात्। अन्योन्यमिथुनवृत्तयः अन्योन्यसहचराः अविनाभाववर्त्तिन इति यावत् चः समुच्चये भवति चात्रा-गमः "अन्योन्यमिथुनाः सर्व्वे सर्वे सर्व्वत्र गामिनः। रज-सोमिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः। तमसश्चापि मिथुने ते सत्त्वरजसी उभे। उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते। नैषामादिः संप्रयोगो वियोगो वोपलभ्यत,, इति ॥ १२ ॥

प्रकाशप्रवृत्तिनियमार्था इत्युक्तम्। के ते इत्यम्भूताः कुतश्चेत्यत आह।

सत्त्वं लघुप्रकाशकमिष्टमुपष्टम्भकं चलञ्च रजः। गुरु वरणकमेव तमः प्रदीपवच्चार्थतोवृत्तिः ॥१३॥

सत्त्वमेव लघु, प्रकाशकमिष्टं सांख्याचार्य्यैः, तत्र कार्य्यो-द्गमने हेतुर्धर्म्मो लाघवं गौरवप्रतिद्वन्द्वि यतोऽग्नेरुर्द्धज्व-लनं भवति तदेव लाघवं कस्यचित्तिर्य्यग्गमने हेतु र्यथा वायोः एवम् करणानां वृत्तिपटुत्वहेतु र्लाघवं गुरुत्वे हि मन्दानि स्युरिति सत्वस्य प्रकाशकत्वमुक्तं सत्वतमसी स्वयमक्रियतया स्वस्वकार्य्यप्रवृत्तिं प्रत्यवसीदन्ती रजसो-

ष्टभ्यते अवसादात् प्रच्याव्य स्वकार्ये ते उत्साहं प्रयत्नं कार्य्यन्ते तदिदमुक्तमुपष्टम्भकं रजइति। कस्मादित्यत उक्तं चलमिति। तदनेन रजसः प्रवृत्त्यर्थत्वं दर्शितम्। रजस्तु चलतया परितस्त्रैगुण्यं चालयद्गुरुणावृण्वता च तमसा तत्र प्रवृत्तिप्रतिबन्धकेन क्वचिदेव प्रवर्त्त्यते इति ततस्ततो व्यावर्त्त्य तमोनियामकमुक्तं गुरु वरणकमेव तमइति। एवकारः प्रत्येकं भिन्नक्रमः सम्बध्यते सत्त्वमेव रजएव तमएव। ननु परस्परविरोधशीला गुणाः सुन्दोपसुन्दवत्परस्परं ध्वंसन्त इत्येव युक्तं प्रागेव तेषामेकक्रियाकर्तृतायाः, इत्यत आह प्रदीपवच्चार्थतो वृत्तिः, दृष्टमेतत् यथा वर्त्तितैले अनलविरोधिनी अथच मिलिते सहानलेन रूपप्रकाशलक्षणं कार्य्यं कुरुतः यथा च वातपित्तश्लेष्माणः परस्परविरोधिनः शरीरधारणलक्षणकार्य्यकारिणः एवं सत्त्वरजस्तमांसि मिथोविरुद्धान्यपि अनुवर्त्स्यन्ति च स्वकार्य्यं करिष्यन्ति च। अर्थतः पुरुषार्थत इति यावत्। यथा वक्ष्यति "पुरुषार्थ एव हेतुर्न केनचित्कार्य्यते करण"मिति। अत्र च सुखदुःखमोहाः परस्परविरोधिनः स्वस्वानुरूपाणि सुखदुःखमोहात्मकान्येव निमित्तानि कल्पयन्ति। तेषाञ्च परस्परमभिभाव्याभिभावकभावान्नानात्वम्। तद्यथा एकैव स्त्री रूपयौवनकुलशीलसम्पन्ना स्वामिनं सुखाकरोति तत्कस्य हेतोः ? स्वामिनं प्रति तस्याः सुखरूपसमुद्भवात्। सैव स्त्री सपत्नीर्दुःखाकरोति तत्कस्य हेतोः ? ताः प्रति तस्या दुःखरूपसमुद्भवात्।

रवीत एव हेतुर्वक्तव्यः। स्यादेतत् अव्यक्तसिद्धौ सत्यां तस्याविवेक्यादयो धर्म्माः सिध्यन्ति अव्यक्तमेव त्वद्यापि न सिद्ध्यति तत्कथमविवेक्यादिसिद्धिरित्यत आह कारणगुणात्मकत्वात्कार्य्यस्य अव्यक्तमपि सिद्धम्। अयमभिसन्धिः कार्य्यं हि कारणगुणात्मकं दृष्टं यथा तन्त्वादिगुणात्मकं पटादि, तथा महदादिलक्षणेनापि कार्य्येण सुखदुःखमोहरूपेण स्वकारणगतसुखदुःखमोहात्मना भवितव्यं तथा च तत्कारणं सुखदुःखमोहात्मकं प्रधानमव्यक्तं सिद्धं भवति॥ १४॥

स्यादेतत् व्यक्ताद्व्यक्तमुत्पद्यते इति कणभक्षाक्षचरणनयाः परमाणवो हि व्यक्तास्तैर्द्व्यणुकादिक्रमेण पृथिव्यादिलक्षणकार्य्यं व्यक्तमारभ्यते पृथिव्यादिषु च कारणगुणक्रमेण रूपाद्युत्पत्तिः तस्माद्व्यक्ताद्व्यक्तस्य तद्गुणस्य चोत्पत्तेः कृतमव्यक्तेनादृष्टचरेणेत्यत आह।

भेदानां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च।
कारणकार्य्यविभागादविभागाद्वैश्वरूप्यस्य॥ १५॥

भेदानां विशेषाणां महदादीनां भूम्यन्तानां कार्य्याणां कारणं मूलकारणमस्त्यव्यक्तं, कुतः कारणकार्य्यविभागात् अविभागात् वैश्वरूप्यस्य। कारणे सत्कार्य्यमितिस्थितम्। तथा च यथा कूर्म्मशरीरे सन्त्येवाङ्गानि निःसरन्ति विभज्यन्ते इदं कूर्म्मशरीरम् एतान्यस्याङ्गानीति। एवं निविशमानानि तस्मिन्नव्यक्तीभवन्ति, एवं कारणात् मृत्पि-

एवं पुरुषान्तरं तामविन्दत् सैव मोहयति तत्कस्य हेतोः तं प्रति तस्या मोहरूपसमुद्भवात्। अनया च स्त्रिया सर्वे भावा व्याख्याताः। तत्र यत्सुखहेतुस्तत्सुखात्मकं सत्त्वं, यत् दुःखहेतुस्तद्दुःखात्मकं रजः, यन्मोहहेतुस्तन्मोहात्मकं तमः, सुखप्रकाशलाघवानां त्वेकस्मिन् युगपदुद्भूतावविरोधः सहदर्शनात्। तस्मात् सुखदुःखमोहैरिव विरोधिभिरेकैकगुणवृत्तिभिः सुखप्रकाशलाघवैर्न निमित्तभेदा उन्नीयन्ते एवं दुःखोपष्टम्भकत्वप्रवर्त्तकत्वैरेवं मोहगुरुत्वावरणैरिति सिद्धं त्रैगुण्यमिति ॥ १३ ॥

स्यादेतत् अनुभूयमानेषु पृथिव्यादिषु अनुभवसिद्धा भवन्त्वविवेकित्वादयः ये पुनः सत्वादयो नानुभवपथमधिरोहन्ति तेषां कुतस्त्यमविवेकित्वं विषयत्वं सामान्यत्वमचेतनत्वं प्रसवधर्मित्वञ्चेत्यत आह।

अविवेक्यादेः सिद्धिः त्रैगुण्यात्तद्विपर्ययेऽभावात्। कारणगुणात्मकत्वात्कार्यस्याव्यक्तमपिसिद्धम्॥१४

अविवेकित्वमविवेकि यथा द्व्येकयोर्द्विवचनैकवचने इत्यत्र द्वित्वैकत्वयोरिति अन्यथा द्व्येकेष्विति स्यात्। कुतः पुनरविवेकित्वादिसिद्धिरित्यत आह त्रैगुण्यात् यद्यत् सुखदुःखमोहात्मकं तदविवेक्यादियोगि यथेदमनुभूयमानं व्यक्तमिति स्फुटत्वादन्वयो नोक्तः। व्यतिरेकमाह तद्विपर्ययेऽभावात् अविवेक्यादिविपर्यये पुरुषे त्रैगुण्याभावात् अथ वा व्यक्ताव्यक्ते पक्षीकृत्य अन्वयाभावेन त्रैगुण्यादि-

खण्डात् हेमपिण्डाद्वा कार्य्याणि घटकुण्डलमुकुटादीनि सन्त्येवाविर्भवन्ति विभज्यन्ते, सन्त्येव च पृथिव्यादीनि कारणात्तन्मात्रादाविर्भवन्ति विभज्यन्ते, सन्त्येव तन्मात्राण्यहङ्कारात् कारणात्, सन्नेवाहङ्कारः कारणान्महतः सन्नेव च महान् परमाव्यक्तादिति, सोऽयं कारणात् परमाव्यक्तात् साक्षात्पारम्पर्य्येणान्वितस्य विश्वस्य कार्य्यस्य विभागः। प्रतिसर्गे तु मृत्पिण्डं हेमपिण्डं वा घटकुण्डलमुकुटादयो विशन्तोऽव्यक्तीभवन्ति तत्कारणरूपमेवानभिव्यक्तं कार्य्यमपेक्ष्याव्यक्तं भवति। एवं पृथिव्यादयस्तन्मात्राणि विशन्तः स्वापेक्षया तन्मात्राण्यव्यक्तयन्ति, एवं तन्मात्राण्यहङ्कारं विशन्ति अहङ्कारमव्यक्तयन्ति, एवमहङ्कारो महान्तमाविशन्महान्तमव्यक्तयति, महान् प्रकृतिं स्वकारणं विशन् प्रकृतिमव्यक्तयति, प्रकृतेस्तु न क्वचिन्निवेश इति सा सर्व्वकार्याणामव्यक्तमेव। सोऽयमविभागः प्रकृतौ वैश्वरूप्यस्य नानारूपस्य कार्य्यस्य। स्वार्थिकः ष्यञ्। तस्मात्कारणे कार्य्यस्य सतएव विभागाविभागाभ्यामव्यक्तं कारणमस्तीति। इतश्चाव्यक्तमस्तीत्याह शक्तितः प्रवृत्तेश्च कारणशक्तितः कार्यं प्रवर्त्तते इति सिद्धम् अशक्तात्कारणात्कार्य्यानुत्पत्तेः। शक्तिश्च कारणगता न कार्यस्याव्यक्तत्वादन्या। न हि सत्कार्यपक्षे कार्यस्याव्यक्ततायां अन्यस्यां शक्तावस्ति प्रमाणम्। अयमेव हि सिकताभ्यस्तिलानां तैलोपादानानां भेदो यदेतेष्वेव तैलमस्त्यनागतावस्थं न सिकतास्विति।

स्यादेतत् शक्तितः प्रवृत्तेः कारणकार्यविभागाविभागौ च महतएव परमाव्यक्तत्वं साधयिष्यतइति कृतं ततः परेणा-व्यक्तेनेत्यतआह परिमाणात् परिमितत्वादव्यापित्वादिति यावत् । विवादाध्यासिता महदादिभेदा अव्यक्तकारण-वन्तः परिमितत्वाद्घटादिवत् । घटादयो हि परिमिता मृदाद्यव्यक्तकारणका दृष्टाः उक्तमेतद्यथा कार्यस्याव्यक्ता-वस्था कारणमेवेति । यन्महतः कारणं तत्परमव्यक्तं ततः परतरव्यक्तकल्पनायां प्रमाणाभावात् । इतश्च विवा-दाध्यासिता भेदा अव्यक्तकारणवन्तः समन्वयात् । भि-न्नानां समानरूपता समन्वयः । सुखदुःखमोहसमन्विता हि बुद्ध्यादयोऽध्यवसायादिलक्षणाः प्रतीयन्ते । यानि च यद्रूपसमनुगतानि तानि तत्स्वभावाव्यक्तकारणकानि यथा मृद्धेमपिण्डसमनुगता घटमुकुटादयो मृद्धेमपिण्डा-व्यक्तकारणकाइति कारणमस्त्यव्यक्तं भेदानामिति सिद्धम् ॥ १५ ॥

अव्यक्तं साधयित्वा अस्य प्रवृत्तिप्रकारमाह ।

कारणमस्त्यव्यक्तं प्रवर्त्तते त्रिगुणतः समुदयाच्च ।
परिणामतःसलिलवत्प्रतिप्रतिगुणाश्रयविशेषात् ॥

प्रतिसर्गावस्थायां सत्वञ्च रजश्च तमश्च सदृशपरिणामानि भवन्ति परिणामस्वभावा हि गुणा नापरिणम्यक्षणमप्यव-तिष्ठन्ते । तस्मात्सत्वं सत्वरूपतया रजोरजोरूप तया तमस्तमोरूपतया प्रतिसर्गावस्थायामपि प्रवर्त्तते तदिदमुक्तं

त्रिगुणत इति। प्रवृत्त्यन्तरमाह समुदयाच्च समेत्योदयः समुदयः समवायः स च गुणानां न गुणप्रधानभावमन्तरेण सम्भवति न गुणप्रधानभावोवैषम्यं विना न च वैषम्यमुपमर्द्दोपमर्द्दकभावादृते इति महदादिभावेन प्रवृत्तिर्द्वितीया। स्यादेतत् कथमेकरूपाणां गुणानामनेकरूपा प्रवृत्तिरित्यत आह परिणामतः सलिलवत् यथा हि वारिदविमुक्तमुदकमेकरसमपि तत्तद्भूमिविकारानासाद्य नारिकेलतालीविल्वचिरविल्वतिन्दुकामलकप्राचीनामलककपित्थफलरसतयापरिणामान्मधुराम्लतिक्तकटुकषायतया विकल्पते एवमेकैकगुणसमुद्भवात् प्रधानं गुणमाश्रित्याप्रधानगुणाः परिणामभेदान् प्रवर्त्तयन्ति तदिदमुक्तं प्रतिप्रतिगुणाश्रयविशेषात् एकैकगुणाश्रयेण योविशेषस्तस्मादित्यर्थः॥ १६॥

ये तु तौष्टिकाः अव्यक्तं वा महान्तं वा अहङ्कारं वा इन्द्रियाणि वा भूतानि वा आत्मानमभिमन्यमानास्तान्येवोपासते तान् प्रत्याह।

सङ्घातपरार्थत्वात्त्रिगुणादिविपर्ययादधिष्ठानात्
पुरुषोऽस्ति भोक्तृभावात्कैवल्यार्थं प्रवृत्तेश्च॥१७॥

पुरुषोऽस्त्यव्यक्तादेर्व्यतिरिक्तः कुतः सङ्घातपरार्थत्वात् अव्यक्त महदहङ्कारप्रभृतयः परार्थाः सङ्घातत्वात् शयनासनाभ्यङ्गवत्सुखदुःखमोहात्मकतया अव्यक्तादयः सर्वे सङ्घाताः। स्यादेतत् शयनासनादयः सङ्घाताः संहत-

शरीराद्यर्था दृष्टा न तु आत्मानं व्यक्ताव्यक्तव्यतिरिक्तं प्रति परार्थाः तस्मात्सङ्घातान्तरमेव परं गमयेयुर्नत्वसङ्घातमात्मानमित्यत आह त्रिगुणादिविपर्य्ययात्। अयमभिप्रायः सङ्घातान्तरार्थत्वे हि तस्यापि सङ्घातत्वात् तेनापि सङ्घातान्तरार्थेन भवितव्यमेवं तेन तेनेत्यनवस्था स्यात् न च व्यवस्थायां सत्यामनवस्थाकल्पना युक्ता गौरवप्रसङ्गात् नच प्रमाणवत्त्वेन कल्पना गौरवमपि मृष्यत इति युक्तं संहतत्वस्य पारार्थ्यमात्रेणान्वयात्। दृष्टान्तदृष्टसर्व्वधर्म्मानुरोधेन त्वनुमानमिच्छतः सर्व्वानुमानोच्छेदप्रसङ्ग इत्युपपादितं न्यायवार्त्तिकतात्पर्यटीकायामस्माभिः। तस्मादनवस्थाभिया अस्यासंहतत्वमिच्छता अत्रिगुणत्वं विवेकित्वमविषयत्वमसामान्यत्वं चेतनत्वमप्रसवधर्म्मित्वं चाभ्युपेयं त्रिगुणत्वादयो हि धर्म्माः सङ्घातत्वेन व्याप्ताः। तत् संहतत्वमस्मिन् परे निवर्त्तमानं त्रिगुणत्वादि व्यावर्त्तयति ब्राह्मण्यमिव निवर्त्तमानं कठत्वादिकं तस्मादाचार्य्येण त्रिगुणादिविपर्य्ययादिति वदता असंहतः परोविवक्षितः स चात्मेति सिद्धम्। इतश्च पुरुषोऽस्ति अधिष्ठानात् त्रिगुणात्मकानामधिष्ठीयमानत्वात् यद्यत्सुखदुःखमोहात्मकं तत्सर्व्वं परेणाधिष्ठीयमानं दृष्टं यथा रथादि यन्त्रादिभिः, सुखदुःखमोहात्मकञ्चेदं बुद्ध्यादि तस्मादेतदपि परेणाधिष्ठातव्यम्। स च परस्त्रैगुण्यादन्य आत्मेति। इतिश्चास्तिपुरुषः भोक्तृभावात् भोक्तृभावेन भोग्ये सुखदुःखे उपलक्षयति। भोग्ये हि सुखदुःखे अनुकूलप्रतिकूलवेदनीये प्रत्यात्मम-

भूयेते तेनानयोरनुकूलनीयेन प्रतिकूलनीयेन च केनचिदप्यन्येन भवितव्यं नचानुकूलनीयाः प्रतिकूलनीयाः वा बुद्ध्यादयस्तेषां सुखदुःखाद्यात्मकत्वेन स्वात्मनि वृत्तिविरोधात्। तस्माद्योऽसुखाद्यात्मा सोऽनुकूलनीयः प्रतिकूलनीयो वा स चात्मेति। अन्ये त्वाहुः भोग्या दृश्या बुद्ध्यादयः न च द्रष्टारमन्तरेण दृश्यता युक्ता तेषां, तस्मादस्ति द्रष्टा दृश्यबुद्ध्याद्यतिरिक्तः, स चात्मेति। भोक्तृभावात् दृश्येन द्रष्टृत्वानुमानादित्यर्थः। दृश्यत्वं च बुद्ध्यादीनां सुखाद्यात्मकतया पृथिव्यादिवदनुमितम्। इतश्चास्ति पुरुष इत्याह कैवल्यार्थं प्रवृत्तेश्च शास्त्राणां महर्षीणाञ्च दिव्यलोचनानां कैवल्यञ्चात्यन्तिकदुःखत्रयप्रशमलक्षणं न बुद्ध्यादीनां सम्भवति ते हि दुःखाद्यात्मकाः कथं स्वभावाद्वियोजयितुं शक्यन्ते तदतिरिक्तस्य त्वतदात्मन आत्मनस्ततो वियोगः शक्यसम्पादः तस्मात्कैवल्यार्थं प्रवृत्तेरागमानां महर्षीणाञ्चास्ति बुद्ध्याद्यतिरिक्त आत्मेति सिद्धम् ॥ १७॥

तदेवं पुरुषास्तित्वं प्रतिपाद्य स किं सर्वशरीरेष्वेकः किमनेकः प्रतिशरीरमिति संशये तस्य प्रतिशरीरमनेकत्वमुपपादयति।

जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥ १८॥

पुरुषबहुत्वं सिद्धं कस्माज्जन्ममरणकरणानां प्रतिनियमात् निकायविशिष्टाभिरपूर्वाभिर्देहेन्द्रियमनोऽहङ्कार-

बुद्धिवेदनाभिः पुरुषस्याभिसम्बन्धो जन्म न तु पुरुषस्य परिणाम स्तस्यापरिणामित्वात् तेषामेव च देहादीनामु-पात्तानां परित्यागो मरणं न त्वात्मनोविनाशः तस्य कूट-स्थनित्यत्वात् करणानि बुद्ध्यादीनि त्रयोदश तेषां जन्म-मरणकरणानां प्रतिनियमोऽव्यवस्था सा खल्वियं सर्वशरी-रेष्वेकस्मिन् पुरुषे नोपपद्यते तदा खल्वेकस्मिन् जाय-माने सर्वे जायेरन् म्रियमाणे च म्रियेरन् अन्धादौ चैकस्मिन् सर्वे एवान्धादयः विचित्ते चैकस्मिन् सर्व्वएव विचित्ताः स्युरित्यव्यवस्था स्यात् प्रतिचेत्रं पुरुषभेदे तु भवति व्यवस्था। नचैकस्यापि पुरुषस्य देहोपाधानभेदाद्य-वस्थेति युक्तं पाणिस्तनाद्युपाधिभेदेनापि जन्ममरणादि-व्यवस्थाप्रसङ्गात्। नहि पाणौ छक्णे, जाते वा स्तनादौ सहत्यवयवे, युवतिर्जाता स्तता वा भवतीति। इतश्च प्रति-चेत्रं पुरुषभेद इत्याह अयुगपत्प्रवृत्तेश्च प्रवृत्तिः प्रयत्न-लक्षणा यद्यप्यन्तःकरणवर्त्तिनी तथापि पुरुषे उपचर्यते तथाच तस्मिन्नेकत्र शरीरे प्रयतमाने स एव सर्वशरीरे-ष्वेक इति सर्व्वत्र प्रयतेत ततश्च सर्व्वाण्येव शरीराणि युग-पच्चालयेत् नानात्वे तु नायं दोषइति। इतश्च पुरुषभेद इत्याह त्रैगुण्यविपर्य्ययाच्चैव एवकारोभिन्नक्रमः सिद्ध-मित्यस्यानन्तरं द्रष्टव्यः सिद्धमेव नासिद्धम्। त्रयोगुणा-स्त्रैगुण्यं तस्य विपर्य्ययोऽन्यथाभावः केचित् खलु सत्त्वनि-कायाः सत्त्वबहुला यथोर्द्ध्व स्रोतसः केचिद्रजोबहुलाः यथा मनुष्याः केचित्तमोबहुलाः यथा तिर्य्यग्योनयः

सोऽयमीदृशस्त्रैगुण्यविपर्ययोऽन्यथाभावस्तेषु सत्त्व निकायेषु न भवेत् यद्येकः पुरुषः स्यादिदे त्वयमदोष-इति ॥ १८ ॥

एवं पुरुषबहुत्वं प्रसाध्य विवेकज्ञानोपयोगितया तस्य धर्मानाह।

तस्माच्च विपर्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य।
कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च ॥ १९ ॥

तस्माच्चेति चः पुरुषस्य बहुत्वेन सह धर्मान्तराणि समुच्चिनोति विपर्यासादस्मादित्युक्ते त्रैगुण्यविपर्ययादित्यनन्तरोक्तं सम्बध्येत अतस्तन्निरासाय तस्मादित्युक्तम् अनन्तरोक्तं हि सन्निधानादिदमो विषयो विप्रकृष्टञ्च तद इति विप्रकृष्टं त्रिगुणमविवेकीत्यादि सम्बध्यते। तस्मात् त्रिगुणादेः यो विपर्य्यासः स पुरुषस्यात्रिगुणत्वं विवेकित्वमविषयत्वमसाधारणत्वं चेतनत्वमप्रसवधर्मित्वञ्च। तत्र चेतनत्वेन अविषयत्वेन च साक्षित्वद्रष्टृत्वे दर्शिते चेतनो हि द्रष्टा भवति नाचेतनः साक्षी च, दर्शितविषयो-भवति यस्मै प्रदर्श्यते विषयः स साक्षी यथाहि लोके अर्थिप्रत्यर्थिनौ विवादविषयं साक्षिणे दर्शयतः एवं प्रकृतिरपि स्वचरितं विषयं पुरुषाय दर्शयतीति पुरुषः साक्षी। नचाचेतनोविषयो वा शक्योविषयं दर्शयितुमिति चैतन्यादविषयत्वाच्च भवति साक्षी अतएव द्रष्टापि भवति अत्रैगुण्याच्चास्य कैवल्यम् आत्यन्तिको दुःखत्रयाभावः कैवल्यं

तच्च तस्य स्वाभाविकादेवात्रैगुण्यात्सुखदुःखमोहरहित-त्वात्सिद्धम् अतएवात्रैगुण्यान्माध्यस्थ्यं सुखी हि सुखेन तृप्यन् दुःखी हि दुःखं द्विषन्न मध्यस्थो भवति तदुभयरहि-तस्तु मध्यस्थ इत्युदासीन इति चाख्यायते विवेकित्वादप्र-सवधर्मित्वाच्चाकर्त्तेति सिद्धम् ॥ १९ ॥

स्यादेतत् प्रमाणेन कर्त्तव्यमर्थमवगम्य चेतनोऽहं चिकी-र्षन् करोमीति कृतिचैतन्ययोः सामानाधिकरण्यमनुभव-सिद्धं तदेतस्मिन्मते नावकल्पते चेतनस्याकर्तृत्वात्कर्तुश्चा-चैतन्यादित्यत आह ।

तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्तृत्वे च तथा कर्त्तेव भवत्युदासीनः ॥ २० ॥

यतश्चैतन्यकर्तृत्वे भिन्नाधिकरणे युक्तितः सिद्धे तस्मा-द्भ्रान्तिरियमित्यर्थः । लिङ्गं महदादि सूक्ष्मपर्य्यन्तं वक्ष्यति भ्रान्तिवीजं तत्संयोगस्तत्सन्निधानम् अतिरोहितार्थमन्-न्यम् ॥ २० ॥

तत्संयोगादित्युक्तं नच भिन्नयोः संयोगोऽपेक्षां विना, न चेयमुपकार्य्योपकारकभावं विनेत्यपेक्षाहेतुमुपकार-माह ।

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥ २१ ॥

प्रधानस्येति कर्म्मणि षष्ठी प्रधानस्य सर्व्वकारणस्य

यद्दर्शनं पुरुषेण तदर्थं, तदनेन भोग्यता प्रधानस्य दर्शिता ततश्च भोग्यं प्रधानं भोक्तारमन्तरेण न सम्भवतीति युक्तास्य भोक्त्रपेक्षा। पुरुषस्यापेक्षां दर्शयति पुरुषस्य कैवल्यार्थम्। तथा हि प्रधानेन सम्भिन्नः पुरुषस्तद्गतं दुःखत्रयं स्वात्मन्यभिमन्यमानः कैवल्यं प्रार्थयते तच्च सत्त्वपुरुषान्यताख्यातिनिबन्धनम्। न च सत्त्वपुरुषान्यताख्यातिः प्रधानमन्तरेणेति कैवल्यार्थं पुरुषः प्रधानमपेक्षते। अनादित्वाच्च संयोगपरम्परायाः, भोगाय संयुक्तोऽपि कैवल्याय पुनः संयुज्यते इति युक्तम्। ननु भवत्वनयोः संयोगो महदादिसर्गस्तु कुतस्त्य इत्यत आह तत्कृतः सर्गः संयोगो हि न महदादिसर्गमन्तरेण भोगाय पर्याप्त इति संयोगएव भोगापवर्गार्थं सर्गं करोतीत्यर्थः॥ २१ ॥

सर्गक्रममाह।

प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोड़शकः।
तस्मादपि षोड़शकात्पञ्चभ्यः पञ्च भूतानि॥२२॥

प्रकृतिरव्यक्तं महदहङ्कारौ वक्ष्यमाणलक्षणौ एकादशेन्द्रियाणि वक्ष्यमाणानि पञ्चतन्मात्राणि च सोऽयं षोड़शसंख्यापरिमितोगणः षोड़शकः तस्मादपि षोड़शकादपकृष्टेभ्यः पञ्चभ्यस्तन्मात्रेभ्यः पञ्चभूतान्याकाशादीनि। तत्र शब्दतन्मात्रादाकाशं शब्दगुणं, शब्दतन्मात्रसहितात् स्पर्शतन्मात्राद्वायुः शब्दस्पर्शरूपतन्मात्रसहिताद्रूपतन्मात्रात्तेजः, शब्दस्पर्शरूपगुणं, शब्दस्पर्शरूपतन्मात्रसहिताद्रसतन्मा-

त्रादापः शब्दस्पर्शरूपरसगुणाः शब्दस्पर्शरूपरसतन्मात्र-सहिताद्गन्धतन्मात्राच्छब्दस्पर्शरूपरसगन्धगुणा पृथिवी जायते इत्यर्थः ॥ २२ ॥

अव्यक्तं सामान्यतोलक्षितं "तद्विपरीत" मित्यनेन विशेषतश्च "सत्त्वं लघु प्रकाशक,, मित्यादिना व्यक्तमपि सामान्यतोलक्षितं "हेतुमदित्यादिना,, सम्प्रतिविवेक-ज्ञानोपयोगितया व्यक्तविशेषं बुद्धिं लक्षयति।

अध्यवसायोबुद्धिर्धर्मोज्ञानं विरागऐश्वर्यम् ।
सात्विकमेतद्रूपं तामसमस्माद्विपर्य्यस्तम् ॥ २३ ॥

अध्यवसायोबुद्धिः क्रियाक्रियावतोरभेदविवक्षया । सर्वोव्यवहर्त्ता आलोच्य मत्वाहमत्राधिकृतइत्यभिमत्य कर्त्त-व्यमेतन्मयेति अध्यवस्यति ततश्च प्रवर्त्तते इति लोकप्रसि-द्धम्। तत्र योऽयं कर्त्तव्यमिति विनिश्चयश्चिति सन्निधा-नादापन्नचैतन्याया बुद्धेः, सोऽध्यवसायो बुद्धेरसाधारणो-व्यापारस्तदभेदा बुद्धिः स च बुद्धेर्लक्षणं समानासमान जातीयव्यवच्छेदकत्वात्। तदेवं बुद्धिं लक्षयित्वा विवेक-ज्ञानोपयोगिनस्तस्या धर्म्मान् सात्विक राजस तामसा-नाह धर्म्मोज्ञानं विरागऐश्वर्य्यं सात्विकमेतद्रूपं तामसम-स्माद्विपर्य्यस्तम्। धर्म्मो ऽभ्युदयनिःश्रेयसहेतुः तत्र याग-दानाद्यनुष्ठानजनितोधर्म्मोऽभ्युदयहेतुः अष्टाङ्ग योगानु-ष्ठानजनितश्च निःश्रेयसहेतुः। सत्वपुरुषान्यताख्याति ज्ञानम्। वैराग्यं रागाभावः। तस्य यतमानसंज्ञा,

व्यतिरेकसंज्ञा, एकेन्द्रियसंज्ञा, वशीकारसंज्ञेति, चतस्रः संज्ञाः। रागादयः कषायाश्चित्तवर्त्तिनस्तैरिन्द्रियाणि यथास्वं विषयेषु प्रवर्त्त्यन्ते तन्माऽत्र प्रवर्त्तिषत विषयेष्वन्द्रियाणीति, तत्परिपाचनायारम्भः प्रयत्नो यतमानसंज्ञा। परिपाचने चानुष्ठीयमाने केचित्कषायाः पक्वाः, पच्यन्ते च केचित्, तत्रैवं पूर्व्वापरीभावे सति पच्यमानेभ्यः कषायेभ्यः पक्वानां व्यतिरेकेणावधारणं व्यतिरेकसंज्ञा। इन्द्रियप्रवृत्त्यसमर्थतया पक्वानामौत्सुक्यमात्रेणमनसि चावस्थापनमेकेन्द्रियसंज्ञा। औत्सुक्यमात्रस्यापि निवृत्तिरुपस्थितेष्वपि दृष्टानुश्रविकविषयेषु या संज्ञात्रयात्परचीना सा वशीकारसंज्ञा। यामत्रभवान् पतञ्जलिर्वर्णयाञ्चकार "दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्य"मिति। सोऽयं बुद्धिधर्म्मो विराग इति। ऐश्वर्य्यमपि बुद्धिधर्म्मो यतोऽणिमादि प्रादुर्भावः। तत्राणिमा अणुभावः यतः शिलामपि प्रविशति। लघिमा लघुभावः यतः सूर्य्यमरीचीनालम्ब्य सूर्य्यलोकं याति महिमा महतोभावः यतोमहान् संभवति। प्राप्तिरङ्गुल्यग्रेण स्पृशति चन्द्रम्। प्राकाम्यमिच्छानभिघातो यतोभूमावुन्मज्जति निमज्जति यथोदके। वशित्वं भूतभौतिकं वशीभवत्यस्यावश्यम्। ईशित्वं भूतभौतिकानां प्रभवस्थितिमीष्टे। यच्च कामावसायित्वं सा सत्यसङ्कल्पता यथास्य सङ्कल्पो भवति भूतेषु तथैव भूतानि भवन्ति। अन्येषां निश्चया निश्चेतव्यमनुविधीयन्ते योगिनस्तु निश्चेतव्याः

पदार्थौ निश्चयमिति, चत्वारः सात्विका बुद्धिधर्माः। तामसास्तु तद्विपरीता बुद्धिधर्माः अधर्माज्ञानावैराग्यानैश्वर्याभिधानाश्चत्वार इत्यर्थः॥ २३॥

अहङ्कारस्य लक्षणमाह।

अभिमानोऽहङ्कारस्तस्मात् द्विविधः प्रवर्त्तते सर्गः। एकादशकश्च गणस्तन्मात्रपञ्चकश्चैव॥ २४॥

अभिमानोऽहङ्कारः यत् खल्वालोचितं, मतञ्च तत्राहमधिकृतः, शक्तः खल्वहमत्र, मदर्था एवामी विषयाः, मत्तोनान्योऽत्राधिकृतः कश्चिदस्त्यतो ऽहमस्मीति योऽभिमानः सोऽसाधारणव्यापारत्वादहङ्कारः तमुपजीव्य हि बुद्धिरध्यवस्यति "कर्त्तव्यमेतन्मयेति,,। तस्य कार्य्यभेदमाह तस्मात् द्विविधः प्रवर्त्तते सर्गः। प्रकारद्वयमाह एकादशकश्च गणः इन्द्रियाह्वयः तन्मात्रपञ्चकश्चैव द्विविधएव सर्गो ऽहङ्कारात् न त्वन्यइत्येवकारेणावधारयति॥२४॥

स्यादेतत् अहङ्कारादेकरूपात् कारणात्कथं जड़प्रकाशकौ गणौ विलक्षणौ भवत इत्यत आह।

सात्विकएकादशकः प्रवर्त्तते वैकृतादहङ्कारात्। भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम्॥ २५॥

प्रकाशलाघवाभ्यामेकादशक इन्द्रियगणः सात्विको-वैकृतात्सात्विकादहङ्कारात् प्रवर्त्तते। भूतादेस्त्वहङ्कारात्तामसात्तन्मात्रोगणः प्रवर्त्तते कस्मात् यतः स तामसः-

एतदुक्तं भवति यद्यप्येकोऽहङ्कारस्तथाऽपि गुणभेदोद्भवाभिभवाभ्यां भिन्नं कार्य्यं करोतीति। ननु यदि सत्वतमोभ्यामेव सर्व्वं कार्य्यं जन्यते तदा कृतमकिञ्चित्करेण रजसेत्यत आह तैजसादुभयं तैजसात् राजसादुभयं गणद्वयं भवति। यद्यपि रजसो न कार्य्यान्तरमस्ति तथापि सत्वतमसी स्वयमक्रिये समर्थे अपि न स्वस्वकार्य्यं कुरुतः रजस्तु चलतया ते यदा चालयति तदा स्वस्वकार्य्यं कुरुतइति तदुभयस्मिन्नपि कार्य्ये सत्वतमसोः क्रियोत्पादनद्वारेणास्ति रजसः कारणत्वमिति न व्यर्थं रज इति ॥२५॥

बुद्धीन्द्रियाणि चक्षुः श्रोत्रघ्राणरसनत्वगाख्यानि।
वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुः॥२६॥

सात्विकाहङ्कारोपादानकमिन्द्रियं तच्च द्विविधं बुद्धीन्द्रियं कर्मेन्द्रियञ्च उभयमप्येतदिन्द्रस्यात्मनश्चिह्नत्वादिन्द्रियमुच्यते। तानि च स्वसंज्ञाभिश्चक्षुरादिभिरुक्तानि तत्र रूपग्रहणलिङ्गं चक्षुः, शब्दग्रहणलिङ्गं श्रोत्रं, गन्धग्रहणलिङ्गं घ्राणं, रसग्रहणलिङ्गं रसनं, स्पर्शग्रहणलिङ्गं त्वक्, वागादीनां कार्य्यं वक्ष्यति॥ २६॥

एकादशकमिन्द्रियमाह।

उभयात्मकमत्रमनःसङ्कल्पकमिन्द्रियञ्च साधर्म्यात्
गुणपरिणामविशेषान्नानात्वं वाह्यभेदाश्च ॥२७॥

एकादशस्विन्द्रियेषु मध्ये मनउभयात्मकं बुद्धीन्द्रियं

कर्मेन्द्रियञ्च चक्षुरादीनां वागादीनाञ्च मनोऽधिष्ठितानामेव स्वस्वविषयेषु प्रवृत्तेः। तत् असाधारणेन रूपेण लक्षयति सङ्कल्पकं मन इति सङ्कल्पेन रूपेण मनो लक्ष्यते आलोचितमिन्द्रियेण वस्त्विदमिति सम्मुग्धमिदमेवं नैवमिति सम्यक् कल्पयति विशेषणविशेष्यभावेन विवेचयतीति यावत्। यदाहुः

सम्मुग्धं वस्तुमात्रन्तु प्राक् गृह्णन्त्यविकल्पितम् ।
तत्सामान्यविशेषाभ्यां कल्पयन्ति मनीषिणः ॥

तथाहि अस्ति ह्यालोचनज्ञानं प्रथमं निर्विकल्पकम् ।
बालमूकादिविज्ञानसदृशं मुग्धवस्तुजमिति ॥
ततः परं पुनर्वस्तुधर्मैर्जात्यादिभिर्यया ।
बुद्ध्यावसीयते सा हि प्रत्यक्षत्वेन सम्मता ॥

सोऽयं सङ्कल्पलक्षणोव्यापारोमनसः समानासमानजातीयाभ्यां व्यवच्छिन्दन् मनोलक्षयति। स्यादेतत् असाधारणव्यापारयोगिनौ यथा महदहङ्कारौ नेन्द्रियमेवं मनोऽप्यसाधारणव्यापारयोगि नेन्द्रियं भवितुमर्हतीत्यत आह इन्द्रियञ्च। कुतः साधर्म्यात् इन्द्रियान्तरैः, सात्त्विकाहङ्कारोपादानत्वञ्च साधर्म्यं न त्विन्द्रलिङ्गत्वं महदहङ्कारयोरप्यात्मलिङ्गत्वेनेन्द्रियत्वप्रसङ्गात्। तस्माद् व्युत्पत्तिमात्रमिन्द्रलिङ्गत्वं न तु प्रवृत्तिनिमित्तम्। अथ कथं सात्त्विकाहङ्कारादेकस्मादेकादशेन्द्रियाणीत्यत आह गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च। शब्दाद्युपभोगसंवर्त्तकादृष्टसहकारिभेदात्कार्य्यभेदः अदृष्टभेदोऽपि गुण-

परिणाम एव। बाह्यभेदाश्चेति दृष्टान्तार्थं यथा बाह्यभेदास्तथैतदपीत्यर्थः॥ २७॥

तदेवमेकादशेन्द्रियाणि स्वरूपत उक्त्वा दशानामसाधारणीर्वृत्तीराह।

**शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः।
वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम्॥ २८॥**

बुद्धीन्द्रियाणां सम्मुग्धवस्तुमात्रदर्शनमालोचनमुक्तं कर्म्मेन्द्रियाणां कण्ठताल्वादिस्थानमिन्द्रियं वाक् तस्या वृत्तिर्वचनं स्पष्टमन्यत्॥ २८॥

अन्तःकरणत्रयस्य वृत्तिमाह।

**स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या।
सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च॥ २९॥**

स्वालक्षण्यं वृत्तिस्त्रयस्य, स्वमसाधारणं येषां तानि स्वलक्षणानि महदहङ्कारमनांसि तेषां भावः स्वालक्षण्यं तच्च स्वानि स्वानि लक्षणान्येव तद्यथा महतोऽध्यवसायोऽहङ्कारस्याभिमानः सङ्कल्पो मनसो वृत्तिर्व्यापारः। वृत्तिर्द्वैविध्यं साधारणासाधारणत्वाभ्यामाह सैषा भवत्यसामान्या असाधारणी। सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च। सामान्या चासौ करणवृत्तिश्चेति त्रयाणामपि करणानां पञ्च वायवः जीवनं वृत्तिः तद्भावे भावात् तदभावे चाभावात्। तत्र प्राणो नासाग्रहृन्नाभिपा-

दाङ्गुष्ठवृत्तिः। अपानः कृकाटिकापृष्ठपादपायूपस्थपार्श्ववृत्तिः। समानो हृन्नाभिसर्व्वसन्धिवृत्तिः। उदानो हृत्कण्ठतालुमूर्द्धभ्रूमध्यवृत्तिः। व्यानस्त्वग्वृत्तिरिति पञ्च वायवः।

तुरीयप्रकरण अस्यासाधारणीषु वृत्तिषु क्रमाक्रमौ सप्रकारावाह।

युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा।
दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्व्विका वृत्तिः॥ ३०॥

दृष्टे यथा यदा सन्तमसान्धकारे विद्युत्सम्पातमात्राद्व्याघ्रमभिमुखमतिसन्निहितं पश्यति तदा खल्वस्यालोचनसङ्कल्पाभिमानाध्यवसाया युगपदेव प्रादुर्भवन्ति, यतस्तत उत्पत्य तत्स्थानादेकपदे ऽपसरति, क्रमशश्च यदा मन्दालोके प्रथमं तावद्वस्तुमात्रं सम्मुग्धमालोचयति अथ प्रणिहितमनाः कर्णान्ताकृष्टसशरः कुञ्चितपदः श्विञ्जितज्यामण्डलीकृतकोदण्डःप्रचण्डतरः पाटच्चरो ऽयमिति निश्चिनोति अथ च मां प्रत्येतीत्यभिमन्यते अथाध्यवस्यति अपसरामीतः स्थानादिति। परोक्षे तु अन्तःकरणत्रयस्य बाह्येन्द्रियवर्ज्जं वृत्तिरित्याह अदृष्टे त्रयस्य तत्पूर्विका वृत्तिः। अन्तःकरणत्रयस्य युगपत् क्रमेण च वृत्तिर्दृष्टपूर्विकेति। अनुमानागमस्मृतयोर्हि परोक्षेऽर्थे दर्शनपूर्व्वाः प्रवर्त्तन्ते नान्यथा। यथा दृष्टे तथा, अदृष्टेऽपीति योजना॥ ३०॥

स्यादेतत् चतुर्णां त्रयाणां वा वृत्तयो न तावत्स्वाभाधीनाः तेषां सदातनत्वेन वृत्तीनां सदोत्पादप्रसङ्गात्-

आकस्मिकत्वे तु वृत्तिसङ्करप्रसङ्गोनियमहेतोरभावादित्यत आह ।

स्वां स्वां प्रतिपद्यन्ते परस्पराकूतहेतुकां वृत्तिम् ।
पुरुषार्थएव हेतुर्न केनचित्कार्यते करणम् ॥३१॥

करणानीति शेषः । यथा हि बहवः पुरुषाः शाक्तीकयाष्टीकधानुष्ककार्पाणिकाः कृतसङ्केताः परावस्कन्दाय प्रवृत्ताः, तत्रान्यतमस्याकूतमवगम्यान्यतमः प्रवर्त्तते, प्रवर्त्तमानश्च शाक्तीकः शक्तिमेवादत्ते न तु यष्ट्यादिकम्, एवं याष्टीकोऽपि यष्टिमेव न शक्त्यादिकम् । तथान्यतमस्य करणस्याकूतात् स्वकार्य्यकरणाभिमुख्यादन्यतमं करणं प्रवर्त्तते तत्प्रवृत्तेश्च हेतुमत्त्वान्न वृत्तिसङ्करइत्युक्तं स्वां स्वां प्रतिपद्यन्ते इति । स्यादेतत् याष्टीकादयश्चेतनत्वात् परस्पराकूतमवगम्य प्रवर्त्तन्ते इति युक्तम्, करणानि त्वचेतनानि तस्मान्नैवं प्रवर्त्तितुमर्हन्ते तेनैषामधिष्ठात्रा करणानां स्वरूपसामर्थ्योपयोगाभिज्ञेन भवितव्यमत आह पुरुषार्थएव हेतुर्न केनचित्कार्य्यते करणम्, भोगापवर्गलक्षणः पुरुषार्थएवानागतावस्थः प्रवर्त्तयति करणानि, कृतमत्र तत्स्वरूपाभिज्ञेन कर्त्रा । एतच्च वत्सविवृद्धिनिमित्तमित्यत्रोपपादयिष्यते ॥ ३१ ॥

न केनचित् कार्य्यते करणमित्युक्तं तत्र करणं विभज्यते ।

करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम् ।
कार्य्यञ्च तस्य दशधा हार्य्यं धार्य्यं प्रकाश्यञ्च ॥३२॥

करणं त्रयोदशविधमिन्द्रियाण्येकादश बुद्धिरहङ्कार-श्चेति त्रयोदशप्रकारं करणं कारकविशेषः करणम्। न च व्यापारावेशं विना कारकत्वमिति व्यापारमाह-तदाहरणधारणप्रकाशकरम्, यथायथं तत्र कर्मेन्द्रियाणि वागादीन्याहरन्ति यथास्वमुपाददते स्वव्यापारेण प्राप्नु-वन्तीति यावत् बुद्ध्यहङ्कारमनांसि तु स्ववृत्त्या प्राणादि-लक्षणया धारयन्ति, बुद्धीन्द्रियाणि प्रकाशयन्ति। आहरण धारणादि क्रियाणां सकर्म्मकतया किं? कर्म्म, कतिवि-धञ्चेत्यत आह कार्य्यञ्च तस्येति। तस्य त्रयोदशविधस्य करणस्य दशधा आहार्य्यं धार्य्यं प्रकाश्यञ्च कार्य्यम्। आहार्य्यं व्याप्यं कर्मेन्द्रियाणां वचनादानविहरणोत्सर्गा-नन्दा यथायथं व्याप्याः ते च यथायथं दिव्यादिव्यतया दश इत्याहार्य्यं दशधा। एवं धार्य्यम् अन्तःकरणादि-त्रिकस्य प्राणादिलक्षणया वृत्त्या शरीरं, तच्च पार्थिवादि-पाञ्चभौतिकं शब्दादीनां पञ्चानां समूहः पृथिवीति, ते च पञ्च दिव्यादिव्यतया दशेति धार्यमपि दशधा। एवं बुद्धीन्द्रियाणां शब्दस्पर्शरूपरसगन्धा यथायथं व्याप्याः ते च यथायथं दिव्यादिव्यतया दशेति प्रकाश्यमपि दश-धेति ॥ ३२ ॥

त्रयोदशविधकरणेऽवान्तरविभागङ्करोति।

अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम्
साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम् ॥३३॥

अन्तःकरणं त्रिविधं बुद्धिरहङ्कारोमन इति शरीराभ्य-

न्तरवृत्तित्वादन्तःकरणम् । दशधा वाह्यमिन्द्रियं त्रयस्या-न्तःकरणस्य विषयाख्यं विषयमाख्याति विषयसङ्कल्पाभि-मानाध्यवसायेषु कर्त्तव्येषु द्वारीभवति तत्र बुद्धीन्द्रियाण्या-लोचनेन, कर्मेन्द्रियाणि तु यथास्वं व्यापारेण । वाह्या-न्तरयोः करणयोर्व्विशेषान्तरमाह साम्प्रतकालं वाह्यं त्रिकालमाभ्यन्तरं करणम्, साम्प्रतकालं वर्त्तमानकालं वाह्यमिन्द्रियं वर्त्तमानसमीपमनागतमतीतमपि वर्त्तमा-नम् अतो वागपि वर्त्तमानकालविषया भवति । त्रिकाल-माभ्यन्तरं करणं तद्यथा नदीपूरभेदादभूद्वृष्टिः, अस्ति धूमादग्निरिह नगनिकुञ्जे, असत्युपघातके पिपीलिकाण्ड-सञ्चरणाद्भविष्यति वृष्टिरिति, तदनुरूपाश्च सङ्कल्पाभि-मानाध्यवसाया भवन्ति । कालश्च वैशेषिकाभिमत एको न अनागतादिव्यवहारभेदं प्रवर्त्तयितुमर्हतीति तस्मादयं यैरुपाधिभेदैरनागतादिभेदं प्रपद्यते सन्तु तएवोपाधयो-नागतादिव्यवहारहेतवः कृतमत्रान्तर्गडुना कालेनेति सांख्याचार्य्याः तस्मान्न कालरूपतत्त्वान्तराभ्युपगम इति ॥ ३३ ॥

साम्प्रतकालानां वाह्येन्द्रियाणां विषयं विवेचयति ।

बुद्धीन्द्रीयाणि तेषां पञ्च विशेषाविशेषविषयाणि ।
वाग्भवति शब्दविषया शेषाणि तु पञ्च विषयाणि॥३४

बुद्धीन्द्रियाणि तेषां दशानामिन्द्रियाणां मध्ये पञ्च विशेषाविशेषविषयाणि विशेषाः स्थूलाः शब्दादयः शान्त-

घोरमूढाः पृथिव्यादिरूपाः, अविशेषास्तन्मात्राणि सूक्ष्माः शब्दादयः, मात्रग्रहणेन भूतभाविनावपाकरोति विशेषा-श्चाविशेषाश्च विशेषाविशेषास्तएव विषया येषां बुद्धीन्द्रि-याणां तानि तथोक्तानि। तत्रोर्द्ध्वस्रोतसां योगिनाञ्च श्रोत्रं शब्दतन्मात्रविषयं स्थूलशब्दविषयञ्च, अस्मदादीनान्तु स्थूलशब्दविषयमेव। एवं तेषां त्वक् स्थूलसूक्ष्मस्पर्शवि-षया अस्मदादीनान्तु स्थूलस्पर्शविषयैव। एवं चक्षुरादयो ऽपि तेषामस्मदादीनाञ्च रूपादिषु सूक्ष्मस्थूलेषु द्रष्टव्याः एवं कर्मेन्द्रियेषु मध्ये वाग्भवति शब्दविषया स्थूलशब्द-विषया तद्धेतुत्वात् न तु शब्दतन्मात्रस्य हेतुः तस्याहङ्का-रिकत्वेन वागिन्द्रियेण सहैककारणकत्वात्। शेषाणि तु चत्वारि पायूपस्थपाणिपादाख्यानि पञ्चविषयाणि पाणा-द्याहार्य्याणां घटादीनां पञ्चशब्दा[illegible]त्वादिति ॥ २४ ॥

साम्प्रतं त्रयोदशसु करणेषु केषाञ्चित् गुणभावं केषा-ञ्चित् प्रधानभावं सहेतुकमाह।

सान्तःकरणा बुद्धिः सर्व्वं विषयमवगाहते यस्मात्।
तस्मात्त्रिविधं करणं द्वारि द्वाराणि शेषाणि ॥३५॥

द्वारि प्रधानं शेषाणि करणानि वाह्येन्द्रियाणि द्वा-राणि तैरुपनीतं सर्व्वं विषयं समनोहङ्कारा बुद्धिर्यस्मादव-गाहतेऽध्यवस्यति तस्माद्वाह्येन्द्रियाणि द्वाराणि द्वारवती च सान्तःकरणा बुद्धिरिति ॥३५॥

न केवलं वाह्यानीन्द्रियाण्यपेक्ष्य प्रधानं बुद्धिरपि तु

ये अप्यहङ्कारमनसी द्वारिणी ते अप्यपेक्ष्य बुद्धिः प्रधानमित्याह।

एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः।
कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति॥३६॥

यथा हि ग्रामाध्यक्षाः कौटुम्बिकेभ्यः करमादाय विषयाध्यक्षाय प्रयच्छन्ति विषयाध्यक्षश्च सर्वाध्यक्षाय, स च भूपतये, तथा बाह्येन्द्रियाण्यालोच्य मनसे समर्पयन्ति मनश्च सङ्कल्प्याहङ्काराय, अहङ्कारश्चाभिमत्य बुद्धौ सर्वाध्यक्षभूतायाम्, तदिदमुक्तं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्तीति। बाह्येन्द्रियमनोऽहङ्काराश्च गुणविशेषाः गुणानां सत्त्वरजस्तमसां विकाराः ते तु परस्परविरोधशीला अपि पुरुषार्थेन भोगापवर्गरूपेण एकवाक्यतां नीताः यथा वर्त्ति तैल वह्नयः सन्तमसापनयेन रूपप्रकाशाय मिलिताःप्रदीपः, एवमेते गुणविशेषा इति योजना॥३६॥

कस्मात्पुनर्बुद्धौ प्रयच्छन्ति न तु बुद्धिरहङ्काराय द्वारिणे मनसे वेत्यत आह।

सर्वं प्रत्युपभोगं यस्मात्पुरुषस्य साधयति बुद्धिः।
सैव च विशिनष्टिपुनःप्रधानपुरुषान्तरं सूक्ष्मम्॥३७

पुरुषार्थस्य प्रयोजकत्वात्तस्य यत्साक्षात्साधनं तत् प्रधानं, बुद्धिश्चास्य साक्षात्साधनं तस्मात्सैव प्रधानम्। यथा सर्वाध्यक्षः साक्षाद्राजार्थसाधनतया प्रधानम्, इतरे तु ग्रामाध्यक्षादयस्तं प्रति गुणभूताः। बुद्धिर्हि पुरुष-

सन्निधानात्तच्छायापत्त्या तद्रूपेव सर्व्वविषयोपभोगं पुरुषस्य साधयति, सुखदुःखानुभवो हि भोगः स च बुद्धौ, बुद्धिश्च पुरुषरूपेवेति सा च पुरुषमुपभोजयति। यथा अर्थालोचनसङ्कल्पाभिमानाश्च तत्तद्रूपपरिणामेन बुद्धावुपसंक्रान्ताः तथा इन्द्रियादिव्यापारा अपि बुद्धेरेव स्वव्यापारेण अध्यवसायेन सह व्यापारीभवन्ति यथा स्वसैन्येन सह ग्रामाध्यक्षादि सैन्यं सर्व्वाध्यक्षस्य भवति। सर्व्वं शब्दादिकं प्रति य उपभोगः पुरुषस्य तं साधयति पश्चात् प्रधानपुरुषयोरन्तरं विशेषं विशिनष्टि करोति यथौदनपाकं पचतीति। ननु पुरुषस्य सर्व्वविषयोपभोगसम्पादिका बुद्धिस्तस्य निर्मोक्षइत्यत आह, सूक्ष्ममिति दुर्लक्ष्यं तदन्तरकरणञ्च प्रतिपादनमनेनापवर्गः पुरुषार्थो दर्शितः ॥३७॥

तदेवं करणानि विभज्य विशेषाविशेषान् विभजते।

तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्यः।
एते स्मृता विशेषाःशान्ता घोराश्च मूढाश्च ॥३८॥

शब्दादितन्मात्राणि सूक्ष्माणि नचैषां शान्तत्वादिरस्ति उपभोगयोग्योविशेषइति मात्रशब्दार्थः। अविशेषानुक्त्वा विशेषान् वक्तुमुत्पत्तिमेषमाह तेभ्यस्तन्मात्रेभ्यः यथासंख्यमेकद्वित्रिचतुःपञ्चभ्यः भूतानि आकाशानिलानलसलिलावनिरूपाणि पञ्च, पञ्चभ्यस्तन्मात्रेभ्यः। अस्त्वेषां भूतानामुत्पत्तिर्विशेषत्वे किं? मायातमित्यत आह एते स्मृता विशेषाः। कुतः? शान्ता घोराश्च मूढाश्च। चक्रो

हेतौ, द्वितीयः समुच्चये, यस्मादाकाशादिषु स्थूलेषु सत्त्वप्रधानतया केचिच्छान्ताः सुखाः, प्रसन्नाः लघवः। केचिद्रजःप्रधानतया घोरा दुःखाः, अनवस्थिताः केचित्तमःप्रधानतया मूढ़ा विषण्णा गुरवः। तेऽमी परस्परव्यावृत्ता अनुभूयमाना विशेषाइति, स्थूलाइति चोच्यन्ते तन्मात्राणि तु अस्मदादिभिः परस्परव्यावृत्तानि नानुभूयन्तइत्यविशेषाइति, सूक्ष्माइति चोच्यन्ते॥ ३८ ॥

विशेषाणामवान्तरविशेषमाह ।

सूक्ष्मा मातापितृजाःसह प्रभूतैस्त्रिधा विशेषाः स्युः।
सूक्ष्मास्तेषां नियता मातापितृजा निवर्त्तन्ते ॥३९॥

त्रिधा विशेषाः स्युः। तान् विशेषप्रकारानाह सूक्ष्मा इत्यादि । सूक्ष्मदेहाः परिकल्पिताः, मातापितृजाः षाट्कौशिकाः तत्र मातृतो लोमलोहितमांसानि, पितृतस्तु स्नाय्वस्थिमज्जान इति षट्कोशाः, प्रभूतानि महान्ति भूतानि प्रभूतानि तैः सह सूक्ष्मशरीरमेकोविशेषः मातापितृजो द्वितीयः महाभूतानि तृतीयः। महाभूतवर्गे च घटादीनां निवेशइति। सूक्ष्ममातापितृजयोर्द्वयोर्विशेषमाह सूक्ष्मास्तेषां विशेषाणां मध्ये ये, ते नियताः नित्याः मातापितृजा निवर्त्तन्ते रसान्ता वा भस्मान्ता वा विड़न्ता वेति ॥ ३९ ॥

सूक्ष्मशरीरं विभजते ।

पूर्व्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यन्तम् ।
संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्॥४०॥

प्रधानेनादिसर्गे प्रतिपुरुषमेकैकमुत्पादितम् असक्तम् (अ) व्याहतं शिलामप्यनुविशति नियतम् आ चादिसर्गात् आ च महाप्रलयादवतिष्ठते महदादिसूक्ष्मपर्य्यन्तं महदहङ्कारैकादशेन्द्रियपञ्चतन्मात्रपर्य्यन्तम् एषां समुदायः सूक्ष्मशरीरं, शान्त घोरमूढैरिन्द्रियैरन्वित त्वाद्विशेषः। नन्वस्तु तदेव शरीरं भोगायतनं पुरुषस्य, कृतं दृश्यमानेन षाट्कौशिकेन शरीरेणेत्यत आह संसरतीति उपात्तमुपात्तं षाट्कौशिकं शरीरं जहाति हायंहायं चोपादत्ते, कस्मात्? निरुपभोगं यतः, षाट्कौशिकं शरीरं विना सूक्ष्मं शरीरं निरुपभोगं, तस्मात्संसरति। ननु धर्म्माधर्म्मनिमित्तः संसारः न च सूक्ष्मशरीरस्यास्ति तद्योगः, तत्कथं संसरतीत्यत आह भावैरधिवासितं धर्म्माधर्म्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्य्यानैश्वर्य्याणि भावास्तदन्विता बुद्धिः तदन्वितञ्च सूक्ष्मशरीरमिति तदपि भावैरधिवासितं यथा सुरभिचम्पकसम्पर्कादस्त्रं तदामोदवासितम्भवति तस्माद्भावैरेवाधिवासितत्वात्संसरति। कस्मात्पुनः प्रधानमिव महाप्रलयेऽपि तच्छरीरं न तिष्ठतीत्यत आह लिङ्गं लयं गच्छतीति लिङ्गं हेतुमत्त्वेन चास्य लिङ्गत्वमिति भावः॥ ४०॥

स्यादेतद्बुद्धिरेव साहङ्कारेन्द्रिया कस्मान्न संसरति कृतं सूक्ष्मशरीरेणाप्रामाणिकेनेत्यत आह।

चित्रं यथाश्रयमृते स्थाण्वादिभ्योविना यथा छाया।
तद्वद्विना विशेषैर्नतिष्ठति निराश्रयं लिङ्गम्॥४१॥

लिङ्गनात् ज्ञापनात् बुद्ध्यादयोलिङ्गं तत् अनाश्रितं न तिष्ठति । जन्मप्रयाणान्तराले बुद्ध्यादयः प्रत्युत्पन्नशरीराश्रिताः प्रत्युत्पन्नपञ्चतन्मात्रवत्त्वे सति बुद्ध्यादित्वात् दृश्यमानशरीरवृत्तिबुद्ध्यादिवत् । विना विशेषैरिति सूक्ष्मैः शरीरैरित्यर्थः । आगमश्चात्र भवति 'अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमोबलादिति । अङ्गुष्ठमात्रत्वेन सूक्ष्मतामुपलक्षयति आत्मनोनिष्कर्षासम्भवेन सूक्ष्ममेव शरीरं पुरुषस्तदपि हि पुरि स्थूलशरीरे शेते ॥ ४१ ॥

एवं सूक्ष्मशरीरास्तित्वमुपपाद्य यथा संसरति येन च हेतुना, तदुभयमाह ।

पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसङ्गेन ॥
प्रकृतेर्विभुत्वयोगान्नटवद्व्यवतिष्ठते लिङ्गम् ॥४२॥

पुरुषार्थेन हेतुना प्रयुक्तं, निमित्तं धर्माधर्मादि, नैमित्तिकं तेषु तेषु निकायेषु यथायथं षाट्कौशिकशरीरग्रहः स हि धर्मादिनिमित्तप्रभवः निमित्तञ्च नैमित्तकञ्च तत्र यःप्रसङ्गः प्रसक्तिस्तया नटवद्व्यवतिष्ठते लिङ्गं सूक्ष्मशरीरम् । यथाहि नटस्तां तां भूमिकां विधाय परशुरामोवा अजातशत्रुर्वा वत्सराजोवा भवति एवं तत्तत्स्थूलशरीरग्रहणात् देवोवा मनुष्योवा पशुर्वा वनस्पतिर्वा भवति सूक्ष्मं शरीरमित्यर्थः । कुतस्त्यः पुनरस्येदृशोमहिमेत्यत आह प्रकृतेर्विभुत्वयोगात् तथा च पुराणं वैश्वरूप्यात् प्रधानस्य परिणामोऽयमद्भुत इति ॥ ४२ ॥

निमित्तनैमित्तिकप्रसङ्गेनेत्युक्तं तत्र निमित्तं नैमित्तिकञ्च विभजते ।

सांसिद्धिकाश्च भावाः प्राकृतिका वैकृतिकाश्च धर्माद्याः ।
दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कललाद्याः ॥ ४३ ॥

वैकृतिका-नैमित्तिकाः, प्राकृतिकाः-स्वाभाविकाः, सांसिद्धिकाः भावाः यथा सर्गादावादिविद्वान् भगवान् कपिलो महामुनिर्धर्मज्ञानवैराग्यैश्वर्यसम्पन्नः प्रादुर्बभूवेति स्मरन्ति । वैकृतिकाश्च भावाः असांसिद्धिकाः उपायानुष्ठानोत्पन्नाः यथा प्राचेतस प्रभृतीनां महर्षीणाम् एवमधर्माज्ञानावैराग्यानैश्वर्याण्यपि । कार्य्यं शरीरं तदाश्रयिणस्तस्यावस्थाः कललबुद्बुदमांसपेशीकरण्डाङ्गप्रत्यङ्गव्यूहाः गर्भस्थस्य, ततो निर्गतस्य बालस्य बाल्यकौमारयौवनवार्द्धकानीति ॥ ४३ ॥

अवगतानि निमित्तनैमित्तिकानि कतमस्य तु निमित्तस्य कतमन्नैमित्तिकमित्यत आह

धर्म्मेण गमनमूर्द्ध्वं गमनमधस्ताद्भवत्यधर्म्मेण ।
ज्ञानेन चापवर्गो विपर्य्ययादिष्यते बन्धः ॥ ४४ ॥

धर्म्मेण गमनमूर्द्ध्वं द्युप्रभृतिषु लोकेषु गमनम् । अधस्ताद्भवत्यधर्म्मेण भूतलादिषु, ज्ञानेन चापवर्गः । तावदेव प्रकृतिरारभते न यावद्विवेकख्यातिं करोति अथ विवेकख्यातौ सत्यां कृतकृत्यतया विवेकख्यातिमन्तं पुरुषं प्रतिनिवर्त्तते प्रकृतिः "विवेकख्यातिपर्य्यन्तं ज्ञेयं प्रकृतिचेष्टित,

मिति। विपर्य्ययादतत्त्वज्ञानादिष्यते बन्धः स च त्रिविधः प्राकृतिकोवैकृतिकोदाक्षिणकश्चेति तत्र प्रकृतावात्मज्ञानात् ये प्रकृतिमुपासते तेषां प्राकृतोबन्धः। यः पुराणे प्रकृतिलयान् प्रत्युच्यते 'पूर्णं शतसहस्रन्तु तिष्ठन्त्यव्यक्तचिन्तका इति। वैकारिकोबन्धस्तेषां ये विकारानेव भूतेन्द्रियाहङ्कारबुद्धीः पुरुषबुद्ध्योपासते तान् प्रतीदमुच्यते 'दश मन्वन्तराणीह तिष्ठन्त्यव्यक्तचिन्तकाः। भौतिकास्तु शतं पूर्णं सहस्रन्त्वाभिमानिकाः। बौद्धा दश सहस्राणि तिष्ठन्ति विगतज्वराः। ते खल्वमी विदेहा येषां वैकृतिकोबन्ध इति। इष्टापूर्त्तेन दाक्षिणकः पुरुषतत्त्वानभिज्ञोहि इष्टापूर्त्तकारी कामोपहतमना बध्यतइति॥ ४४॥

वैराग्यात् प्रकृतिलयःसंसारोभवति राजसाद्रागात्।
ऐश्वर्य्यादविघातोविपर्य्ययात्तद्विपर्यासः॥ ४५॥

वैराग्यात्प्रकृतिलयः पुरुषतत्त्वानभिज्ञस्य वैराग्यमात्रात्प्रकृतिलयः प्रकृतिग्रहणेन प्रकृतिकार्य्यमहदहङ्कारभूतेन्द्रियाणि गृह्यन्ते तेष्वात्मबुद्ध्या उपास्यमानेषु लयः। संसारो भवति राजसाद्रागात् राजसादित्यनेन रजसोदुःखत्वात्संसारस्य दुःखता सूचिता। ऐश्वर्य्यादविघातः इच्छायाः, ईश्वरो हि यदिच्छति तत्करोति। विपर्य्ययादनैश्वर्य्यात् तद्विपर्यासः सर्व्वत्रेच्छाविघात इत्यर्थः॥ ४५॥

बुद्धिधर्म्मान् धर्म्मादीनष्टौ भावान् समासव्यासाभ्यां

मुमुक्षूणां हेयोपादेयान् दर्शयितुं प्रथमतस्तावत्समासमाह।

एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्यः।
गुणवैषम्यविमर्द्दात्तस्य च भेदास्तु पञ्चाशत्॥४६॥

प्रतीयतेऽनेनेति प्रत्ययो बुद्धिस्तस्य सर्गः तत्र विपर्य्ययोऽज्ञानमविद्या च बुद्धिधर्म्मः अशक्तिरपि करणवैकल्यहेतुका बुद्धिधर्म एव तुष्टिसिद्धी अपि वक्ष्यमाणे बुद्धिधर्म्मावेव। तत्र विपर्य्याशक्तितुष्टिषु यथायोगं सप्तानां धर्म्मादीनां ज्ञानवर्जमन्तर्भावः सिद्धौ च ज्ञानस्येति। व्यासमाह तस्य च भेदास्तु पञ्चाशत् कस्मात् गुणवैषम्यविमर्दात् गुणानां वैषम्यम् एकैकस्याधिकबलता द्वयोर्द्वयोर्वा, एकैकस्य न्यूनबलता द्वयोर्द्वयोर्वा। तेन न्यूनाधिक्ये सन्त्वस्याधिक्यमात्रं यथाकार्यमुन्नेयम्। तदिदं गुणानां वैषम्यं तेनोपमर्द्दः एकैकस्य न्यूनबलस्य द्वयोर्द्वयोर्वाभिभवः तस्मात्तस्य भेदाः पञ्चाशदिति॥४६॥

तानेव पञ्चाशद्भेदान् गणयति

पञ्च विपर्ययभेदा भवन्त्यशक्तिश्च करणवैकल्यात्।
अष्टाविंशतिभेदा तुष्टिर्नवधाष्टधा सिद्धिः॥४७॥

अविद्यास्मितारागद्वेषाभिनिवेशाः यथासंख्यं तमोमोहमहामोहतामिस्रान्धतामिस्रसंज्ञका, पञ्च विपर्ययविशेषाः विपर्ययप्रभवानामस्मितादीनां विपर्ययस्वभावत्वात् यद्वा यदविद्यया विपर्ययेणावधार्यते वस्तु, अस्मितादयस्त-

दुःखभावाः सन्तस्तदभिनिविशन्ते। अतएव पञ्चपर्वा अविद्येत्याह भगवान् वार्षगण्यः ॥ ४७ ॥

सम्प्रति पञ्चानां विपर्ययभेदानामवान्तरभेदमाह।

भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः
तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्रः ॥ ४८ ॥

भेदस्तमसोऽविद्याया अष्टविधः अष्टसु अव्यक्तमहदहङ्कारपञ्चतन्मात्रेषु अनात्मस्वात्मबुद्धिरविद्या तमः। अष्टविधविषयत्वात्तस्याष्टविधत्वं मोहस्य च अत्राप्यष्टविधो भेद इति चेनानुषज्यते। देवा ह्यष्टविधमैश्वर्य्यमासाद्यामृतत्वाभिमानिनोऽणिमादिकमात्मीयं शाश्वतिकमभिमन्यन्ते इति सोयमस्मितामोहो ऽष्टविधैश्वर्यं विषयत्वादष्टविधः। दशविधो महामोहः शब्दादिषु पञ्चसु दिव्यादिव्यतया दशविधेषु विषयेषु रञ्जनीयेषु रागआसक्तिर्महामोहः स च दशविधविषयत्वाद्दशविधः। तामिस्रो द्वेषोऽष्टादशधा। शब्दादयो दश विषया रञ्जनीयाः स्वरूपतः, ऐश्वर्यं त्वणिमादिकं न स्वरूपतो रञ्जनीयं किन्तु रञ्जनीयशब्दाद्युपायाः। ते च शब्दादय उपस्थिताः परस्परेणोपहन्यमानास्तदुपायाश्चाणिमादयः स्वरूपेणैव कोपनीया भवन्तीति। शब्दादिभिर्दशभिः सहाणिमाद्यष्टकमष्टादशधेति तद्विषयो द्वेषस्तामिस्रोऽष्टदशविषयत्वादष्टादशधेति। तथा भवत्यन्धतामिस्रः अभिनिवेशस्तथेत्यनेनाष्टादशधेत्यनुषज्यते। देवाः खल्वणिमादिकमष्टवि-

६ त०

शमैश्वर्यमासाद्य दश शब्दादीन् भुञ्जानाः शब्दादयो-भोग्यास्तदुपायाश्चाणिमादयो ऽस्माकमसुरादिभिर्मा स्म उपघानिषतेति बिभ्यति। तदिदं भयमभिनिवेशोऽन्ध-तामिस्रोऽष्टादशविषयत्वात् अष्टादशधेति। सोऽयं पञ्च विधविकल्पोविपर्ययोऽवान्तरभेदात् द्वाषष्टिरिति ॥ ४८ ॥

तदेवं पञ्च विपर्ययभेदानुक्त्वा अष्टाविंशतिभेदामशक्तिमाह

एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा।
सप्तदश वधा बुद्धेर्विपर्ययात्तुष्टिसिद्धीनाम् ॥ ४९॥

एकादशेन्द्रियवधाः

बाधिर्यं, कुष्ठिताऽन्धत्वं, जड़ताऽजिघ्रता तथा।
मूकता, कौण्यपङ्गुत्वक्लैब्योदावर्त्तमन्दताः।

यथासंख्यं श्रोत्रादीनामिन्द्रियाणां वधाः एतावत्येव तु तद्धेतुका बुद्धेरशक्तिः स्वव्यापारे भवति। तथाचैका-दशहेतुकत्वादेकादशधा बुद्धेरशक्तिरुच्यते। हेतुहेतु मतोरभेदविवक्षया च सामानाधिकरण्यम्। तदेवमिन्द्रि-यवधद्वारेण बुद्धेरशक्तिमुक्त्वा स्वरूपतोऽशक्तीराह सह बुद्धिवधैरिति। कति बुद्धेः स्वरूपतोवधाइत्यत आह सप्तदश वधा बुद्धेः, कुतः ? विपर्य्ययात्तुष्टिसिद्धीनाम्, तुष्टयोनवधेति तद्विपर्ययास्तन्निरूपणान्नवधा भवन्ति। एवं सिद्धयोऽष्टाविति तद्विपर्ययास्तन्निरूपणात् अष्टौ भवन्तीति ॥ ४९ ॥

तुष्टिर्नवधेत्युक्तं ताः परिगणयति।

आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः।
बाह्या विषयोपरमात्पञ्च नव तुष्टयोऽभिमताः॥५०॥

प्रकृतिव्यतिरिक्त आत्मास्तीति प्रतिपद्य ततोऽस्य श्रवणमननादिना विवेकसाक्षात्काराय त्वसदुपदेशतुष्टो यो न प्रयतते तस्य चतस्र आध्यात्मिक्यस्तुष्टयोभवन्ति प्रकृतिव्यतिरिक्तमात्मानमधिकृत्य यस्मात्तास्तुष्टयस्तस्मादाध्यात्मिक्यः, कास्तादृत्यत आह प्रकृत्युपादान कालभाग्याख्याः प्रकृत्यादिराख्या यासां तास्तथोक्ताः। तत्र प्रकृत्याख्या तुष्टिर्यथा कस्यचिदुपदेशः 'विवेकसाक्षात्कारोऽपि प्रकृतिपरिणामभेदः तञ्च प्रकृतिरेव करोतीति कृतं ते ध्यानाभ्यासेन, तस्मादेवमेवास्य वत्सेति। सेयमुपदेष्टव्यस्य शिष्यस्य प्रकृतौ तुष्टिः प्रकृत्याख्या तुष्टिः अम्भ इत्युच्यते। "या तु प्राकृत्यविवेकख्यातिर्न सा प्रकृतिमात्राद्भवति मा भूत्सर्वस्य सर्वदा तन्मात्रस्य सर्वान् प्रत्यविशेषात् प्रव्रज्यायास्तु सा भवति तस्मात्प्रव्रज्यामुपाददीयाः कृतं ते ध्यानाभ्यासेनायुष्मन्नित्युपदेशे या तुष्टिः सोपादानाख्या सलिलमुच्यते। "या तु प्रव्रज्यापि न सद्योनिर्वाणदेति सैव कालपरिपाकमपेक्ष्य सिद्धिन्ते विधास्यति अलमुत्तप्ततया तवेत्युपदेशे" या तुष्टिःसाकालाख्या मेघ उच्यते॥ "या तु न कालात् नाप्युपादानाद्विवेकख्यातिरपि तु भाग्यादेव अतएव मदालसापत्यानि अतिबालानि मातुरुपदेशमात्रादेव विवेकख्यातिमन्ति मुक्तानि बभूवुः तत

भाग्यमेव हेतुर्नान्यदित्युपदेशे या तुष्टिः सा भाग्याख्या तुष्टिरुच्यते। बाह्या दर्शयति बाह्यास्तुष्टयो विषयोपरमात्पञ्च, याः खल्वनात्मनः प्रकृतिमहदहङ्कारादीनात्मेत्यभिमन्यमानस्य वैराग्ये सति तुष्टयस्ता बाह्याः आत्मज्ञानाभावेऽनात्मानमधिकृत्य प्रवृत्तेरिति। ताश्च वैराग्ये सति सम्भवन्ति तुष्टय इति वैराग्यहेतुपञ्चविधत्वाद्वैराग्याण्यपि पञ्च, तत्पञ्चत्वात् तुष्टयः पञ्चेति, उपरम्यतेऽनेनेत्युपरमो वैराग्यं विषयादुपरमो विषयोपरमः। विषया भोग्याः शब्दादयः पञ्च उपरमा अपि पञ्च। तथा च अर्जनरक्षणक्षयभोगहिंसादोषदर्शनहेतुजन्मान उपरमाः पञ्च भवन्ति। तथा हि सेवादयो धनोपार्जनोपायास्ते च सेवकादीन् दुःखाकुर्वन्ति। दृप्यद्दुरीश्वरद्वाःस्थदण्डचण्डार्द्धचन्द्रजां वेदनां भावयन् प्राज्ञः कः सेवासु प्रसज्जते। एवमन्येऽप्यर्जनोपाया दुःखा इति विषयोपरमे या तुष्टिः सैषा पारमुच्यते। तथार्जितं धनं राजैकागारिकाग्निजलौघादिभ्यो विनङ्क्ष्यतीति तद्रक्षणे महद्दुःखमिति भावयतो विषयोपरमे या तुष्टिः सा द्वितीया सुपारमुच्यते। तथा महतायासेनार्जितं धनं भुज्यमानं क्षीयते इति तत्क्षयं भावयतो विषयोपरमे या तुष्टिः सा तृतीया पारापारमुच्यते। एवं शब्दादिभोगाभ्यासाद्वर्द्धन्ते कामास्ते च विषयाप्राप्तौ कामिनं दुःखयन्तीति भोगदोषं भावयतो विषयोपरमे या तुष्टिः सा चतुर्थी अनुत्तमाम्भ उच्यते। एवं नानुपहत्य भूतानि विषयोपभोगः सम्भवतीति हिंसा-

दोषदर्शनाद्विषयोपरमे या तुष्टिः सा पञ्चमी उत्तमाम्भ उच्यते। एवमाध्यात्मिकीभिश्चतसृभिर्बाह्याभिश्च पञ्चभिर्नव तुष्टयोऽभिमताः ॥ ५० ॥

गौणमुख्यभेदाः सिद्धीराह।

ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः। दानञ्च सिद्धयोऽष्टौ सिद्धेः पूर्व्वोऽङ्कुशस्त्रिविधः॥ ५१॥

विहन्यमानस्य दुःखस्य त्रित्वात्त्रिविघातास्त्रय इति इमा मुख्याः तिस्रः सिद्धयस्तदुपायतया त्वितरा गौण्यः पञ्च सिद्धयस्ता अपि हेतुहेतुमत्तया व्यवस्थिताः। तास्वाद्या अध्ययनलक्षणा सिद्धिर्हेतुरेव, मुख्यास्तु हेतुमत्यः। विधिवद्गुरुमुखादध्यात्मविद्यानामक्षरस्वरूपग्रहणमध्ययनं प्रथमा सिद्धिस्तारमुच्यते तत्कार्य्यं शब्दः, शब्द इति पदं शब्दजनितमर्थज्ञानमुपलक्षयति कार्य्ये कारणोपचारात्सा द्वितीया सिद्धिः सुतारमुच्यते तदिदं द्विधा श्रवणम्। ऊहस्तर्कः आगमाविरोधिन्यायेनागमार्थपरीक्षणम् संशयपूर्वपक्षनिराकरणेनोत्तरपक्षव्यवस्थापनं तदिदं मननमाचक्षते आगमिनः। सा तृतीया सिद्धिस्तारतारमुच्यते। स्रोतृमेचितं मननममनन सेवासुहृत् सम्मतमिति द्वितीयं मननमाह सुहृत्प्राप्तिरिति। न्यायेन हि स्वयं परीक्षितमप्यर्थं न श्रद्दधते न यावद्गुरुशिष्यसब्रह्मचारिभिः सह संवाद्यते, अतः सुहृदां गुरुशिष्यसब्रह्मचारिणां संवादकानां प्राप्तिः सुहृत्प्राप्तिः सा सिद्धिश्चतुर्थी रम्यकमुच्यते।

दानञ्च शुद्धिर्विवेकज्ञानस्य, दैप् शोधने इत्यस्माद्धातोर्दानपदव्युत्पत्तेः । यथाह भगवान् पतञ्जलिः "विवेकख्यातिरविप्लवा दुःखत्रयस्य हानोपाया,, इति अविप्लवा शुद्धिः सा च सवासनसंशयविपर्य्यासानां परिहाण्या विवेकसाक्षात्कारस्य स्वच्छप्रवाहेऽवस्थानम् । सा च निविड़ादेव नैरन्तर्य्यदीर्घकालादरसेविताभ्यासपरिपाकाद्भवतीति दानेन विवेकख्यात्या कार्य्येण सोऽपि संगृहीतः । सेयं पञ्चमी सिद्धिः सदामुदितमुच्यते । तिस्रश्च मुख्याः सिद्धयः प्रमोदमुदितमोदमाना इत्यष्टौ सिद्धयः । अन्ये व्याचक्षते विनोपदेशादिना प्राग्भवीयाभ्यासवशात्तत्त्वस्य स्वयमूहनं यत् सा सिद्धि रूहः । यस्य सांख्यशास्त्रपाठमन्यदीयमाकर्ण्य तत्त्वज्ञानमुत्पद्यते सा सिद्धिः शब्दः शब्दपाठानन्तरभावात् । यस्य शिष्याचार्य्यसंबन्धेन संवादेन सांख्यशास्त्रं ग्रन्थतोऽर्थतश्चाधीत्य ज्ञानमुत्पद्यते साध्ययनहेतुका सिद्धिरध्ययनम्, सुहृत्प्राप्तिरिति यस्याधिगततत्त्वं सुहृदं प्राप्य ज्ञानमुत्पद्यते सा ज्ञानलक्षणा सिद्धिस्तस्य सुहृत्प्राप्तिः। दानञ्च सिद्धिहेतुः धनादिदानाराधितोज्ञानी ज्ञानं प्रयच्छति । अस्य च युक्तायुक्तत्वे सूरिभिरेवावगन्तव्ये इति कृतं परदोषोद्भावनेन नः सिद्धान्तमात्रव्याख्यानप्रवृत्तानामिति । सिद्धितुष्टिविपर्य्ययेणाशक्तिर्बुद्धिवधः सप्तदशधाद्रष्टव्यः । अत प्रत्ययसर्गे सिद्धिरुपादेयेति प्रसिद्धमेव । तन्निवारणहेतवस्तुविपर्य्ययाशक्तितुष्ट्योहेयाइत्याह सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः । पूर्व्व-

इति विपर्य्ययाशक्तितुष्टीः परामृशति ताः सिद्धिकारणानामङ्कुशो निवारकत्वात् अतः सिद्धिपरिपन्थित्वात् अङ्कुशइवेति विपर्य्ययाशक्तितुष्टयोहेया इत्यर्थः॥ ५१॥

स्यादेतत्पुरुषार्थप्रयुक्ता सृष्टिः स च पुरुषार्थः प्रत्ययसर्गाद्वा तन्मात्रसर्गाद्वा सिध्यतीति कृतमुभयसर्गेणेत्यत आह।

न विना भावैर्लिङ्गं न विना लिङ्गेन भावनिर्वृत्तिः।
लिङ्गाख्योभावाख्यस्तस्माद्द्विविधःप्रवर्त्ततेसर्गः॥५२॥

लिङ्गमिति। तन्मात्रसर्गमुपलक्षयति भावैरिति च प्रत्ययसर्गम्। एतदुक्तं भवति तन्मात्रसर्गस्य पुरुषार्थसाधनत्वस्वरूपञ्च न प्रत्ययसर्गाद्विना भवति एवं प्रत्ययसर्गस्य स्वरूपं पुरुषार्थसाधनत्वञ्च न तन्मात्रसर्गादृते इत्युभयथा सर्गप्रवृत्तिः। भोगः पुरुषार्थो न भोग्यान् शब्दादीन् भोगायतनञ्च शरीरद्वयमन्तरेण सम्भवतीति उपपन्नस्तन्मात्रसर्गः। एवं स एव भोगोभोगसाधनानीन्द्रियाणि चान्तःकरणानि चान्तरेण न सम्भवति न च तानि धर्म्मादीन् भावान् विना सम्भवन्ति न चापवर्गहेतुर्विवेकख्यातिरुभयसर्गं विनेत्युपपन्न उभयविधः सर्गः। अनादित्वाच्च बीजाङ्कुरवन्नान्योन्याश्रयदोषमावहति कल्पादावपि प्राचीन कल्पोत्पन्नभावलिङ्गसंस्कारवशाद्भावलिङ्गयोरुत्पत्तिर्नानुपपन्नेति सर्वमवदातम्॥ ५२॥

विभक्तः प्रत्ययसर्गः। भूतादिसर्गं विभजते।

अष्टविकल्पो दैवस्तैर्यग्योनश्च पञ्चधा भवति।
मानुष्यश्चैकविधः समासतो भौतिकः सर्गः॥ ५३॥

ब्राह्मप्राजापत्यैन्द्रपैत्रगान्धर्वयाक्षराक्षसपैशाचा इत्यष्टविधो दैवः सर्गः। तैर्यग्योनश्च पञ्चधा भवति पशुमृगपक्षिसरीसृपस्थावरा इति मानुष्यश्चैकविधः ब्राह्मणत्वाद्यवान्तरभेदाविवक्षया, संस्थानस्य चतुर्व्वप्यविशेषादिति समासतः संक्षेपतो भौतिकः सर्गः। घटादयस्तु शरीरत्वेऽपि स्थावरा एवेति॥ ५३॥

भौतिकस्यास्य सर्गस्य चैतन्योत्कर्षनिकर्षतारतम्यादूर्द्ध्वाधोमध्यभावेन त्रैविध्यमाह।

ऊर्द्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः।
मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्य्यन्तः॥ ५४॥

ऊर्द्ध्वं सत्त्वविशालो द्युप्रभृतिः सत्यान्तो लोकः सत्त्वबहुलः तमोविशालश्च मूलतः सर्गः पश्वादिः स्थावरान्तः, सोऽयं मोहमयत्वात्तमोबहुलः। भूर्लोकस्तु सप्तद्वीपसमुद्रसन्निवेशो मध्ये रजोविशालः धर्म्माधर्म्मानुष्ठानपरत्वाद्दुःखबहुलत्वाच्च तामिमां लोकसंस्थितिं संक्षिपति ब्रह्मादिस्तम्बपर्य्यन्तः स्तम्बग्रहणेन वृक्षादयः सङ्गृहीताः॥ ५४॥

तदेवं सर्गं दर्शयित्वा तस्यापवर्गसाधनवैराग्योपयोगिनीं दुःखरूपतामाह।

तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः।
लिङ्गस्याविनिवृत्तेस्तस्माद्दुःखं स्वभावेन॥ ५५॥

तत्र शरीरादौ यद्यपि विविधा विचित्रानन्दभोगभागिनः प्राणभृद्भेदा स्तथापि सर्वेषां जरामरणकृतं दुःखमविशिष्टं सर्व्वस्य खलु क्रमेरपि मरणत्रासो मा नभूवम्, भूयासमित्येवमात्मकोऽस्ति। दुःखं च भयहेतुरिति मरणं दुःखम्। स्यादेतत् दुःखादयः प्राकृता बुद्धिगुणास्तत्कथमेते चेतनसम्बन्धिनो भवन्तीत्यत आह पुरुष इति पुरि लिङ्गे शेते पुरुषः लिङ्गञ्च तत्सम्बन्धीति चेतनोऽपि तत्सम्बन्धी भवतीत्यर्थः। कुतः पुनर्लिङ्गसम्बन्धि दुःखं पुरुषस्य चेतनस्येत्यत आह लिङ्गस्याविनिवृत्तेः पुरुषाद्भेदाग्रहाल्लिङ्गधर्म्मानात्मन्यध्यवस्यति पुरुषः। अथ वा दुःखमाप्नावधिः आङा कथ्यते लिङ्गं यावन्न निवर्त्तते तावदिति॥ ५५॥

उक्तस्य सर्गस्य कारणविप्रतिपत्तीर्निराकरोति।

इत्येष प्रकृतिकृतोमहदादिविशेषभूतपर्यन्तः।
प्रतिपुरुषविमोक्षार्थं स्वार्थइव परार्थ आरम्भः॥५६

आरभ्यतइत्यारम्भः सर्गः महदादिभूतः प्रकृत्यैव कृतो नेश्वरेण न ब्रह्मोपादानो नाप्यकारणः। अकारणत्वे ह्यत्यन्तभावोऽत्यन्ताभावो वा भवेत्। न ब्रह्मोपादानः चितिशक्तेरपरिणामात्। नेश्वराधिष्ठितप्रकृतिकृतः निर्व्यापारस्याधिष्ठातृत्वासम्भवात् न हि निर्व्यापारस्तक्षा वास्याद्यधितिष्ठति। ननु प्रकृतिकृतश्चेत्तस्या नित्यायाः प्रवृत्तिशीलाया अनुपरमात्सदैव सर्गः स्यादिति न कश्चिन्मुच्येत इत्यत आह प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ

आरम्भः यथौदनकाम ओदनाय पाके प्रवृत्त ओदनसिद्धौ निवर्त्तते एवं प्रत्येकं पुरुषान्मोचयितुं प्रवृत्ता प्रकृतिर्यं पुरुषं मोचयतितं प्रति न प्रत्येकं पुनः प्रवर्त्तते तदिदमाह स्वार्थ इव स्वार्थे यथा तथा परार्थे आरम्भइत्यर्थः ॥५६॥

स्यादेतत्स्वार्थं परार्थं वा चेतनः प्रवर्त्तते न च प्रकृतिरचेतनैवं भवितुमर्हति तस्मादस्ति प्रकृतेरधिष्ठाता चेतनः, न च क्षेत्रज्ञाः चेतना अपि प्रकृतिमधिष्ठातुमर्हन्ति तेषां प्रकृतिस्वरूपानभिज्ञत्वात् तस्मादस्ति सर्व्वार्थदर्शी प्रकृतेरधिष्ठाता स चेश्वर इत्यत आह ।

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य॥५७॥

दृष्टमचेतनमपि प्रयोजने प्रवर्त्तमानं यथा वत्सविवृद्धये क्षीरमचेतनं प्रवर्त्तते एवं प्रकृतिरचेतनापि पुरुषविमोक्षणाय प्रवर्त्तिष्यते । न च क्षीरप्रवृत्तेरपीश्वराधिष्ठाननिबन्धनत्वेन साध्यत्वान्न साध्येन व्यभिचारइति साम्प्रतं प्रेक्षावत्प्रवृत्तेः स्वार्थकारुण्याभ्यां व्याप्तत्वात् ते च जगत्सर्गाद्व्यावर्त्तमाने प्रेक्षावत्प्रवृत्तिपूर्व्वकत्वमपि व्यावर्त्तयतः नह्यवाप्तसकलेप्सितस्य भगवतोजगत्सृजतः किमप्यभिलषितं भवति नापि कारुण्यादस्य सर्गे प्रवृत्तिः प्राक् सर्गाज्जीवानामिन्द्रियशरीरविषयानुत्पत्तौ दुःखाभावेन कस्य प्रहाणेच्छा कारुण्यं, सर्गोत्तरकालं दुःखिनोऽवलोक्य कारुण्याभ्युपगमे दुरुत्तरमितरेतराश्रयत्वं कारुण्येन सृष्टिः सृष्ट्या च कारुण्यमिति । अपि च करुणया प्रेरितः ईश्वरः

सुखिन एव जन्तून् सृजेन्न विचित्रान् । कर्मवैचित्र्यात् वैचित्र्यमिति चेत् कृतमस्य प्रेक्षावतः कर्माधिष्ठानेन तदनधिष्ठानमात्रादेवाचेतनस्यापि कर्मणः प्रवृत्त्युपपत्तेस्तत्कार्यशरीरेन्द्रियविषयानुत्पत्तौ दुःखानुत्पत्तेरपि सुकरत्वात् । प्रकृतेस्त्वचेतनायाः प्रवृत्तेर्न स्वार्थानुग्रहो न कारुण्यं प्रयोजकमिति नोक्तदोषप्रसङ्गावतारः । पारार्थ्यमात्रन्तु प्रयोजनमुपपद्यते तस्मात्सुष्ठूक्तं वत्सविवृद्धिनिमित्तमिति ॥ ५७ ॥

स्वार्थइवेति दृष्टान्तितं तद्विभजते ।

औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्त्तते लोकः ।
पुरुषस्य विमोक्षार्थं प्रवर्त्तते तद्वदव्यक्तम् ॥ ५८ ॥

औत्सुक्यमिच्छा सा खल्विष्यमाणप्राप्तौ निवर्त्तते इष्यमाणञ्च स्वार्थः इष्टलक्षणत्वात् फलस्य । दार्ष्टान्तिके योजयति पुरुषस्य विमोक्षार्थं प्रवर्त्तते तद्वदव्यक्तम् ॥ ५८ ॥

ननु भवतु पुरुषार्थः प्रकृतेः प्रवर्त्तकः निवृत्तिस्तु कुतस्त्या प्रकृतेरित्यत आह ।

रङ्गस्य दर्शयित्वा निवर्त्तते नर्त्तकी यथा नृत्यात् ।
पुरुषस्य तथात्मानं प्रकाश्य निवर्त्तते प्रकृतिः॥५९॥

रङ्गस्येति स्थानेन स्थानिनः पारिषदानुपलक्षयति । आत्मानं शब्दाद्यात्मना पुरुषाद्भेदेन च प्रकाश्येत्यर्थः ॥५९॥

स्यादेतत् प्रवर्त्ततां प्रकृतिः पुरुषार्थं पुरुषादुपकृतात् प्रकृतिर्लप्स्यति कञ्चिदुपकारम् आज्ञासम्पादना-

श्रितादिवाज्ञापयितुर्भुजिष्या तथाच न परार्थोऽस्या आरम्भ इत्यत आह।

नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः।
गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकञ्चरति ॥६०॥

यथा गुणवानप्युपकार्य्यपि भृत्यो निर्गुणे अतएवानुपकारिणि स्वामिनि निष्फलाराधनः एवमियं प्रकृतिस्तपस्विनी गुणवत्युपकारिण्यप्यनुपकारिणि निर्गुणेऽपि पुरुषे व्यर्थपरिश्रमेति पुरुषार्थमेव यतते न स्वार्थमिति सिद्धम् ॥ ६० ॥

स्यादेतन्नर्त्तकी नृत्यं परिषद्भ्योदर्शयित्वा निवृत्तापि पुनस्तद्द्रष्टृकौतूहलात् प्रवर्त्तते यथा, तथा प्रकृतिरपि पुरुषायात्मानं दर्शयित्वा निवृत्तापि पुनः प्रवर्त्स्यतीत्यत आह।

प्रकृतेः सुकुमारतरं नकिञ्चिदस्तीति मेमतिर्भवति।
या दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्य ॥ ६१॥

सुकुमारतरता अतिपेशलता परपुरुषदर्शनासहिष्णुतेति यावत् असूर्य्यम्पश्या हि कुलवधूः अतिमन्दाक्षमन्थरा प्रमादाद्विगलितशिरोंऽचला चेदालोक्यते परपुरुषेण, तदासौ तथा प्रयतते अप्रमत्ता यथैनां पुरुषान्तराणि न पुनः पश्यन्तीति एवं प्रकृतिरपि कुलवधूतोऽप्यधिका दृष्टा विवेकेन न पुनर्द्रक्ष्यत इत्यर्थः ॥ ६१ ॥

स्यादेतत्पुरुषश्चेदगुणोऽपरिणामी कथमस्य मोक्षः-

मुक्तेर्बन्धनविश्लेषार्थत्वात् सवासनक्लेशकर्माशयानाञ्च बन्धनसंज्ञितानां पुरुषेऽपरिणामिन्यसम्भवात् अत एवास्य न संसारः प्रेत्यभावापरनामास्ति निष्क्रियत्वात् तस्मात्-पुरुषविमोक्षार्थमिति रिक्तं वचः इतीमामाशङ्कामुपसंहारव्याजेनाभ्युपगच्छन्नपाकरोति ।

तस्मान्न बध्यतेऽसौ न मुच्यतेनापि संसरतिकश्चित् ।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः॥६२

अद्धा न कश्चित्पुरुषोबध्यते न कश्चित्संसरति न कश्चिन्मुच्यत इति । प्रकृतिरेव तु नानाश्रया सती बध्यते च संसरति च मुच्यते च बन्धमोक्षसंसाराः पुरुषे उपचर्य्यन्ते यथा जयपराजयौ भृत्यगतावपि स्वामिन्युपचर्य्येते तदाश्रयेण भृत्यानां तद्भागित्वात्तत्फलस्य च शोकलाभादेः स्वामिसम्बन्धात् । भोगापवर्गयोश्च प्रकृतिगतयोरपि विवेकाग्रहात् पुरुषसम्बन्ध उपपादित इति सर्व्वं पुष्कलम् ॥ ६२ ॥

नन्ववगतं प्रकृतिगता बन्धसंसारापवर्गाः पुरुष उपचर्य्यन्त इति किं साधनाः पुनरेतेप्रकृतेरित्यत आह ।

रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः ।
सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण ॥६३॥

तत्त्वज्ञानवर्जं बध्नाति धर्मादिभिः सप्तभिः रूपैर्भावै-रिति पुरुषार्थं प्रति भोगापवर्गं प्रति आत्मनात्मानमेक-

तत्त्व

रूपेण तत्त्वज्ञानेन विवेकख्यात्या विमोचयति पुरुषं भोगापवर्गौ न करोतीत्यर्थः ॥ ६३ ॥

अवगतमीदृशं तत्त्वं ततः किमित्यत आह ।

एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम् ।
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥ ६४ ॥

तत्त्वेन विषयेण विषयि ज्ञानमुपलक्षयति उक्तरूपप्रकारतत्त्वविषयज्ञानाभ्यासादादरनैरन्तर्यदीर्घकालसेवितात्सत्त्वपुरुषान्यतासाक्षात्कारि ज्ञानमुत्पद्यते यद्विषयश्चाभ्यासस्तद्विषयमेव साक्षात्कारमुपजनयति तत्त्वविषयश्चाभ्यास इति तत्त्वसाक्षात्कारं जनयति अत उक्तं विशुद्धमिति । कुतो विशुद्धमित्यत आह अविपर्ययादिति संशयविपर्ययौ हि ज्ञानस्याविशुद्धी तद्रहितं विशुद्धं तदिदमुक्तमविपर्ययादिति नियतमनियततया गृह्णन् संशयोऽपि विपर्ययः तेनाविपर्ययादिति संशयविपर्ययाभावो दर्शितः तत्त्वविषयत्वाच्च संशयविपर्ययाभावः । स्यादेतदुत्पद्यतामीदृशाभ्यासात्तत्त्वज्ञानं तथाप्यनादिना मिथ्याज्ञानसंस्कारेण मिथ्याज्ञानं जनयितव्यं तथा च तन्निबन्धनस्य संसारस्यानुच्छेदप्रसङ्ग इत्यत उक्तं केवलं विपर्ययेणासम्भिन्नम् । यद्यप्यनादिर्विपर्ययवासना तथापि तत्त्वज्ञानवासनया तत्त्वविषयसाक्षात्कारप्रसवत्यादिमत्यापि शक्या समुच्छेत्तुं, तत्त्वपक्षपातो हि धियां स्वभावः यथाहुः बाह्या अपि "निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः । न बाधोयत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपाततः इति,, ।

ज्ञानस्वरूपमुक्तं नास्मि न मे नाहमिति नास्मीत्यात्मनि क्रियामात्रं निषेधति यथाहुः "कृभ्वस्तयः क्रियासामान्यवचना" इति। तथा चाध्यवसायाभिमानसङ्कल्पालोचनानि चान्तराणि बाह्याश्च सर्व्वे व्यापारा आत्मनि प्रतिषिद्धानि बोद्धव्यानि यतश्चात्मनि व्यापारावेशो नास्त्यतो नाहम्, अहमिति कर्त्तृपदम्, अहं जानाम्यहं जुहोम्यहं ददेऽहं भुञ्जे इति सर्व्वत्र कर्त्तुः परामर्शात्। निष्क्रियत्वे च सर्व्वकर्त्तृत्वाभावः ततः सुष्ठूक्तं नाहमिति अतएव न मे, कर्त्ता हि स्वामितां लभते तदभावात् कुतः स्वाभाविकी स्वामितेत्यर्थः। अथवा नास्मीति पुरुषोऽस्मि न प्रसवधर्म्मा अप्रसवधर्म्मत्वाच्चाकर्त्तृत्वमाह नाहमिति। अकर्त्तृत्वाच्च न स्वामित्वमाह न मे इति। नन्वेतावत्सु ज्ञातेष्वपि कश्चित्कदाचिदज्ञातो विषयोऽस्ति तदज्ञानञ्च जन्तून् बन्धयिष्यतीत्यत आह अपरिशेषमिति नास्ति किञ्चिदस्मिन् परिशिष्टं ज्ञातव्यं यदज्ञानं बन्धयिष्यतीत्यर्थः ॥ ६४ ॥

किं पुनरनेन तत्त्वसाक्षात्कारेण सिध्यतीत्यत आह

तेन निवृत्तप्रसवामर्थवशात्सप्तरूपविनिवृत्ताम् ।
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः सुस्थः॥६५॥

भोगविवेकसाक्षात्कारौ हि प्रकृतेः प्रसोतव्यौ तौ च प्रसूताविति नास्याः प्रसोतव्यमवशिष्यते यत् प्रसोष्यतइति निवृत्तप्रसवा प्रकृतिः। विवेकज्ञानरूपोपायोऽस्य

वध्यः सामर्थ्यं तस्मात्, अतत्त्वज्ञानपूर्वकाणि खलु धर्मा-धर्माज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्याणि, वैराग्यमपि केवलतौष्टिकानाम् अतत्त्वज्ञानपूर्वकमेव तच्च तत्त्वज्ञानं विरोधित्वेनातत्त्वज्ञानमुच्छिनत्ति कारणनिवृत्त्या च सप्त रूपाणि निवर्तन्ते इति सप्तरूपविनिवृत्ता प्रकृतिः । अव-स्थित इति निष्क्रियः, स्वस्थ इति रजस्तमोवृत्तिकलुषया बुद्ध्या असम्भिन्नः सात्त्विक्या तु बुद्ध्या तदापस्य मनाक् सम्भेदो ऽस्त्येव अन्यथैवम्भूतप्रकृति दर्शनानुपपत्तेरिति ॥ ६५ ॥

स्यादेतन्निवृत्तप्रसवामिति न मृष्यामहे संयोगकृतो हि स इत्युक्तं योग्यता च संयोगः भोक्तृत्वयोग्यता च पुरुषस्य चैतन्यं भोग्यत्वयोग्यता च प्रकृतेर्जडत्वं विषयत्वञ्च नचैत-योरस्ति निवृत्तिः न च करणीयाभावान्निवृत्तिः तज्जा-तीयस्यान्यस्य करणीयत्वात् पुनःपुनःशब्दाद्युपभोगवदि-त्यत आह ।

दृष्टा मयेत्युपेक्षक एको दृष्टाहमित्युपरमत्यन्या ।
सति संयोगेऽपि तयोःप्रयोजनं नास्ति सर्गस्य॥६६॥

करोतु नाम पौनःपुन्येन शब्दाद्युपभोगं प्रकृतिर्या विवेकख्यातिर्न कृतेति कृतविवेकख्यातिं शब्दाद्युपभोगं न जनयति । अविवेकख्यातिनिबन्धनो हि तदुपभोगः, निबन्धना भावेन न तज्जनितुमर्हति अङ्कुर इव बीजा-भावे । प्राकृतान् हि सुखदुःखमोहात्मनः शब्दादीनद-विवेकान्ममैते इत्यभिमन्यमान आत्मा भुञ्जीत एवं विवेक-

ख्यातिमपि प्राकृतीमविवेकादेवात्मा मदीयमिति मन्यते उत्पन्नविवेकख्यातिस्तु असंसर्गान्न शब्दादीन् भोक्तुमर्हति नापि विवेकख्यातिं प्राकृतीं ततो विविक्त आत्मा स्वार्थमभिसन्धातुमर्हतीति । पुरुषार्थौ च भोगविवेकौ प्रकृत्यारम्भप्रयोजकावित्यपुरुषार्थौ सन्तौ न प्रकृतिं प्रयोजयतः तदिदमुक्तं प्रयोजनं नास्ति सर्गस्येति । अत्र प्रयुज्यते सर्गे प्रकृतिरनेनेति प्रयोजनं तदपुरुषार्थत्वेनासीत्यर्थः ॥ ६६ ॥

स्यादेतदुत्पन्नतत्त्वसाक्षात्कारान्मुक्तश्चेदनन्तरमेव मुक्तस्य तस्य शरीरपातः स्यादिति कथमदेहः प्रकृतिं पश्येत् अथ तत्त्वज्ञानेऽपि न मुच्यते कर्मणामप्रक्षीणत्वात् । तेषां कुतः प्रक्षयः भोगादिति चेत् हन्त भोस्तत्त्वज्ञानं न मोक्षसाधनमिति व्यक्ताव्यक्तज्ञविज्ञानजन्मना तत्त्वज्ञानेनापवर्ग इति रिक्तं वचः । भोगेन चापरिसंख्येयः कर्माशयप्रचयोऽनियतविपाकसमयः क्षेतव्यः इतश्चापवर्गप्राप्तिरित्यपि मनोरथमात्रमित्यत आह ।

सम्यग्ज्ञानाधिगमाद्धर्मादीनामकारणप्राप्तौ ।
तिष्ठति संस्कारवशाच्चक्रभ्रमिवद्धृतशरीरः ॥६७॥

तत्त्वसाक्षात्कारोदयादेवानादिरप्यनियतविपाककालोऽपि कर्माशयप्रचयो दग्धबीजभावतया न जात्यायुर्भोगलक्षणाय फलाय कल्पते । क्लेशसलिलावसिक्तायां हि बुद्धिभूमौ कर्मबीजान्यङ्कुरं प्रसुवते तत्त्वज्ञाननिदाघ

निपीतसकलक्षीर घूर्णितायामूषरायां कृत कार्यबीजा-नामङ्कुरप्रसवः। नहीदमुक्तं धर्मादीनामकारणत्वमपि त्विति अकारणत्वमात्रामित्यर्थः। उत्पन्नतत्त्वज्ञानेऽपि च संस्कारवशात्तिष्ठति यथोपरतेऽपि कुलालव्यापारे चक्रं वेगाख्य-संस्कारवशाद्भ्रमत्तिष्ठति कालपरिपाकवशात्तूपरते संस्कारे निष्क्रियं भवति। शरीरस्थितौ च प्रारब्धपरिपाकौ धर्माधर्मौ संस्कारौ। तथा चाश्रूयते "भोगेन त्वितरे क्षपयित्वाथ सम्पद्यत,, इति "तावदेवास्य चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये,, इति। प्रक्षीयमाणाविद्याविशेषश्च संस्कारस्तद्वशात्तत्सामर्थ्याद्धृतशरीरस्तिष्ठति॥६७॥

स्यादेतत् यदि संस्कारविशेषाद्धृतशरीरस्तथापि कदास्य मोक्षोभविष्यतीत्यत आह।

प्राप्ते शरीरभेदे चरितार्थत्वात्प्रधानविनिवृत्तौ। ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ॥६८॥

अनारब्धविपाकानां तावत्कर्माशयानां तत्त्वज्ञानाग्निना बीजभावो दग्धः प्रारब्धविपाकानां तूपभोगेन क्षये सति प्राप्ते शरीरभेदे विनाशे चरितार्थत्वात्कृतप्रयोजनत्वात्प्रधानस्य तं पुरुषं प्रति निवृत्तावैकान्तिकमवश्यम्भावि आत्यन्तिकमविनाशीत्युभयं कैवल्यं दुःखत्रयविगमं प्राप्नोति पुरुषः॥ ६८ ॥

प्रमाणेनोपपादितेऽप्यत्यन्तश्रद्धोत्पादनाय परमर्षिपूर्वकत्वमाह।

पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातम् ।
स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम् ॥ ६९ ॥

गुह्यं गुहानिवासि स्थूलधियां दुर्बोधमिति यावत् परमर्षिणा कपिलेन । तदेव आगमिकत्वेन द्रढयति स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानां यत्र ज्ञाने यदर्थं यथा। चर्म्मणि द्वीपिनं हन्तीति । भूतानां प्राणिनां स्थित्युत्पत्तिप्रलया आगमैश्चिन्त्यन्ते ॥ ६९ ॥

आः एतत्, यत्परमर्षिणा साक्षात्कथितं तच्छ्रद्दधीमहि यत्पुनरीश्वरकृष्णेन कथितं तत्र कुतः श्रद्धेत्यत आह ।

एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ ।
आसुरिरपि पञ्चशिखाय तेन बहुधा कृतं तन्त्रम् ॥७०

एतत् पवित्रं पावनं दुःखत्रयहेतोः पाप्मनः पुनातीति अग्र्यं सर्वेभ्यः पवित्रेभ्यो मुख्यं मुनिः कपिलः आसुरयेऽनुकम्पया प्रददौ आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम् ॥ ७० ॥

शिष्यपरम्परयागतमीश्वरकृष्णेन चैतदार्य्याभिः ।
संक्षिप्तमार्य्यमतिना सम्यग्विज्ञाय सिद्धान्तम् ॥७१

आरात् याता तत्त्वेभ्य इत्यार्य्या आर्य्या मतिर्यस्य सोऽयमार्य्यमतिरिति ॥ ७१ ॥

एतच्च शास्त्रं, सकलशास्त्रार्थसूचकत्वात् न तु प्रकरणमित्याह ।

सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य।
आख्यायिकाविरहिताः परवादविवर्जिताश्चापि॥७२

तथा च राजवार्त्तिकं "प्रधानास्तित्वमेकत्वमर्थवत्त्वमथान्यता॥ पारार्थ्यञ्च तथानैक्यं वियोगोयोग एव च। शेषवृत्तिरकर्तृत्वं मौलिकार्थाः स्मृता दश। विपर्ययः पञ्चविधस्तथोक्ता नव तुष्टयः। करणानामसामर्थ्यमष्टाविंशतिधा मतम्। इति षष्टिः पदार्थानामष्टाभिः सह सिद्धिभिरिति,,। सेयं षष्टिपदार्थी कथितेति सकलशास्त्रार्थकथनान्नेदं प्रकरणमपि तु शास्त्रमेवेदमिति सिद्धम्। एकत्वमर्थवत्त्वं पारार्थ्यञ्च प्रधानमधिकृत्योक्तम्। अन्यत्वमकर्तृत्वं बहुत्वञ्चेति पुरुषमधिकृत्य। अस्तित्व वियोगोयोगश्चेत्युभयमधिकृत्य। स्थितिरिति स्थूलसूक्ष्ममधिकृत्य॥७२

मनांसि कुमुदानीव बोधयन्ती सतां मुदा।
श्रीवाचस्पतिमिश्राणां कृतिःस्तात्तत्त्वकौमुदी॥

इति षड्दर्शनटीकाकृद्वाचस्पतिमिश्रविरचिता साङ्ख्यतत्त्वकौमुदी समाप्ता।

कलिकाता।

संवाद ज्ञानरत्नाकर यन्त्रे श्रीयुत भुवनचन्द्र वसाक द्वारा मुद्रित। निमतलाघाट ष्ट्रीट ८ संख्यक भवन। सन १२८४ साल।

प्रहसन।	
हास्यार्णव	।)
धर्म्मशास्त्र।	
सप्तश्लोकी गीता	)५
नवग्रहस्तोत्र	)५
नित्यकर्म्मपद्धति	=)
स्रग्धरास्तोत्र	=)
श्रयालुस्मृति	-)
काव्यशास्त्र।	
शिशुपालबध (माघ)	४)
किरातार्ज्जुनीय(भारवि)	२।)
" मूल मात्र	।)
कुमारसम्भव पूर्व्व	॥)
" उत्तर	।)
रघुवंश	१॥)
मेघदूत इंराजी	॥)
संस्कृत	।=)
नलोदय	।=)
ऋतुसंहार	।-)
रत्नपञ्चक	-)
सूर्य्यशतक	-)
भामिनीविलास	।)
चाणक्यश्लोक	-)
शृङ्गारतिलक	=)

विद्वन्मोदतरङ्गिणी	।)
काव्यसंग्रह	२)
गीतगोविन्द	॥)
वैराग्यशतक	=)
नाटक।	
रत्नावली	।॥)
वेणीसंहार	ऐ
शकुन्तला	ऐ
विक्रमोर्व्वशी	ऐ
मुद्राराक्षस	ऐ
मालविकाग्निमित्र	।।)
वसन्ततिलकभाण	।)
महावीरचरित	॥।)
कोष।	
हारावलि	=)
अमरकोष	॥)
मेदिनी	१)
उइलसन साहेब कृत संस्कृत इंराजी अभिधान १म खण्ड हइते ७ खण्ड पर्य्यन्त	३॥)
हेमचन्द्रकोष.	१)
साहित्य।	
वर्णपरिचय	-)

दशकुमारचरित पूर्व्व ।)
" उत्तर ॥)
हितोपदेश ॥)
भोजप्रबन्ध ।)

व्याकरण ।

लघुकौमुदी ॥)
मुग्धबोध ॥)
महाभाष्यम्, महामुनि
पतञ्जलि कृत १मखण्ड ।=)
" २य खण्ड ।=)

दर्शन ।

सर्व्वदर्शनसंग्रह १)

वेदान्त ।

श्रीमद्भगवद्गीता ६)
विवेकचूड़ामणि ।)
मुक्तिकोपनिषत् ≡)
ईश भाष्य टीकासहित =)
केन " =)
कठ " ।)
प्रश्न " ।=)
मुण्ड " ।-)
माण्डुक्य १)
वेदान्त परिभाषा ॥)

हिन्दी ।

मनभावनी भाषा टीका
सहित श्रीमद्भगवद्गीता १॥)
बाङ्गलादेशकीइतिहास =)
परिमाण विद्या =)
माधवविलास =)
नजीरकी सैर ।)
बैतालपच्चीसी ॥।)
खैरशाहकी बारमासी -)
रामकृष्ण " -)
श्रीराम माहात्म्य -)
श्रीरामचालीसा -)
दिग्विजय ।॥)
भारतीप्रकाश)॥
पाण्डवगीता ।)
प्रबोधचन्द्रोदय ॥)
उत्तररामचरित १)
भाषाभूषण ।=)
कङ्कालिनी ।)

श्रीः

श्रीगणेशायनमः ॥ शुद्धं शान्तसमस्तदोषनिचयं वेदैकवेद्यं परं विज्ञानैकरसं परात्परतरं पूर्णं पुराणं हरिम् । मायामानुषरूपिणं मुनिवरैराराध्यपादं प्रभुं श्रीराधारमणं दयालुमनिशं कृष्णं भजे श्यामलम् ॥ १ ॥ श्रीमद्दैशिकपादाब्जं नत्वा तस्य प्रसादतः । दोषदूषकतामूलनिर्णयं ग्रन्थमारभे ॥ २ ॥ तत्रादौ सर्वदोषाणां साधारण्येन खण्डनम् । पश्चाद्विशेषतस्तेषामिहोक्तो मूलनिर्णयः ॥ ३ ॥ विवादाभावदार्ढ्याय विरक्तैः सर्ववादतः ॥ द्रष्टव्योऽवश्यमेवैष जयार्थैस्य जयार्थिभिः ॥ ४ ॥ मूर्ध्नाऽहं विदुषां प्रणम्य परितः पादाविदं प्रार्थये । यच्चौद्यात्पदतोऽर्थतश्च गलितं स्यादत्र यद्यन्मया । तत्तत्सर्वमिदं सुशोध्य कृपया पश्यन्तु सन्तोऽनघाः । दोषान्मेऽविगणय्य दूषणनिधेर्दोषे गुणारोपिणः ॥ ५ ॥ अथ यानवलम्ब्य बहुलं खाण्डनिका वाद्युक्तमतनिरासाय खण्डनकोटिषु प्रवर्तन्ते तेषामात्माश्रयादीनां दोषत्वमेव तावन्न विचारसहम् । अन्यथा तेषां सर्वत्रैव सुवचत्वेन भवता कथ्यमाना आत्माश्रयादयोप्यनवस्थेयाः । तथाहि । योयमात्माश्रयो भवता दोषत्वेन व्यवह्रियते सोपि किं दुष्टे दोषव्यवहारस्य प्रयोजको ऽदुष्टे वा । अदुष्टे चेदलमदुष्टेपि दोषव्यवहारप्रयोजकस्याविद्याविजृम्भितस्य तस्यात्माश्रयस्योद्भावनया, दूषणीयमदुष्टमेव । नहि वस्तुतो यन्निर्दुष्टं तत्तादात्म्येन चित्तस्थापितैर्दोषादिभिरणुमात्रेऽपि सम्बध्यते । अन्यथा तु दिवान्धपेचकादिपरिकल्पितैस्तम

आदिभिः सविचारादयोपि कदाचित्सम्बध्येरन्। दुष्टे चेद्दोषव्यवहारस्य प्रयोजक स्तदापि किमनेनैव भवदुद्भाव्यमानेनात्माश्रयेण दुष्टे दोषव्यवहारस्य प्रयोजकः आहोस्विदन्येन केनचित्। नाद्यः। दोषोद्भावनतः पूर्वं तस्य निर्दुष्टत्वापातादात्माश्रयाच्च। नच दोषव्यक्त्यन्तरेण दुष्टे दोषव्यवहारप्रयोजकोयमात्माश्रय इति वाच्यम्। तत्राप्युक्तविकल्पग्रासप्रसानपायात्। तथाहि। दोषव्यक्त्यन्तरमपि किं दुष्टे दोषव्यवहारस्यप्रयोजकमदुष्टे वा, नान्त्यो व्याघाताद्दोषाभाववति दोषप्रकारकज्ञानस्य भ्रमत्वप्रसङ्गाच्च। आद्ये तु-स्वेनैव दुष्टे स्वस्य दोषव्यवहारप्रयोजकत्वे आत्माश्रयः। यद्दोषव्यवहारप्रयोगार्थं स्वयमागत स्तेन दुष्टे ऽन्योन्याश्रयः परस्परदोषव्यवहारप्रयोगार्थमव्यवधानेन परस्पराऽपेक्षणात्। अथैतद्दोषपरिजिहीर्षया चेत्तृतीयदोषव्यक्तिदुष्टे द्वितीयदोषव्यक्तौ दोषव्यवहारप्रयोजकत्वं तदा तृतीयदोषव्यक्तेरपि दुष्टे दोषव्यवहारप्रयोजकत्वस्यैव वक्तव्यत्वेन पुनः स्वेनैव दुष्टे स्वस्य दोषव्यवहारप्रयोजकत्वमात्माश्रयदोषग्रासग्रस्तं न प्रक्षापथमधिरोहति। द्वितीयदोषव्यक्त्या दुष्टे तत्स्वीकारे चान्योन्याश्रयः। प्रथमेन चक्रकम्। चतुर्थेनाऽनवस्था। अथ गत्यन्तरविरहादनवस्थाप्याश्रीयते तर्हि ते दोषाः किं क्रमेण धर्म्मिणि वर्तन्ते युगपद्वा। क्रमेण चेत्तर्हि धर्म्मिणो ऽनादित्वप्रसङ्ग उत्तरोत्तरदोषेण पूर्वपूर्वदोषकार्य्यस्य धर्म्मिणि दुष्टत्वव्यवहारस्याऽन्यथासिद्धिः प्रास्लोपप्रसङ्गश्च। युगपच्चेत्तर्हि दुष्टे दोषव्यवहारप्रयोजकत्वमिति पक्षक्षतिः। अथैतद्दोषपरिहारायैकेन दुष्टे ऽपरस्य दोषव्य-

वहारप्रयोजकत्वमिष्यते तर्ह्यविनिगमः, एतद्दोषदुष्टे एतद्दोषस्य दोषव्यवहारप्रयोजकत्वमित्यत्र नयामकाभावात्। दोषोपहिते दोषव्यवहारप्रयोजकत्वे तूपाधेस्तटस्थतयोपधेयकोटावप्रवेशाद्दूषणीयस्य दुष्टत्वं न स्यात्। दोषोपलक्षिते तदभ्युपगमे तु केनचिद्युक्तिप्रमाणाभ्यां परिहृतेपि तस्मिन्दुष्टत्वव्यवहारः प्रसज्येत, उपलक्षणे वर्तमानत्वाऽनपेक्षणात्। नच दोषरूपोपलक्षणोपलक्षितत्वस्य तस्मिन्विशेषणत्वाङ्गीकारात्तस्य च तदानीं तत्राभावान्न दुष्टत्वव्यवहार इति वाच्यम्। दोषरूपोपलक्षणोपलक्षितत्वस्य विशेषणत्वे तस्य च दोषावस्थितिकालमात्रावस्थायित्वे विशेषणपक्षोक्तदोषस्यैव पुनरपि प्रसरात्। दोषोपलक्षितत्वरूपविशेषणविशिष्टत्वस्यापि च विशेषणत्वे तद्विशिष्टत्वस्यापि तथात्वेन पुनस्तद्विशिष्टत्वस्यापि तथात्वेनाऽनवस्था। उपलक्षणत्वे वोपाधित्वे वा दोषधर्म्मिकोपलक्षणत्वोपाधित्वविकल्पोक्तानिरुक्तदोषस्यैवाऽनतिक्रमः। नचाऽवधीरितविकल्पे वस्तुस्वरूपे एव दोषव्यवहारजनकत्वमात्माश्रयादेरित्यपि युक्तिमत्, निखिलविचारविचार्य्यकथाऽनुत्थानप्रसङ्गात्। त्वदभिमतात्माश्रयादिबाधकयुक्तेरपि दुष्टत्वापातप्रसङ्गाच्च। किञ्च। वस्तुस्वरूपशब्देन शुद्धं सर्वधर्म्मविनिर्म्मुक्तं व्रह्मैवोच्यते आहोस्विद्विशिष्टम्। आद्ये व्यवहारहेतुत्वमपि तस्य नास्तीति वक्तव्यम् तथाच सर्वव्यवहारानास्पदे सर्वधर्म्मविनिर्म्मुक्ते स्वरूपे कथमात्माश्रयादेर्दोषव्यवहारप्रयोजकत्वोक्तिरपि युक्तिपथमारोहेत्। नापि द्वितीयः। विशिष्टस्याऽपदार्थत्वात्। तथाहि। विशिष्टं नाम विशेषणविशेष्यतत्सम्ब-

न्धिभ्योऽतिरिक्तमेते एव वा। नाद्योऽनुपलब्धे दण्डिनमानयेत्युक्तेऽतिरिक्तस्य तस्यानयनप्रसङ्गाच्च। दण्डादिसम्बन्धेनोपलक्षितत्वात्तस्यैवानयनं नान्यस्येति चेन्न। अदण्डादिमतउपलक्ष्यत्वेऽतिप्रसङ्गात्, दण्डादिमतस्यान्यत्वात्। द्वितीये तु प्रत्येकस्मिन्दण्डादावपि दण्डीतिव्यवहारप्रसङ्गः। न ते प्रत्येकं दण्डिपदार्थाः किन्तु मिलिता इति चेत् किं ते च मेलकञ्च मिलितपदार्थ उत तेभ्योऽन्य एवेति विकल्प्य पुनरप्युक्तदोषभीत्यनपायात्। तस्माद्विशिष्टपदार्थस्यापि निर्वक्तुमशक्यत्वाद्विशिष्टे शुद्धे वा वस्तुस्वरूपे आत्माश्रयादेर्दोषव्यवहारजनकत्वमभ्युपगम्याप्यात्माश्रयादेर्दोषत्वकथने व्यर्थो भवतः प्रयासः। नचात्माश्रयादेर्दोषत्वानङ्गीकारे घटो घटस्य कारणमित्यपि ज्ञानं स्यादात्माश्रयादिज्ञानस्याऽप्रतिबन्धकत्वादिति शङ्क्यम्। नहि स्वमेव स्वोत्पत्त्यादिज्ञानहेतुरिति वयं ब्रूमो येनैवं प्रतीतिप्रसङ्ग आपाद्येत। किन्त्वात्माश्रयादेर्दोषत्वमेव खण्डयामः। नचार्थादेव तत्सिद्ध्यतीति वाच्यम्, "पञ्च पञ्चनखा भक्ष्या" इत्यत्र पञ्चपञ्चनखातिरिक्तभक्षणव्यावृत्तिविधावपि पञ्चनखभक्षणस्यार्थतो विहितत्वप्रसङ्गात्। यद्वा तत्तद्देशतत्तत्कालादिरूपसामग्र्यन्तरव्यतिरेकादेव नोक्तप्रतीत्यापत्तिः, अविद्याध्यासादौ च तत्सत्त्वादविद्याध्यासेऽविद्याध्यासो हेतुरिति ज्ञानमिष्टमेव। किञ्चान्ततापि गत्वा समवायभेदादीनां नैयायिकेन संवित्प्रकाशादीनां च मीमांसकेनाऽविद्याध्यासादीनां च वैदान्तिकादिना स्वस्मिन्स्वस्यैव निर्वाहकताऽऽश्रयणीयेति किमर्द्धजरतीयन्यायेनात्माश्रयादेरन्यत्र दोषत्वाभिधानम्। ननु य-

आत्माश्रयादिषु प्रमाणं नास्ति तत्र ते नाभ्युपगन्तव्या यत्र तु प्रमाणमुपलभ्यते तत्र तदभ्युपगम आवश्यकः प्रमाणसिद्धस्य वस्तुनो लोपाऽसम्भवात्, इति तदभ्युपगमानभ्युपगमयोः प्रामाणिकत्वाऽप्रामाणिकत्वे एव प्रयोजके। एवं सति प्रकृते आत्माश्रयादेर्दोषव्यवहारप्रयोजकत्वमेवा ऽऽत्माश्रयादेर्दोषात्मकतामन्तरेणाऽनुपपद्यमानं सदात्माश्रयादेर्दोषात्मकतां गमयति। नहि स्वयमदोषरूपो ऽन्यत्र दोषव्यवहारप्रयोजक इति सम्भवति। लोके माधुर्य्यादिस्वभावानामेव गुडादीनामन्यत्र माधुर्य्यादिव्यवहारप्रयोजकत्वस्य दृष्टत्वात् अतोऽन्यथानुपपत्यादिप्रमाणसिद्ध आत्माश्रयोपिनदोषाय भवतीति चेत्। नैवम्। तथाहि घटपटादीनां सर्वेषामेव यथायथं स्वप्रकाशब्रह्मात्मकत्वस्य "सर्वं खल्विदं ब्रह्म, वासुदेवः सर्वम्, इदं पुराणः" इत्यादिश्रुतिस्मृतिवाक्यप्रतैरुपपत्तिभिश्च सिद्धत्वेन सर्वत्रैव स्वे महिम्नि प्रतिष्ठितस्वरूपात्माश्रयस्य भवतोऽप्यवश्यमाश्रयणीयत्वापतात् न क्वाप्यात्माश्रयादेर्दोषत्वम्। नच घटपटादीनां ब्रह्मात्मकतैवाऽनुपपन्नेति वाच्यम्। ब्रह्मणोऽतिरिक्तत्वेन घटादेः स्वरूपस्य त्वया विविच्य वक्तुमशक्यत्वात्। तथाहि। कोयं घटो नाम ब्रह्मातिरिक्तः पदार्थः। कम्बुग्रीवाकारवत्त्वघटत्वादयो धर्म्मा यत्र प्रतीयन्ते स एवेति चेन्न यत्तच्छब्दयोरप्रसिद्धिमात्रवाचकत्वेन तद्विशेषोपस्थित्यनियामकत्वादन्यदेवेतस्तद्विशेषोपस्थापकं किमपि घटस्वरूपं वक्तव्यं मृत्कपालाद्यारब्धोऽवयविविशेषो घट इति चेन्न अवयवित्वेन प्रतीतेरवयवसापेक्षत्वेन निरपेक्षघटस्वरूपत्वाऽयोगात्। तस्मान्निर्विशेषं वाङ्मनसाद्यविषयं स्वभासमानं घटस्वरूपमे-

वान्ते वक्तव्यं तेऽवशिष्यते तच्चात्मस्वरूपमेव भेदकधर्म्माभावात्।
एवं पदार्थान्तरमप्यात्मस्वरूपमेवेति क्वात्माश्रयादेर्दोषत्वम्।
किञ्चाऽऽत्माश्रयादेर्दोषत्ववादिमते प्रामाणिकात्माश्रयादेर-
ऽदोषत्वमप्रामाणिकानाञ्च तेषां दोषत्वमित्याकारको नियम
एव नोपपद्यते। तथाहि। अप्रामाणिकस्य प्रमाणसिद्धत्वे
व्याघातात्, प्रामाणिकस्य तथात्वे तु स्वेनाऽऽक्रीतात्माश्रया-
दिदोषपिशाचग्रासत्रासस्यैव पुनरप्यनपायात्। ननु स्वाध्या-
योऽध्येतव्य इत्यध्ययनविधिर्यथा स्वाध्यायाऽध्ययनं विधाय
स्वाध्ययनमपि विधत्ते तथैवाऽनेनोक्तनियमेनैतन्नियमवा-
क्यस्यभवदुद्भावितात्माश्रयादेरपि प्रामाणिकत्वेन निर्दोषत्वं
सिद्ध्यतीति चेत् किं तत्साधकं प्रमाणम्, स्वानुभव एवेति
चेन्न तवानुभवस्याप्रमाणत्वात् कार्य्यत्वादादिलिङ्गकमनु-
मानं प्रमाणमिति चेन्न। शुक्तिरजतादिभ्रमे प्रवृत्यादिका-
र्य्यत्वादिलिङ्गस्याऽप्रामाणिकरजताद्यर्थसाधकत्वेन व्यभि-
चारात्। नाप्यर्थापत्तिरन्यथाप्युपपत्तेः। तस्मात्प्रमाणसिद्धा-
त्माश्रयादेरदोषत्वमिति साहसमात्रम्। एतेन दोषत्वं हि
ज्ञानकारणीभूताऽभावप्रतियोगियथार्थज्ञानविषयत्वं, घटो
घटस्य कारणमित्याकारकं यज्ज्ञानं तत्कारणीभूतो योऽभाव
आत्माश्रयादिविषयकज्ञानाभाव स्तत्प्रतियोगियथार्थज्ञान-
मात्माश्रयादिविषयकज्ञानं तद्विषयता वर्तते चात्माश्रयादि-
ष्वऽतस्तत्र तेषां दोषत्वं स्वीकर्तव्यम्, दोषः स्वस्मिन्दोषव्यव-
हारस्य प्रयोजक इत्यादौ त्वात्माश्रयादिज्ञानस्य प्रतिबन्ध-
कत्वमेव नास्ति अतशोपि तज्ज्ञाने कार्य्यानुत्पादस्याऽदर्श-
नादतो न दोषत्वं स्वीकार्य्यमित्यपि परास्तं वेदितव्यम्।

आत्माश्रयाद्यभ्युपगन्तृमते स्वाभ्युपगतात्माश्रयादिनैव स्वोक्तनियमस्यापि पराहतत्वात्। तथाहि। प्रतिबन्धकसद्भावो हि कार्य्यानुत्पादेनैवानुमेयः कार्य्यानुत्पादश्च प्रतिबन्धकाभावादित्यन्योन्याश्रयः। तथा कार्य्यानुत्पाद इत्यत्र कीदृशस्य कार्य्यस्याऽनुत्पादो विवक्षितः उत्पन्नस्योत्पद्यमानस्योत्पत्स्यमानस्य वा। नाद्यद्वितीयौ। उत्पन्नस्योत्पद्यमानस्य वाऽभिवदनात्मकस्य ज्ञानात्मकस्य च कार्य्यस्योत्पन्नत्वादेव प्रतिबन्धाऽसम्भवात्। तृतीये त्वात्माश्रयादिना प्रतिबन्धार्हं तत्प्रतिबध्यते तदनर्हं वा, नान्त्यो व्याघातात् तथात्वे वाऽतिप्रसङ्गात्। आद्ये तु प्रतिबन्धार्हत्वस्य प्रतिबध्यविशेषणत्वोपाधित्वादिविकल्पैः स्वाभिमतात्माश्रयादय एवोक्तविधिना यथायथं स्वाभिमतखण्डयितारः। तस्मादात्माश्रयादेः प्रायशः सर्वत्रैव प्रसरान्न तेषां दोषत्वं स्वीकार्य्यम्। नापि भवान्स्वोक्तनियमादिषु परैरुद्भावितात्माश्रयादेः प्रामाणिकत्वेनाऽदोषत्वं स्वोद्भावितस्य च तस्य परं प्रति दोषत्वं वक्तुमुत्सहते। स्वेनक्रीतपिशाचस्य विनिगमकाभावस्य जागरूकत्वात्। ननु भवताऽपि खण्डितस्यात्माश्रयादेः खण्डनं क्रियते ऽखण्डितस्य वा। आद्ये आत्माश्रयो द्वितीये व्याहतिरिति चेन्नैवम्। खण्डितस्यैव खण्डनात्। यथोक्तमाचार्य्यैः "नित्यबोधपरिपीडितं जगद्विभ्रमं तुदति वाक्यजा मतिः। वासुदेवनिहतं धनञ्जयो हन्ति कौरवकुलं यथा पुनरिति" तस्मादात्माश्रयादेर्न कथमपि दोषत्वोक्तिः सङ्गच्छत इति सिद्धम्॥

नन्वात्माश्रयादेर्दोषत्वमनङ्गीकुर्वाणो भवान् कथमिवात्माश्रयादिभिरेव परकीयदोषान्खण्डयितुमुत्सहते, नहि स्वयं

भुञ्जानो गुडं परं वारयितुं कोपीष्टे वारयन्वाऽवधेयवचनो भवतीति चेन्नैवम् आत्माश्रयादिस्वसम्भावितदोषातिरिक्तदोषमनन्वानस्याऽऽहार्य्यात्माश्रयादेरेव दूषकत्वस्य मुख्यत्वात्, तेन तस्यैव स्वीकारात्। अत एव श्रीमद्भागवते "गुणदोषदृष्टिर्दोषो गुणस्तूभयवर्ज्जितमिति" गुणदोषानुसन्धानदत एव गुणदोषसम्पर्कः प्रतिपादितः॥

युज्यते चैतदुष्ट्रयष्टिन्यायेनापि परकीयदोषैरेव परमतखण्डनम्। अत एव वेदान्तिकप्रभृतीनामद्वैतादितत्तन्मतावलम्बिनां पराभिमतप्रमाणप्रमेयादिव्यवस्थां प्रकल्प्यैव प्रमाणप्रमेयादिखण्डनमपि श्लिष्टतरम्। तदुक्तम् "बालान्प्रति विवर्त्तोयं ब्रह्मणः सकलं जगत्। अविचर्तितमानन्दमास्थिताः कृतिनः सदा" इति, परपक्षमादाय खण्डनस्याऽयुक्तत्वे त्वद्वैतादिवादिनां तेषां तत्सर्वमरण्यरुदितं स्यात्। तस्मात्परेषोक्ता आत्माश्रयादयः परोक्तप्रक्रिययैव पराहन्यन्त इति निरवद्यम्। ननु परमते निषेधनीयस्यात्माश्रयादेः प्रमितत्वाऽप्रमितत्वाभ्यां निषेधो ऽनुपपन्न इति चेन्नैवम्, अप्रमितप्रतियोगिकनिषेधाङ्गीकारेपि क्षतिविरहात्। अन्यथात्वऽप्रमितप्रतियोगिको निषेधो नास्तीति निषेधस्याप्यनुपपत्तेरिति परमतेऽप्रमितानामात्माश्रयादीनां निषेधो नानुपपन्नः॥

नापि चात्माश्रयादेर्विशिष्य लक्षणं निर्वक्तुं शक्यते। तथाहि। कोऽयमात्माश्रयो नाम, न तावत्स्वसिद्धौ स्वस्यापेक्षा। स्वत्वस्यैकस्याऽनुगतस्य निर्वक्तुमशक्यत्वेन लक्षणस्याऽव्यापनात्, अपेक्ष्यस्य वाऽकिञ्चित्करत्वात्। किञ्च। स्वसिद्धावित्यत्र सिद्धिशब्देन किमुत्पत्तिरुच्यते उतावस्थितिराहोस्वित् प्रमि-

रप्यैतच्चितयान्यतमत्। नाद्यः। घटादेः स्वसत्तासंसर्गरूपायामाद्यक्षणसम्बन्धरूपायां वोत्पत्तौ घटादेरपेक्षायाः सर्वपरीक्षकसम्मतत्वात्। अन्यथा सत्तासंसर्गादिः किमवलम्ब्य स्वसत्तामनुविन्देत। नच सत्तासंसर्गादेः केवलघटाद्यपेक्षणेऽपि सत्तासंसृष्टस्य तस्याऽनपेक्षणेन नात्माश्रय इति वाच्यम्। केवलशब्देन सत्ताऽसंसृष्टार्थग्रहणे व्याघातात्। शशशृङ्गादेरपि स्वसत्ताऽसंसृष्टत्वसाम्येन तत्प्रसङ्गाच्च। नच तत्र सामग्र्यन्तरविरहादेव स्वसत्तासंसर्गोऽसम्भवी। सामग्र्यन्तरविरहस्यादृष्टाऽदृष्टादिप्रतियोगिघटितत्वेन तदभावस्य प्रत्यक्षतोऽवगन्तुमशक्यत्वात्। कार्य्याभावलिङ्गेन तदनुमाने तु परस्पराश्रयो वज्रलेपायते। अपिचोत्पत्तावाद्यक्षणसम्बन्धादिरूपायामुत्पत्त्यन्तरस्वीकारेऽनवस्थापातः। उत्पत्तेरुत्पत्तौ स्वस्यैवापेक्षणे तु कथं नात्माश्रयः। उत्पत्तिभिन्नस्य स्वस्योत्पत्तौ स्वस्यापेक्षाऽऽत्माश्रय इत्यस्यापि प्रागुक्तदिशा * निरासोऽवगन्तव्यः॥ नापि द्वितीयः कल्पः आधीयान् तत्तद्देशतत्तत्कालाधेयत्वस्यैवाऽवस्थितिपदार्थतया तत्र तत्तद्घटपटाद्याधेयपदार्थापेक्षाया आवश्यकत्वात्। नो चेन्निराश्रयमाधेयत्वमेवात्मानं न लभेत। अपिच। तत्तद्देशतत्तत्कालनिरूपिताधेयत्वरू-

* घटादेः स्वसत्तासंसर्गरूपे आद्यक्षणसम्बन्धरूपे वोत्पत्तिपदार्थे घटादेरपेक्षायाः सर्वपरीक्षकसम्मतत्वं प्रागुक्ता दिक्। उपलक्षणञ्चैतद्विमन्तरस्यापि। तथाहि। उत्पत्तिभिन्नस्योत्पत्तावप्यात्माश्रयो न दोषावह आत्माश्रयत्वात् उत्पत्तिधर्म्मिकात्माश्रयवदिति॥

पायामवस्थितावनवस्थित्यन्तरस्वीकारे तत्राप्यन्यत्तत्राप्यऽन्यदिति सैव दुस्तरानवस्था। स्वस्यैव स्वनिर्वाहकत्वे च व्यक्तमात्माश्रयः। अत एव न तृतीयोपि। घटादेः स्वविषयकज्ञानजननेपि स्वापेक्षाया दर्शनात्। निर्विषयकज्ञाने मानाभावात्। ज्ञानस्य च स्वविषयकज्ञानान्तरवेद्यत्वे ऽनवस्थादयः। स्ववेद्यत्वे च तत्रैव प्रसङ्गः। एतेन चतुर्थोपि पक्षोऽपाकृतः। नन्वेवं स्वसिद्धावव्यवधानेन स्वापेक्षायाः सत्त्वेपि स्वस्मिन्स्वापेक्षायाः क्वाप्यऽदृष्टत्वात्तदेव लक्षणं सुनिर्वाच्यमिति चेन्मावहगर्वं स्वस्मिन्नपि घटादौ तादात्म्येन स्वापेक्षायाः सर्वजनीनत्वात्। अन्यथा घटादेस्तादात्म्येन स्वात्मनि पटादिनिरपेक्षत्वे नाऽपटादित्ववदऽघटादित्वप्रसङ्गोपि स्यात्। किञ्च। स्वस्मिन्स्वस्यापेक्षेत्यत्र लक्षणघटकीभूताऽपेक्षा किं यस्य कस्य चिन्नाह्या प्राणिमात्रस्य वा प्रतिपत्तुरेव वा। नाद्यः चैत्रस्य घटे घटापेक्षाऽऽत्माश्रयो मैत्रस्य वेत्यत्र विनिगमकाभावात्। नहि तीयः। सर्वजनीनापेक्षाया असर्वज्ञेन ज्ञातुमशक्यत्वात्। तृतीये तु नहि यत्किञ्चित्पदार्थविषयकप्रतिपत्तिमतोऽपेक्षाया आत्माश्रयत्वं सम्भवतीति स्वस्मिन्स्वापेक्षां प्रतिपत्तुरेव स्वस्मिन्स्वापेक्षाया आत्माश्रयत्वं वक्तव्यं तथाचांशिक आत्माश्रयः, निरुक्ताऽपेक्षायां * निरुक्तापेक्षाप्रतिपत्तिमतोऽपेक्षणेऽशतो निरुक्तापेक्षाया अप्यपेक्षादर्शनात्। नचांशिक आत्माश्रयो न दोषावह इति युक्तं वक्तुम् "नहि

* निरुक्ताऽपेक्षायाम् = स्वस्मिन्स्वाऽपेक्षायां, निरुक्ताऽपेक्षाप्रतिपत्तिमतः = स्वस्मिन्स्वापेक्षाप्रतिपत्तिमतोऽपेक्षणेंऽशतः स्वस्मिन्स्वापेक्षाया अप्यपेक्षादर्शनादिति प्रघट्टकार्थः॥

दण्डी कुण्डलिनं समारोहति" इत्यात्मिकात्माश्रयस्याप्या-त्माश्रयादेर्दोषत्वादिभिस्तत्र तत्र दोषत्वोपगमात्। किञ्च। लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति नियमवादिना येनात्माश्रयदोषसिद्ध्यर्थं स्वसिद्धौ स्वस्यापेक्षादिरूपं लक्षणमुपन्यस्यते तन्मते निरुक्तलक्षणं स्वसिद्ध्यर्थं लक्षणान्तरमपेक्षते नवा, अपेक्षते चेत्तत्सिद्ध्यर्थमपि लक्षणान्तरमवेषणायां पुनस्तत्सिद्ध्यर्थं लक्षणान्तरगवेषणायामनवस्था। नचेदपेक्षते कृतं तर्ह्यात्माश्रयादिसिद्ध्यर्थमपि तद्गवेषणेन, लक्षणं विनैव लक्षणवत्तत्सिद्धयुपपत्तेः। निरुक्तात्माश्रयसाधकलक्षणस्यैव स्वसाधकत्वे तु स्फुटमात्माश्रयः। एतेनात्माश्रयत्वजातिमत्त्वमपि तल्लक्षणमपास्तम्। निरुक्तविधिना स्वसिद्धौ स्वस्यापेक्षादिरूपस्य जातिव्यञ्जकस्याऽनिर्वाच्यत्वात् दोषत्वादिना साङ्कर्याच्च। तथाहि। आत्माश्रयत्वमपहाय दोषत्वं वर्ततेऽप्रामाणिकाऽन्योन्याश्रयादिषु दोषत्वं चापहायात्माश्रयत्वं वर्तते प्रामाणिकात्माश्रयादिषु तदुभयोरपि समावेशोऽप्रामाणिकात्माश्रयादिष्वित्यत आत्माश्रयत्वं न जातिः। नच सङ्करस्य जातिबाधकत्वं न सम्भवतीति वाच्यम्। तथा सति ब्राह्मणादिषु क्षत्रियादिभ्यो जातानामपि वर्णसङ्कराणां ब्राह्मणत्वक्षत्रियत्वादिजातिर्भवता वक्तव्यत्वापातात्। एवं सङ्करस्य जातिबाधकत्वेऽन्योन्याश्रयत्वादिकमपि न जातिरिति विज्ञेयम्। तस्मादात्माश्रयलक्षणस्यैवानिर्वाच्यत्वादनुपपन्नमात्माश्रय इति सिद्धम्॥

नाप्यन्योन्याश्रयो दोषः। सच परैः परस्परसिद्धौ परस्परापेक्षारूपोऽभिधीयते तथाच चक्रकादिष्वतिप्रसङ्गस्तत्रापि

परस्परापेक्षाया जागरूकत्वात् । नच चक्रकादिभिन्नत्ववि-शेषणेन तद्व्युदासः शक्यसम्पादः । अन्योन्याश्रयस्यैवाऽव्याप्य-सिद्धया तद्भिन्नत्वस्य चक्रकादिष्वसिद्धौ चक्रकादिभिन्नत्वविशे-षणस्याप्यसिद्धेः । अन्यथा स्वभिन्नत्वे सतीत्यपि विशेषणोपा-दानं स्यात् । अनेनैव च लक्षणेन तत्सिद्धौ कथं नात्माश्रया-न्योन्याश्रयादयः स्युः । किञ्च । घटादेराधेयतासम्बन्धादिरू-पायामुत्पत्तौ संसर्गो घटादिकं प्रतियोगिनं प्रतियोगीभूतश्च घटादिः संसर्गमपेक्षते एवेति क्वान्योन्याश्रयो व्यपदेशः स्यात् । एवमवस्थित्याऽऽदावप्यूह्यम् । अपिच परस्परसिद्धौ परस्परापेक्षामन्योन्याश्रयं ब्रुवतो भवत इदं लक्षणवाक्यं परस्परसाकाङ्क्षपदघटितं निराकाङ्क्षपदघटितं वा, अन्त्ये वा-क्योन्मत्तादिवदनवधेयवचनो भवानुपेक्षणीय एव तत्त्वजिज्ञा-सुभिः । आद्ये तु तदेव लक्षणवाक्यं स्वोक्तिव्याघातकत्वे ना-पलभमानः किं न विलज्जसे ॥

अत एव न त्रितयसिद्धावव्यवधानेन त्रितयापेक्षारूपं चक्रकमपि दोषाय । चतुष्टयादिसिद्धावव्यवधानेन चतुष्टया-द्यपेक्षारूपासु ताश्वव्याप्तेः अनवस्थादिष्वतिव्याप्तेश्च, तत्रापि त्रितयसिद्धौ त्रितयापेक्षायाः सात्त्विकप्रमाणेन निर्णीतत्वा-त् । तद्भिन्नत्वनिवेशे च चक्रकापत्तिः । तथाहि । स्वसिद्धौ सत्यामनवस्थाधर्म्मिकस्वत्वावच्छिन्नप्रतियोगिताकभेदसिद्धिः तत्सिद्धौ च तत्त्वावच्छिन्नप्रतियोगिताकस्वधर्म्मिकभेदसिद्धिः ततस्तद्घटितलक्षणेन स्वसिद्धिरिति । एतेन द्वयव्यवधानेन

प्राथमिकापेक्षारूपं चक्रकाख्यपक्षमप्यपास्तम् तस्याप्युक्त * विधिनाऽव्याप्त्यादिग्रस्तत्वात् ॥

नाप्यनवस्था, पूर्वपूर्वसिद्धावनवच्छिन्नोत्तरोत्तरापेक्षा ह्यनवस्था। सा च बीजाङ्कुराद्यनेकस्मिन्स्थलेऽनुभवसिद्धेत्यतो नदोषायाऽलम्। यथा ऽनवस्थादीनामेकत्र दोषव्यवहारप्रयोजकत्वमन्यत्र नेति सम्भवति स्वभावपरित्यागप्रसङ्गात्। एकस्य वस्तुनो विरुद्धस्वभावद्वयाऽसम्भवाच्च। किञ्च। कियतामनवस्थादीनां दोषत्वं कियताञ्च नेत्येतदिदानीं त्वया तत्त्वतो निर्णयार्थं वक्तव्यम्। यावतां युक्त्यनुभवसिद्धत्वं तावतामदोषत्वमन्येषान्तु न तथेति चेत्किमेकैकयुक्त्यनुभवसिद्धत्वं विवक्षितमुत सर्वपुरुषयुक्त्यनुभवसिद्धत्वम्। नाद्यः। एकै..स्य घटपटादियावद्वस्तुविषयकज्ञानाभावेन तद्धर्मिकदोषस्याऽपरिज्ञानात् तन्निचरयुक्त्यनुभवस्यैवासिद्धेः। सर्वपुरुषयुक्त्यनुभवसिद्धत्वस्य चासर्वज्ञेनाविज्ञेयत्वात्। नहि परकीययुक्त्यनुभवयोः परस्य प्रत्यक्षं घटते। तस्माद्द्वाभ्यामेवाऽसिद्धेर्यावतां युक्त्यनुभवसिद्धत्वं तावतामदोषत्वमित्येषा वाग्युक्तिः पूतिकूष्माण्डायिता।

---

* उक्तविधिस्तूत्तरद्वयव्यवधानेन प्राथमिकापेक्षायाश्चक्रकत्वे प्राथमिकद्वयव्यवधानेनोत्तरापेक्षारूपचक्रकेऽव्याप्तिरेवं प्राथमिकद्वयव्यवधानेन विलोमगणनायां प्राथमिकोत्तरापेक्षायाश्चक्रकत्वे उत्तरद्वयव्यवधानेन प्राथमिकाऽपेक्षारूपचक्रकेऽव्याप्तिः। तथा त्रिचतुरादिव्यवधानेन प्राथमिकाऽपेक्षारूपचक्रकाऽव्याप्तिश्चेत्यादिरूपा यथायथं ग्राह्या॥

कश्च प्राक्लोपोनाम किमुत्तरोत्तरेण पूर्वपूर्वकार्य्यसम्भवे पूर्वपूर्ववैयर्थ्यमुतोत्तरोत्तरेण पूर्वपूर्वविनाशः। नाद्यः। पूर्वपूर्वकार्य्यस्य तत्तत्क्षणविशिष्टस्योत्तरोत्तरेण निष्पादयितुमशक्यत्वात्। द्वितीये तु विभुविशेषगुणेष्वपि तत्प्रसङ्गस्तेषामप्युत्तरोत्तरगुणनाश्यत्वात् ॥

नापि विनिगमनाविरहः सम्भवति। विकल्पाऽसहत्वात् तथाहि। विनिगमनाह्येकतरपक्षपातिनीयुक्तिस्तस्या विरहो विनिगमनाविरह इत्यत्र विनिगमनायां विनिगमनान्तरमस्ति नवा। आद्ये तस्यामप्यन्यातस्यामप्यन्येत्यनवस्थापातः। अन्त्ये तु विनिगमनायामेव विनिगमनाविरहस्य विश्रान्तिर्गतं विनिगमनाविरहस्य दोषत्वेन। नच तत्र तस्याऽदोषत्वेप्यन्यत्र दोषत्वं सूपपादम्। अतएव विनिगमनाविरहात्। विनिगमनादृष्टान्तेनान्यत्रापि दोषाभावानुमानस्य सुलभत्वाच्च। तथाहि। विमतो न दुष्टः विनिगमनाशून्यत्वाद्विनिगमनावत्। नचाप्रयोजको हेतुः अप्रयोजकत्वस्य प्रयोजकतर्कविरहरूपत्वेनार्थाद्विनिगमनाविरहरूपतयाऽव्याप्यसिद्धेः। ननु माभूदप्रयोजको हेतुः सोपाधिकस्तु परं भविष्यति एकतरपक्षसाधकत्वस्योपाधित्वात् तस्य यत्र दोषाभावस्तत्रैकपक्षसाधकत्वमिति दृष्टान्ते साध्यव्यापकता, यत्र तु विनिगमनाशून्यत्वं तत्र नैकतरपक्षसाधकत्वमिति च पक्षे साधनाव्यापकत्वाऽतः साध्यव्यापकत्वे सति साधनाव्यापकत्वादेकतरपक्षसाधकत्वमुपाधिरिति चेन्मैवं मंस्थाः। उपाधेः स्वाभावेन साध्याभावोन्नायकतया विमतो दुष्टः एकतरपक्षाऽसाधकत्वादिति तद्व्यतिरेके एकतरपक्षसाधकत्वे एव र ष्ट-



श्री

इमौ सव्याख्यौ

श्रुतबोधवृत्तरत्नाकरग्रंथौ,

भगीरथात्मजेन

हरिप्रसादशर्मणा,

मुम्बापुर्यां

"निर्णयसागराख्य" मुद्रणयंत्रालये मुद्रापितौ।

श्रीविक्रमादित्यसंवत् १९३९.

यह पुस्तक रामवाडीमें हरिप्रसादभगीरथके

पुस्तकालयमें मिलेंगे.

॥ इदं पुस्तकमितराणि च संस्कृतप्राकृतपुस्तकानि मुंबय्याख्यराजधान्यां श्रीकालिकादेव्या मार्गे रामवाडीनामके स्थले भगीरथात्मजस्य हरिप्रसादशर्मणः पुस्तकालये यथायोग्यमौल्येन मिलिष्यंति ॥ ॥ ॥ ॥ ॥

॥ श्रीगणेशाय नमः ॥

॥ अथ श्रुतबोधप्रारंभः ॥

छंदसां लक्षणं येन श्रुतमात्रेण बुध्यते ॥ तमहं संप्रवक्ष्यामि श्रुतबोधमविस्तरम् ॥ १ ॥

अथ टीकाप्रारंभः ॥ श्रीमत्सारस्वतं धाम नत्वा स्तुत्वा च सद्गुरुम् ॥ टीका श्रीश्रुतबोधस्य छंदसः क्रियते मया ॥ १ ॥ छंदसामिति ॥ अहं तं श्रुतबोधं नाम छंदःशास्त्रं संप्रक्ष्यामि । कीदृशं तम् । अविस्तरं न विद्यते विस्तारो यस्मिन् सोऽविस्तरस्तमविस्तरम् । येन श्रुतमात्रेण प्रस्तारादिविनैव छंदसामार्यानुष्टुबादीनां लक्षणं गुरुलघुवर्णमात्रागणादिस्वरूपं बुध्यते ज्ञायत इत्यन्वयः ॥ १ ॥ ॥ ॥

संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसंमिश्रम् ॥ विज्ञेयमक्षरं गुरु पदांतस्थं विकल्पेन ॥ २ ॥

संयुक्ताद्यमिति ॥ अथ छंदोलक्षणस्य लघुगुरुज्ञानमंतरेण दुर्विज्ञेयत्वाल्लघुगुरुलक्षणमाह । एता-

दृशमक्षरं गुरु ज्ञेयम् । कीदृशमक्षरम् । संयुक्ताद्यं संयुक्तस्य संयोगीभूतस्याद्यमादिभवम् । पुनः कीदृशम् । दीर्घं द्विमात्रकम् । सानुस्वारमनुस्वारेण सह वर्तमानम् । पुनः विसर्गसंमिश्रं विसर्गेण संमिश्रं विसर्गसहितम् । पादांतस्थमक्षरं विकल्पेन गुरु लघु विज्ञेयम् । पादांते गुरुरपि लघुः स्यात्कुत्रचिल्लघुरपि गुरुः स्यात् । तथाचोक्तं ग्रंथान्तरे । वा पादांते त्वसौ वक्रो ज्ञेयोऽन्यो मात्रको लघुः ॥ २ ॥ ॥ ॥

आदिमध्यावसानेषु भजसा यांति
गौरवम् ॥ यरता लाघवं यांति म-
नौ तु गुरुलाघवम् ॥ ३ ॥

श्लोकादौ कस्मिंश्चिद्गणे पतिते शुभं कस्मिंश्चिद्गणे पतिते चाशुभं भवतीत्यष्टगणानां लक्षणमाह । आदिमध्यावसानेष्विति ॥ भजसाः भगणजगणसगणाः आदिमध्यावसानेषु गौरवं गुरुतां यांति । आदिश्च मध्यं च अवसानं च तानि तेषु । तथाहि । आदिगुरुर्भगणः मध्यगुरुर्जगणः अंत्यगुरुः सगणः यरताः यगणरगणतगणाः आदिमध्यावसानेषु लाघवं लघुतां यांति । तथाहि । आदिलघुर्यगणः मध्यलघू रगणः अंत्यलघुस्तगणः । तुपुनः मनौ मगणनगणौ आदिमध्यावसा-

नेषु गुरुलाघवं गुरुतां लघुतां च यातः । तथा-च । सर्वगुरुर्मगणः सर्वल्लघुर्नगणः भवतीति । एतेषां देवताः फलानि च ग्रंथांतरे । मो भूमिः श्रियमातनोति य जलं वृद्धिं रवन्हिर्मृतिं सो वायुः परदेशदूरगमनं त व्योम शून्यं फलम् ॥ जः सूर्यो भयमाददाति विपुलं भेंदुर्यशो निर्मलं नो नाकश्च सुखप्रदः फलमिदं प्राहुर्गणानां बुधाः॥३॥

यस्याः पादे प्रथमे द्वादशमात्रास्त-
था तृतीयेऽपि ॥ अष्टादश द्वितीये च-
तुर्थके पंचदश सार्या ॥ ४ ॥

यस्याः पाद इति ॥ सा आर्या भवति । सा का यस्याः प्रथमे पादे द्वादश मात्राः स्युः । तृतीये तथा द्वादश मात्रा भवंति । द्वितीयेऽष्टादश मात्रा भवंति । चतुर्थके पंचदश मात्रा भवंति सा आर्या ॥ ४ ॥ आर्या । चरणेषु क्रमान्मात्राः— १२, १८, १२, १५ ॥ ॥ ॥

आर्यापूर्वार्धसमं द्वितीयमपि यत्र
भवति हंसगते ॥ छंदोविदस्तदा-
नीं गीतिंताममृतवाणि भाषंते ॥ ५॥

आर्यापूर्वार्धसममिति ॥ हे अमृतवाणि छंदोविदस्तदानीं तां गीतिं भाषंते ब्रुवते हे । हंसगते य-

त्रार्यापूर्वार्धसमं द्वितीयमपि उत्तरार्धमपि भवति। पूर्वार्धस्य प्रथमे द्वादश मात्रा द्वितीयेऽष्टादश तृतीये द्वादश चतुर्थकेऽष्टादश संकलनया षष्टिमात्रेत्यर्थः। अमृतमिव वाणी वाक् यस्याः सामृतवाणी तस्याः संबुद्धौ छंदांसि विदंति जानंतीति छंदोविदः शास्त्रज्ञा इत्यर्थः। हंसस्य गतिर्गमनमिव गमनं यस्याः सा हंसगता तस्याः संबुद्धौ हंसगते इत्यर्थः ॥ ५ ॥ गीतिः। चरणेषु क्रमान्मात्राः—
१२, १८, १२, १८ ॥ ॥ ॥

आर्योत्तरार्धतुल्यं प्रथमार्धमपि प्रयुक्तं चेत् ॥ कामिनि तामुपगीतिं प्रकाशयंते महाकवयः ॥ ६ ॥

आर्योत्तरार्धतुल्यमिति ॥ हे कामिनि महाकवयस्तामुपगीतिं प्रकाशयंते। उपगीतिसंज्ञकां प्रकटीकुर्वते इत्यर्थः। यदि आर्योत्तरर्धतुल्यं प्रथमार्धमपि प्रयुक्तं चेत्प्रयोगीकृतं भवति। उत्तरार्धेन द्वादशमात्रिकेन तुल्यं समानं भवति। प्रथमे द्वादश मात्रा द्वितीये पंचदश तृतीये द्वादश चतुर्थे पंचदश संकलनया ५४ चतुष्पंचाशन्मात्रेत्यर्थः। कामो विद्यते यस्याः सा कामिनी तस्याः संबुद्धौ महांतश्च ते कवयश्चेति कर्मधारयः। तथाचोक्तं ग्रंथांतरे। आर्याद्वितीयकेऽर्धे यद्गदितं लक्षणं तत्स्यात्॥य-

द्युभयोरपि दलयोरुपगीतिं तां मुनिर्ब्रूते ॥ ६ ॥ उपगीतिः । चरणेषु क्रमान्मात्राः—१२,१५,१२,१५ ॥

आद्यचतुर्थं पंचमकं चेत् ॥ यत्र गुरु स्यात्साक्षरपंक्तिः ॥ ७ ॥

अथाक्षरपंक्तिः आद्यचतुर्थमिति ॥ यत्र यस्यां वृत्तौ आद्यं प्रथमं चतुर्थं पंचमकं गुरु स्यात्साक्षरपंक्तिः ज्ञेया । अक्षरशब्दः पादपूरणार्थः छंदस्तु पंक्तिः प्रतिचरणे इदं लक्षणम् । तथा चोक्तं रत्नाकरे । भोगाविति पंक्तिः ॥ ७ ॥ अक्षरपंक्तिः । चरणाक्षराणि ५ ग० भ; गु, गु ॥

अगुरुचतुष्कं भवति गुरू द्वौ ॥ घनकुचयुग्मे शशिवदनासौ ॥ ८ ॥

अगुर्विति ॥ हेघनकुचयुग्मे यत्राद्यं चतुष्कं वर्णचतुष्टयं अगुरु स्याच्चत्वारो वर्णा लघवः संति ततो द्वौ पंचमषष्ठौ गुरू दीर्घौ भवतस्तदा शशिवदना चरणचतुष्टयेष्विदं लक्षणं असाविति संबंधः । घनं कठिनं कुचयुग्मं यस्याः सा घनकुचयुग्मा तस्याः संबुद्धौ । तथाचोक्तं रत्नाकरे । शशिवदनान्यौ ॥ ८ ॥ शशिवदना । चरणाक्ष० ६, ग० न, य ॥ ॥ ॥

तुर्यं पंचमकं चेदत्र स्याल्लघु बाले ॥
विद्वद्भिर्मृगनेत्रे प्रोक्ता सा मदलेखा॥९॥

सप्ताक्षरजातौ मदलेखालक्षणमाह तुर्यमिति ॥ हे मृगनेत्रे यदि तुर्यं चतुर्थं पंचमकं पंचमं लघु स्यात् हेबाले नवयौवने विद्वद्भिः पंडितैः सा मदलेखा प्रोक्ता। मृगस्य नेत्रे इव नेत्रे यस्याः सा मृगनेत्रा तस्याः संबुद्धौ। उक्तं रत्नाकरे। मसौ गः स्यान्मदलेखा ॥ १ ॥ मदलेखा । चरणाक्ष० ७, ग० म, स; ग ॥ ॥ ॥

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पंचमम् ॥ द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥१०॥ ॥ ॥

अष्टाक्षरजातौ पद्यलक्षणमाह श्लोक इति ॥ अन्ययोः प्रथमतृतीयपादयोः सप्तममक्षरं गुरु द्विमात्रकं भवति। सर्वत्र चतुर्ष्वपि चरणेषु पंचमं वर्णं लघु स्यात् षष्ठं गुरु स्यात्। द्विचतुष्पादयोर्द्वितीयचतुर्थचरणयोः सप्तमं वर्णं ह्रस्वं ज्ञेयम्। ईदृग्विधे श्लोके पद्येऽनुष्टुबादयो भवंति ॥ १० ॥

पंचमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः॥ षष्ठं गुरु विजानीयादेतत्पद्यस्य लक्षणम् ॥ ११ ॥ ॥ ॥

अथ पद्यलक्षणमाह ॥ पंचममिति ॥ एतत्पद्यस्य लक्षणं विजानीयात् । यत्र सर्वत्र चरणेषु पंचमं लघु भवति । द्विचतुर्थयोः द्वितीयचतुर्थचरणयोः सप्तममक्षरं लघु भवति सर्वत्र चरणेषु षष्ठं अक्षरं गुरु भवति ॥ ११ ॥ पद्यं । चरणाक्ष० ८, गणनियमो नास्ति ॥ ॥ ॥

आदिगतं तुर्यगतं पंचमकं चांत्यगतम् ॥ स्याद्गुरु चेत्तत्कथितं माणवकाक्रीडमिदम् ॥ १२ ॥ ॥

माणवकाक्रीडलक्षणमाह आदिगतमिति ॥ तदिदं माणवकाक्रीडं कथितं कविभिरित्यध्याहार्यम् । आदिगतं प्रथमं तुर्यगतं चतुर्थं पंचमकं पंचमं अंत्यगतं अंत्यस्थितमष्टमं गुरु स्याच्चदिदं माणवकाक्रीडं बुधा विदंति । तथा चोक्तं रत्नाकरे । माणवकं भत्तलगाः ॥ १२ ॥ माणवकं । चरणाक्ष०८, ग०भ, त; ल, ग ॥ ॥ ॥

द्वितुर्यषष्ठमष्टमं गुरु प्रयोजितं यदा ॥ तदा निवेदयंति तां बुधा नगस्वरूपिणीम् ॥ १३ ॥ ॥ ॥

अथ नगस्वरूपिणीलक्षणमाह द्वितुर्येति ॥ बुधाः पंडिताः तदानीं नगस्वरूपिणीं निवेदयं-

ति। तदा कदा यदा द्वितीयं तुर्यं चतुर्थं षष्ठं अष्टमं अक्षरं गुरु प्रयोजितं गुरुसंज्ञकं भवति एतादृशीं तां नगस्वरूपिणीं निवेदयंति। तथाचोक्तं रत्नाकरे। प्रमाणिका जरौ लगौ ॥ १३ ॥ प्रमाणिका, नगस्वरूपिणीति वा। च० अ० ८, ग० ज, र; ल, ग ॥ ॥ ॥

सर्वे वर्णा दीर्घा यस्यां विश्रामः
स्याद्वेदैर्वेदैः ॥ विद्वद्वृंदैर्वीणावाणि
व्याख्याता सा विद्युन्माला ॥ १४ ॥

अथ विद्युन्माला लक्षणमाह सर्वे वर्णा इति ॥ हे वीणावाणि विद्वद्वृंदैः पंडितसमूहैः सा विद्युन्माला व्याख्याता। वीणायाः वाणीव वाणी यस्याः सा वीणावाणी तस्याः संबुद्धौ। विदुषां पंडितानां वृंदानि समूहास्तैः सा का यस्यां सर्वे वर्णाः दीर्घाः गुरुभूताः भवंति। वेदैर्वेदैश्चतुर्भिश्चतुर्भिर्विश्रामो भवतीति सा विद्युन्माला। तथाचोक्तं रत्नाकरे। मो मो गो गो विद्युन्माला ॥ १४ ॥ विद्युन्माला। च० अ० ८, ग० म, म; ग, ग; यतिः ४, ४ ॥ ॥

तन्वि गुरु स्यादाद्यचतुर्थं पंचमषष्ठं

चांत्यमुपांत्यम् ॥ इंद्रियबाणैर्यत्र
विरामः सा कथनीया चंपकमाला॥१५॥

अथ दशाक्षरजातौ चंपकमालालक्षणमाह तन्वीति ॥ हे तन्वि तन्वंगि सा पंचकमाला कथनीया । सा का यत्र यस्यां आद्यचतुर्थं प्रथमं चतुर्थं पंचमषष्ठं अंत्यं दशमं उपांत्यं नवमं एते गुरवो भवंति यत्र इंद्रियबाणैः पंचभिः पंचभिरक्षरैर्विरामो विश्रामः सा चंपकमाला कथनीया । आद्यचतुर्थं पंचमषष्ठं इत्येकत्वे द्विगुद्वंद्वौ । इंद्रियाणि च बाणाश्च इंद्रियबाणास्तैः । तथाचोक्तं रत्नाकरे । चंपकमाला चेद्भमसागः ॥ १५ ॥ चंपकमाला । च० अ० १०, ग० भ, म, स; ग; यतिः५, ५ ॥ ॥ ॥

चंपकमाला यत्र भवेदंत्यविहीना
प्रेमनिधे ॥ छंदसि दक्षा ये कवयस्तन्मणिबंधं ते ब्रुवते ॥ १६ ॥ ॥

अथ नवाक्षरजातौ मणिबंधलक्षणमाह चंपकमालेति ॥ हे प्रेमनिधे छंदसि छंदोग्रंथे ये दक्षाः कुशलास्ते कवयस्तन्मणिबंधसंज्ञकं ब्रुवते । यत्रांत्यविहीना चंपकमाला भवेत् । चंपकमाला तु । दशाक्षरा इदं नवाक्षरं भवेत् ।

लक्षणं तु तदेव चंपकमालागतमेव तन्मणिबंधं। प्रेमस्य निधिरिव निधिः तस्याः संबुद्धौ अंत्यविहीनः अंते भवोंऽत्यो वर्णः तेन विहीना त्यक्ता भवेत्। तदुक्तं रत्नाकरे। भ्मौ संगयुक्तौ रुक्मवती॥ ॥ १६ ॥ मणिबंधं । च० अ ९, ग० भ, म, स; यतिः ५, ४ ॥ ॥ ॥

ह्रस्वो वर्णो जायते यत्र षष्ठः कंबुग्रीवे तद्वदेवाष्टमांत्यः ॥ विश्रामः स्यात्तन्वि वेदैस्तुरंगैस्तां भाषंते शालिनीं छांदसीयाः॥ १७ ॥ ॥

एकादशाक्षरजातौ शालिनीमाह ह्रस्व इति॥ हे तन्वि कृशांगि छांदसीयाः छंदसि कुशलास्तां शालिनीं भाषंते । तां कां हेकंबुग्रीवे यत्र यस्यां षष्ठो वर्णो ह्रस्वः तद्वदष्टमांत्यः नवमः ह्रस्वो जायते। यत्र वेदैश्चतुर्भिस्तुरंगैः सप्तभिर्विश्रामस्तां शालिनीं भाषंते ब्रुवते । कंबोः शंखस्य ग्रीवावद्ग्रीवा यस्याः सा तत्संबुद्धौ । कंबुग्रीवा त्रिरेखा स्यादित्यमरः। तदुक्तं रत्नाकरे। शालिन्युक्ता म्तौ तगौ गो॥ १७॥ शालिनी। चर० अ०११ ग० म, त, त; ग, ग; यतिः ४, ७॥

चत्वारः प्राक्सुतनु गुरवो द्वौदशैका-

दशौ चेन्मुग्धे वर्णौ तदनु कुमुदामो-
दिनि द्वादशांत्यौ ॥ तद्वच्चांत्यौ युग-
रसहयैर्यत्र कांते विरामो मंदाक्रांतां
प्रवरकवयस्तन्वि तां संगिरंते ॥ १८ ॥

चत्वार इति ॥ हे सुतनु सुष्ठु तनुः कायो यस्याः सा तस्याः संबोधनं हेसुतनु प्रवरकवयः श्रेष्ठकवयः तां मंदाक्रांतां वदंति । तां कां चेद्यदि यत्र यस्यां प्रागादौ चत्वारो वर्णा गुरवो भवंति । हे मुग्धे च पुनः द्वौदशैकादशौ वर्णौ गुरू भवतः । हे कुमुदामोदिनि च पुनः तदनु द्वादशांत्यौ त्रयोदशचतुर्दशौ वर्णौ गुरू भवतः । च पुनः अंत्यौ तद्वद्भवतः । हेकांते च पुनः युगरसहयैश्चतुःषट्सप्तभिः क्रमेण विरामो भवति प्रवरकवयस्तद्विदः ॥ १८ ॥ मंदाक्रांता । च० अ० १७ ग० म, भ, न, त, त; ग, ग; यतिः ४, ६, ७ ॥

मंदाक्रांतांत्ययतिरहिता सालंकारे
भवति यदि सा ॥ तद्विद्भिर्ध्रुवम-
भिहिता ज्ञेया हंसी कमलवदने ॥१९ ॥

हंस्या लक्षणमाह मन्दाक्रांतेति ॥ हेकमलवदने तत्तदा ध्रुवं निश्चयेन हंसी ज्ञेया ज्ञातव्या । कमलवत्सौंदर्यं सौरभादिगुणैः कमलसदृशं वद-

नं मुखं यस्याः सा तत्संबोधनम्। कथंभूता हंसी विद्वद्भिः पंडितैरभिहिता कथिता। तदा कदा हेसालंकारे यदि मंदाक्रांता अंत्ययतिरहिता अंते भवा अंत्या मंदाक्रांतायां युगरसहयैः विश्रामः सांत्यरहिता दशवर्णात्मिका सा हंसी ज्ञेया लक्षणं मंदाक्रांताया एव। अलंकारेण आभूषणेन सह वर्तमाना सालंकारा तस्याः संबोधनं सालंकारे ॥ १९ ॥ हंसी। च०अ० १०, ग० म, भ, न; ग; यतिः ४, ६ ॥ ॥

आद्यचतुर्थमहीननितंबे सप्तमकं दशमं च तथांत्यम् ॥ यत्र गुरु प्रकटस्मरसारे तत्कथितं ननु दोधकवृत्तम् ॥ २० ॥ ॥ ॥ ॥

अथ दोधकवृत्तलक्षणमाह आद्यचतुर्थमिति ॥ हेप्रकटस्मरसारे कविभिः तत् ननु दोधकवृत्तं कथितं। प्रकटः स्मरसारः कामबलं यस्याः सा तस्याः संबोधनम्। हेअहीननितंबे अहीनौ स्थूलौ नितंबौ कटिपश्चाद्भागौ यस्याः सा तत्संबुद्धौ यत्र यस्मिन् आद्यचतुर्थं प्रथमं चतुर्थं सप्तमकं सप्तमं दशमं तथा अंत्यं एकादशं एतानि अक्षराणि गुरूणि संति। तदुक्तं रत्नाकरे। दोधकवृत्तमिदं भभभागैः ॥२०॥ दोधकं। च० अ० ११, ग० भ, भ, भ, ग ग ॥

यस्यां त्रिषट्सप्तममक्षरं स्याध्रस्वं सुजंघे नवमं च तद्वत् ॥ गत्या विलज्जीकृतहंसकांते तामिंद्रवज्रां ब्रुवते कवींद्राः ॥ २१ ॥

अथेंद्रवज्रालक्षणमाह यस्यामिति ॥ हेगत्या विलज्जीकृतहंसकांते कवींद्रास्तामिंद्रवज्रां ब्रुवते । गत्या गमनेन विलज्जीकृता हंसस्य कांतिः शोभा यया सा तस्याः संबोधनं । तां कां यस्यां त्रिषट्सप्तममक्षरं ऱ्हस्वं स्यात् तद्वन्नवमं ऱ्हस्वं स्यात् हेसुजंघे तामिति संबंधः । एतादृशीं इंद्रवज्रां ब्रुवते । सुष्ठु शोभने जंघे यस्याः सा तत्संबुद्धौ । कवीनां कविषु वा इंद्राः पूज्या बृहस्पत्यादयः तदुक्तं रत्नाकरे । स्यादिंद्रवज्रा यदि तौ जगौ गः ॥२१ ॥ इंद्रवज्रा । च० अ० ११, ग० त, त, ज; ग, ग; यतिः ५, ६ ॥ ॥ ॥

यदींद्रवज्राचरणेषु पूर्वे भवंति वर्णा लघवः सुवर्णे ॥ अमंदमाद्यन्मदने तदानीमुपेंद्रवज्रा कथिता कवींद्रैः ॥ २२ ॥

अथोपेंद्रवज्रालक्षणमाह यदीति ॥ हे अमंदमाद्यन्मदने तदानीं कवींद्रैः यदींद्रवज्राचरणेषु पूर्वे वर्णा लघवः संति शेषमिंद्रवज्रावत् आद्यवर्णे

र्‍हस्वमेवेति शेषः । चतुर्ष्वपि पादेषु आद्यो र्‍हस्वः हेसुवर्णे सा उपेंद्रवज्रा कथिता अमंदं बहुलं माद्यन् हर्षं कुर्वन्मदनो यस्यां सा तत्संबुद्धौ । तथा चोक्तं रत्नाकरे । उपेंद्रवज्रा जतजास्ततो गौ ॥ २२ ॥ उपेंद्रवज्रा । च० अ० ११, ग० ज, त, ज; ग, ग; यतिः ५, ६ ॥ ॥ ॥

यत्र द्वयोरप्यनयोस्तु पादा भवंति
सीमंतिनि चंद्रकांते ॥ विद्वद्भिराद्यैः
परिकीर्त्तिता सा प्रयुज्यतामित्युप-
जातिरेषा ॥ २३ ॥

उपजातिलक्षणमाह यत्रेति ॥ हेचंद्रकांते सा एषा उपजातिरिति प्रयुज्यतां। कथंभूता सा आद्यैः पुरातनैर्विद्वद्भिः पंडितैः परिकीर्तिता कथिता । सा का हे सीमंतिनि यत्र द्वयोरनयोरिंद्रवज्रोपेंद्रवज्रयोरपि पादाः यथाक्रमेण भवंति। प्रथमे तृतीये च इंद्रवज्रालक्षणं द्वितीये चतुर्थे च उपेंद्रवज्रालक्षणम्। सीमंतः केशवेशो विद्यते यस्याः सा तत्संबुद्धौ चंद्रवत्कांतिर्यस्याः सा तत्संबुद्धौ पक्षे चंद्रवत्कांता कमनीया या सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । अनंतरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ॥ २३ ॥ उपजातिः । च० अ०

११, प्रथमे तृतीये च चरणे इंद्रवज्रा द्वितीये चतुर्थे चोपेंद्रवज्रेत्यर्थः ॥

आख्यानकी स्यात्प्रकटीकृतार्थे य-
दींद्रवज्राचरणः पुरस्तात् ॥ उपेंद्रव-
ज्राचरणास्त्रयोऽन्ये मनीषिणोक्ता
विपरीतपूर्वा ॥ २४ ॥ ॥ ॥

अथाख्यानकीलक्षणमाह आख्यानकीति ॥ हे प्रकटीकृतार्थे मनीषिणा विदुषा यदि इंद्रवज्रावत्प्रथमचरणः स्यात् । अन्ये त्रयश्चरणा उपेंद्रवज्रावत्संति तदा विपरीतपूर्वाख्यानकी विपरीताख्यानकीत्यर्थः । प्रकटीकृतोऽर्थः कामलक्षणो यया सा तत्संबुद्धौ इयं वृत्तरत्नाकरे नोक्ता तथापि पिंगलादिभिराचार्यैर्हलायुधादावुक्तैव ॥ २४ ॥ आख्यानकी । च० अ० ११, प्रथमचरण इंद्रवज्रावत् अन्ये उपेंद्रवज्रावत् ॥

आद्यमक्षरमतस्तृतीयकं सप्तमं च
नवमं तथांतिमम् ॥ दीर्घमिंदुमुखि
यत्र जायते तां वदंति कवयो रथो-
द्धताम् ॥ २५ ॥ ॥ ॥

अथ रथोद्धतालक्षणमाह आद्यमिति ॥ हे इं-

द्रुमुखि कवयः तां रथोद्धतां वदंति । कां यत्राद्यमक्षरमतस्तृतीयकं सप्तमं नवमं तथांतिमं एकादशं एते वर्णा दीर्घा द्विमात्रिका जायंते । इंदुवन्मुखं यस्याः सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । रान्नराविह रथोद्धता लगौ ॥ २५ ॥ रथोद्धता । च० अ० ११, ग० र, न, र; ल, ग; यतिः ७, ४ ॥

अक्षरं च नवमं दशमं चेद्व्यत्ययाद्भवति यत्र विनीते ॥ प्रोक्तमेणनयने यदि सैव स्वागतेति कविभिः कथितासौ ॥ २६ ॥ ॥

स्वागताया लक्षणमाह अक्षरमिति ॥ हे एणनयने सैषा रथोद्धता तदा कविभिः स्वागतेति कथिता । हे विनीते नम्रीभूते यदि यत्र यस्यां व्यत्ययाद्वैपरीत्येन नवममक्षरं दशमवद्दशमं नवमवत् । नवमो लघुः दशमो गुरुः द्वौ चकारौ विपरीतार्थसूचकौ । एणस्य नयने इव नयने यस्याः सा तस्याः संबुद्धौ । अयमर्थः । रथोद्धतायां नवमं अक्षरं गुरु भवति दशमं चाक्षरं लघु भवति स्वागतायां तु नवममक्षरं लघु दशमं चाक्षरं गुरु भवतीति भावः । तदुक्तं रत्नाकरे । स्वागतेति रन भाद्गुरुयुग्मम् ॥ २६ ॥ स्वागता । च० अ० ११, ग० र, न, भ; ग, ग; यतिः ७, ४ ॥ ॥

ह्रस्वो वर्णः स्यात्सप्तमो यत्र बाले तद्वद्बिंबोष्ठि न्यस्त एकादशाद्यः ॥बा-णैर्विश्रामस्तत्र चेद्वा तुरंगैर्नाम्ना नि-र्दिष्टा सुभ्रु सा वैश्वदेवी ॥ २७ ॥

अथ वैश्वदेवीलक्षणमाह ह्रस्व इति ॥ यत्र सप्तमो वर्णो ह्रस्वः स्यात् । हेबाले षोडशवर्षाभ्यंतरवयस्के तद्वत्पूर्वोक्तप्रकारवत् । हे बिंबोष्ठि एकादशाद्यो दशमो वर्णो ह्रस्वः स्यात् । एवं न्यस्तः निक्षिप्तः स्याच्चेद्यदि तत्र बाणैः पंचभिस्तुरंगैः सप्तभिश्च विश्रामः स्यात् । हेसुभ्रु सा नाम्ना वैश्वदेवी निर्दिष्टा कथिता । सुष्ठु भ्रुवौ यस्याः सा तस्याः संबुद्धौ । बिंबवदोष्ठौ यस्याः सा एकादशादौ जात एकादशाद्यः । तदुक्तं रत्नाकरे । पंचाश्वैश्छिन्ना वैश्वदेवी मौ यौ ॥ २७ ॥ वैश्वदेवी । च० अ० १२, ग० म, म, य, य; यतिः ५, ७ ॥

सतृतीयकषष्ठमनंतरते नवमं विरतिप्रभवं गुरु चेत् ॥ घनपीनपयो-धरभारनते ननु तोटकवृत्तमिदं क-थितम् ॥ २८ ॥ ॥ ॥ ॥

द्वादशाक्षरजातौ तोटकलक्षणमाह सतृतीयकेति ॥ हे घनपीनपयोधरभारनते ननु इह निश्चितं

तोटकवृत्तं कथितं विस्तारितं चेद्यदि हे अनंतरते सतृतीयकं षष्ठं नवमं गुरु स्यात्तृतीयं षष्ठं च तृतीयषष्ठे ताभ्यां सह वर्त्तत इति ॥ कीदृशं विरतिप्रभवं अंत्यं द्वादशं गुरु स्यात् । अनंता अपरिमिता रतिर्यस्याः सा अनंतरता तत्संबुद्धौ घनौ च पीनौ च घनपीनौ कठिननिबिडौ पयोधरौ च तयोर्भरः आधिक्यं तेन नता नम्रीभूता या सा तत्संबुद्धौ। विरते प्रभव उत्पत्तिर्यस्य तत्तथोक्तम्। तदुक्तं रत्नाकरे । इह तोटकमंबुधिसैः कथितम् ॥ २८ ॥ तोटकं । च० अ० १२, ग० स, स, स, स; यतिः ६, ६ ॥ ॥ ॥

यदाद्यं चतुर्थं तथा सप्तमं चेत्तथैवाक्षरं ह्रस्वमेकादशाद्यम् ॥ शरच्चंद्रविद्वेषिवक्त्रारविंदे तदुक्तं कवींद्रैर्भुजंगप्रयातम् ॥ २९ ॥ ॥ ॥

भुजंगप्रयातलक्षणमाह यदाद्यमिति ॥ हे शरच्चंद्रविद्वेषिवक्त्रारविंदे कवींद्रैस्तच्छंदो भुजंगप्रयातमुक्तं कथितम् । किं चेद्यदा आद्यं प्रथमं तथा चतुर्थं तथा सप्तमं एव निश्चितं एकादशाद्यं एकादशस्यादिभूतं दशममक्षरं ह्रस्वं स्यात्तदिति संबंधः शरदः चंद्रः शरच्चंद्रः तस्य विद्वेषि वक्त्रमेवारविंदं यस्याः सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । भुजंग-

प्रयातं भवेद्वैश्चतुर्भिः ॥ २९ ॥ भुजंगप्रयातं । च० अ० १२, ग० य, य, य, य; यतिः ६, ६ ॥

अयि कृशोदरि यत्र चतुर्थकं गुरु च सप्तमकं दशमं तथा ॥ विरतिजं च तथैव विचक्षणैर्द्रुतविलंबितमि-त्युपदिश्यते ॥ ३० ॥ ॥ ॥

द्रुतविलंबितलक्षणमाह अयि कृशोदरीति ॥ अयि कोमलालापे विचक्षणैः पंडितैर्द्रुतविलंबि-तमित्युपदिश्यते इति किं हे कृशोदरि यत्र चतु-र्थकं चेत्सप्तमकं तथा दशमं इमान्यक्षराणि गु-रूणि सन्ति । विरतिजं अंत्यं द्वादशं गुरु स्यादि-त्यर्थः। कृशमुदरं यस्याः सा कृशोदरी तत्संबुद्धौ । तदुक्तं रत्नाकरे । द्रुतविलंबितमाह नभौ भरौ ॥ ३० ॥ द्रुतविलंबितं । च० अ० १२, ग० न, भ, भ, र ॥ ॥ ॥

यदि तोटकस्य गुरु पंचमकं विहितं विलासिनि तदक्षरकम् ॥ रससं-ख्यकं गुरु न चेदबले प्रमिताक्षरेति कविभिः कथिता ॥ ३१ ॥ ॥

प्रमिताक्षरालक्षणमाह यदि तोटकस्येति ॥ हे

अबले कविभिः प्रमिताक्षरा इति कथिता । किं हेविलासिनि यदि तोटकस्य उक्तलक्षणकस्य पंचमकं वर्णं गुरु विहितं स्यात् रससंख्यकं षष्ठं गुरु न चेत् गुरु तु पंचममेव सा प्रमिताक्षरेत्यर्थः। विलासो विभ्रमो यस्याः सा विलासिनी तत्संबुद्धौ । तदुक्तं रत्नाकरे। प्रमिताक्षरा सजससैरुदिता ॥ ३१ ॥ प्रमिताक्षरा ॥ च० अ० १२, ग० स, ज, स, स ॥ ॥ ॥

प्रथमाक्षरमाद्यतृतीययोर्द्रुतविलंबि-
तकस्य च पादयोः ॥ यदि चेन्न त-
दा कमलेक्षणे भवति सुंदरि सा ह-
रिणीप्लुता ॥ ३२ ॥ ॥ ॥

अथ हरिणीप्लुतालक्षणमाह प्रथमाक्षरमिति ॥ हेकमलेक्षणे सुकविभिः तदेयं हरिणीप्लुता कथिता। यदि द्रुतविलंबितकस्य छंदसः आद्यतृतीययोः पादयोः प्रथमाक्षरं चेत् नएकादशाक्षरमेवं विषमपादयोः तदेयं हरिणीप्लुता । कमलवदीक्षणे यस्याः सा तत्संबुद्धौ हेसुंदरि शुभांगे । तदुक्तं रत्नाकरे १, ३; सौ स्लौ गः । २, ४; न्भौ भ्रौ । पक्षे हरिणीप्लुता ॥ ३२ ॥ हरिणीप्लुता । च० १, ३; अ० ११; ग० स, स, स; ल, ग ॥ च० २, ४; अ० १२, ग० न, भ, भ, र ॥ ॥ ॥

उपेंद्रवज्राचरणेषु संति चेदुपांत्यव-
र्णा लघवः कृता यदा ॥ मदोल्लस-
द्भ्रूजितकामकार्मुके वदंति वंशस्थ-
मिदं बुधास्तदा ॥ ३३ ॥ ॥ ॥

वंशस्थलक्षणमाह उपेंद्रवज्रेति ॥ हेमदोल्लसद्भ्रूजितकामकार्मुके तदा बुधा इदं वंशस्थं वदंति। तदा कदा यदा उपेंद्रवज्राचरणेषु उपांत्यवर्णाः अंत्यसमीपस्था वर्णा एकादशसंज्ञिका लघवः संति प्रतिचरणे एकादशमो वर्णो लघुस्तदा वंशस्थं । मदेन उल्लसंतौ भ्रुवौ ताभ्यां जितं कामकार्मुकं मदनधनुर्यया सा तत्संबुद्धौ । अंत्यस्य समीपमुपांत्यं उपांत्याश्च ते वर्णाश्चेति । तदुक्तं रत्नाकरे । जतौ तुवंशस्थमुदीरितं जरौ ॥ ३३ ॥ वंशस्थं । च० अ० १२, ग० ज, त, ज, र; यतिः ५, ७ ॥ ॥ ॥ ॥ ॥

यस्यामशोकांकुरपाणिपल्लवे वंशस्थ-
पादा गुरुपूर्ववर्णकाः ॥ तारुण्यहे-
लारतिरंगलालसे तामिंद्रवंशां कव-
यः प्रचक्षते ॥ ३४ ॥ ॥ ॥

इंद्रवंशालक्षणं यस्यामशोकेति ॥ हे तारुण्यहेलारतिरंगलालसे कवयो यस्यां वंशस्थपा-

दा गुरुपूर्ववर्णका भवंति हे अशोकांकुरपाणिपल्लवे तामिंद्रवंशां प्रचक्षते ब्रुवते । अशोकांकुरवत्पाणिपल्लवौ यस्याः सा तारुण्यस्य हेलास्ताभी रतिरंगे लालसा अभिलाषो यस्याः सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । स्यादिंद्रवंशा तौ ज्रौ ॥ २४ ॥ इंद्रवंशा । च० अ० १२, ग० त, त, ज, र; यतिः ५, ७ ॥ ॥ ॥ ॥

यस्यां प्रिये प्रथमकमक्षरद्वयं तुर्यं
तथा गुरु नवमं दशांतिकम् ॥ सांत्यं भवेद्यदि विरतिर्युगग्रहैः सा लक्षिता ह्यमृतलते प्रभावती ॥ ३५ ॥

त्रयोदशाक्षरजातौ प्रभावतीलक्षणमाह यस्यामिति ॥ हे अमृतलते यस्यां प्रथमुमक्षरद्वयं तुर्यं तथा चतुर्थं तथा नवमं दशांतिकं दशसहितं त्रयोदशं वर्णं युगग्रहैश्चतुर्भिर्नवभिश्चाक्षरैर्विरतिः सा प्रभावती लक्षिता कथिता । अमृतस्य लतेव लता या सा तत्संबुद्धौ ॥ ३५ ॥ प्रभावती। च० अ० १३, ग० ज, भ, स, ज, ग; यतिः ४, ९ ॥

आद्यं चेत्त्रितयमथाष्टमं नवांत्यं द्वे
चांत्ये गुरुविरतौ सुभाषिते स्यात् ॥

विश्रामो भवति महेशनेत्रदिग्भि-
र्विज्ञेया ननु सुभगे प्रहर्षिणी सा॥३६॥

अथ प्रहर्षिणीलक्षणमाह आद्यमिति ॥ हे सुदति ननु इति निश्चितं आद्यं त्रितयं प्रथमतः वर्णत्रयं अथाऽष्टमं नवांत्यं दशमं चांत्ये द्वे द्वादशत्रयोदशाख्ये एते गुरवो भवंति । हे सुभाषिते महेशनेत्रैर्वर्णत्रयानंतरं दिग्भिर्दशवर्णानंतरं च विश्रामः स्यात् सा प्रहर्षिणी विज्ञेया ज्ञातव्या। सुशोभनं भाषणं यस्याः सा । सुशोभना दंता यस्या सा सुदती तत्संबुद्धौ । तदुक्तं रत्नाकरे । म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम् ॥ ३६ ॥ प्रहर्षिणी । च० अ० १३, ग०म, न,ज, र,ग; यतिः ३, १०॥

आद्यं द्वितीयमपि चेद्गुरु तच्चतुर्थं य-
त्राष्टमं च दशमांत्यमुपांत्यमंत्यम् ॥
कामांकुशांकुशितकामिमतंगजेंद्रे कां-
ते वसंततिलकां किल तां वदंति ॥३७॥

चतुर्दशाक्षरजातौ वसंततिलकालक्षणमाह आद्यमिति ॥ हे कामांकुशांकुशितकामिमतंगजेंद्रे यत्र आद्यं प्रथमं द्वितीयमपि गुरु चतुर्थं दशमांत्यं एकादशमुपांत्यं त्रयोदशं अंत्यं चतुर्दशं एते गुरवः स्युः हेकांते बुधास्तां वसंततिलकां वदंति।

काम एवांकुशस्तेनांकुशिता वशीकृताः कामिन एव मतंगजेंद्रा यया सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । उक्ता वसंततिलका तभजा जगौ गः ॥३७॥ वसंततिलका । च० अ० १४, ग० त, भ, ज, ज; ग, ग ॥ ॥ ॥ ॥ ॥

प्रथममगुरुषट्कं विद्यते यत्र कांते त-
दनु च दशमं चेदक्षरं द्वादशांत्यम्॥
गिरिभिरथ तुरंगैर्यत्र कांते विरामः
सुकविजनमनोज्ञा मालिनी सा प्र-
सिद्धा ॥ ३८ ॥ ॥ ॥

पंचदशाक्षरजातौ मालिनीलक्षणमाह प्रथममिति ॥ हेकांते यत्र प्रथमं षट्कमगुरु लघ्वेव भवति तदनु दशमं द्वादशांत्यं त्रयोदशं च लघु । गिरिभिरथ तुरंगैरष्टभिः सप्तभिश्च विरामस्तदा सुकविजनमनोज्ञा मालिनी सा प्रसिद्धा कृता । तदुक्तं रत्नाकरे । ननमयययुतेयं मालिनी भोगिलोकैः ॥ ३८ ॥ मालिनी । च० अ० १५, ग० न, न, म, य, य; यतिः ८, ७ ॥ ॥

सुतनु लघवः पंच प्राच्यास्ततो
दशमांतिकं तदनु ललितालापे वर्णौ
यदि त्रिचतुर्दशौ ॥ प्रभवति पुनर्यं-

त्रोपांत्यः स्फुरत्करकंकणे यतिरपि
रसैर्वेदैरश्वैः स्मृता हरिणीति सा॥३९॥

सप्तदशाक्षरजातौ हरिणीलक्षणमाह सुमुखीति ॥ हे स्फुरत्करकंकणे यत्र प्राच्याः प्रथमाः पंच वर्णा लघवः संति । ततो दशमांतिक एकादशः हेललितालापे यदि त्रिचतुर्दशौ त्रयोदशचतुर्दशौ लघू स्यातां उपांत्यः षोडशोऽपि लघुः । रसैः षड्भिर्वेदैश्चतुर्भिरश्वैः सप्तभिश्च विरामः स्यात्तदा सा हरिणी स्मृता । स्फुरंति करयोः कंकणानि यस्याः सा ललित आलापो यस्याः सा । उक्तं च रत्नाकरे । रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा ॥ ३९ ॥ च० अ० १७, ग० न, स, म, र, स; ल, ग; यतिः ६, ४, ७ ॥ ॥

यदा पूर्वो ह्रस्वः कमलनयने ष-
ष्ठकपरास्ततो वर्णाः पंच प्रकृतिसु-
कुमारांगि लघवः ॥ त्रयोऽन्ये चो-
पांत्याः सुतनुजघनाभोगसुभगे रसै
रुद्रैर्यस्यां भवति विरतिः सा शि-
खरिणी ॥ ४० ॥ ॥ ॥

अथ शिखरिणीलक्षणमाह यदा पूर्वो ह्रस्व इति ॥ हे सुतनुजघनाभोगसुभगे यदा पूर्वो वर्णो

-ह्स्वो भवति।हेप्रकृतिसुकुमारांगि ततः षष्ठकपराः षष्ठतः पंच वर्णाः सप्तमाष्टमनवमदशमैकादशा लघवः संति। अन्ये उपांत्यास्त्रयो वर्णाश्चतुर्दशपंचदशषोडशा लघवो भवंति। यस्यां रसैः षड्भी रुद्रैरेकादशैर्विरतिर्भवेत्। हेसुतनु सा शिखरिणी कथिता। कमलवन्नयने यस्याः सा प्रकृत्या स्व भावेन सुकुमाराण्यंगानि यस्याः। जघनयोराभोगस्तेन सुभगा। सुशोभना तनुर्यस्याः सा तत्संबुद्धौ। तदुक्तं रत्नाकरे। रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी॥ ४०॥ शिखरिणी। च० अ० १७,ग० य, म,न, स,भ,ल, ग; यतिः६,११॥

द्वितीयमलिकुंतले यदि षडष्टमं द्वा-
दशं चतुर्दशमथ प्रिये गुरु गभी-
रनाभिन्हदे॥ सपंचदशमंतिकं त-
दनु यत्र कांते यतिर्गिरींद्रफणिभृ-
त्कुलैर्भवति सुभ्रु पृथ्वी हि सा॥ ४१॥

पृथ्वीलक्षणमाह द्वितीयमिति॥ हे सुभ्रु यदि द्वितीयसंख्याकं गुरु स्यात् हे अलिकुंतले षडष्टमं च गुरु हे प्रिये द्वादशमथ चतुर्दशं गुरु हे गभीरनाभिन्हदे पंचदशेन सहितमंतिकं गुरु स्यात्। हेकांते यत्र गिरीन्द्रैरष्टभिः फणिभृत्कुलैर्न-

वभिश्च यतिः स्यात्सा पृथ्वीनामकं वृत्तं भवति। अलिवद्भ्रमरवच्छ्यामाः कुंतला अलका यस्याः सा। गंभीरा निम्ना नाभिरेव ह्रदो यस्याः सा तत्संबुद्धौ। तदुक्तं रत्नाकरे। जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ॥ ४१ ॥ पृथ्वी। च० अ० १७, ग० ज, स, ज, स, य; ल, ग; यतिः ८, ९ ॥ ॥ ॥ ॥ ॥

चत्वारः प्राक् सुतनु गुरवो द्वादशै-
कादशौ चेन्मुग्धे वर्णौ तदनु कुमु-
दामोदिनि द्वादशांत्यौ ॥ तद्वच्चांत्यौ
युगरसहयैर्यत्र कांते विरामो मंदा-
क्रांतां प्रवरकवयस्तन्वि तां सं-
गिरंते ॥ ४२ ॥ ॥ ॥

मंदाक्रांतालक्षणमाह चत्वार इति ॥ हेतन्वि प्रवरकवयो यत्र प्राक् चत्वारो वर्णा गुरवः स्युः हे कुमुदामोदिनि चेद्वर्णौ द्वादशैकादशौ गुरू स्तः। हे मुग्धे द्वादशांत्यौ द्वादशस्यांत्यस्थितौ त्रयोदशचतुर्दशौ गुरू स्यातां अंत्यौ षोडशसप्तदशौ तद्वद्गुरू युगरसहयैर्विरामः एतादृशीं तां मंदाक्रांतां संगिरंते मुकुंदवदामोदः सुगंधिर्यस्याः सा। तथोक्तं रत्नाकरे। मंदाक्रांतां जलधिषडगैर्म्भौ नतौ

ताहुरू चेत् ॥ ४२ ॥ मंदाक्रांता । च० अ० १७, ग० म, भ, न, त, त; ग, ग; यतिः ४, ६, ७ ॥

आद्याश्चेद्गुरवस्त्रयः प्रियतमे षष्ठस्त-
था चाष्टमो नन्वेकादशतस्त्रयस्तद-
नुचेदष्टादशाद्यौ ततः ॥ मार्तंडैर्मु-
निभिश्च यत्र विरतिः पूर्णेंदुबिंबान-
ने तद्वृत्तं प्रवदंति काव्यरसिकाः
शार्दूलविक्रीडितम् ॥ ४३ ॥ ॥

एकोनविंशतिजातौ शार्दूलविक्रीडितमाह आद्या इति ॥ हेपूर्णेंदुबिंबानने काव्यरसिकास्तद्वृत्तं शार्दूलविक्रीडितं वदंति । यत्राद्यास्त्रयो गुरवः षष्ठस्तथाऽष्टमः गुरुः ननु एकादशतस्त्रयः द्वादशत्रयोदशाचतुर्दशा गुरवः ततश्चेदष्टादशस्याद्यौ षोडशसप्तदशौ गुरू स्यातां । यत्र मार्तंडैर्मुनिभिर्द्वादशसप्तभिर्विरतिः हे प्रियतमे तदेतच्छार्दूलविक्रीडितं पूर्णश्चासाविंदुस्तस्य बिंबवदाननं यस्याः सा अतिशयेन प्रिया प्रियतमा तस्याः संबुद्धौ तदुक्तं रत्नाकरे । सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् ॥ ४३ ॥ शार्दूलविक्रीडितम् । च० अ० १९, ग० म, स, ज, स, त, त; ग, यतः १२, ७ ॥ ॥ ॥ ॥ ॥

चत्वारो यत्र वर्णाः प्रथममलघवः षष्ठकः सप्तमोऽपि द्वौ तद्वत्षोडशाद्यौ मृगमदमुदिते षोडशांत्यौ तथांत्यौ ॥ रंभास्तंभोरुकांते मुनिमुनिमुनिभिर्दृश्यते चेद्विरामो बाले वंद्यैः कवींद्रैः सुतनु निगदिता स्रग्धरा सा प्रसिद्धा ॥ ४४ ॥ इतिकविकालिदासकृतः श्रुतबोधनामकश्छंदोग्रंथः

समाप्तः

एकविंशत्यक्षरजातौ स्रग्धरालक्षणं चत्वार इति ॥ हे सुदति वंद्यैः पूज्यैः कवींद्रैः प्रसिद्धा इयं स्रग्धरा गदिता । यत्र प्रथमं चत्वारो वर्णा अलघवो गुरवः संति षष्ठकः सप्तमोऽपि तद्वद्गुरुः । षोडशाद्यौ चतुर्दशपंचदशौ तथांत्यौ सप्तदशाष्टादशौ च गुरू स्यातां । मुनिमुनिमुनिभिर्विरामः । हेरंभास्तंभोरुकांते हेबाले इयं स्रग्धरा प्रसिद्धा मृगस्य मदेन मुदिता सा । रंभायाः स्तंभवदूर्वोः कांतिर्यस्याः सा सुशोभना दंता यस्याः सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । म्रौ भ्नौ यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ॥ ४४ ॥ इति

श्री श्रुतबोधनामकस्य छंदोग्रंथस्य व्याख्या समाप्ता ॥ स्त्रग्धरा । च० अ० २१, ग० म, र, भ; न; य, य, य; यतिः ७, ७, ७ ॥

गणनामदेवफलानि ।

मो भूमिः श्रियमातनोति य जलं
वृद्धिं र चाग्निर्मृतिं सो वायुः परदे-
शदूरगमनं त व्योमशून्यं फलम् ॥
जः सूर्यो रुजमाददाति विपुलं भेंदु-
र्यशो निर्मलं नो नाकश्च सुखप्रदः
फलमिदं प्राहुर्गणानां बुधाः ॥ १ ॥

अथगणसंख्यानामरूपदेवफल-
ज्ञापकं यंत्रम् ॥ ॥

	गणनाम	रूपम्	देवता	फलम्	मित्रादि	फलम्
१	मगणः	ऽऽऽ	मही	लक्ष्मीः	मित्रम्	शुभम्
२	नगणः	।।।	स्वर्गः	बुद्धिः	मि त्रम्	शुभम्
३	भगणः	ऽ।।	शशी	यशः	दा सः	शुभम्
४	यगणः	।ऽऽ	जलम्	आयुः	दासः	शुभम्
५	जगणः	।ऽ।	रविः	रुजम्	उदासः	अशुभम्
६	रगणः	ऽ।ऽ	अग्निः	दाहः	शत्रुः	अशुभम्
७	सगणः	।।ऽ	वायुः	विदेशः	शत्रुः	अशुभम्
८	तगणः	ऽऽ।	नभः	शून्यम्	उदासः	अशुभम्

॥ अथ सटीको वृत्तरत्नाकरः प्रारभ्यते ॥

श्रीगणेशाय नमः ॥ सुखसंतानसि-
द्ध्यर्थं नत्वा ब्रह्माच्युतार्चितम् ॥ गौ-
रीविनायकोपेतं शंकरं लोकशंक-
रम् ॥ १ ॥

तेन केदारेणेदं छंदः क्रियते । किं कृत्वा शंकरं नत्वा किमर्थं नत्वा सुखसंतानसिद्ध्यर्थं सुखस्य संततिरविच्छेदस्तस्य सिद्धिर्निष्पत्तिस्तदर्थं नत्वा । अथ सुखं च संतानश्च सिद्धयश्च सुखसंतानसिद्धयः तदर्थं नत्वा सुखमात्यंतिकं मोक्षलक्षणं संतानः पुत्रपौत्रादिः सिद्धयोऽणिमादयस्तदर्थं तेन केदारेणेदं वृत्तरत्नाकरं नाम छंदः क्रियते इति संबंधः । किंविशिष्टं शंकरं ब्रह्मा चअच्युतश्च ब्रह्माच्युतौ ताभ्यामर्चितं पूजितं पुनः किंविशिष्टं गौरीविनायकोपेतं गौरी च विनायकश्च गौरीविनायकौ ताभ्यामुपेतं सहितं पुनः किंविशिष्टं लोकशंकरं लोकानां शं सुखं करोतीति लोकशंकरम् ॥ १ ॥

वेदार्थशैवशास्त्रज्ञः पव्येकोऽभूद्वि-

जोत्तमः ॥ तस्य पुत्रोऽस्ति केदारः
शिवपादार्चने रतः ॥ २ ॥

वेदार्थश्च शैवशास्त्राणि च जानातीति वेदार्थशैवशास्त्रज्ञः एवंविधः पव्येकोनाम द्विजोत्तमोऽभूज्जातस्तस्य पुत्रः केदारोऽस्ति स किंविशिष्टः शिवपादार्चने रतः शिवस्य ईश्वरस्य पादौ शिवपादौ तयोरर्चनं पूजनं तस्मिन् शिवपादार्चने रत आसक्तः ॥ २ ॥

तेनेदं क्रियते छंदो लक्ष्यलक्षणसंयुतम् ॥ वृत्तरत्नाकरं नाम बालानां
सुखबुद्धये ॥ ३ ॥

किंविशिष्टं छंदः लक्ष्यलक्षणसंयुतं लक्ष्यमुदाहरणं च लक्षणं छंदःस्वरूपकथनं च लक्ष्यलक्षणे ताभ्यां संयुतं अन्येषु रामशर्मादिषु छंदःशास्त्रेषु लक्षणं सूत्रमेवास्ति लक्ष्यं प्रयोगो नास्ति एतत्पुनरुभाभ्यामिव युक्तम् । वृत्तान्येव श्रीप्रभृतीनि रत्नानि तेषामाकरं वृत्तरत्नाकरं नाम ॥ कस्मै बालानामनधीतच्छंदःशास्त्राणां सुखावबोधाय ॥ ३ ॥

त्रिभिर्विशेषकम् ॥ पिंगलादिभिरा-

चार्यैर्यदुक्तं लौकिकं द्विधा ॥ मा-
त्रावर्णविभेदेन छंदस्तदिह कथ्यते॥४॥

यत्पिंगलादिभिराचार्यैर्लौकिकं छंदो द्विधोक्तं तेन प्रकारेण मात्राकारेण च तदिहास्मिन् ग्रंथे छंदः कथ्यते लोके भवं लौकिकं न पुनर्वैदिकं काव्यादिष्वनुपयोगात् ॥ ४ ॥ ॥

षडध्यायनिबद्धस्य छंदसोऽस्य परि-
स्फुटम् ॥ प्रमाणमपि विज्ञेयं ष-
ड्त्रिंशदधिकं शतम् ॥ ५ ॥ ॥

अस्य छंदसः प्रमाणमपि परिस्फुटं परिसमंतात्प्रकटं विज्ञेयं ज्ञातव्यं किंविशिष्टस्य छंदसः षट् च तेऽध्यायाश्च षडध्यायास्तैर्निबद्धं तस्य किं प्रमाणं शतं किंविशिष्टं शतं षट्त्रिंशताधिकम् ५

म्यरस्तजभ्नगैर्लांतैरेभिर्दशभिरक्ष-
रैः ॥ समस्तं वाङ्मयं व्याप्तं त्रैलो-
क्यमिव विष्णुना ॥ ६ ॥

एभिर्दशभिरक्षरैः सकलं वाङ्मयं वाग्जालं व्याप्तं कुक्षीकृतं किमिव त्रैलोक्यमिव केन विष्णुना नारायणेन एभिः कैः म्यरस्तजभ्नगैः लांतैः ॥ ६ ॥ ॥ ॥

सर्वगुर्मौ मुखांतलौं यरावंतगलौ
सतौ॥ ग्मध्याद्यौ ज्भौ त्रिलो नोष्टौ
भवंत्यत्र गणास्त्रिकाः ॥ ७ ॥ ॥

इदानीं तेषामक्षराणां लक्षणमाह सर्वगुरुर्मः मगणःऽऽऽ मुखे आदौ अंतर्मध्ये लो लघुर्ययोस्तौ मुखांतलौं यगणरगणौ मुखलघुर्यगणः ।ऽऽ मध्यलघू रगणःऽ।ऽ अंते अवसाने गुरुर्लघुश्च ययोस्तौ अंतगलौ सतौ सगणतगणौ अंतगुरुः सगणः ।।ऽ अंतलघुस्तगणःऽऽ। गुरुर्मध्ये आद्ये ययोस्तौ ज्भौ जगणभगणौ मध्यगुरुर्जगणः ।ऽ। आदिगुरुर्भगणः ऽ॥ त्रीणि लघूनि यस्यसः त्रिलघुर्नगणः ।।। अत्रास्मिन् छंदसि अष्टौ गणास्त्रिकारुयवयवा भवंति ॥ ७ ॥

ज्ञेयाः सर्वांतमध्यादिगुरवोऽत्र चतुष्कलाः ॥ गणाश्चतुर्लघूपेताः पंचार्यादिषु संस्थिताः ॥ ८ ॥

आर्यादिषु स्थिताः पंच गणाः ज्ञेयाः । गणाः किंविशिष्टाः चतुष्कलाः चतुर्मात्राः ते के पंच गणाः सर्वांतमध्यादिगुरवः सर्वश्च अंतश्च मध्यश्च आदिश्च ते गुरवो येषां ते सर्वांतमध्यादिगुरवः

किं भूतास्ते लघूपेताः पंचमो गणश्चतुर्लघुस्तेनोपेताः युक्ताः स्थापना चैषा सर्वगुरुः ऽऽऽ अंत्यगुरुः ॥ ऽ मध्यगुरुः ।ऽ। आदिगुरुः ऽ ॥ चतुर्लघुः ।।।। इति ॥ ८ ॥

सानुस्वारो विसर्गांतो दीर्घो युक्तप-
रश्च सः ॥ वा पादांते लसौ ग्वक्रो
ज्ञेयोऽन्यो मातृको ऌज्जुः ॥ ९ ॥

सानुस्वारः सह अनुस्वारेण वर्तत इति सानुस्वारः विसर्गांतः विसर्गः अंते यस्य सः विसर्गांतः दीर्घः युक्तपरः युक्तं संयोगाक्षरं परं यस्मात्स युक्तपरः एतादृशः वर्णः वा विकल्पेन पादांते गुरुर्भवति । असौ गुरुस्तु पुनः स च प्रस्तारे वक्रो ज्ञेयः अन्यो अस्माद्विपरीतो मातृकः एकमातृकः स च प्रस्तारे ऋज्जुः पंचलघुर्भवति । गुरुःऽ लघुः ।॥ ९ ॥ ॥ ॥ ॥

पादादाविह वर्णस्य संयोगः क्रमसं-
ज्ञकः ॥ पुरःस्थितेन तेन स्याल्लघु-
तापि क्वचिद्गुरोः ॥ १० ॥ ॥

इह छन्दसि पादादौ वर्णस्य संयोगः क्रमसंज्ञकः स्यात्तेन वर्णस्य संयोगेन पुरःस्थितेन अग्रस्थितेन क्वचिद्गुरोरपि लघुता स्यात् ॥ १० ॥

इदमस्योदाहरणं ॥ तरुणं सर्षप-
शाकं नवौदनं पिच्छलानि च द-
धीनि ॥ अल्पव्ययेन सुंदरि ग्रा-
म्यजनो मिष्टमश्नाति ॥ ११ ॥

अस्योदाहरणं दर्शयति ॥ हेसुंदरि स्तोकद्रव्ये-
ण ग्राम्यजनो मिष्टं मधुरमश्नाति भुंक्ते कं तरुण-
मभिनवं सर्षपशाकं नवांकुरम् पिच्छलानि चि-
क्कणानि दधीनि दुग्धं च अत्रार्यायां ग्रा इत्येत-
स्मिन् पादादिस्थितेन सुंदरि इत्येतस्य यदि गुरुत्वं
क्रियते तदा युक्तपरत्वात्पंचकलो भवति चतु-
र्मात्रागणाः आर्यायाः कर्तव्याः तस्माच्छंदःकर-
णाय क्वचिद्गुरोरपि लघुत्वं भवतीति ॥ ११ ॥

अब्धिभूतरसादीनां ज्ञेया संज्ञात्र
लोकतः ॥ ज्ञेयः पादश्चतुर्थांशो
यतिर्विच्छेदसंज्ञिका ॥ १२ ॥ ॥

उत्तरत्र अंकैः संज्ञामाह अब्धयः समुद्राश्च-
त्वारः ४ भूतानि पंच महद्भूतानि ५ रसाः षट् ६
आदिशब्दग्रहणेन अश्वाः मुनयश्च सप्त ७ अ-
ष्टौ पर्वताः वसवश्च ८ नव ग्रहाः रंध्राणि च ९
दश दिशः १० एकादश रुद्राः ११ द्वादश सू-

यौः १२ त्रयोदश विश्वे देवाः १३ चतुर्दश भुवनानि १४ इत्यादयो गृह्यंते । एताः संज्ञा लोकतः पूर्वाचार्येभ्योऽवगंतव्याः ज्ञेयाः। चतुर्थ अंशः पादो ज्ञेयः यतिर्विरतिः किंकथ्यते विच्छेदसंज्ञिका ॥ १२ ॥ ॥ ॥ ॥

युक्समं विषमं चायुक्स्थानं सद्भिर्निगद्यते ॥ सममर्धसमं वृत्तं विषमं च तथा परम् ॥ १३ ॥ ॥

सद्भिः सत्पुरुषैः समं स्थानं युङ्गिगद्यते । विषमं स्थानमयुङ्गिगद्यते समं वृत्तं भवति अर्धसमं तथा परं विषमं भवति ॥ १३ ॥ ॥ ॥

अंघ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः ॥ तच्छंदःशास्त्रतत्त्वज्ञाः समं वृत्तं प्रचक्षते ॥ १४॥ ॥ ॥

तल्लक्षणमाह । यस्य वृत्तस्यांघ्रयः पादाश्चत्वारस्तुल्यलक्षणलक्षिता भवंति तद्वृत्तं छंदःशास्त्रतत्त्वज्ञाः समं वृत्तं प्रचक्षते वदंति ॥ १४ ॥ ॥

प्रथमांघ्रिसमो यस्य तृतीयश्चरणो भवेत् ॥ द्वितीयस्तुर्यवद्वृत्तं तदर्धसमसुच्यते ॥ १५ ॥ ॥ ॥

यस्य वृत्तस्य प्रथमपादस्तृतीयपादेन समो भवेत् द्वितीयपादश्चतुर्थपादवत्तद्वृत्तमर्धसमं भवेत् ॥ १५ ॥ ॥ ॥ ॥ ॥

यस्य पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम् ॥ तदाहुर्विषमं वृत्तं छंदःशास्त्रविशारदाः ॥ १६ ॥ ॥

यस्य पादचतुष्टयेऽपि परस्परं लक्षणं भिन्नं भवेद्युक्तं भवति तद्विषमं वृत्तं छंदःशास्त्रविशारदा आहुः कथयंति ॥ १६ ॥ ॥ ॥

आरभ्यैकाक्षरात्पादादेकैकाक्षरवर्धितैः ॥ पृथक्छंदो भवेत्पादैर्यावत्षड्विंशतिं गतम् ॥ १७ ॥ ॥ ॥

एकैकाक्षरात्पादादारभ्य आदौ कृत्यैकैकमक्षरं वर्धितं येषु पादेषु ते एकैकाक्षरवर्धितास्तैरेकैकाक्षरवर्धितैः पादैः पृथक् छंदो भवेत् पादैरित्थंभूतैर्यावत् षड्विंशतिं गतम् । तथा च प्रथमजातावुक्तायां चत्वारोप्येकाक्षराः पादा भवंति अत्युक्तजातौ चत्वारोपि द्व्यक्षराः पादा भवंति इत्थं यावत् यथा वृत्तावृत्तयोश्चत्वारोपि पादाः षड्विंशतिवर्णप्रमाणा भवंति ॥ १७ ॥ ॥ ॥

तदूर्ध्वं चंडवृष्ट्यादिदंडकाः परि-
कीर्तिताः ॥ शेषं गाथा त्रिभिः षड्भि-
श्चरणैश्चोपलक्षिता ॥ १८ ॥ ॥

तस्याः षड्विंशत्यक्षरजातेरूर्ध्वं चण्डवृष्टिरादि-र्येषां ते चंडवृष्ट्यादिदण्डकाः परिसमंतात्कीर्ति-ताः कथिताः। उक्तान्यच्छन्दः शेषं सा गाथा। सा च त्रिभिः षड्भिर्वा चरणैः पादैरुपलक्षिता चिन्हिता भवति ॥ १८ ॥ ॥ ॥

उक्तात्युक्ता तथा मध्या प्रतिष्ठान्या
सुपूर्विका ॥ गायत्र्युष्णिगनुष्टुप् च
बृहती पंक्तिरेव च ॥ १९ ॥ ॥

इदानीं छंदोजातीरुद्दिशन्नाह। उक्ता १ अत्यु-क्ता २ मध्या ३ प्रतिष्ठा ४ अन्या सुपूर्विका सु-प्रतिष्ठा ५ गायत्री ६ उष्णिक् ७ अनुष्टुप् ८ बृहती ९ पंक्तिः १० ॥ १९ ॥ ॥ ॥

त्रिष्टुप् च जगती चैव तथातिजग-
ती मता ॥ शक्वरी सातिपूर्वा स्या-
दष्ट्यत्यष्टी ततः स्मृते ॥ २० ॥ ॥

त्रिष्टुप् ११ जगती १२ अतिजगती १३

शक्करी १४ सा शक्करी अतिपूर्वा स्यादतिशक्करी १५ अष्टिः १६ अत्यष्टिः १७ ॥ २० ॥ ॥

धृतिश्चातिधृतिश्चैव कृतिः प्रकृति-
राकृतिः ॥ विकृतिः संकृतिश्चापि त-
थाभिकृतिरुत्कृतिः ॥ २१ ॥ ॥

धृतिः १८ अतिधृतिः १९ कृतिः २० प्रकृतिः २१ आकृतिः २२ विकृतिः २३ संकृतिः २४ अभिकृतिः २५ उत्कृतिः २६ ॥ २१ ॥

इत्युक्ताश्छंदसां संज्ञाः क्रमशो व-
च्मि सांप्रतम् ॥ लक्षणं सर्ववृत्तानां
मात्रावृत्तानुपूर्वकम् ॥ २२ ॥ इति
भट्टकेदारविरचिते वृत्तरत्नाकरे प्र-
थमोऽध्यायः ॥ १ ॥

इति छंदसां संज्ञा जात्याख्याः क्रमशः क्रमेण उक्ताः। सांप्रतं सर्ववृत्तानां लक्षणं चिन्हं वच्मि भणामि मात्रावृत्तान्यार्यादीनि अनुपूर्वं यस्मिन्लक्षणे तन्मात्रावृत्तानुपूर्वकं लक्षणं भणामीति संबंधः ॥ २२॥ इति वृत्तरत्नाकराख्यछंदःशास्त्रस्य टीकायां प्रथमोऽध्यायः ॥ १ ॥ ॥

आर्यालक्षणमाह ॥ लक्ष्मैतत्सप्त गणा

गोपेता भवति नेह विषमेजः ॥ षष्ठोऽयं न
लघुर्वा प्रथमेऽर्धे नियतमार्यायाः ॥ १ ॥

सांप्रतमार्यालक्षणमाह आर्यायाः प्रथमेर्धे एतल्लक्ष्म लक्षणं नियतं निश्चितं वर्तते एतत्किं सप्त गणाः गोपेताः इहास्यामार्यायां विषमे स्थाने प्रथमतृतीयपंचमसप्तमरूपे जगणो न भवति षष्ठश्चायं जगणो भवति अथवा न लघुर्भवति इत्यार्याप्रथमदले निश्चितं लक्षणं भवति शिष्येण पृष्टं आर्यायां क्वचित्पदनियमोऽस्ति गुरुराह ॥ १॥

षष्ठे द्वितीयलात्परकेंऽते मुखलाच्च
स यतिपदनियमः ॥ चरमेर्धे पंचमके
तस्मादिह भवति षष्ठो लः ॥ २ ॥

षष्ठे द्वितीयेत्यादिव्याख्या षष्ठेंऽते षष्ठस्थानवर्तिनि नलघुरूपे द्वितीयलाद्द्वितीयलघोः प्रारभ्य नियमो भवति षष्ठे नगणलघौ सति प्रथमलघुस्थाने यतिरित्यर्थः तथापरके पुरोवर्तिनि सप्तमकेंऽते नलघौ सति मुखलात्परः पदनियमो भवति षष्ठगणांते यतिरित्यर्थः पंचमीत्वात्पूर्वसंग्रहः अत्र पंचमी अर्वाक्सूचका दृश्यते यथा पाटलिपुत्राद्दृष्टो देव इत्यत्र पाटलिपुत्रपुरादर्वाक् इति गम्यते चरमेर्धेद्वितीयदले पंचमकेंते सति पंचम-

गणस्थानवर्तिनि नलघौ सति तस्मान्मुखलघुतः परतः पदनियमो भवति चतुर्थगणांते यतिरित्यर्थः इह द्वितीयेऽर्धे षष्ठो लो लघुर्भवति ॥ २ ॥ ॥

त्रिष्वंशकेषु पादो दलयोराद्येषु दृ-
श्यते यस्याः ॥ पथ्येति नाम तस्या-
श्छंदोविद्भिः समाख्यातम् ॥ ३ ॥

यस्याः आर्यायाः द्वयोराद्येषु त्रिष्वंशेषु गणेषु द्वादशमात्रासु पादो दृश्यते शेषं प्रकटम् ॥ ३ ॥

संलंघ्य गणत्रयमादिमं शकलयोर्द्व-
योर्भवति पादः ॥ यस्यास्तां पिंगल-
नागो विपुलामिति समाख्याति ॥

यस्या आर्याया द्वयोः शकलयोरादिमं गणत्रयं विलंघ्यातिक्रम्य पादो भवति तां पिंगलश्चासौ नागश्च पिंगलनागः पिंगलाचार्यस्य शेषरूपत्वात् विपुलायामिति समाख्याति ॥ ४ ॥

उभयार्धयोर्जकारौ द्वितीयतुर्यौ गम-
ध्यगौ यस्याः ॥ चपलेति नाम तस्याः
प्रकीर्तितं नागराजेन ॥ ५ ॥ ॥

यस्या आर्यायाः उभयार्धयोर्द्वितीयतुर्यौ जकारौ स्यातां जकारौ किंभूतौ गुरुमध्यगतौ त-

स्याः चपलेति नाम नागराजेन प्रकीर्तितं कथि-
तम् ॥ ५ ॥ ॥ ॥ ॥

आद्यं दलं समस्तं भजेत लक्ष्म च-
पलागतं यस्याः ॥ शेषे पूर्वजल-
क्ष्मा मुखचपला सोदिता मुनिना ॥ ६ ॥

यस्या आर्याया आद्यं दलं प्रथमं चपलागतं चपलाश्रितं लक्ष्म लक्षणं समस्तं भजेत आश्रयेत शेषे पश्चिमेऽर्धे पूर्वजं लक्ष्म यस्याः सा पूर्वजलक्ष्मा मुखे आदौ चपला मुखचपला सा उदिता कथिता मुनिना पिंगलेन ॥ ६ ॥

प्राक्प्रतिपादितमर्धे प्रथमेतरे तु च-
पलायाः ॥ लक्ष्माश्रयेत सोक्ता वि-
शुद्धधीभिर्जघनचपला ॥ ७ ॥ इ-
त्यार्याप्रकरणम् ॥ ॥ ॥

प्रथमेर्धे प्राक् पूर्वप्रतिपादितं कथितं सप्त गणा गोपेता भवति । नेह विषमे ज इत्यादिलक्षणमाश्रयेत पुनः प्रथमेतरे तु चरमेऽर्धे चपलायाः लक्ष्म लक्षणमाश्रयेत सा विशुद्धधीभिर्जघने पश्चाद्भागे चपला इव जघनचपलोक्ता ॥ ७ ॥ इति पंचार्याभेदाः॥ इति आर्याप्रकरणम् ॥

आर्याप्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः ॥ दलयोः कृतयतिशोभां तां गीतिं गीतवान् भुजंगेशः ॥ १ ॥ ॥ ॥

अधुना गीतिलक्षणमाह ॥ यदि कथमप्यार्याया: प्रथमदलोक्तं लक्षणमुभयोरपि दलयोर्भवेत् तां गीतिं भुजंगेशः पिंगलः गीतवान् गीतिं किंविशिष्टां कृता यतिभिर्विच्छेदैः शोभा यस्याः सा तथा ताम् ॥ १ ॥ ॥ ॥

आर्याद्वितीयकेऽर्धे यद्गदितं लक्षणं तत्स्यात् ॥ यद्युभयोरपि दलयोरुपगीतिं तां मुनिर्ब्रूते ॥ २ ॥ ॥ ॥

यदार्याद्वितीयकेऽर्धे लक्षणं गदितं कथितं वर्तते तल्लक्षणं यदि उभयोरपि दलयोः स्यात्तदा तामुपगीतिं मुनिः पिंगलो ब्रूते भणति ॥ २ ॥

आर्याशकलद्वितयं व्यत्ययरचितं भवेद्यस्याः ॥ सोद्गीतिः किल कथिता तद्वद्यत्यंशभेदसंयुक्ता ॥ ३ ॥ ॥

यस्या आर्यायाः शकलद्वितयं खंडद्वयं व्य-

त्ययरचितं प्रथमे स्थाने द्वितीयं द्वितीयस्य स्थाने प्रथमं लक्षणं भवेत् प्रथमे दले मात्रा २७ द्वितीयदले मात्रा ३० सा उद्गीतिः किलशब्दो-निश्चये एतर्ह्येवं किलश्रूयते। कथिता तद्वत् तेनैव प्रकारेण यतयश्च अंशाश्च यत्यंशाः तेषां भेदस्तेन संयुक्ताः ॥ ३ ॥ ॥ ॥

आर्यापूर्वार्धं यदि गुरुणैकेनाधिकेन निधने युक्तम् ॥ इतरत्तद्वन्निखिलं दलं यदीयमुदितैवमार्यागीतिः ॥ ४ ॥ इति गीतिप्रकरणम् ॥ ॥

यदि आर्यापूर्वार्धमेकेनाधिकेन गुरुणा निधने अवसाने युक्तं भवति तदीयमितरद्वितीयं दलं निखिलं समस्तं तद्वत्तस्यैव पूर्वदलवद्भवति तदा एवमार्यागीतिरुक्ता उदिता समस्तपादेषु कला द्वात्रिंशत् ३२ भवंति ॥ ४ ॥ इति चतस्रो गीतयः ॥ इति गीतिप्रकरणम् ॥ ॥ ॥

षड्विषमेऽष्टौ समे कालास्ता श्च समे स्युर्नो निरंतराः ॥ न समात्र पराश्रिताः कला वैतालीयेंऽते रलौ गुरुः ॥ १ ॥

अत्र वैतालीये छंदसि विषमे पादे प्रथमतृतीयरूपे षट् कला मात्रा भवंति समे पादे द्वि-

तीयचतुर्थरूपेऽष्टौ कला भवंति च पुनस्ताः कलाः समे पादे निरंतरा अंतररहिता लघवो न स्युः अत्र वैतालीये समकला द्वितीया चतुर्थी षष्ठी च पराश्रिता न भवति कोर्थः द्वितीया लघुरूपा कला तृतीयकलायां न मिलति चतुर्थी पंचम्यां षष्ठी सप्तम्यां चेत्थं न स्यात्। पूर्वाश्रिताः स्युर्द्वितीया प्रथमायां चतुर्थी तृतीयायामेवं स्यात्। अंते षट् कलाग्रतोऽष्टकलाग्रतश्च रलौ रगणलघू कार्यौ ततो गुरुरेक इति चतुष्पादेषु ॥१॥

पर्यंतेर्यौ तथैव शेषं त्वौपच्छंदसिकं सुधीभिरुक्तम् ॥ २ ॥ ॥ ॥

पर्यंते अंते यौ रगणयगणौ भवतः शेषं तथैव षट्कला विषमेऽष्टौ समे तदौपच्छंदसिकं सुधीभिः पंडितैरुक्तं भणितम् ॥ २ ॥ ॥

आपातलिका कथितेयं भाद्गुरुकावथ पूर्ववदन्यत् ॥ ३ ॥ ॥ ॥

भाद्भगणाद्गुरुकौ द्वौ यदि भवतस्तदा आपातलिकानाम छंदो भवति अथानंतरमन्यत्पूर्ववत् ॥ ३ ॥ ॥ ॥ ॥ ॥

तृतीययुग्दक्षिणांतिका समस्तपादेषु द्वितीयलः ॥ ४ ॥ ॥ ॥

समस्तपादेषु द्वितीयो लघुस्तृतीयेन सह युक् संमिलितो भवेत् तदा दक्षिणांतिकानाम छंदो भवति ॥ ४ ॥ ॥ ॥ ॥

उदीच्यवृत्तिर्द्वितीयलः सक्तोऽग्रेण
भवेदयुग्मयोः ॥ ५ ॥ ॥

यत्र अयुग्मयोर्विषमपादयोर्द्वितीयो लघुरग्रेण तृतीयेन लघुना सह सक्तः संबद्धो मिलितो भवति सा उदीच्यवृत्तिरुदिता कथिता ॥ ५ ॥

पूर्वेण युतोऽथ पंचमः प्राच्यवृत्तिरुदितेति युग्मयोः ॥ ६ ॥ ॥

अथ यत्र युग्मयोः समपादयोः पंचमो लघुः पूर्वेण युतश्चतुर्थेन संयुक्तो भवति सा प्राच्यवृत्तिरुदिता ॥ ६ ॥ ॥ ॥ ॥

यदा समावोजयुग्मकौ पूर्वयोर्भवति
तत्प्रवृत्तकम् ॥ ७ ॥ ॥ ॥

ओजयुग्मकौ विषमसमौ यदा पूर्वयोरुदीच्यवृत्तिप्राच्यवृत्त्योः समौ तुल्यौ यथासंख्येन विषमसमौ यदा वा भवतस्तदा प्रवृत्तकंनाम छंदो भवति ॥ ७ ॥ ॥ ॥ ॥

अस्य युग्मरचितापरांतिका ॥ ८ ॥

अस्य वैतालीयस्य युग्मरचिता समपादरचि-

ता समस्तपादेष्वष्टौ कला रगणो लघुर्गुरुश्च भव-
त्ति साऽपरांतिकानाम छंदः ॥ ८ ॥ ॥

अयुग्मगा चारुहासिनी ॥ ९ ॥ इ-
तिवैतालीयप्रकरणम् ॥ ॥ ॥

वैतालीयादेर्विषमपादजाता समस्तपादेषु सैव लक्षणेन चारुहासिनी भवति ॥ ९ ॥ इतिवैतालीयप्रकरणम् ॥ ॥ ॥ ॥

वक्त्रं नाद्यान्नसौ स्यातामब्धेर्योऽनुष्टु-
भि ख्यातम् ॥ १ ॥ ॥ ॥

आद्यात्प्रथमाक्षरात्परतो नसौ नगणसगणौ न स्यातां न भवेतां किंतु हि नियमेनाब्धेः परो यो यगणः कार्यस्तदा वक्त्रंनाम छंदः स्यात् । अनुष्टुभि अनुष्टुप्प्रकरणे ख्यातं प्रसिद्धम् ॥ १ ॥

युजोर्जेन सरिद्भर्तुः पथ्यावक्त्रं प्रकी-
र्तितम् ॥ २ ॥ ॥ ॥

युजोः समपादयोः सरिद्भर्तुः समुद्राच्चतुरक्षरात् जेन गणेन कृत्वा पथ्यावक्त्रंनाम छंदः प्रकीर्तितं कथितम् ॥ २ ॥ ॥ ॥

अयुजोर्जेन वारिधेस्तदेव विपरी-
तादि ॥ ३ ॥ ॥ ॥

अयुजोर्विषमपादयोर्वारिधेश्चतुरक्षरात्परे पादे जेन जगणेन तदेव पथ्यावक्रं नाम विपरीतादि विपरीतपथ्यावक्रं भवतीत्यर्थः ॥ ३ ॥ ॥

चपलावक्रमयुजोर्नकारश्चेत्प-
योराशेः ॥ ४ ॥ ॥

अयुजोः विषमपादयोः पयोराशेः समुद्राच्च-तुरक्षराच्चेद्यदि नकरो गणो भवति तदा चपलावक्रंनाम छंदः स्यात् ॥ ४ ॥ ॥ ॥

यस्यां लः सप्तमो युग्मे सा युग्म-
विपुला मता ॥ ५ ॥ ॥ ॥

यस्यां छंदोजातौ सप्तमस्थाने युग्मे समपादें सप्तमो लो लघुर्भवति सा युग्मविपुला मताभिप्रेता ॥ ५ ॥ ॥ ॥ ॥

सैव तस्याखिलेष्वपि ॥ ६ ॥

सैव तस्याचार्यस्याभिप्रायेण यस्याः सकलेषु समस्तेषु सप्तमो लघुर्भवति सा युग्मविपुला भवति ॥ ६ ॥ ॥ ॥ ॥ ॥

भेनाब्धितो भाद्विपुला ॥ ७ ॥

अब्धितः समुद्राद्भेन भगणेन भाद्भकारात्परा भविपुलेत्यर्थः ॥ ७ ॥ ॥ ॥ ॥

५

इत्थमन्या रश्चतुर्थात् ॥ ८ ॥

इत्थममुना प्रकारेण चतुर्थाच्चतुरक्षरात् रो रगणो यदि भवति तदान्या रविपुला भवति ॥८॥

नोम्बुधेश्चेन्नविपुला ॥ ९ ॥

अंबुधेः समुद्राच्चतुरक्षरात्परो यदि नो नगणस्तदा नविपुला भवति ॥ ९ ॥ ॥ ॥

तोऽब्धेस्तत्पूर्वान्या भवेत् ॥ १० ॥

इति वक्त्रप्रकरणम् ॥ ॥ ॥

अब्धेश्चतुरक्षराद्यदि तस्तदा अन्या विपुला तत्पूर्वा तविपुला भवति ॥ १० ॥ इति वक्त्रप्रकरणम् ॥ ॥ ॥ ॥ ॥

द्विकगुणितवसु लघुरचलधृतिरिति॥१॥

अथात्र वृत्तान्यधिक्रियंते तान्येवाह द्वावेव द्विकौ द्वाभ्यां गुणिता वसवोष्टौ लघवो यस्यां सा द्विकगुणितवसुलघुः अचलधृतिर्नाम छंदो भवति तथा आपदाकुलकं छंदो यावद्द्विकगुणितवसुलघुरिति वर्तते तेनोत्तरत्र षोडश मात्रा अधिक्रियंते ॥ १ ॥ ॥ ॥ ॥

मात्रासमकं नवमाल्गंतम् ॥ २ ॥

उपचित्रा नवमे परयुक्ते ॥ ३ ॥

अष्टाभ्यो भाद्गावुपचित्रा ॥ ४ ॥

जान्लावथाम्बुधेर्विश्लोकः ॥ ५ ॥

मात्रासमकं छंदः स्याद्यत्र नवमो ल् लघुः । ग् गुरुः अंते यस्य तत् षोडश मात्राः । अष्टाभ्यो मात्राभ्यः परयुक्ते दशमयुक्ते नवमे मात्राषोडशके उपचित्रा भवति । अष्टाभ्यो भगणस्तस्माद्गौ गुरू यदीयौ भवतस्तदा उपचित्रा स्यात् । अंबुधेश्चतसृभ्यो मात्राभ्यः परो जगणो यदि भवति न्लौ वा नगणलघू वा भवतस्तदा विश्लोकोनाम छंदो भवति ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ॥

तद्युगलाद्वानवासिका स्यात् ॥ ६ ॥

तद्युगलादम्बुधियुग्मात् अष्टाभ्यो मात्राभ्यः परो जो यदि वा न्लौ तदा वानवासिकानाम छन्दो भवति ॥ ६ ॥ ॥ ॥ ॥

बाणाष्टनवसु यदि लश्चित्रा ॥ ७ ॥

यदतीतकृतविविधलक्ष्मयुतैर्मात्रासमादिपादैः कलितम् ॥ अनियतवृत्तपरिमाणसहितं प्रथितं जगत्सु पादाकुलकम् ॥ ८ ॥ ॥ ॥

बाणाष्टनवसु पंचमाष्टनवमात्रासु यदि लो

लघुस्तदा चित्रानाम छंदः ॥ ७ ॥ यदिति अतीतं पूर्वं कृतं विविधं नानारूपं लक्ष्म लक्षणं तेन कलितैः प्रागुक्तमात्रासमादिलक्षणसहितैः पादैर्यच्छंदः कलितमनियतमनिश्चितं यद्वृत्तपरिमाणं तेन सहितमेवंविधं जगत्प्रसिद्धं यत्तत्पादाकुलकंनाम छंदः ॥ ८ ॥ ॥ ॥

वृत्तस्य लो विना वर्णैर्गा वर्णा गुरु-
भिस्तथा । गुरवो लैर्दले नित्यं प्र-
माणमिति निश्चितम् ॥ ९ ॥ ॥

वृत्तस्येति । यस्य कस्यापि वृत्तस्य लो लघवो मात्रारूपा भवंति तेभ्यो वर्णैरक्षरैर्विना गा गुरुसंख्या भवति तथा तेभ्यो लघुभ्यो गुरुभिस्तत्संख्यां विना वर्णसंख्या भवति तेभ्यो मात्राभ्यः तैर्लघुभिर्विना शेषमात्राणां च दले कृते सति तत्संख्याका गुरवो वाच्याः यथात्रैव वृत्ते एवं सर्वत्र ज्ञेयम् ॥ ९ ॥ ॥ ॥ ॥

शिखिगुणितदशलघुरचितमपगत-
लघुयुगलमपरमिदमखिलम् ॥ स-
गुरुकशकलयुगलमपि सुपरिघटित-
ललितपदनिचिति भवति शिखा॥ १० ॥

शिखीति ॥ शिखी अग्निः ३ शिखिभिस्त्रिभिर्गु-

णिता ये दश लघवस्तैरचितं यत्तत् । पुनः कीदृशमपगतं लघुयुगलं यस्मात्तत् । एवं प्रथमं दलं तथा परं द्वितीयं दलमखिलं संपूर्णं त्रिंशन्मात्रकं तथा दलद्वयमपि सगुरुकं । कोऽर्थः । प्रथमे दलेऽष्टाविंशति लघवः प्रांते गुरुश्च द्वितीये त्रिंशन्मात्राः प्रांते गुरुः एवं दलद्वये द्विषष्टि लघव इत्यर्थः । कथंभूतं सुपरि शोभनप्रकारेण घटिता नि बद्धानि मनोज्ञानि पदानि तेषां निचितो रचना यस्मिंस्तच्छिखानाम छंदो भवति ॥ १० ॥ ॥

विनिमयविहितसकलयुगललघुल-
लितपदविततिरचितगणनिचया ॥
श्रुतिसुखकृदियमपि जगति जशिर
उपगतवति जि सति भवति स्वजा॥११॥

विनिमयेन वैपरीत्येन विहितं यत्सकलयुगलं तस्य लघवस्तैर्ललिता या विततिः पदश्रेणिस्तया रचिता निबद्धा गणसमूहा यस्यां सा श्रुत्योः सुखं करोतीति श्रुतिसुखकृत् क सति जि जकारे जकारस्य शिरसि उपगतवतीत्यर्थः स्वजानाम छंदः ॥ ११ ॥ ॥ ॥ ॥

अष्टावर्धे गा द्व्यभ्यस्ता यस्याः सा-
नंगक्रीडोक्ता ॥ दलमपरमपि वसु-

गुणितसलिलनिधिलघुकविरचित-
पदविततिं भवति ॥ १२ ॥ ॥

यस्या अर्धे दले अष्टौ गा गुरवो भवंति कथं-भूता गुरवः द्व्यभ्यस्ता द्विगुणिताः षोडश गुरव एव स्युरित्यर्थः। तथा परं द्वितीयमपि दलं वसु-भिरष्टभिर्गुणिता ये सलिलनिधयश्चत्वारो लघवो यत्तत्कविभी रचिता पदविततिः पदश्रेणिर्यस्य तत् सा अनंगक्रीडानाम छंदो भवति ॥ १२ ॥

त्रिगुणनवलघुरवसितिगुरुरिति द-
लयुगकृततनुरिह रुचिरा ॥ १३ ॥

इति मात्राप्रकरणम् ॥ इति भट्टके-
दाररचिते वृत्तरत्नाकरे द्वितीयो-
ऽध्यायः ॥ २ ॥ ॥ ॥

त्रिगुणास्त्रिभिर्गुणिता नव लघवो यस्यां सा त्रिगुणनवलघुः अवसितौ अवसाने गुरुर्यस्याः सा अवसितिगुरुः इत्येवं दलयुगेन खंडयुग्मेन कृता तनुर्यस्याः सा दलयुगकृततनुः रुचिराना-मेति छंदः ॥ १३ ॥ इति वृत्तरत्नाकराख्ये छंदसि मात्राप्रकरणवृत्तौ द्वितीयोऽध्यायः ॥ २ ॥

उक्ता गुश्रीः ॥ १ ॥ अत्युक्ता गौ

स्त्रीः ॥ २ ॥ मध्या मो नारी रो मृ-
गी ॥ ३ ॥ प्रतिष्ठा म्गौ चेत्कन्या ॥४॥

इदानीं समवृत्ताध्यायमभिधातुमाह ॥ ग्गुरु-र्यदि पादेपादे एकैको वर्णो भवति तदा उक्तायां जातौ श्रीनाम वृत्तं भवति ॥ १ ॥ पादेपादे द्वौ गकारौ यदि भवतस्तदा अत्युक्तायां जातौ स्त्रीनाम छंदो भवति ॥ २ ॥ पादेपादे एकैको मगणो यदि भवति तदा मध्यायां जातौ नारीनाम छंदः । रो रगणो यदि भवति तदा मध्यायां जातौ मृगीनाम छंदः ॥ ३ ॥ एवं यावंतश्छंदभेदा भवंति तावंत एवमवतार्याः म्गौ मगणगुरू चेद्यदि भवतस्तदा प्रतिष्ठायां जातौ कन्यानाम छंदः॥४॥

सुप्रतिष्ठा । भ्गौ गिति पंक्तिः ॥ ५ ॥
गायत्री त्यौ स्तस्तनुमध्या । शशि-
वदना न्यौ । त्सौ चेद्वसुमती ॥ ६ ॥

भ्गौ भगणौ द्वौ गुरू च भवत इति सुप्रतिष्ठायां जातौ पंक्तिर्नाम छंदः ॥ ५ ॥ त्यौ तगणयगणौ यदि स्तस्तदा गायत्र्यां जातौ तनुमध्या । न्यौ नगणयगणौ यदि तदा शशिवदना । चेद्यदि त्सौ तगणसगणौ भवतस्तदा वसुमती ॥ ६ ॥ ॥

उष्णिक् । मधु यदि ननगाः । कुमा-

रललिता ज्सौग् । म्सौ गः स्यान्मदलेखा ॥ ७ ॥ ॥ ॥

यदि ननगाः द्वौ नगणौ गुरुश्च भवति तदा उष्णिहि जातौ मधुसंज्ञं भवति । ज्सौग् जगणसगणौ गुरुश्च कुमारललिता । म्सौ गः मगणसगणौ गुरुश्च यदा भवति तदा मदलेखा ॥ ७ ॥ ॥

अनुष्टुप् । भौ गिति चित्रपदा गः । मोमो गो गो विद्युन्माला । माणवकं भात्तलगाः । म्नौ गौ हंसरुतमेतत् । जौ समानिका गलौ च । प्रमाणिका जरौ लगौ । वितानमाभ्यां यदन्यत् ॥ ८ ॥ ॥ ॥

अथानुष्टुप्जातौ भौ ग्गः द्वौ भगणौ गुरुद्वयं च यदा भवति तदा चित्रपदानाम । मो मो गो गो द्वौ मगणो द्वौ गुरू च विद्युन्माला छंदः । भाद्भगणात् परे तलगाः तगणलघुगुरवो यदि भवंति तदा माणवकं छंदः । मगणनगणौ द्वौ गुरू चैतत् हंसरुतंनाम छंदः । रगणजगणौ गुरुलघू च यदि भवतस्तदा समानिकानाम छंदः । जगणरगणौ लघुगुरू च तदा प्रमाणिकानाम छंदः । आभ्यां

समानिकाप्रमाणिकाभ्यां यदन्यल्लक्षणं तद्वितानं-
नाम छंदो भवति ॥ ८ ॥ ॥ ॥ ॥

बृहती। रान्नसाविह हलमुखी। भुज-
गशिशुभृता नौ मः ॥ ९ ॥ ॥

अथ बृहत्यां जातौ रात् रगणात्परौ नसौ नगण-
सगणौ यदि भवतस्तदा हलमुखीनाम छंदः। इ-
हास्मिन् शास्त्रे द्वौ नगणौ मगणश्च यदि भवति
तदा भुजगशिशुभृतानाम छंदो भवति ॥ ९ ॥

पंक्तिः। म्सौ ज्गौ शुद्धविराडिदं मतं।
म्नौ गौंचेति पणवनामेदम्। जौं रगौ
मयूरसारिणी स्यात्। भ्मौ सगयु-
क्तौ रुक्मवतीयम्। ज्ञेया मत्ता मभ-
सगयुक्ता। चंपकमाला चेद्भमसाद्गः।
नरजगैर्भवेन्मनोरमा ॥ १० ॥ ॥

पंक्त्यां जातौ म्सौ मगणसगणौ ज्गौ जगणगु-
रू च यदि भवतस्तदा शुद्धविराडिति मतमभिप्रेतं।
मगणनगणौ रगणगुरू च यदा भवतस्तदा पणव-
नामकं छंदः। रगणजगणौ रगणगुरू च यदि भव-
तस्तदा मयूरसारिणीनाम छंदः स्यात्। भगणमग-
णौ सगणगुरुभ्यां युक्तौ यदि भवतस्तदा रुक्मव-

तीयं भवति । मभसगाः मगणभगणसगणगुरुव-स्तैर्युक्ता यदा भवति तदा मत्ता ज्ञेया। भगणमग-णसगणाश्चेद्यदि गुरुः भवति तदा चंपकमाला-नाम छंदः । नगणजगणरगणगुरुभिर्युक्ता यदि भवेत्तदा मनोरमा भवति ॥ १० ॥ ॥ ॥

त्रिष्टुप् । त्जौ ज्गौ गुरुणेयमुपस्थि-तोक्ता। स्यादिंद्रवज्रा यदि तौ जगौ गः। उपेंद्रवज्रा जतजास्ततो गौ। अनंतरोदीरितलक्ष्मभाजौ पादौ य-दीयावुपजातयस्ताः । इत्थं किला-न्यास्वपि मिश्रितासु स्मरंति जाति-ष्विदमेव नाम ॥ सांद्रपदं भ्तौ नग-लघुभिश्च । नजजलगैर्गदिता सुमु-खी ।दोधकवृत्तमिदं भभभाद्गौ । शा-लिन्युक्ताम्तौतगौ गोऽब्धिलोकैः। वा-तोर्मीयं गदिता म्भौ तगौ गः। पंच र-सैः श्रीर्भतनगगैः स्यात्। म्भौ न्लौ गः स्याद्भ्रमरविलसिता । रान्नराविह रथोद्धता लगौ। स्वागतेति रनभाद्गु-

रुयुग्मं ननसगगुरुरचिता वृत्ता। न-
न रलगुरुभिश्च भद्रिका । श्येनिका
रजौ रलौ गुरुर्यदा । उपस्थितमिदं
ज्सौ ताद्दका रौ ॥ ११ ॥ ॥

त्रिष्टुभि जातौ तगणजगणौ जगणगुरू च गुरुणा कृत्वा यदि तदेयमुपस्थिता उक्ता कथिता । द्वौ तगणौ जगणगुरू गुरुश्च यदि भवति तदा इंद्रवज्रानाम छंदः स्यात् । जतजा जगणतगणजगणास्ततोऽग्रतो गुरू द्वौ च यदि भवतस्तदा उपेंद्रवज्रा भवति। अनंतरशब्दे पाश्चात्यवृत्तद्वयमिंद्रवज्रोपेंद्रवज्राख्यं गृह्यते अनंतरमुदीरितमनंतरोदीरितमनंतरोदीरितं तच्च लक्ष्म तद्भजतः अनंतरोदीरितलक्ष्मभाजौ यौ यदीयौ पादौ यस्या इमौ यदीयौ तावुपजातय उच्यंते । इत्थमनेन प्रकारेण अन्यास्वपि जातिषु मिलितासु पूर्वाचार्या इदमेव नाम स्मरंति । यथा कुमारसंभवे प्रथमसर्गे उपजातिश्छंदः । अस्त्युत्तरस्यां दिशि देवतात्मा अत्र प्रथमपादे इंद्रवज्रा । हिमालयो नाम नगाधिराज इत्यत्रोपेंद्रवज्रा एवं तृतीयचतुर्थचरणयोरप्यवगंतव्यम् । भ्तौ भगणतगणौ नगलघुभिः नगणगुरुलघुभिश्च सांद्रपदं नाम छंदः। नजजलगैः नगणजगणजगणलघुगुरुभिस्तदा सु-

मुखी गदिता कथिता । भभभाद्गणाद्वौ गुरू यदि भवतस्तदा इदं दोधकं वृत्तं स्यात् । मततगणादग्रे द्वौ गुरू भवतोऽत्राब्धिलोकैश्चतुःसप्तभिरक्षरैर्यतिर्विधेया तदा शालिनी उक्ता । अत्र छंदसि चतुर्वर्णेभ्यः एका यतिः कार्या ततः सप्तवर्णेभ्यो द्वितीया यतिर्विधेया । परमत्र यदि यतिर्न स्यात्तदा छंदोप्यलीकः । मगणतगणौ तगणगुरू गुरुश्च इयं वातोर्मी पंचरसैः पंचभिः षड्भिश्च यदि यतिर्भवति । भतनगगैः भगणतगणनगणैर्गुरुभ्यां तदा श्रीनीम छंदः स्यात् । मगणभगणौ नगणलघुगुरवश्च भवंति तदा भ्रमरविलसिता स्यात् । इह छंदोजातौ सत् रगणान्नरौ नगणरगणौ लघुगुरू च भवतस्तदा रथोद्धता नाम । रनभात्रगणनगणभगणाद्यदि गुरुयुग्मं भवति तदा स्वागता भवति । नगणभगणसगणगुरुगुरुभी रचिता वृत्तानाम छंदः । नगणनगणरगणलघुगुरुभिर्भद्रिकानाम छंदः । रगणजगणौ रगणलघुगुरवश्च यदा एवं तदा श्येनिकानाम छंदः । जगणसगणौ ततः तगणात्परो गुरू च भवतस्तदा उपस्थितमिदं छंदः ॥ ११ ॥ ॥

जगती । चंद्रवर्त्म गदितं तु रनभसैः ।
जतौ तु वंशस्थमुदीरितं जरौ । स्यादिंद्रवंशा ततजैरसंयुतैः । इह तो-

टकमंबुधिसैः प्रथितं । द्रुतविलं-
बितमाह नभौ भरौ । वसुयुगविरति-
र्नौ म्यौ पुटोऽयम् । प्रमुदितवदना
भवेन्नौ ररौ । नयसहितौ न्यौ कुसुम-
विचित्रा । रसैर्जसजसा जलोद्धतग-
तिः । भुजंगप्रयातं भवेद्यैश्चतुर्भिः
रैश्चतुर्भिर्युता स्त्रग्विणी संमता । भु-
वि भवेन्नभजरैः प्रियंवदा । त्यौत्यौ
मणिमाला छिन्ना गुहवक्त्रैः । धीरैर-
भाणि ललिता तभौ जरौ । जजा-
विह मौक्तिकदाम जजौ च । त्यौ त्या-
विति निर्दिष्टा पुष्पविचित्रा । विभा-
वरी तु सा जरौ जरौ यतः । प्रमि-
ताक्षरा सजसजैरुदिता । ननभर-
सहिताभिहितोज्ज्वला । पंचाश्वै-
श्छिन्ना वैश्वदेवी ममौ यौ । अब्ध्यं-
गैःस्याज्जलधरमाला म्भौ स्मौ। इह
नवमालिनी नजभरौ भ्यौ । स्वरश-

रविरतिर्ननौ रौ प्रभा । भवति न
जावथ मालती जरौ । इति वद
तामरसं नजजाद्यः ॥ १२ ॥ ॥

जगत्यां जातौ रश्च नश्च भश्च सश्च रनभसाः रगणनगणभगणसगणास्तैश्चंद्रवर्त्म गदितं कथितं । जश्च तश्च जतौ जगणतगणौ तु पुनः जरौ जगणरगणौ यदि भवतस्तदा वंशस्थंनाम छंदः उदीरितं कथितं । तगणनगणजगणैः रगणसंयुक्तैः इंद्रवंशा स्यात् । इह छंदोजातौ अंबुधिसैश्चतुःसगणैः तोटकं प्रथितं । नश्च भश्च नभौ नगणभगणौ भरौ भगणरगणौ च भवतस्तदा द्रुतविलंबितमाह । नौ नगणनगणौ म्यौ मगणयगणौ च यत्र वसवोऽष्टौ युगानि चत्वारि तैर्यतिर्यस्मात्सोऽयं पुटोनाम छंदः । नौ नगणनगणौ रौ रगणरगणौ च यत्र भवतः सा प्रमुदितवदना भवेत् । न्यौ नगणयगणौ नगणयगणसंयुक्तौ यत्र सा-कुसुमविचित्रा । रसः षड्भिर्यतिः जसजसा जगणसगणजगणसगणैः रचिता या सा जलोद्धतगतिर्नाम छंदः । चतुर्भिर्यैर्यगणैर्भुजंगप्रयातंनाम छंदो भवेत् । चतुर्भिः रैः रगणैः स्त्रग्विणी संमता कथिता । नगणभगणजगणरगणैर्भुवि पृथिव्यां प्रियंवदानाम छंदो भवेत् । तगणयगणौ तगण-

यगणौ च यत्र सा मणिमालानाम परं गुहवक्त्रैः छिन्ना गुहः कार्तिकेयस्तस्य वक्त्राणि मुखानि षट् तत्संख्यया यतिर्विधेया । तगणभगणौ जगणरगणौ च यत्र सा धीरैर्मनोषिभिः ललिता अभाणि । चत्वारो जगणा यत्र तत् मौक्तिकदाम छंदः । इह अस्मिन्शास्त्रे स्यात् तगणयगणौ तगणयगणौ च इत्यनेन प्रकारेण यत्र सा मुनिना पुष्पविचित्रा निर्दिष्टा कथिता । जगणरगणौ तु पुनः जगणरगणौ यतो भवतः सा विभारीनाम । सगणजगणसगणजगणैः प्रमिताक्षरानाम उदिता कथिता । नगणनगणभगणरगणसहिता या सा उज्ज्वला अभिमता । द्वौ मगणौ ततो द्वौ यगणौ यत्र सा वैश्वदेवी परंतु पंचाश्वैश्छिन्ना पंचाक्षरैः प्रथमा यतिः ततोऽश्वैः सप्तभिर्द्वितीया यतिः कार्या । अब्धयश्चत्वारोंगान्यष्टौ तैर्विरामो यत्र मगणभगणौ सगणमगणौ च स्याच्च सा जलधरमालानाम छंदः । नगणजगणाभ्यां परौ भगणयगणौ यदि स्तस्तदा इह छंदोजातौ नवमालिनी भवति । स्वरैः सप्तभिस्ततः शरैः पंचभिर्विरतिर्विरामो यत्र च द्वौ नगणौ द्वौ रगणौ च भवतः सा प्रभानाम छंदः । नगणजगणौ अथ जगणरगणौ यत्र स्तः सा मालतीनाम भवति । नगणज-

गणजगणात्परो यगणः स्यात्तदा इति तामरसं-
नाम त्वं वद कथय ॥ १२ ॥ ॥ ॥

अतिजगती । तुरगरसयतिर्नौ ततौ
गः क्षमा। म्तौ ज्रौ गस्त्रिदशयतिः प्र-
हर्षिणीयं। चतुर्ग्रहैरिह रुचिरा ज्भौ
स्रौ गः । वेदै रंध्रैर्म्तौ यसगा मत्त-
मयूरं । जतौ सजौ गो भवति मंजु-
भाषिणी । ननततगुरुभिश्चंद्रिका-
श्वर्तुभिः ॥ १३ ॥ ॥ ॥

अथातिजगती जातिः तुरगरसयतिः सप्तष-
ड्भिर्विरामः स्याद्यत्र द्वौ नगणौ द्वौ तगणौ गुरु-
रेकश्च सा क्षमानाम छंदः । मगणतगणौ जग-
णरगणौ गुरुश्च त्रिदशयतिः त्रिभिरक्षरैस्ततो द्वि-
तीयो दशाक्षरैर्विरामः इयं प्रहर्षिणीनाम छं-
दः । जगणभगणौ सगणरगणौ गुरुश्च एभिः रु-
चिरानाम छंदः । इह छंदसि चतुर्भिरक्षरैः प्रथमा
यतिः ततो ग्रहैर्नवभिरक्षरैर्द्वितीया यतिः कार्या ।
वेदैश्चतुर्भिरक्षरैः रंध्रैः नवभिर्यतिः मगणतगणौ
यगणसगणगुरुभिः सह यत्र च तत् मत्तमयूरं
छंदः । जतौ जगणतगणौ सजौ सगणजगणौ

गो गुरुश्च यत्र सा मंजुभाषिणी भवति। नगणनगणतगणतगणगुरुभिश्चंद्रिकानाम छंदः। परमश्वैः सप्तभिस्ततः ऋतुभिः षड्भिर्यतिः कार्या ॥ १२ ॥

शक्करी। म्तौ न्सौ गावक्षग्रहविरतिरसंबाधा। ननरसलघुगैः स्वरैरपराजिता। ननभनलगिति प्रहरणकलिता। उक्ता वसंततिलका तभजा जगौ गः सिंहोद्धतेयमुदिता मुनिकाश्यपेन॥ उद्धर्षिणीति गदिता मुनिशैतवेन श्रीपिंगलेन कथिता मधुमाधवीति ॥ १ ॥ इंदुवदना भजसनैः सगुरुयुग्मैः। द्विःसप्तच्छिदलोला म्सौ म्भौ गो चरणे चेत् ॥ १४ ॥

अथ शक्कर्यां चतुर्दशाक्षरायां जातौ मगणतगणौ नगणसगणौ द्वौ गुरू च तदाऽसंबाधानाम छंदः अत्र अक्षैरिंद्रियैः पंचभिः ग्रहैर्नवभिर्यतिः कार्या। नगणनगणरगणसगणलघुगुरुभिरपराजितानाम छंदः अत्र स्वरैः सप्तभिर्यतिः कार्या। द्वौ नगणौ भगणनगणौ लघुगुरू च इत्यनया रीत्या प्रहरणकलिकानाम छंदः। तगणभगणजगणज-

गणा द्वौ गुरू च एभिर्वसंततिलका उक्ता। मतांतरमाह इयं वसंततिलका काश्यपेन मुनिना सिंहोद्धता उदिता भणिता। तथा शैतवेन मुनिना इयमुद्धर्षिणी निगदिता । श्रीपिंगलेनाचार्येणेयं मधुमाधवीति कथिता ।एवं च रूपाण्यपि मतानि। भगणजगणसगणनगणैर्गुरुयुग्मसहितैरिंदुवदना स्यात् चेद्यदि चरणे पादे मगणसगणौ मगणभगणौ द्वौ गुरू च तदा अलोलानाम छंदः अत्र द्विःसप्तच्छित् द्वौ वारौ सप्तभिः सप्तभिः छित् छेदो यतिर्विराम इति ॥ १४ ॥ ॥ ॥

अतिशक्करी। द्विहतहयलघुरथ गिति शशिकला । श्रगिति भवति रसनवकयतिरियं । वसुमुनियतिरिह मणिगुणनिकरः। मा बाणा यस्यां सा कामक्रीडा ज्ञातव्या। ननमयययुतेयं मालिनी भोगिलोकैः। भवति नजौ भजौ रसहितौ प्रभद्रकम् । सजना नयौ शरदशकविरतिरेला म्रौ म्यौ यांतौ भवेतां सप्ताष्टकैश्चंद्रलेखा ॥१५॥

अथ पंचदशाक्षरायां शक्कर्यां जातौ द्विहता

द्वाभ्यां गुणिता हयाः सप्त जाताश्चतुर्दश प्रागेव तावंतो लघवस्तदनु एको गुरुरित्यमुना प्रकारेण शशिकलानाम छंदो भवति। इयं शशिकला यदि रसनवकयतिः षड्नवभिर्यतिस्तदेत्यनया रीत्या स्रग्नाम भवति। इह अस्यां शशिकलायामष्टसप्तभिर्यतिस्तदेयं मणिगुणनिकरः स्यात्। मा बाणाः पंच मगणाः यस्यां सा कामक्रीडासंज्ञा ज्ञातव्या। द्वौ नगणौ एको मगणो द्वौ यगणौ च एभिर्युता इयं मालिनी अस्यां भोगिलोकैः अष्टभिः सप्तभिश्च यतिर्विधेया। नगणजगणौ भगणजगणौ रगणसहितौ तदा प्रभद्रकंनाम छंदो भवति। सगणजगणनगणाः नगणयगणौ च भवतो यत्र शरदशकविरतिः पंचभिस्ततो दशभिर्वर्णैर्यतिर्भवति सा एलासंज्ञा स्यात्। मगणरगणौ मगणयगणौ यगणांतौ यदि भवेतां यतिश्च सप्तभिरष्टभिरक्षरैर्भवेत्तदा चंद्रलेखासंज्ञा स्यात्। इत्यतिशक्वरी जातिः॥ १५॥ ॥ ॥ ॥

अष्टिः। भ्रात्रिनगैः स्वरान्नवमृषभगजविलसितं। नजभजरैः सदा भवति वाणिनी गयुक्तैः। जरौ जरौ जगाविदं वदंति पंचचामरम्॥ १६॥ ॥

अथ अष्टिजातिस्तत्र भ्रत्रीति भ्रौ भगणरगणौ त्रिनं नगणत्रितयं ततो गो गुरुरेकः एभिः ऋषभगजविलसितंनाम छंदोत्र स्वरात्सप्तभ्यः नवं यतिः । नगणजगणभगणजगणरगणैर्गुरुसहितैः तदा वाणिनीनाम छंदो भवति । जगणरगणौ जगणरगणौ जगणगुरू च एतैरिदं छंदः पंचचामरं नाम छंदोविदः वदंति कथयंति ॥१६॥

अत्यष्टिः। रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी। जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः। दिग्मुनि वंशपत्रपतितं भरनभनलगैः। रसयुगहयैः न्सौ म्रौ स्लौ गो यदा हरिणी तदा। मंदाक्रांता जलधिषडगैर्म्भौ नतौ ताद्गुरू चेत्। यदि भवतो नजौ भजजला गुरुर्नर्कुटकं। मुनिगुहकार्णवैः कृतयतिं वद कोकिलकम्॥ १७॥ ॥

अथ अत्यष्टिजातिस्तत्र रसैः षड्भिस्ततो रुद्रैरेकादशभिश्छिन्ना विरतिर्यत्र च यगणमगणनगणसगणभगणलघवो गुरुश्च सा शिखरिणी स्यात्।

जगणसगणौ जगणसगणयगणलघवो गुरुश्च यत्र सा पृथ्वीनाम छंदः । अत्र अष्टभिस्ततो नवभिर्यतिः कार्या । भगणरगणनगणभगणनगणलघुगुरुभिर्वंशपत्रपतितंनाम छंदोऽत्र दशभिस्ततः सप्तभिर्यतिः। षड्भिस्ततश्चतुर्भिस्ततः सप्तभिर्यतिर्यदा नगणसगणौ मगणरगणौ सगणलघू गुरुश्च तदा हरिणीनाम छंदः स्यात् । चेद्यदि जलधिभिश्चतुर्भिः षड्भिः अंगैः सप्तभिः यतिः मगणभगणौ नगणतगणौ तात् तगणात् गुरू च स्यातां तदा मंदाक्रांतानाम छंदः । यदि नगणजगणौ भवतः भगणजगणजगणलघवो गुरुश्च स्यात्तदा नर्कुटकंनाम छंदः । इदं नर्कुटकं यदि मुनिगुहकार्णवैः मुनिभिः सप्तभिः गुहकैरिति गुहः कार्तिकेयस्तस्य कानि मुखानि षट् तैर्गुहकैः षड्भिः अर्णवैश्चतुर्भिश्च कृता यतिर्यत्र स मुनिगुहकार्णवैः कृतयतिस्तं तदा त्वं कोकिलकंनाम छंदः कथय ॥ १७ ॥

धृतिः स्याद्भूतर्त्वश्वैः कुसुमितलता-
वेल्लिता म्तौ नयौ यौ ॥ १८ ॥ ॥

धृतिर्नाम जातिस्तत्र यत्र भूतर्त्वश्वैः पंचषट्सप्तभिर्यतिः मगणतगणौ नगणयगणौ द्वौ यगणौ च सा कुसुमितलतावेल्लिता स्यात् ॥ १८ ॥

अतिधृतिः । रसर्त्वश्वैर्य्मौ न्सौ ररगु-

रुयुता मेघविस्फूर्जिता स्यात् । सूर्या-
श्वैर्मसजस्तताः सगुरवः शार्दूलवि-
क्रीडितम् ॥ १९ ॥ ॥ ॥

अथ अतिधृतिर्जातिः यमनसररगणगुरुयुता मेघविस्फूर्जिता स्यात् । रसैः षड्भिः ऋतुभिः षड्भिः अश्वैः सप्तभिः कृतविरामा । सूर्याश्वैः द्वादश-सप्तभिः कृतविरामं मसजसततगणा गुरुसहिता यत्र तत् शार्दूलविक्रीडितंनाम छंदः स्यात्॥१९॥

कृतिः। ज्ञेया सप्ताश्वषड्भिर्मरभनययु-
ता भ्लौ गः सुवदना । त्री रजौ गलौ
भवेदिहेदृशेन लक्षणेन वृत्तनाम ॥२०॥

अथ कृतिजातौ मरभनयगणसहिता भगण-लघू गुरुश्च यत्र च सप्ताश्वषड्भिः सप्तभिः अश्वैः सप्तभिः षड्भिः यतिः सा सुवदना ज्ञेया । त्रिस्त्रीन् वारान् रगणजगणौ ततो गुरुलघू इह ईदृशेन लक्षणेन वृत्तनाम छंदो भवेत् ॥ २० ॥

प्रकृतिः। म्रभ्नैर्यानां त्रयेण त्रिमुनि-
यतियुता स्रग्धरा कीर्तितेयम्॥२१॥

अथ प्रकृतिजातौ मरभनगणैस्ततो यानां त्र-येण यगणत्रयेण इयं स्रग्धरा कीर्तिता । किंभु-

ता स्रग्धरा त्रिमुनियतियुता सप्तभिस्ततः सप्तभिततः सप्तभिर्विरामसहिता ॥ २१ ॥

आकृतिः । भ्रौ नरना रनावथ गुरु
दिगर्कविरमं हि भद्रकमिदम् ॥२२॥

अथ आकृतिजातौ भगणरगणौ ततो नगणरगणनगणास्ततो रगणनगणौ अथ गुरुः इदं भद्रकंनाम छंदः किंभूतं दिगर्कविरमं दशभिर्द्वादशभिश्च विरामो यत्र तत् अत्र हि पादपूरणे ॥२२॥

विकृतिः । यदिह नजौ भजौ भजभ-
लगास्तदाश्वललितं हरार्कयति त-
त् । मत्ताक्रीडं मौ भ्नौ नौ न्लौ गिति
भवति वसुशरदशयतियुतम् ॥ २३ ॥

अथ विकृतिजातिः यदिह शास्त्रे नगणजगणौ भगणजगणभगणजगणभगणलघुगुरवश्च स्युस्तत् अश्वललितं नाम छंदः । किंभूतं तत् हरार्कयति हरैरेकादशभिरर्कैर्द्वादशभिर्यतिर्विरामो यत्र तत् । द्वौ मगणौ भगणनगणौ द्वौ नगणौ नगणलघू गुरुश्च इति लक्षणेन मत्ताक्रीडंनाम कीदृशं मत्ताक्रीडं वसुशरदशयतियुतमष्टपंचदशभिर्यतिस्तया सहितम् ॥ २३ ॥

संकृतिः। भूतमुनीनैर्यतिरिह भतनाः
स्भौ भनयाश्च यदि भवति तन्वी ॥२४॥

अथ संकृतिर्जातिः इह छंदोजातौ भतनाः सभौ भनयाश्च एते गणा यदि भवेयुस्तदा तन्वी-नाम छंदो भवति । अत्र पंचसप्तद्वादशभिर्यतिः कार्या ॥ २४ ॥ ॥ ॥ ॥

अभिकृतिः। क्रौंचपदा भ्मौ स्भौ न-
ननानूगाविषुशरवसुमुनिविरतिरिह
भवेत् ॥ २५ ॥ ॥ ॥

अथ अभिकृतिर्जातिः इह शास्त्र चेद्यदि भगणमगणौ सगणभगणौ चत्वारो नगणा एको गुरुश्च इषुभिः शरैः पंचभिः वसुभिरष्टभिर्मुनिभिः सप्तभिश्च विरतिः स्यात्तदा क्रौंचपदानाम छंदो भवेत् ॥ २५ ॥ ॥ ॥

उत्कृतिः। वस्वीशाश्वच्छेदोपेतं ममतनयुगनरसलगैर्भुजंगविजृंभितम् ।
मो नाः षट् सगगिति यदि नवर-
सरसशरयतियुतमपवाहाख्यम् ॥ २६ ॥

अथ उत्कृतिजातौ ममतगणास्ततो नयुगं नगणयुगलं ततो नरसगणलघुगुरवः एतैर्भुजंगवि-

जृंभितंनाम छंदो भवति। कीदृशं तत् वस्वीशाश्वच्छेदोपेतमष्टैकादशसप्तभिश्छेदो विरामस्तेनोपेतं युक्तम्। एको मगणस्ततो नगणाः षट् ततः सगणस्ततो गुरुद्वयमित्यमुना प्रकारेण यदि नवषट्पंचभिर्यतिस्तया युतमुपेतं तदा अपवाहाख्यंनाम छंदः स्यात् ॥ २६ ॥ ॥ ॥

॥ इति समवृत्तप्रकरणम् ॥

यदि ह नयुगलं ततः सप्त रेफास्त-
दा चंडवृष्टिप्रयातो भवेद्दंडकः ॥ १ ॥

अथ चंडवृष्ट्यादिकदंडकानाह यदि हेति। यदि इह दंडकजातौ आदौ नयुगलं नगणयुग्मं ततः सप्त रेफाः सप्त रगणास्तदा चंडवृष्टिप्रयातोनाम दंडको भवेत् चत्वारोपि पादा ईदृशेन लक्षणेन कर्तव्याः ॥ १ ॥ ॥ ॥

प्रतिचरणविवृद्धरेफाः स्युरर्णार्णव-
व्यालजीमूतलीलाकरोद्दामशंखादयः २

तथात्र प्रतिचरणविवृद्धरेफा इति। दंडकं दंडकंप्रति पादे पादे एकैकरगणवृद्धिः क्रियते तदा अमूनि नामानि दंडकानां पृथक् स्युः आदौ सर्वत्र नगणद्वयमेव कार्यं तथा च द्वौ नगणौ ततः सप्त रगणाः अत्र तु द्वौ नगणौ ततः पादे पादे

अष्टौ रगणास्तदा अर्णनाम दंडकं स्यात् एवं प्रतिदंडकवृद्धौ नवभिरर्णवनाम दशभिः रगणैर्व्यालः एकादशभिः रगणैर्जीमूतनाम द्वादशभिः रगणैर्लीलाकरः त्रयोदशभिः रगणैरुद्दामः तथा पादे पादे आदौ द्वौ नगणौ ततश्चतुर्दश रगणास्तदा शंखोनाम दंडको भवति आदिशब्दात्त्यंयगगनसमुद्रादयोपि शिष्टकृतनामानो गृह्यंते रगणवृद्धिरपि कर्तव्या ॥ २ ॥ ॥ ॥

प्रचितकसमभिधो धीरधीभिः स्मृतो दंडको नद्वयादुत्तरैः सप्तभिर्यैः ॥ ३ ॥ इति भट्टकेदारविरचिते वृत्तरत्नाकराख्ये छंदसि समवृत्ताध्यायस्तृतीयः समाप्तः ॥ ३ ॥ ॥ ॥

तथा नगणद्वयादुत्तरैरग्रेतनैः सप्तभिर्यैर्यगणैर्धीरधीभिः पंडितैः प्रचितकसमभिधोनाम दंडकः स्मृतः कथितः ॥ ३ ॥ इति दंडकाः ॥ इति वृत्तरत्नाकराख्ये छंदसि समवृत्ताध्यायस्तृतीयः ॥३॥

विषमे यदि सौ सलगा दले भौ युजि भाद्गुरुकावुपचित्रम् ॥ १ ॥

भत्रयमोजगतं गुरुणी चेत् युजि च

नजौ ज्ययुतौ द्रुतमध्या ॥ २ ॥ ॥

इदानीमर्धसमवृत्ताध्यायो व्याख्यायते ॥ विषमे दले प्रथमतृतीये पादे यदि द्वौ सगणौ ततः सगणलघुगुरवो भवंति पुनर्यदा युजि समे दले द्वितीयचतुर्थपादे द्वौ भौ भगणौ ततो भात् भगणात् द्वौ गुरू भवतस्तदा उपचित्रंनाम छंदः अत्र तृतीयपादः प्रथमपादसदृशः चतुर्थपादो द्वितीयपादसदृशः एवं सर्वत्रार्धसमच्छंदसि ज्ञेयम् ॥ १ ॥ चेद्यदि ओजगतं विषमपादोत्पन्नं लक्षणं भगणत्रयं प्रथमं ततो गुरुणी गुरुद्वयं च पुनः युजि समे पादे नगणजगणौ जगणयगणसहितौ भवेतां तदा द्रुतमध्यानाम छंदो भवति ॥ २ ॥ ॥ ॥

सयुगात्सगुरू विषमे चेद्भाविह वेगवती युजि भाद्गौ ॥ ३ ॥ ॥

विषमे पादे सगणयुग्मात्सगणगुरू चेद्यदि भवतः इह युजि समे पादे भौ भगणौ ततः पुनर्भगणात् द्वौ गुरू यदि भवतस्तदा वेगवतीनाम छंदो भवति ॥ ३ ॥ ॥ ॥

ओजे तपरौ जरौ गुरुश्चेत् म्सौ ज्गौ भद्रविराड् भवेदनोजे ॥ ४ ॥ ॥

ओजे विषमे पादे तगणात्परौ जगणरगणौ गुरुश्चेद्भवति अनोजे समे पादे मसौ जगणगुरू च तदा भद्रविराट्नाम छंदो भवेत् ॥ ४ ॥

असमे सजौ सगुरुयुक्तौ केतुमती
समे भरनगाद्गः ॥ ५ ॥ आख्यान-
की तौ जगुरू च ओजे जतावनोजे
जगुरू गुरुश्चेत् ॥ ६ ॥ ॥ ॥

असमे विषमे पादे सजौ सगणजगणौ सगणगुरू ताभ्यां युक्तौ भवेतां समे पादे भगणरगणनगणगुरवः एभ्यः पुनर्गुरुरेको यदि भवति तदा केतुमतीनाम छंदः स्यात् ॥ ५ ॥ ओजे विषमे पादे तौ द्वौ तगणौ जगुरू जगणगुरू पुनर्गुरुरेकश्च पुनरनोजे समे पादे जगणतगणौ ततो जगणगुरू पुनरेको गुरुश्चेत्तदा आख्यानकीनाम छंदः ॥ ६ ॥

जतौ जगौ गो विषमे समे स्यात्
तौ ज्गौ ग एषा विपरीतपूर्वा ॥ ७ ॥

विषमे पादे जगणतगणौ जगणगुरू गुरुश्च पुनः समे पादे तौ द्वौ तगणौ जगणगुरू गुरुरेकश्च स्यात् तदा एषा विपरीतपूर्वा विपरीताख्यानकी भवति ॥ ७ ॥

सयुगात्सलघू विषमे गुरुर्युजि न-
भौ च भरौ हरिणीप्लुता ॥ ८ ॥ अयुजि
ननरला गुरुः समे न्जमपरवक्त्रमि-
दं ततो जरौ ॥ ९ ॥ ॥ ॥

विषमे पादे सगणयुग्मात् सगणलघू गुरुश्च पुनर्युजि समे पादे नगणभगणौ भगणरगणौ च तदा हरिणीप्लुतानाम छंदो भवति ॥ ८ ॥ अयुजि विषमे पादे द्वौ नगणौ ततो रगणलघुगुरवः समे पादे नगणजगणौ ततोऽनंतरं जगणरगणौ इदमपरवक्त्रंनाम छंदः ॥ ९ ॥

अयुजि नयुगरेफतो यकारो युजि
च नजौ जरगाश्च पुष्पिताग्रा ॥ १० ॥
वदंत्यपरवक्त्राख्यं वैतालीयं विप-
श्चितः ॥ पुष्पिताग्राभिधं केचिदौ-
पच्छंदसिकं तथा ॥ ११ ॥ ॥

अयुजि विषमे पादे नगणयुगं च रेफश्च नगणयुगरेफौ ताभ्यां नगणयुगरेफतो यगणो भवति च पुनः युजि समे पादे नगणजगणौ ततो जगणरगणगुरवश्च तदा पुष्पिताग्रानाम छंदो भवेत् ॥ १० ॥ यदिदमपरवक्त्राख्यंनाम छंदस्तद्विपश्चि-

तः पंडिता वैतालीयं वदंति कथयंति पाश्चात्यं पुष्पिताग्राभिधं छंदो भवेत् ततः केचिदाचार्या औपच्छंदसिकं वदंति ॥ ११ ॥

स्यादयुग्मके रजौ रजौ समे तु ज-
रौ जरौ गुरुर्यदा यवान्मतीयम् ॥ १२ ॥

अयुग्मके विषमे पादे रगणजगणौ ततो रगणजगणौ तु पुनः समे पादे जगणरगणौ ततो जगणरगणौ गुरुश्च तदा यवाद्यवशब्दात्परा मतीयं यवमतीत्यर्थः ॥ १२ ॥ इति वृत्तरत्नाकराख्ये छंदसि अर्धसमवृत्तरूपश्चतुर्थोऽध्यायः ॥ ४ ॥

मुखपादोऽष्टभिर्वर्णैः परेस्मान्मक-
रालयैः॥ क्रमाद्वृद्धाः सततं यस्य वि-
चित्रैः पादैः संपन्नसौंदर्यं तदभिहि-
तममलधीभिः पदचतुरूर्ध्वाभिधं
वृत्तम् ॥ १ ॥ ॥ ॥ ॥

अथ विषमवृत्ताध्यायो व्याख्यायते । मुखपाद इति । यस्य वृत्तस्य मुखपाद आदिपादोऽष्टभिर्वर्णैः अस्मात् मुखपादात्परे अग्रेतनास्त्रयः पादा मकरालयैश्चतुर्भिरक्षरैः क्रमात् क्रमेण वृद्धा भवंति द्वितीयपादो द्वादशभिरक्षरैः तृतीयः पादः षोडशाक्षरैश्चतुर्थो विंशत्यक्षरैः अमलधीभिः पं-

डितैस्तत् पदचतुरूर्ध्वाभिधं वृत्तमभिहितं भणितं किंभूतं तत् सततमनवरतं यस्य वृत्तस्य विचित्रैः नानाविधैः पादैः संपन्नसौंदर्यं जातचारुत्वम्॥१॥

प्रथमसमुदितवृत्ते विरचितविषमचर-
णभाजि गुरुकयुगलनिधने इह क-
लित आडा विधृतरुचिरपदवित-
तियतिरिति भवति पीडः ॥ २ ॥ ॥

प्रथममिति। इह शास्त्रे प्रथमसमुदितवृत्ते पूर्वं प्रतिपादिते वृत्ते पदचतुरूर्ध्वाभिधे वृत्ते आडा कलितः पीडोनाम छंदो भवति। आपीड इत्यर्थः। किंभूते वृत्ते विरचितान् विषमान् चरणान् पादान् भजतीत्येवंशीलः स तथा तस्मिन् किंभूतः आपीडः गुरुयुगलं निधनेऽवसाने यस्य स तथा। पुनः किंभूतः। विधृता रुचिरा पदविततौ यतिर्येन स तथा भावार्थस्त्वयं आपीडछंदसि सर्वं लक्षणं पदचतुरूर्ध्वाभिधसक्तं किंतु पदे पदे प्रांते गुरुद्वयं कार्यम्॥ २॥

प्रथममितरचरणसमुत्थं श्रयति ज-
गति लक्ष्म इतरदितरजनितमपि
यदि चतुर्थं चरणयुगलकमधिकृत-

मपरमिति कलिका सा ॥ ३ ॥ ॥

प्रथममिति । तुर्यं चतुर्थांशः पाद इत्यर्थः यदि प्रथमं तुर्यं प्रथमपादः अष्टाक्षररूपः इतरचरणसमुत्थं द्वितीयचरणभवं द्वादशाक्षररूपं लक्ष्म लक्षणं श्रयति । इतरत्तुर्यं द्वितीयपादो द्वादशाक्षररूपः इतरजनितमपि प्रथमपादजनितमष्टाक्षररूपं श्रयति । अपरं चरणयुगलं तृतीयचतुर्थमधिकारापन्नं पूर्वोक्तं क्रमेण षोडशविंशत्यक्षरं लक्ष्म चिन्हं श्रयति इत्यनेन प्रकारेण जगति लोके तदा सा कलिकानाम छंदः ॥ ३ ॥

द्विगुरुयुतसकलचरणांता मुखचरणरचितमनुभवति तृतीयः चरण इह हि लक्ष्म प्रकृतमपरमखिलमपि भजति लवल्या ॥ ४ ॥ ॥

सा लवल्यानाम छंदो भवति । किंभूता । द्वाभ्यां गुरुभ्यां युतं युक्तं सकलचरणानामंतमवसानं यस्याः तथा इहास्यां लवल्यायां हि निश्चितं तृतीयः चरणो मुखचरणरचितं प्रथमपादोद्भवं लक्ष्म अनुभवति आश्रयते । प्रकृतं प्रस्तुतमपरमन्यदखिलं चरणत्रयं भजति ॥ ४ ॥ ॥

प्रथममधिवसति यदि तुर्यं चरम-

चरणपदमवसितगुरुयुग्मा । निखि-
लमपरमुपरितनसममिह ललितपा-
दत्रितयममृतधारा ॥ ५ ॥ ॥ ॥

प्रथममधीति । प्रथमं तुर्यं प्रथमपादोष्टाक्षररूपो यदि चरमचरणपदं चतुर्थं पदं स्थानमधिवसति प्राप्नोति निखिलं समस्तमपरमन्यत् उपरितनसमं पाश्चात्यसमानं ललितपादत्रितयमिह शास्त्रे पादचतुरूर्ध्वे तदा अमृतधारानाम छंदो भवति किंभूता अमृतधारा अवसितमवसाने गुरुयुग्मं यस्याः सा अवसितगुरुयुग्मा ॥ ५ ॥ ॥

॥ इति पदचतुरूर्ध्वप्रकरणं समाप्तं ॥

सजमादिमे सलघुकौ च नसजगुरु-
केष्वथोद्गता ॥ त्र्यंघ्रिगतभनजला
गयुताः सजसा जगौ चरममेकतः
पठेत् ॥१॥ चरणत्रयं भजति लक्ष्म
यदि सकलमुद्गतागतं नौ भगौ भ-
वति सौरभकं चरणे यदीह भवत-
स्तृतीयके ॥ २ ॥

सजमादिमे इति । आदिमे प्रथमे पादे सजं

सगणजगणौ पुनः सगणलघू भवतः। अथ द्वितीये पादे नगणसगणजगणगुरुषु सत्सु उद्गतानाम छंदः त्रिशब्दस्तृतीये वर्तते त्रिश्चासावंघ्रिश्च त्र्यघ्रिस्तृतीयपादस्तत्र गतास्तेच ते भगणनगणजगणलघवो गुरुयुताः स्युः। चरमं पश्चिमं पादं सगणजगणसगणा जगणगुरू च यदि एकतः एकत्र पठेत् भणेत् तदा उद्गतानाम छंदो भवति ॥१॥ चरणत्रयमिति। यदि इह छंदसि तृतीये चरणे नौ रगणनगणौ भगौ भगणगुरू च भवतः अपरं तृतीयवर्ज्यं सकलं दलं चरणत्रयं यदि उद्गतागतं लक्ष्म लक्षणं भजति तदा सौरभकंनाम छंदो भवति ॥ २ ॥ ॥ ॥ ॥

नयुगं सकारयुगलं च भजति चरणं तृतीयकं तदुदितमुरुमतिभिर्ललितं यदि शेषमस्य खलु पूर्वतुल्यकम् ॥ ३ ॥ ॥ ॥

नयुगमिति। यदि तृतीयकं चरणं पादं नगणद्वय सगणद्वयं चास्य शेषमपरं पादत्रयं खलु निश्चितं पूर्वतुल्यकमुद्गतागतं लक्षणं भजति तदा उरुमतिभिः प्रचुरमतिभिः पंडितैस्तद्वृत्तं ललितनाम उदितमुक्तम् ॥ ३ ॥ ॥ ॥

॥ इत्युद्गताप्रकरणं समाप्तम् ॥

म्सौ ज्भौ गौ प्रथमांघ्रिरेकतः पृथ-
गन्यत् त्रितयं सनजरगास्तथा ननौ
सः त्रिनपरिकलितजयौ प्रचुपित-
मिदमुदितमुपस्थितपूर्वम् ॥ १ ॥

म्साविति मगणसगणौ जगणभगणौ द्वौ गुरू च एषः प्रथमांघ्रिश्चरणः एकतः प्रथमपादात्पृथगन्यदग्रेतनं पाद त्रितयं किं लक्षणरूपमित्याह सगणनगणजगणरगणगुरवो द्वितीये पादे। तथा ननौ द्वौ नगणौ सगणश्च तृतीये पादे। त्रयश्च ते नाश्चिनास्तैस्त्रिनैः परिकलितौ युक्तौ च तौ जयौ जगणयगणौ चतुर्थे पादे यदि भवतस्तदोपस्थितपूर्वं प्रचुपितमुपस्थितप्रचुपितंनाम छंदः इदमुदितं कथितं छंदोविद्भिरिति शेषः ॥ १ ॥

नौ पादेथ तृतीयके सनौ नसयुक्तौ
प्रथमांघ्रियति यदि प्रवर्धमानं त्रि-
तयमपरमपि पूर्वसदृशमिह भवे-
त्प्रविततमतिभिरिति गदितं खलु
वृत्तम् ॥ २ ॥

नौ पाद इति। अथानंतरं तृतीयके पादे नौ द्वौ नगणौ पुनः सगणनगणौ नगणसगणयुक्तौ यदि

स्तः अपरमन्यत् पादत्रितयमिह शास्त्रे पूर्वसदृशं पाश्चात्यछंदःसमानमपि निश्चितं भवेत् यदि प्रथमांघ्रौ यतिर्यस्मिन्तत्प्रथमांघ्रियति । प्रवितततमतिभिर्विस्तीर्णबुद्धिभिर्नरैः खलु निश्चितमित्येवंभूतं वर्धमानं छंदो गदितं कथितम् ॥ २ ॥

अस्मिन्नेव तृतीयपादके तजराः स्युः
प्रथमे च विरतिरार्षभं वदंति तच्छु-
द्धविराट्पुरस्थितं त्रितयमपरमपि
यदि पूर्वसमं स्यात् ॥ ३ ॥

अस्मिन्नेवेति। अस्मिन्नेव वर्धमानसंज्ञिके छंदसि तृतियपादके तजराः तगणजगणरगणाः स्युः प्रथमे च पादे विरतिः कार्या। अपरं पादत्रितयं यदि पूर्वसमं स्यात् बुधास्तत् शुद्धविराट्पुरस्थितमार्षभं छंदो वदंति शुद्धविराडार्षभमित्यर्थः ॥ ३ ॥ इत्युपस्थितप्रचुपितप्रकरणम् ॥

विषमाक्षरपादं वा पादैरसमं दशध-
र्मवत् ॥ यच्छंदो नोक्तमत्र गाथेति
तत्सूरिभिः प्रोक्तम् ॥ १ ॥ इति वृ-
त्तरत्नाकराख्ये छंदसि पंचमोऽध्यः ॥५॥

विषमाक्षरेति। विषमाक्षराः पादा यस्मिन् त-

द्विषमाक्षरपादं छंदः यस्येदमेव अष्टदशसप्तनवाक्षरं पादवृत्तं तथा पादैरसमं त्रिपादं षट्पादं त्रिषट्पादभेदात् दशधर्मवत्। यथा। दशधर्मं न जानंति धृतराष्ट्र निबोध तान्। मत्तः प्रमत्त उन्मत्तः श्रांतः क्रुद्धो बुभुक्षितः॥ त्वरमाणश्च भीरुश्च लुब्धः कामी च ते दश॥ इयं खलु षट्पदी गाथा। इत्येवमादि यच्छंदोत्र नोक्तं तत्पूर्वसूरिभिरित्येषा गाथा प्रोक्ता किंनाम गाथा। गीतिका कलिका वेल्लितका द्विपदी ध्रुवकौत्साहचत्वरीपद्धुलिकाप्रभृति तत्सर्वं गाथासंज्ञकम् ॥ १ ॥ इति वृत्तरत्नाकराख्ये छंदसि विषमवृत्तनिरूपणाख्यः पंचमोऽध्यायः ॥ ५ ॥ ॥ ॥ ॥

प्रस्तारो नष्टमुद्दिष्टमेकद्व्यादिलगक्रिया ॥ संख्या चैवाध्वयोगश्च षडेते प्रत्ययाः स्मृताः ॥ १ ॥

प्रथमं द्वारश्लोकमाह प्रस्तार इत्यादि। द्वाराणि अमूनि प्रस्तारः १ नष्टम् २ उद्दिष्टम् ३ एकद्व्यादिलगक्रिया ४ संख्या ५ अध्वयोगः ६ एते षट् प्रत्ययाः स्मृताः ॥ १ ॥

पादे सर्वगुरावाद्याल्लघुं न्यस्य गुरोर्धः ॥ यथोपरि तथा शेषं भूयः कुर्यादमुं विधिम् ॥ २ ॥ ॥

प्रस्तारमाह पादे सर्वेति । सर्वगुरौ पादे आद्याद्गुरोरधो लघुं न्यस्य यथा उपरि तथा शेषं समस्तमुद्धरितं भूयोभूयः पुनःपुनरप्यमुं विधिं कुर्यात् ॥ २ ॥ ॥ ॥ ॥ ॥

ऊने दद्याद्गुरूनेव यावत्सर्वलघुर्भवेत्॥ प्रस्तारोयं समाख्यातश्छंदोविचितिवेदिभिः ॥ ३ ॥ इति प्रस्तारः ॥

ऊन इति । ऊने पश्चादूने गुरूण्येव दद्यात् तावद्यावत्सर्वलघुर्भवेत् प्रस्तार्यत इति प्रस्तारः वर्णानां विस्तारो न्यासः समाख्यातः कथितः । कैः छंदसि विचीयंतेऽस्यामिति छंदोविचितिस्तां विदंतीति छंदोविचितिवेदिनस्तैः पंडितैः ॥ ॥

अथ प्रस्तारस्य स्थापनाप्रकारः ॥

ऽऽ
।

ऽऽ२
।ऽ
ऽ।
।।

ऽऽऽ
।ऽऽ
।ऽऽ
।।ऽ
ऽऽ।
।ऽ।
ऽ।।
।।।

एवं संक्षेपेणोक्त्वा विस्तारमाह । सर्वगुरौ पादे इति पादे यावंतो वर्णास्तावंतो गुरव एव लिख्यंते आदौ यथा सर्वच्छंदोजातिषु वर्णसंख्यया गुरवो

लिख्यंते। प्रथमरूपजातमेतावता तथा त्र्यक्षरे छंदसि स्थापना दृश्यते द्वितीयप्रस्ताररूपे क्रियमाणे आद्याद्गुरोरधो लघुर्न्यसनीयो यथात्रैव त्रिगुणप्रस्तारे आद्यगुरोरधो लघुरस्ति. तस्माद्विन्यस्तलघोरग्रतः यथोपरितनप्रस्तारे तथैव कर्त्तव्यं। यत्रोपरि गुरुस्तत्राप्यधो गुरुः यत्रोपरि लघुस्तत्राधोपि लघुः यत्र प्रस्तारे उपरि द्वौ गुरू अधोपि तथैव भूयो भूयः अमुमेव विधिं कुर्यात् यद्युपरितनप्रस्तारे आदौ लघुर्द्वितीयो गुरुस्तदा तस्माद्द्वितीयादधो लघुर्न्यस्यते अग्रतो यथोपरि तथा शेषविधिः कार्यः ऊने दद्याद्गुरूण्येव यत्पूर्वं पाश्चात्यमूनं स्थानं तत्र गुरुर्दीयते अथ तृतीयाद्गुरोरधो लघुस्ततः पूर्वं द्वे गुरुणी दीयेते यद्वा चतुर्थाद्गुरोरधः यदि लघुः स्यात् तदा त्रीणि ऊनस्थाने दीयंते। एवं तावन्मात्रः कार्यो यावत्सर्वलघुः प्रस्तारो भवेत्॥ इति प्रस्तारविधिः॥ तथा चतुर्थवर्णप्रस्तारे षोडश रूपाणि लभ्यंते। स्थापना लिखितैवास्ति एवं वृत्ते यावंतो वर्णास्तावानयं प्रस्तारोपि कर्तव्यः॥ ३ ॥ ॥ ॥ ॥

नष्टस्य यो भवेदंकस्तस्यार्धेऽर्धे स-
मे च लः॥ विषमे चैकमादाय तदर्धे-
ऽर्धे गुरुर्भवेत्॥ इति नष्टं समाप्त॥

उद्दिष्टं द्विगुणानाद्यादुपर्यंकान् स-
मालिखेत् ॥ लघुस्था ये तु तत्रांका-
स्तैः सैकैर्मिश्रितैर्भवेत् ॥ १ ॥ इति
उद्दिष्टं समाप्तम् ॥ ॥ ॥

नष्टमाह नष्टस्येति । नष्टस्य गतरूपस्य योऽकः तस्यांकस्य समेऽर्धे कृते लो लघुर्लभ्यते च पुनर्विषमे एकमादाय मध्ये निक्षिप्य अर्धे कृते तदर्धे गुरुर्भवेदित्यन्वयार्थः । यथा केनापि पृष्टस्य वृत्तस्य त्र्यक्षरजातिकस्य प्रस्तारे चतुर्थरूपं कीदृशं स्यात् । नष्टस्य चतुर्थरूपोंकः समो भवति तस्य समांकस्यार्धे कृते लघुर्लभ्यते पुनरुद्वरितौ द्वौ समौ तयोरर्धे कृतेपि लघुर्लभ्यते तत उद्वरितः एको विषमः विषमो भागं न दत्ते ततो विषमे चैकमादाय एकमध्ये क्षिप्त्वा विषमः समः कार्यः सोप्येको विषमः सैकः सन् द्वौ जातौ तदर्धे तस्य विषमांकस्य समीकृतस्यार्धे गुरुरेव लभ्यते । एवं तावत्कर्तव्यं यावत्पादाक्षरप्रमाणं लभ्यते ततस्त्र्यक्षरे छंदसि चतुर्थे रूपम् ॥ ऽ ईदृशं भवति पुनः केनापि पृष्टं चतुरक्षरे छंदसि पंचमं रूपं कीदृशं भवति । पंच विषमास्ते सैका जाताः षट् तदर्धे विषमत्वाद्गुरुः प्राप्यते। पुनस्त्रयो विषमाः सैका जाताश्चत्वारस्तदर्धे च गुरुर्लभ्यते । उद्वरितौ

द्वौ समौ तदर्धेपि च लघुःप्राप्तःपुनरुद्धरित एकोऽस्य विषमस्यार्धं न भवति ततः एकमादायार्धे कृते गुरुः प्राप्तः ततश्चतुरक्षरे छंदसि पंचमं रूपम् ऽऽ।ऽ ईदृशं भवति इत्याम्नायः ॥ १ ॥ इति नष्टविधिः । उद्दिष्टमाह । उद्दिष्टमिति । कोऽर्थः केनापि पट्टके रूपं लिखित्वा कियत्तमं रूपमिदमिति पृच्छति । इदमुद्दिष्टमुच्यते उद्दिष्टा यावंतो वर्णा लिखिताः संति तेषां मध्य आद्यमक्षरमादौ कृत्वा सर्वेषामुपरि द्विगुणितानंकान् समालिखेत् आद्यवर्णस्य मस्तके एकैको लेख्यः ततः स्थानद्विगुणिताः अंकाः शिरसि लेख्याः । कथं द्वितीयवर्णस्योपरि द्विकस्त्रितीयवर्णस्योपरि चतुष्ककः चतुर्थवर्णस्योपरि अष्टको देयः पंचमवर्णस्योपरि षोडश देयाः षष्ठवर्णस्योपरि द्वात्रिंशदंका देयाः एवं तावद्यावदंत्यवर्णोपर्यंकः स्यात्तत्र येंऽका गुरुरूपोपरि लिखिताः संति तैर्न कार्यम् । लघुस्थाः लघुवर्णोपर्यपि येंकास्तत्र ते एकतो मूल्यंते एकीकृत्य पुनरेको मध्ये क्षिप्यते ततस्तैर्लघुस्थैरंकर्मिश्रितैरेकीकृतैः सैकैरेकसहितैर्यावदंको भवेत्तावत्तममिदं रूपमिति वक्तव्यम् ॥ १ ॥ इत्युद्दिष्टस्याम्नायः समाप्तः ॥ ॥ ॥ ॥

वर्णान् वृत्तभवान् सैकानुत्तराधरतः

स्थितान् ॥ एकादिक्रमशश्चैतानुपर्युपरि निक्षिपेत् ॥ १ ॥ उपांत्यतो निवर्तेत त्यजेदेकैकमूर्ध्वतः ॥ उपर्याद्याद्गुरोरेवमेकद्व्यादिलगक्रिया ॥ ॥ २ ॥ इत्येकद्व्यादिलगक्रिया ॥ २ ॥

एकद्व्यादिलगक्रियार्थमाह ॥ वर्णानिति ॥ यावंतो वृत्तभवा वर्णास्तावंतः सैकान् एकसहितान् अधऊर्ध्वस्थितान् कृत्वादिक्रमेण एतानुपरि उपरि निक्षिपेत् उपांत्यतः समीपान्निवर्तेत व्याघटेत ऊर्ध्वतः एकैकं त्यजेत् । उपरि आद्यादिलगक्रिया भवंतीत्यन्वयः ॥ विस्तरमाह ॥ छंदोविद्भिर्वृत्तभवान् यस्मिन् पादे यावंतो वर्णास्तावंत एकका लिख्यंते सैकान् तन्मध्ये एकः पुनर्लिख्यते उत्तराधरतः अधऊर्ध्वस्थिता लिख्यंते । चतुरक्षरपादजातौ स्थापना एतानेकादिक्रमेण उपरि उपरि निक्षिपेत् । तावत् यावत् उपांत्यं ततः उपांत्यान्निवर्तेत उपांत्यं त्यजेदित्यर्थः । एकमेकमुपरि ऊर्ध्वतस्त्यजन् । आद्याद्गुरोरिति भावार्थमाह । चतुक्षरे छंदसि आद्यमेकं वृत्तं सर्वगुरुर्भवति चत्वारि त्रिगुरूणि भवंति । षट् रूपाणि द्विगुरूणि भवंति एकं सर्वलघु रूपं भवति कथमित्याह ॥ ये अध ऊर्ध्व-

पंच एकका्स्तत्र प्रथम एको द्वितीये एकके क्षिप्यो ते तौ द्वौ जातौ तौ च तृतीयैकके क्षिप्येते ते त्रयो जाताः ते च चतुष्कैकके क्षिप्यंते जत्वारो जाताः पाश्चात्योंकः एकः कुत्रापि न लुप्यते ततः उपर्यं- कमेकं त्यजन् निवर्तेत ततः पुनरपि प्रथम एको द्वितीये द्वितीयके क्षिप्यते ते त्रयो जाताः ते च तृतीये त्रिके क्षिप्यंते षट् जाताः तत उपर्यंकं च- तुष्कं त्यजन्निवर्तेत। तत्र प्रथमांके सर्वगुरुप्रमाणं ततः पुनरपि प्रथमैको द्वितीये त्रिके क्षिप्यते च- त्वारो जाताः ततः उपर्यंकं षट्कं त्यजन्निवर्तेत ततश्चतुष्कः पाश्चात्योंकः स कुत्रापि न लुप्यते ततः उपर्यंकं त्यजन्निवर्तेत तत्र प्रथमांके सर्व- गुरुप्रमाणं द्वितीयांके त्रिगुरुप्रमाणं तृतीयांके द्विगुरुप्रमाणं चतुर्थांके एकगुरुप्रमाणं पंचमांके सर्वलघुप्रमाणं चोर्ध्वतो ज्ञातव्यम्। अधस्ताच्च प्र- थमांके सर्वलघुप्रमाणं द्वितीयांके त्रिलघुप्रमाणं तृतीयांके द्विलघुप्रमाणं चतुर्थांके एकलघुप्रमाणं चरमांके सर्वगुरुप्रमाणं च ज्ञातव्यम्॥ १॥ २॥
इति एकद्व्यादिलगक्रिया ॥ ॥ ॥

लगक्रियांकसंदोहे भवेत्संख्याविमि-
श्रिते॥ उद्दिष्टांकसमाहारः सैको वा
जनयेदिमाम् ॥ १॥ इति संख्या॥

संख्यामाह लगक्रियांकेति । लगक्रियांकसंदोहे एकद्व्यादिलगक्रियायाः अंकसमूहे विमिश्रिते एकतो मिलिते तद्वृत्तप्रस्ताररूपसंख्यामिलितोंकः स यथा । चतुरक्षरजातौ एकश्चत्वारः षट् चत्वार एकश्चैते लगक्रियांका भवंति एतेषां लगक्रियांकानां मिश्रीभावे षोडश भवंति ते षोडश एव संख्या चतुरक्षरजातेः प्रस्तारस्य । पक्षांतरमाह । वाथवा उद्दिष्टांकसमाहारः उद्दिष्टवृत्तवर्णशिरसि येंकास्तेषामेकीभावः पुनरेकरहितः इमां संख्यां जनयेत् तथा चतुरक्षरे छंदसि द्विगुणैरंकैरारोप्यमाणैः पंचदश भवंति तैः सैकैः षोडश ॥ १ ॥

संख्यैव द्विगुणैकोना सद्भिरध्वा प्रकीर्तितः ॥ वृत्तस्यांगुलिकीं व्याप्तिमधः कुर्यादथांगुलिम् ॥ १ ॥ इत्यध्वा ॥

अध्वानमाह संख्यैवेति । चतुरक्षरजातौ षोडश संख्यैव सा द्विगुणा द्वात्रिंशदेकोना एकत्रिंशद्भवति स सद्भिरध्वा वृत्तस्थानमार्गः कथितः कथं । वृत्तस्य वर्णांगुलिकीं अंगुलिपरिमाणां व्याप्तिं स्थानभूमिं कुर्यात् तथा द्वयोः प्रस्तारयोरंतराले एकमेवांगुलं कुर्यात् एकत्रिंशदंगुलायां भुवि एवं चतुरक्षरं छंदः प्रस्तार्यते अध ऊर्ध्वप्रमा-

णमिदं न तु दीर्घतायाः प्रमाणं तत्र प्रमाणाभावात् ॥ १ ॥ इत्यध्वा ॥ एते षट् प्रत्ययाः ॥

वंशे भूत्काश्यपस्य प्रकटगुणगणः शैवसिद्धांतवेत्ता विप्रः पव्येकनामा विमलतरमतिर्वेदतत्त्वावबोधे ॥
केदारस्तस्य सूनुः शिवचरणयुगाराधनैकाग्रचित्तश्छन्दस्तेनाभिरामं
प्रविरचितमिदं वृत्तरत्नाकराख्यम् ॥
॥ १ ॥ इति श्रीभट्टकेदारविरचिते वृत्तरत्नाकराख्ये छंदःशास्त्रे प्रस्तारप्रकरणं समाप्तम् ॥ ॥ ॥

वंशेभूदिति । पव्येकनामा विप्रः काश्यपस्य वंशेऽभूत् किंभूतो विप्रः प्रकटगुणगणः पुनः किंभूतः शैवसिद्धांतवेत्ता पुनः किंभूतः वेदतत्त्वावबोधे विमलतरमतिः तस्य पव्येकस्य केदारः सूनुः किंभूतः केदारः शिवचरणयुगाराधनैकाग्रचित्तः तेन केदारेण इदं वृत्तरत्नाकराख्यं छंदः प्रविरचितं किंभूतं छंदः अभिरामम् ॥ १ ॥ इति वृत्तरत्नाकराख्यछंदसो व्याख्या समाप्ता ॥ ॥

॥ समाप्तं ॥

ईशा-केन-कठ-प्रश्न-मुण्ड-माण्डुक्योपनिषदां

षस्नां मूलम् ।



आशियाटिक् सोसायिटीप्रकाशितपुस्तकमवलम्ब्य

श्री केदारनाथ वन्द्योपाध्यायेन

प्रकाशितम् ।



कलिकाता ।

नूतन संस्कृतयन्त्रे

श्री हरिमोहन मुखोपाध्यायेन

मुद्रितम् ।



सन १२८० साल ।



ईशा-केन-कठ-प्रश्न-मुण्ड-माण्डुक्योपनिषदां

षण्णां मूलम् ।



आशियाटिक् सोसायिटीप्रकाशितपुस्तकमवलम्ब्य

श्री केदारनाथ वन्द्योपाध्यायेन

प्रकाशितम् ।



कलिकाता ।

नूतन संस्कृतयन्त्रे

श्री हरिमोहन मुखोपाध्यायेन

मुद्रितम् ।



सन १२८० साल ।



ॐ परमात्मने नमः ॥

॥ ॐ ॥ वाजसनेयसंहितोपनिषत् ॥

ईशावास्यमिदꣳ सर्व्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनं ॥ १ ॥
कुर्व्वन्नेवेह कर्म्माणि जिजीविषेच्छतꣳ समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म्म लिप्यते नरे ॥ २ ॥
असुर्य्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥ ३ ॥
अनेजदेकम्मनसो जवीयो नैनद्देवा आप्नुवन् पूर्व्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति॥ ४॥
तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्व्वस्य तदु सर्व्वस्यास्य वाह्यतः ॥ ५ ॥
यस्तु सर्व्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्व्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥ ६ ॥
यस्मिन् सर्व्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥ ७ ॥

स पर्य्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धं ।
कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः॥ ८ ॥

अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायाꣳ रताः ॥ ९ ॥

अन्यदेवाहुर्विद्ययाऽन्यदेवाहुरविद्यया इति
शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १० ॥

विद्याञ्चाविद्याञ्च यस्तद्वेदोभयꣳ सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥ ११ ॥

अन्धन्तमः प्रविशन्ति येऽसम्भूतिमुपासते ।
ततो भूय इव ते तमो य उ सम्भूत्याꣳ रताः ॥ १२ ॥

अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात् ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १३ ॥

सम्भूतिञ्च विनाशञ्च यस्तद्वेदोभयꣳ सह ।
विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुते ॥ १४ ॥

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत्त्वम्पूषन्नपावृणु सत्यधर्म्माय दृष्टये ॥ १५ ॥

पूषन्नेकर्षे यम सूर्य्य प्राजापत्य व्यूह रश्मीन् समूह ।
तेजो यत्ते रूपङ्कल्याणतमन्तत्ते पश्यामि योऽसावसौ पुरुषः सोऽहमस्मि ॥ १६ ॥

वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरं ।

ॐ क्रतो स्मर कृतꣳ स्मर क्रतो स्मर कृतꣳ स्मर ॥ १७ ॥

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नमउक्तिं विधेम ॥ १८ ॥

इति वाजसनेयसंहितोपनिषत्सम्पूर्णा ॥

ॐ तत्सत् ॥

सामवेदीयतलवकारोपनिषत् ॥

ॐ केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः । केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति ॥ १ ॥

श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणश्चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति॥ २ ॥

न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनो न विद्मो न विजानीमो यथैतदनुशिष्यादन्यदेव तद्विदितादथो अविदितादधि । इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे ॥ ३ ॥

यद्वाचानभ्युदितं येन वागभ्युद्यते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ४ ॥

यन्मनसा न मनुते येनाहुर्मनो मतं ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ५ ॥

यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ६ ॥

यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतं ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते । ॥ ७ ॥

घ्राणेन
यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ८ ॥

इति प्रथमः खण्डः ॥ १ ॥

यदि मन्यसे सुवेदेति दहृमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपं यदस्य त्वं यदस्य देवेष्वथ नु मीमांस्यमेव ते मन्ये विदितं ॥ ९ ॥ १ ॥

नाहं मन्ये सुवेदेति नो न वेदेति वेद च ।
यो नस्तद्वेद तद्वेद नो न वेदेति वेद च ॥ १० ॥ २ ॥

यस्यामतं तस्य मतं मतं यस्य न वेद सः ।
अविज्ञातं विजानतां विज्ञातमविजानतां ॥ ११ ॥ ३ ॥

प्रतिबोधविदितं मतममृतत्वं हि विन्दते ।
आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतं ॥ १२ ॥ ४ ॥

इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती

विनष्टिः । भूतेषु भूतेषु विचिन्त्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति ॥ १३ ॥ ५ ॥

द्वितीयः खण्डः ॥ २ ॥

ब्रह्म ह देवेभ्यो विजिग्ये तस्य ह ब्रह्मणो विजये देवा अमहीयन्त त ऐक्षन्तास्माकमेवायंविजयोऽस्माकमेवायं महि-मेति ॥ १४ ॥ १ ॥ तद्धैषां विजज्ञौ तेभ्यो ह प्रादुर्बभूव तन्न व्यजानन्त किमिदं यक्षमिति ॥ १५ ॥ २ ॥

तेऽग्निमब्रुवन् जातवेद एतद्विजानीहि किमेतद्यक्षमिति तथेति ॥ १६ ॥ ३ ॥ तदभ्यद्रवत्तमभ्यवदत् कोऽसीति अग्निर्वा-ऽहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीति ॥ १७ ॥ ४ ॥ तस्मिं-स्त्वयि किं वीर्य्यमित्यपीदꣳ सर्व्वं दहेयं यदिदं पृथिव्यामिति ॥ १८ ॥ ५ ॥ तस्मै तृणं निदधावेतद्दहेति तदुपप्रेयाय सर्व्व-जवेन तन्न शशाक दग्धुं स तत एव निववृते नैतदशकं विज्ञातुं यदेतद्यक्षमिति ॥ १९ ॥ ६ ॥

अथ वायुमब्रुवन् वायवेतद्विजानीहि किमेतद्यक्षमिति तथेति ॥ २० ॥ ७ ॥ तदभ्यद्रवत्तमभ्यवदत्कोऽसीति वायुर्वा अहमस्मीत्यब्रवीन्मातरिश्वा वा अहमस्मीति ॥ २१ ॥ ८ ॥ तस्मिंस्त्वयि किं वीर्य्यमित्यपीदꣳ सर्व्वमाददीयं यदिदं पृथि व्यामिति ॥ २२ ॥ ९ ॥ तस्मै तृणं निदधावेतदादत्स्वेति तदुप-प्रेयाय सर्व्वजवेन तन्न शशाकादातुं स तत एव निववृते नैत

दशकं विज्ञातुं यदेतद्यक्षमिति ॥ २३ ॥ १० ॥ अथेन्द्रमब्रुवन्मघवन्नेतद्विजानीहि किमेतद्यक्षमिति तथेति तदभ्यद्रवत्तस्मात्तिरोदधे ॥ २४ ॥ ११ ॥ स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीं ताꣳ होवाच किमेतद्यक्षमिति ॥ २५ ॥ १२ ॥

तृतीयः खण्डः समाप्तः ॥ ३ ॥

सा ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये महीयध्वमिति ततो हैव विदाञ्चकार ब्रह्मेति ॥ २६ ॥ १ ॥ तस्माद्वा एते देवा अतितरामिवान्यान्देवान् यदग्निर्वायुरिन्द्रस्ते ह्येनन्नेदिष्ठं पस्पर्शुस्ते ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति ॥ २७ ॥ २ ॥ तस्माद्वा इन्द्रोऽतितरामिवान्यान् देवान् स ह्येनन्नेदिष्ठं पस्पर्श स ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति ॥ २८ ॥ ३ ॥

तस्यैष आदेशो यदेतद्विद्युतो व्यद्युतदा इतीति न्यमीमिषदा इत्यधिदैवतं ॥ २९ ॥ ४ ॥

अथाध्यात्मं यदेतद्गच्छतीव च मनोऽनेन चैतदुपस्मरत्यभीक्ष्णं सङ्कल्पः ॥ ३० ॥ ५ ॥ तद्ध तद्वनं नाम तद्वनमित्युपासितव्यं स य एतदेवं वेदाऽभि हैनं सर्वाणि भूतानि संवाञ्छन्ति ॥ ३१ ॥ ६ ॥

उपनिषदं भो ब्रूहीत्युक्ता त उपनिषद्ब्राह्मीं वाव त उपनिषदमब्रूमेति ॥ ३२ ॥ ७ ॥ तस्यै तपो दमः कर्मेति प्रतिष्ठा

वेदाः सर्व्वाङ्गानि सत्यमायतनं ॥ ३३ ॥ ८ ॥ यो वा एतामेवं वेदापहत्य पाप्मानमनन्ते स्वर्गे लोके ज्येये प्रतितिष्ठति प्रतितिष्ठति ॥ ३४ ॥ ६ ॥ इति चतुर्थः खण्डः समाप्तः ॥ ४ ॥

इति सामवेदीयतलवकारोपनिषत्समाप्ता ॥ ॐ तत्सत् ॥

ॐ तत्सत् ॥

यजुर्व्वेदीयकठोपनिषत् ।

॥ ॐ ॥ उशन् ह वै वाजश्रवसः सर्व्ववेदसन्ददौ । तस्य ह नचिकेता नाम पुत्र आस ॥ १ ॥ तꣳ ह कुमारꣳ सन्तं दक्षिणासु नीयमानासु श्रद्धाऽऽविवेश सोऽमन्यत ॥ २ ॥

पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः । अनन्दा नाम ते लोकास्तान् स गच्छति ता ददत् ॥ ३ ॥ स होवाच पितरं तत कस्मै मान्दास्यसीति । द्वितीयं तृतीयन्तꣳ होवाच मृत्यवे त्वा ददामीति ॥ ४ ॥ बहूनामेमि प्रथमो बहूनामेमि मध्यमः । किꣳ स्विद्यमस्य कर्त्तव्यं यन्मयाद्य करिष्यति ॥ ५ ॥

अनुपश्य यथा पूर्व्वे प्रतिपश्य तथापरे । सस्यमिव मर्त्त्यः पच्यते सस्यमिवाजायते पुनः ॥ ६ ॥ वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान् । तस्यैताꣳ शान्तिं कुर्व्वन्ति हर वैवस्वतोदकं ॥ ७ ॥ आशाप्रतीक्षे सङ्गतꣳ सूनृताञ्चेष्टापूर्त्ते पुत्रपशूꣳश्च सर्व्वान्। एतद्वृङ्क्ते पुरुषस्याल्पमेधसो यस्यानश्नन् वसति ब्राह्मणो गृहे ॥ ८ ॥

तिस्रो रात्रीर्यदवात्सीर्गृहे मेऽनश्नन् ब्रह्मन्नतिथिर्नमस्यः।
नमस्तेऽस्तु ब्रह्मन् स्वस्ति मेऽस्तु तस्मात्प्रति त्रीन् वरान्
वृणीष्व ॥ ९ ॥ शान्तसङ्कल्पः सुमना यथा स्याद्वीतमन्युर्गौतमो
माभिमृत्यो। त्वत्प्रसृष्टं माभिवदेत् प्रतीत एतत्त्रयाणां प्रथमं
वरं वृणे ॥ १० ॥ यथा पुरस्ताद्भविता प्रतीत औद्दालकिरा-
रुणिर्मत्प्रसृष्टः। सुखꣳ रात्रीः शयिता वीतमन्युस्त्वां ददृशि-
वान्मृत्युमुखात्प्रमुक्तं ॥ ११ ॥

स्वर्गे लोके न भयं किञ्च नास्ति न तत्र त्वं न जरया
बिभेति। उभे तीर्त्वाऽशनायापिपासे शोकातिगो मोदते
स्वर्गलोके ॥ १२ ॥ स त्वमग्निꣳ स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तꣳ
श्रद्दधानाय मह्यं। स्वर्गलोका अमृतत्वं भजन्त एतद्द्वितीयेन
वृणे वरेण ॥ १३ ॥ प्र ते ब्रवीमि तदु मे निबोध स्वर्ग्यमग्नि-
न्नचिकेतः प्रजानन्। अनन्तलोकाप्तिमथो प्रतिष्ठां विद्धि त्वमे-
तन्निहितं गुहायां ॥ १४ ॥

लोकादिमग्निन्तमुवाच तस्मै या इष्टका यावतीर्वा यथा
वा। स चापि तत्प्रत्यवदद्यथोक्तमथास्य मृत्युः पुनरेवाह
तुष्टः ॥ १५ ॥ तमब्रवीत्प्रीयमाणो महात्मा वरन्तवेहाद्य
ददामि भूयः। तवैव नाम्ना भविताऽयमग्निः सृङ्काञ्चेमा-
मनेकरूपाङ्गृहाण ॥ १६ ॥

त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं त्रिकर्म्मकृत्तरति जन्ममृत्यू।

ब्रह्मजज्ञन्देवमीड्यं विदित्वा निचाय्येमाꣳ शान्तिमत्यन्तमेति
॥ १७ ॥ त्रिणाचिकेतस्त्रयमेतद्विदित्वा य एवं विद्वाꣳश्चिनुते
नाचिकेतं । स मृत्युपाशान् पुरतः प्रणोद्य शोकातिगो मोदते
स्वर्गलोके ॥ १८ ॥ एष तेऽग्निर्नचिकेतः स्वर्ग्योयमवृणीथा
द्वितीयेन वरेण । एतमग्निं तवैव प्रवक्ष्यन्ति जनासस्तृतीयं
वरन्नचिकेतो वृणीष्व ॥ १९॥

येयम्प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके ।
एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीयः ॥ २० ॥
देवैरत्रापि विचिकित्सितं पुरा न हि सुविज्ञेयमणुरेष धर्म्मः ।
अन्यं वरं नचिकेतो वृणीष्व मा मोपरोत्सीरति मा
सृजैनं ॥ २१ ॥

देवैरत्रापि विचिकित्सितं किल त्वञ्च मृत्यो यन्न सुवि-
ज्ञेयमात्थ । वक्ता चास्य त्वादृगन्यो न लभ्यो नान्यो वरस्तुल्य
एतस्य कश्चित् ॥ २२ ॥ शतायुषः पुत्रपौत्रान् वृणीष्व बहून् पशून्
हस्तिहिरण्यमश्वान् । भूमेर्महदायतनं वृणीष्व स्वयञ्च जीव
शरदो यावदिच्छसि ॥ २३॥ एतत्तुल्यं यदि मन्यसे वरं वृणीष्व
वित्तं चिरजीविकाञ्च । महाभूमौ नचिकेतस्त्वमेधि कामा-
नान्त्वा कामभाजं करोमि ॥ २४ ॥

ये ये कामा दुर्लभा मर्त्त्यलोके सर्व्वान् कामाꣳश्छन्दतः
प्रार्थयस्व । इमा रामाः सरथाः सतूर्य्या नहीदृशा लम्भनीया

मनुष्यैः । आभिर्मत्प्रत्ताभिः परिचारयस्व नचिकेतो मरणं मानुप्राक्षीः ॥ २५ ॥ श्वोभावा मर्त्यस्य यदन्तकैतत् सर्वेन्द्रियाणां जरयन्ति तेजः । अपि सर्वं जीवितमल्पमेव तवैव वाहास्तव नृत्यगीते ॥ २६ ॥ न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वित्तमद्राक्ष्म चेत्त्वा । जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयः स एव ॥ २७ ॥

अजीर्यताममृतानामुपेत्य जीर्यन्मर्त्यः क्वधःस्थः प्रजानन् । अभिध्यायन् वर्णरतिप्रमोदानतिदीर्घे जीविते को रमेत ॥ २८ ॥ यस्मिन्निदं विचिकित्सन्ति मृत्यो यत्साम्पराये महति ब्रूहि नस्तत् । योऽयं वरो गूढमनुप्रविष्टो नान्यन्तस्मान्नचिकेता वृणीते ॥ २९ ॥ इति प्रथमा वल्ली ॥ १ ॥

अन्यच्छ्रेयोऽन्यदुतैव प्रेयस्ते उभे नानार्थे पुरुषꣳ सिनीतः । तयोः श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते ॥ १ ॥ श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः । श्रेयो हि धीरोऽभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद्वृणीते ॥ २ ॥

स त्वं प्रियान् प्रियरूपाꣳश्च कामानभिध्यायन्नचिकेतोऽत्यस्राक्षीः । नैताꣳ सृङ्कां वित्तमयीमवाप्तो यस्यां मज्जन्ति बहवो मनुष्याः ॥ ३ ॥ दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता । विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा

कामा बहवो लोलुपन्ता ॥ ४ ॥ अविद्यायामन्तरे वर्त्तमानाः स्वयन्धीराः पण्डितम्मन्यमानाः । दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथाऽन्धाः ॥ ५ ॥

न साम्परायः प्रतिभाति बालम्प्रमाद्यन्तं वित्तमोहेन मूढं । अयं लोको नास्ति पर इति मानी पुनः पुनर्व्वशमापद्यते मे ॥ ६ ॥ श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यन्न विद्युः । आश्चर्यो वक्ता कुशलोऽस्य लब्धाऽऽश्चर्यो ज्ञाता कुशलानुशिष्टः ॥ ७ ॥ न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिन्त्यमानः । अनन्यप्रोक्ते गतिरत्र नास्त्यणीयान् ह्यतर्क्यमणुप्रमाणात् ॥ ८ ॥ नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ । यान्त्वमापः सत्यधृतिर्बतासि त्वादृङ्नो भूयान्नचिकेतः प्रष्टा ॥ ९ ॥

जानाम्यहं शेवधिरित्यनित्यं न ह्यध्रुवैः प्राप्यते हि ध्रुवन्तत् । ततो मया नाचिकेतश्चितोऽग्निरनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यं ॥ १० ॥ कामस्याप्तिं जगतः प्रतिष्ठां क्रतोरनन्त्यमभयस्य पारं । स्तोममहदुरुगायम्प्रतिष्ठान्दृष्ट्वा धृत्या धीरो नचिकेतोऽत्यस्राक्षीः ॥ ११ ॥

तन्दुर्दर्शङ्गूढमनुप्रविष्टं गुहाहितङ्गह्वरेष्ठम्पुराणं । अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ॥ १२ ॥ एतच्छ्रुत्वा सम्परिगृह्य मर्त्यः प्रवृह्य धर्म्यमणुमेतमाप्य । स

मोदते मोदनीयꣳ हि लब्ध्वा विवृतꣳ सद्म नचिकेत सम्मन्ये
॥ १३ ॥ अन्यत्र धर्म्मादन्यत्राधर्म्मादन्यत्रास्मात्कृताकृतात् ।
अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वद ॥ १४ ॥

सर्व्वे वेदा यत्पदमामनन्ति तपाꣳसि सर्व्वाणि च यद्व-
दन्ति । यदिच्छन्तो ब्रह्मचर्य्यञ्चरन्ति तत्ते पदꣳ सङ्ग्रहेण
ब्रवीम्योमित्येतत् ॥ १५ ॥ एतद्ध्येवाक्षरम्ब्रह्म एतद्ध्येवाक्षर-
म्परं । एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥ १६ ॥
एतदालम्बनꣳ श्रेष्ठमेतदालम्बनम्परं । एतदालम्बनं ज्ञात्वा
ब्रह्मलोके महीयते ॥ १७ ॥

न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव
कश्चित् । अजो नित्यः शाश्वतोऽयम्पुराणो न हन्यते हन्य-
माने शरीरे ॥ १८ ॥

हन्ता चेन्मन्यते हन्तुꣳ हतश्चेन्मन्यते हतं । उभौ तौ न
विजानीतो नायꣳ हन्ति न हन्यते ॥ १९ ॥ अणोरणीया-
न्महतो महीयानात्मास्य जन्तोर्निहितो गुहायां । तमक्रतुः
पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः ॥ २० ॥

आसीनो दूरं व्रजति शयानो याति सर्व्वतः ।
कस्तम्मदामदन्देवं मदन्यो ज्ञातुमर्हति ॥ २१ ॥

अशरीरꣳ शरीरेष्वनवस्थेष्ववस्थितं । महान्तं विभुमा-
त्मानं मत्वा धीरो न शोचति ॥ २२ ॥ नायमात्मा प्रवचनेन

लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनूꣳ स्वां ॥ २३ ॥

नाविरतो दुश्चरितान्नाशान्तो नासमाहितः। नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् ॥ २४ ॥ यस्य ब्रह्म च क्षत्रञ्च उभे भवत ओदनं। मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ॥ २५ ॥ इति काठोपनिषदि द्वितीया वल्ली ॥ २ ॥

ऋतं पिबन्तौ सुकृतस्य लोके गुहाम्प्रविष्टौ परमे परार्द्धे। छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः ॥ १ ॥

यः सेतुरीजानानामक्षरम्ब्रह्म यत्परं।
अभयं तितीर्षताम्पारं नाचिकेतꣳ शकेमहि ॥ २ ॥
आत्मानꣳ रथिनं विद्धि शरीरꣳ रथमेव तु।
बुद्धिन्तु सारथिं विद्धि मनः प्रग्रहमेव च ॥ ३ ॥
इन्द्रियाणि हयानाहुर्विषयाꣳस्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥ ४ ॥
यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सदा।
तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥ ५ ॥
यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा।
तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥ ६ ॥

यस्त्वविज्ञानवान् भवत्यमनस्कः सदाऽशुचिः ।
न स तत्पदमाप्नोति सꣳसारञ्चाधिगच्छति ॥ ७ ॥
यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः ।
स तु तत्पदमाप्नोति यस्माद्भूयो न जायते ॥ ८ ॥
विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः ।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमम्पदं ॥ ९ ॥
इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।
मनसश्च परा बुद्धिर्बुद्धेरात्मा महान् परः ॥ १० ॥
महतः परमव्यक्तमव्यक्तात् पुरुषः परः ।
पुरुषान्न परं किञ्चित्सा काष्ठा सा परागतिः ॥ ११ ॥
एष सर्व्वेषु भूतेषु गूढोत्मा न प्रकाशते ।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥ १२ ॥
यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि ।
ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि ॥ १३ ॥

उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत । क्षुरस्य धारा
निशिता दुरत्यया दुर्गम्पथस्तत्कवयो वदन्ति ॥ १४ ॥ अशब्दम-
स्पर्शमरूपमव्ययं तथाऽरसन्नित्यमगन्धवच्च यत् । अनाद्यनन्त-
म्महतः परन्ध्रुवं निचाय्य तन्मृत्युमुखात्प्रमुच्यते॥ १५ ॥ नाचिके-
तमुपाख्यानं मृत्युप्रोक्तꣳ सनातनं । उक्त्वा श्रुत्वा च मेधावी
ब्रह्मलोके महीयते॥ १६ ॥ य इमं परमं गुह्यं श्रावयेद्ब्रह्मसंसदि ।

प्रयतः श्राद्धकाले वा तदानन्त्याय कल्पते तदानन्त्यायकल्पत इति ॥१७॥ इति प्रथमाध्याये तृतीया वल्ली ॥ ३ ॥ इतिप्रथमोऽध्यायः समाप्तः ॥

पराञ्चि खानि व्यतृणत्स्वयम्भूस्तस्मात्पराङ् पश्यति नान्तरात्मन् । कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ॥ १ ॥

पराचः कामाननुयन्ति बालास्ते मृत्योर्यन्ति विततस्य पाशं। अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयन्ते ॥ २ ॥

येन रूपं रसं गन्धं शब्दान् स्पर्शांश्च मैथुनान् । एतेनैव विजानाति किमत्र परिशिष्यते । एतद्वैतत् ॥ ३ ॥

स्वप्नान्तं जागरितान्तञ्चोभौ येनानुपश्यति । महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥ ४ ॥ य इमं मध्वदं वेद आत्मानं जीवमन्तिकात् । ईशानम्भूतभव्यस्य न ततो विजुगुप्सते । एतद्वैतत् ॥ ५ ॥ यः पूर्वन्तपसो जातमद्भ्यः पूर्वमजायत। गुहां प्रविश्य तिष्ठन्तं यो भूतेभिर्व्यपश्यत । एतद्वैतत् ॥ ६ ॥

या प्राणेन सम्भवत्यदितिर्देवतामयी। गुहां प्रविश्य तिष्ठन्तीं या भूतेभिर्व्यजायत। एतद्वैतत् ॥ ७॥ अरण्योर्निहितो जातवेदा गर्भ इव सुभृतो गर्भिणीभिः। दिवे दिव

ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः । एतद्वै तत् ॥ ८ ॥ यतश्चोदेति सूर्य्योऽस्तं यत्र च गच्छति । तन्देवाः सर्व्वेऽर्पितास्तदु नात्येति कश्चन । एतद्वै तत् ॥ ९ ॥

यदेवेह तदमुत्र यदमुत्र तदन्विह । मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ १० ॥

मनसैवेदमाप्तव्यन्नेह नानास्ति किञ्चन । मृत्योः स मृत्युङ्गच्छति य इह नानेव पश्यति ॥ ११ ॥ अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति । ईशानो भूतभव्यस्य न ततो विजुगुप्सते । एतद्वै तत् ॥ १२ ॥ अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाऽधूमकः । ईशानो भूतभव्यस्य स एवाद्य स उ श्वः । एतद्वै तत् ॥ १३ ॥

यथोदकन्दुर्गे वृष्टम्पर्व्वतेषु विधावति एवं धर्म्मान् पृथक् पश्यंस्तानेवानुविधावति ॥ १४ ॥ यथोदकं शुद्धे शुद्धमासिक्तन्तादृगेव भवति । एवम्मुनेर्विजानत आत्मा भवति गौतम ॥ १५ ॥ इति चतुर्थी वल्ली समाप्ता ॥ ४ ॥

पुरमेकादशद्वारमजस्यावक्रचेतसः । अनुष्ठाय न शोचति विमुक्तश्च विमुच्यते । एतद्वै तत् ॥ १ ॥

हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम्बृहत् ॥ २ ॥

ऊर्द्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति। मध्ये वामनमासीनं विश्वे देवा उपासते ॥ ३ ॥ अस्य विस्रंसमानस्य शरीरस्थस्य देहिनः। देहाद्विमुच्यमानस्य किमत्र परिशिष्यते। एतद्वैतत् ॥ ४ ॥

न प्राणेन नापानेन मर्त्त्यो जीवति कश्चन। इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ ॥ ५ ॥ हन्त त इदम्प्रवक्ष्यामि गुह्यम्ब्रह्म सनातनं। यथा च मरणं प्राप्य आत्मा भवति गौतम ॥ ६ ॥ योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्येऽनुसंयन्ति यथा कर्म्म यथा श्रुतं ॥ ७ ॥

य एष सुप्तेषु जागर्त्ति कामं कामं पुरुषो निर्म्मिमाणः। तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते। तस्मिँल्लोकाः श्रिताः सर्व्वे तदु नात्येति कश्चन ॥ एतद्वैतत् ॥ ८ ॥ अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव। एकस्तथा सर्व्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥ ९ ॥ वायुर्यथैको भूवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव। एकस्तथा सर्व्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥ १० ॥ सूर्य्यो यथा सर्व्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्वाह्यदोषैः। एकस्तथा सर्व्वभूतान्तरात्मा न लिप्यते लोकदुःखेन वाह्यः ॥ ११ ॥

एको वशी सर्वभूतान्तरात्मा एकं रूपम्बहुधा यः करोति। तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वत-

न्नेतरेषां ॥ १२ ॥ नित्योऽनित्यानाञ्चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्। तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषां ॥ १३ ॥

तदेतदिति मन्यन्तेऽनिर्देश्यम्परमं सुखं। कथन्नु तद्विजानीयां किमु भाति विभाति वा ॥ १४ ॥ न तत्र सूर्य्यो भाति न चन्द्रतारकन्नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्व्वन्तस्य भासा सर्व्वमिदं विभाति ॥ १५ ॥
इति पञ्चमी वल्ली समाप्ता ॥ ५ ॥

ऊर्द्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः। तदेव शुक्रन्तद्ब्रह्म तदेवामृतमुच्यते। तस्मिँल्लोकाः श्रिताः सर्व्वे तदु नात्येति कश्चन। एतद्वै तत् ॥ १ ॥

यदिदं किञ्च जगत्सर्व्वं प्राण एजति निःसृतं। महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति ॥ २ ॥ भयादस्याग्निस्तपति भयात्तपति सूर्य्यः। भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ॥ ३ ॥

इह चेदशकद्बोद्धुम्प्राक् शरीरस्य विस्रसः। ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते ॥ ४ ॥ यथाऽऽदर्शे तथाऽऽत्मनि यथा स्वप्ने तथा पितृलोके। यथाप्सु परीव ददृशे तथा गन्धर्व्वलोके छायातपयोरिव ब्रह्मलोके ॥ ५ ॥

इन्द्रियाणाम्पृथग्भावमुदयास्तमयौ च यत् ।
पृथगुत्पद्यमानानां मत्वा धीरो न शोचति ॥ ६ ॥
इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमं ।
सत्त्वादधि महानात्मा महतोऽव्यक्तमुत्तमं ॥ ७ ॥
अव्यक्तात्तु परः पुरुषो व्यापकोऽलिङ्ग एव च ।
यज्ज्ञात्वा मुच्यते जन्तुरमृतत्वञ्च गच्छति ॥ ८ ॥
न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनं ।
हृदा मनीषा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति ॥ ९ ॥
यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह ।
बुद्धिश्च न विचेष्टते तामाहुः परमाङ्गतिं ॥ १० ॥
तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणां ।
अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ ॥ ११ ॥
नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा ।
अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते ॥ १२ ॥
अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयोः ।
अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति ॥ १३ ॥
यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥ १४ ॥
यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः ।
अथ मर्त्यो मृतो भवत्येतावदनुशासनं ॥ १५ ॥

शतञ्चैका च हृदयस्य नाड्यस्तासाम्मूर्द्धानमभिनिःसृतैका।
नानाविधगतयः जैत्महेतुकाः इति यावत्
तयोर्द्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति॥१६॥

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्नि-
उद्धरेत्
विष्टः। तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्य्येण। तं
विद्याच्छुक्रममृतं तं विद्याच्छुक्रममृतमिति॥१७॥ मृत्यु-
प्रोक्तान्नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिञ्च कृत्स्नं।
ब्रह्मप्राप्तो विरजोऽभूद्विमृत्युरन्योऽप्येवं यो विदध्यात्ममेव
गुरुशिष्यौ पालयतु गुरुज्ञानतिरस्कारसामर्थ्य
॥१८॥ सहनाववतु सह नौ भुनक्तु सह वीर्य्यं करवावहै
तेजस्वि नावधीतमस्तु मा विद्विषावहै॥ ॐ शान्तिः शान्तिः
शान्तिः॥ हरिः ॐ॥१९॥ इति कठोपनिषदि द्वितीयाध्याये
षष्ठी वल्ली समाप्ता॥६॥ ॐ तत्सत्॥ ॐ॥ २

॥ अथर्व्ववेदीयप्रश्नोपनिषदारम्भः॥

शिबिऋषेःपुत्रःसत्यकामनामकोमुनिः सुकेशनामकभरद्वाजस्यपुत्रः

ॐ नमः परमात्मने॥ हरिः ॐ॥ सुकेशा च भारद्वाजः
सोर्य्यऋषेःपुत्रःगार्ग्यगोत्री अश्वलऋषेःपुत्रःकौशल्यनाम कोमुनिः
शैव्यश्च सत्यकामः सौर्य्यायणी च गार्ग्यः कौशल्यश्चाश्वलायनो
विदर्भदेशवासीभार्गवगोत्री ...कात्यायनः...पितामहो यस्य
भार्गवो वैदर्भिः कवन्धी कात्यायनस्ते हैते ब्रह्मपरा ब्रह्मनिष्ठाः
परं ब्रह्मान्वेषमाणा एष ह वै तत्सर्व्वं वक्ष्यतीति ते ह समित्-
पाणयो भगवन्तं पिप्पलादमुपसन्नाः॥१॥

तान् ह स ऋषिरुवाच भूय एव तपसा ब्रह्मचर्य्येण
श्रद्धया संवत्सरं संवत्स्यथ यथाकामं प्रश्नान् पृच्छथ यदि विज्ञा-

संवत्सरया स्नातं तं

स्याम: सर्व्वं ह वो वक्ष्याम इति ॥ २॥ अथ कबन्धी कात्यायन उपेत्य पप्रच्छ। भगवन् कुतो ह वा इमा: प्रजा: प्रजायन्त इति ॥ ३ ॥

हि

तस्मै स होवाच प्रजाकामो वै प्रजापति: स तपोऽतप्यत स तपस्तप्त्वा स मिथुनमुत्पादयते। रयिञ्च प्राणञ्चेत्येतौ मे बहुधा प्रजा: करिष्यत इति॥ ४ ॥

आदित्यो ह वै प्राणो रयिरेव चन्द्रमा रयिर्वा एतत्सर्व्वं यन्मूर्त्तञ्चामूर्त्तञ्च तस्मान्मूर्त्तिरेव रयि: ॥ ५ ॥

अथादित्य उदयन्यत्प्राचीं दिशं प्रविशति तेन प्राच्यान् प्राणान्रश्मिषु सन्निधत्ते। यद्दक्षिणां यत्प्रतीचीं यदुदीचीं यदधो यदूर्द्ध्वं यदन्तरा दिशो यत्सर्व्वं प्रकाशयति तेन सर्व्वान् प्राणान् रश्मिषु सन्निधत्ते ॥ ६ ॥ स एष वैश्वानरो विश्वरूप: प्राणो ऽग्निरुदयते। तदेतदृचाभ्युक्तं ॥ ७ ॥ विश्वरूपं हरिणं जातवेदसं परायणं ज्योतिरेकं तपन्तं। सहस्ररश्मि: शतधा वर्त्तमान: प्राण: प्रजानामुदयत्येष सूर्य्य: ॥ ८ ॥

संवत्सरो वै प्रजापतिस्तस्यायने दक्षिणञ्चोत्तरञ्च। तद्ये वै तदिष्टापूर्त्ते कृतमित्युपासते। ते चान्द्रमसमेव लोकमभिजयन्ते। त एव पुनरावर्त्तन्ते तस्मादेत ऋषय: प्रजाकामा दक्षिणं प्रतिपद्यन्ते। एष ह वै रयिर्य: पितृयाण: ॥ ९ ॥

अथोत्तरेण तपसा ब्रह्मचर्य्येण श्रद्धया विद्ययात्मानमन्वि-

ह्यादित्यमभिजयन्त एतद्वै प्राणानामायतनमेतदमृतमभयमेतत् परायणमेतस्मान्न पुनरावर्त्तन्त इत्येष निरोधस्तदेष श्लोकः ॥ १० ॥

पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्द्धे पुरीषिणं। अथेमे अन्य उ परे विचक्षणं सप्तचक्रे षडर आहुरर्पितमिति ॥ ११ ॥

मासो वै प्रजापतिस्तस्य कृष्णपक्ष एव रयिश्शुक्लः प्राणस्तस्मादेते ऋषयः शुक्ल इष्टिं कुर्व्वन्तीतर इतरस्मिन् ॥ १२ ॥

अहोरात्रो वै प्रजापतिस्तस्याहरेव प्राणो रात्रिरेव रयिः प्राणं वा एते प्रस्कन्दन्ति। ये दिवा रत्या संयुज्यन्ते ब्रह्मचर्य्यमेव तद्यद्रात्रौ रत्या संयुज्यन्ते ॥ १३ ॥

अन्नं वै प्रजापतिस्ततो ह वै तद्रेतस्तस्मादिमाः प्रजाः प्रजायन्त इति ॥ १४ ॥ तद्ये ह तत्प्रजापतिव्रतं चरन्ति ते मिथुनमुत्पादयन्ते। तेषामेवैष ब्रह्मलोको येषां तपो ब्रह्मचर्य्यं येषु सत्यं प्रतिष्ठितं ॥ १५ ॥ तेषामसौ विरजो ब्रह्मलोको न येषु जिह्ममनृतं न माया चेति ॥ १६ ॥ इति प्रथमः प्रश्नः ॥ १ ॥

अथ हैनं भार्गवो वैदर्भिः पप्रच्छ। भगवन् कत्येव देवाः प्रजां विधारयन्ते कतर एतत् प्रकाशयन्ते कः पुनरेषां वरिष्ठ इति ॥ १ ॥ तस्मै स होवाचाकाशो ह वा एष देवो वायु-

रग्निरापः पृथिवी वाङ्मनश्चक्षुः श्रोत्रञ्च। ते प्रकाश्याभि-
वदन्ति वयमेतद्बाणमवष्टभ्य विधारयामः ॥ २ ॥

तान् वरिष्ठः प्राण उवाच। मा मोहमापद्यथाऽहमेवै-
तत् पञ्चधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामीति ॥ ३॥
तेऽश्रद्दधाना बभूवुः सोऽभिमानादूर्द्ध्वमुत्क्रमत इव तस्मिन्नुत्क्रा-
मत्यथेतरे सर्व्वं एवोत्क्रामन्ते तस्मिंश्च प्रतिष्ठमाने सर्व्वं एव
प्रातिष्ठन्ते। तद्यथा मक्षिका मधुकरराजानमुत्क्रामन्तं
सर्व्वा एवोत्क्रामन्ते तस्मिंश्च प्रतिष्ठमाने सर्व्वा एव प्रातिष्ठन्त
एवं वाङ्मनश्चक्षुः श्रोत्रञ्च ते प्रीताः प्राणं स्तुन्वन्ति ॥ ४ ॥

एषोऽग्निस्तपत्येष सूर्य्य एष पर्जन्यो मघवानेष वायुरेष
पृथिवी रयिर्देवः सदसच्चामृतञ्च यत् ॥ ५ ॥ अरा इव रथ-
नाभौ प्राणे सर्व्वं प्रतिष्ठितं। ऋचो यजूंषि सामानि यज्ञः
क्षत्रं ब्रह्म च ॥ ६ ॥ प्रजापतिश्चरसि गर्भे त्वमेव प्रतिजायसे।
तुभ्यं प्राण प्रजास्त्विमा बलिं हरन्ति यः प्राणैः प्रतितिष्ठसि
॥ ७ ॥ देवानामसि वह्नितमः पितॄणां प्रथमा स्वधा। ऋषी-
णाञ्चरितं सत्यमथर्व्वाङ्गिरसामसि ॥ ८ ॥ इन्द्रस्त्वं प्राण
तेजसा रुद्रोऽसि परिरक्षिता। त्वमन्तरिक्षे चरसि सूर्य्यस्त्वं
ज्योतिषाम्पतिः ॥ ९ ॥ यदा त्वमभिवर्षस्यथेमाः प्राण ते प्रजाः।
आनन्दरूपास्तिष्ठन्ति कामायान्नं भविष्यतीति ॥ १० ॥

वैत्यस्त्वं प्राणैकऋषिरत्ता विश्वस्य सत्पतिः ।
वयमाद्यस्य दातारः पिता त्वं मातरिश्व नः ॥ ११ ॥
या ते तनूर्वाचि प्रतिष्ठिता या श्रोत्रे या च चक्षुषि ।
या च मनसि सन्तता (स्थिता) शिवां तां कुरु मोत्क्रमीः ॥ १२ ॥
प्राणस्येदं वशे सर्वं त्रिदिवे यत्प्रतिष्ठितं ।
मातेव पुत्रान्रक्षस्व श्रीश्च प्रज्ञाञ्च विधेहि न इति ॥ १३ ॥
इति द्वितीय प्रश्नः ॥ २ ॥

अथ हैनं कौसल्यश्चाश्वलायनः पप्रच्छ । भगवन् कुत एष प्राणो जायते कथमायात्यस्मिञ्छरीर आत्मानं वा प्रविभज्य कथं प्रातिष्ठते केनोत्क्रमते कथं वाह्यमभिधत्ते कथमध्यात्ममिति ॥ १ ॥ तस्मै स होवाचाति प्रश्नान् पृच्छसि ब्रह्मिष्ठोऽसीति तस्मात्तेऽहं ब्रवीमि ॥ २ ॥

आत्मन एष प्राणो जायते । यथैषा पुरुषे छायैतस्मिन्नेतदाततं मनोकृतेनायात्यस्मिञ्छरीरे ॥ ३ ॥ यथा सम्राडेवाधिकृतान्विनियुङ्क्ते । एतान् ग्रामानेतान् ग्रामानधितिष्ठस्वेत्येवमेवैष प्राणः + इतरान् प्राणान् पृथक् पृथगेव सन्निधत्ते ॥ ४ ॥ पायूपस्थेऽपानं चक्षुःश्रोत्रे मुखनासिकाभ्यां प्राणः स्वयं प्रातिष्ठते मध्ये तु समानः । एष ह्येतद्धुतमन्नं समन्नयति तस्मादेताः सप्तार्चिषो भवन्ति ॥ ५ ॥

हृदि ह्येष आत्मा । अत्रैतदेकशतं नाडीनां तासां

शतं शतमेकैकस्यां द्वासप्ततिर्द्वासप्ततिः प्रतिशाखानाडीसहस्राणि भवन्त्यासु व्यानश्चरति ॥ ६ ॥ अथैकयोर्द्ध्व उदानः पुण्येन पुण्यं लोकं नयति पापेन पापमुभाभ्यामेव मनुष्यलोकं ॥ ७ ॥ आदित्यो ह वै वाह्यः प्राण उदयत्येष ह्येनं चाक्षुषं प्राणमनुगृह्णानः । पृथिव्यां या देवता सैषा पुरुषस्यापानमवष्टभ्यान्तरा यदाकाशः स समानो वायुर्व्यानः ॥ ८ ॥ तेजो ह वै उदानस्तस्मादुपशान्ततेजाः । पुनर्भवमिन्द्रियैर्मनसि सम्पद्यमानैः ॥ ९ ॥ यच्चित्तस्तेनैष प्राणमायाति प्राणस्तेजसा युक्तः । सहात्मना यथा सङ्कल्पितं लोकं नयति ॥ १० ॥

य एवं विद्वान् प्राणं वेद । न हास्य प्रजा हीयतेऽमृतो भवति तदेष श्लोकः ॥ ११ ॥ उत्पत्तिमायतिं स्थानं विभुत्वञ्चैव पञ्चधा । अध्यात्मञ्चैव प्राणस्य विज्ञायामृतमश्नुते विज्ञायामृतमश्नुत इति ॥ १२ ॥ इति तृतीयप्रश्नः ॥ ३ ॥

अथ हैनं सौर्य्यायणी गार्ग्यः पप्रच्छ । भगवन्नेतस्मिन् पुरुषे कानि स्वपन्ति कान्यस्मिन् जाग्रति कतर एष देवः स्वप्नान् पश्यति कस्यैतत् सुखं भवति कस्मिन्नु सर्व्वे सम्प्रतिष्ठिता भवन्तीति ॥ १ ॥

तस्मै स होवाच । यथा गार्ग्य मरीचयोऽर्कस्यास्तं गच्छतः सर्व्वा एतस्मिंस्तेजोमण्डल एकीभवन्ति । ताः पुनः पुनरुदयतः प्रचरन्त्येवं ह वै तत्सर्व्वं परे देवे मनस्येकी-

त्येवं तवन्नो ज्यम्॥१०॥

भवति। तेन तर्ह्येष पुरुषो न शृणोति न पश्यति न जिघ्रति न रसयते न स्पृशते नाभिवदते नादत्ते नानन्दयते न विसृजते नेयायते स्वपितीत्याचक्षते॥ २॥

नवलति

प्राणाग्नय एवैतस्मिन् पुरे जाग्रति। गार्हपत्यो ह वा एषोऽपानो व्यानोऽन्वाहार्य्यपचनो यद्गार्हपत्यात्प्रणीयते प्रणयनादाहवनीयः प्राणः॥ ३॥

होतारूपः

यदुच्छ्वासनिश्वासावेतावाहुती समं नयतीति स समानः। मनो ह वाव यजमान इष्टफलमेवोदानः स एनं यजमानमहरहर्ब्रह्म गमयति॥ ४॥ अत्रैष देवः स्वप्ने महिमानमनुभवति। यद्दृष्टं दृष्टमनुपश्यति श्रुतं श्रुतमेवार्थमनुशृणोति देशदिगन्तरैश्च प्रत्यनुभूतं पुनः पुनः प्रत्यनुभवति दृष्टञ्चादृष्टञ्च श्रुतञ्चाश्रुतञ्चानुभूतञ्चाननुभूतञ्च सर्व्वं पश्यति सर्व्वः पश्यति॥ ५॥

स यदा तेजसाऽभिभूतो भवति। अत्रैष देवः स्वप्नान्न पश्यत्यथ तदैतस्मिञ्छरीरे एतत्सुखं भवति॥ ६॥ स यथा सोम्य वयांसि वासो वृक्षं सम्प्रतिष्ठन्ते। एवं ह वै तत्सर्व्वं पर आत्मनि सम्प्रतिष्ठते॥ ७॥ पृथिवी च पृथिवीमात्रा चापश्चापोमात्रा च तेजश्च तेजोमात्रा च वायुश्च वायुमात्रा चाकाशश्चाकाशमात्रा च चक्षुश्च द्रष्टव्यञ्च श्रोत्रञ्च श्रोतव्यञ्च घ्राणञ्च घ्रातव्यञ्च रसश्च रसयितव्यञ्च त्वक् च स्पर्शयितव्यञ्च वाक् च

वक्तव्यञ्च हस्तौ चादातव्यञ्चोपस्थश्चानन्दयितव्यञ्च पायुश्च विसर्जयितव्यञ्च पादौ च गन्तव्यञ्च मनश्च मन्तव्यञ्च बुद्धिश्च बोद्धव्यञ्चाहङ्कारश्चाहङ्कर्त्तव्यञ्च चित्तञ्च चेतयितव्यञ्च तेजश्च विद्योतयितव्यञ्च प्राणश्च विधारयितव्यञ्च ॥ ८ ॥

एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुषः। स परेऽक्षरे आत्मनि सम्प्रतिष्ठते ॥ ९ ॥ परमेवाक्षरं प्रतिपद्यते स यो ह वै तदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सोम्य। स सर्व्वज्ञः सर्व्वो भवति तदेष श्लोकः ॥ १० ॥ विज्ञानात्मा सह देवैश्च सर्व्वैः प्राणा भूतानि सम्प्रतिष्ठन्ति यत्र। तदक्षरं वेदयते यस्तु सोम्य स सर्व्वज्ञः सर्व्वमेवाविवेशेति ॥ ११ ॥ इति चतुर्थप्रश्नः समाप्तः ॥ ४ ॥

अथ हैनं शैब्यः सत्यकामः पप्रच्छ। स यो ह वै तद्भगवन्मनुष्येषु प्रायणान्तमोङ्कारमभिध्यायीत। कतमं वाव स तेन लोकं जयतीति ॥ १ ॥

तस्मै सहोवाच। एतद्वै सत्यकाम परञ्चापरञ्च ब्रह्म यदोङ्कारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेति ॥ २ ॥ स यद्येकमात्रमभिध्यायीत स तेनैव संवेदितस्तूर्णमेव जगत्यामभिसम्पद्यते। तमृचो मनुष्यलोकमुपनयन्ते स तत्र तपसा ब्रह्मचर्य्येण श्रद्धया सम्पन्नो महिमानमनुभवति ॥ ३ ॥ अथ यदि द्विमा-

त्रेण मनसि सम्पद्यते सोऽन्तरिक्षं यजुर्भिरुन्नीयते। स सोमलोकं स सोमलोके विभूतिमनुभूय पुनरावर्त्तते॥ ४॥

यः पुनरेतन्त्रिमात्रेणैवोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्य्ये सम्पन्नः। यथा पादोदरस्त्वचा विनिर्मुच्यत एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते तदेतौ श्लोकौ भवतः॥ ५॥

तिस्रो मात्रा मृत्युमत्यः प्रयुक्ता अन्योन्यसक्ता अनविप्रयुक्ताः। क्रियासु बाह्याभ्यन्तरमध्यमासु सम्यक् प्रयुक्तासु न कम्पते ज्ञः॥ ६॥ ऋग्भिरेतं यजुर्भिरन्तरिक्षं स सामभिर्यत्तत्कवयो वेदयन्ते। तमोङ्कारेणैवायतनेनान्वेति विद्वान् यत्तच्छान्तमजरममृतमभयं परञ्चेति॥ ७॥ इति पञ्चमप्रश्नः समाप्तः॥ ५॥

अथ हैनं सुकेशा भारद्वाजः पप्रच्छ। भगवन् हिरण्यनाभः कौसल्यो राजपुत्रो मामुपेत्यैतं प्रश्नमपृच्छत। षोडशकलं भारद्वाज पुरुषं वेत्थ तमहं कुमारमब्रुवं नाहमिमं वेद यद्यहमिममवेदिषं कथं ते नावक्ष्यमिति समूलो वा एष परिशुष्यति योऽनृतमभिवदति तस्मान्नार्हाम्यनृतं वक्तुं स तूष्णीं रथमारुह्य प्रवव्राज। तं त्वा पृच्छामि क्वासौ पुरुष इति॥ १॥ तस्मै स होवाच। इहैवान्तःशरीरे सोम्य स

पुरुषो यस्मिन्नेताः षोडशकलाः प्रभवन्तीति ॥ २ ॥

स ईक्षाञ्चक्रे। कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामीति ॥ ३ ॥

स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं। मनोऽन्नमन्नाद्वीर्य्यं तपो मन्त्राः कर्म्मलोका लोकेषु च नाम च ॥ ४ ॥

स यथेमा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति भिद्येते तासां नामरूपे समुद्र इत्येवं प्रोच्यते। एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति भिद्येते तासां नामरूपे पुरुष इत्येवं प्रोच्यते स एषोऽकलोऽमृतो भवति तदेष श्लोकः ॥ ५ ॥ अरा इव रथनाभौ कला यस्मिन् प्रतिष्ठिताः। तं वेद्यं पुरुषं वेद यथा मा वो मृत्युः परिव्यथा इति ॥ ६ ॥

तान् होवाचैतावदेवाहमेतत्परं ब्रह्म वेद। नातः परमस्तीति ॥ ७ ॥ ते तमर्च्चयन्तस्त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसीति। नमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥ ८ ॥ इति षष्ठप्रश्नः समाप्तः ॥ ६ ॥ इति प्रश्नोपनिषत् समाप्ता ॥ ॐ तत् सत् ॥ हरिः ॐ ॥

अथर्व्ववेदीयमुण्डकोपनिषदारम्भः ॥

॥ॐ॥ ब्रह्मा देवानां प्रथमः सम्बभूव विश्वस्य कर्त्ता भुवनस्य

गोप्ता । स ब्रह्मविद्यां सर्व्वविद्याप्रतिष्ठामथर्व्वाय ज्येष्ठपुत्राय प्राह ॥ १ ॥ अथर्व्वणे यां प्रवदेत ब्रह्माथर्व्वा तां पुरोवाचाङ्गिरे ब्रह्मविद्यां । स भारद्वाजाय सत्यवाहाय प्राह भारद्वाजोऽङ्गिरसे परावरां ॥ २ ॥

शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ । कस्मिन्नु भगवो विज्ञाते सर्व्वमिदं विज्ञातं भवतीति ॥ ३ ॥ तस्मै स होवाच । द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च ॥ ४ ॥

तत्रापरा ऋग्वेदो यजुर्व्वेदः सामवेदोऽथर्व्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति । अथ परा यया तदक्षरमधिगम्यते ॥ ५ ॥

यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्व्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः ॥ ६ ॥ यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति । यथा सतः पुरुषात् केशलोमानि तथाऽक्षरात् सम्भवतीह विश्वं ॥ ७ ॥

तपसा चीयते ब्रह्म ततोऽन्नमभिजायते । अन्नात् प्राणो मनः सत्यं लोकाः कर्म्मसु चामृतं ॥ ८ ॥

यः सर्व्वज्ञः सर्व्वविद्यस्य ज्ञानमयं तपः । तस्मादेतद्ब्रह्म नाम रूपमन्नञ्च जायते ॥ ९ ॥ इति प्रथममुण्डके प्रथमः खण्डः ॥१॥

तदेतत्सत्यं मन्त्रेषु कर्म्माणि कवयो यान्यपश्यंस्तानि त्रेतायां बहुधा सन्ततानि। तान्याचरथ नियतं सत्यकामा एष वः पन्थाः सुकृतस्य लोके ॥ १ ॥ यदा लेलायते ह्यर्चिः समिद्धे हव्यवाहने। तदाज्यभागावन्तरेणाहुतीः प्रतिपादयेच्छ्रद्धया हुतं ॥ २ ॥ यस्याग्निहोत्रमदर्शमपौर्णमासमचातुर्मास्यमनाग्रयणमतिथिवर्जितञ्च। अहुतमवैश्वदेवमविधिना हुतमासप्तमांस्तस्य लोकान् हिनस्ति ॥ ३ ॥ काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा। स्फुलिङ्गिनी विश्वरूपी च देवी लेलायमाना इति सप्त जिह्वा ॥ ४ ॥ एतेषु यश्चरते भ्राजमानेषु यथाकालं चाहुतयो ह्याददायन्। तन्नयन्त्येताः सूर्य्यस्य रश्मयोयत्र देवानां पतिरेकोऽधिवासः ॥ ५ ॥ एह्येहीति तमाहुतयः सुवर्चसः सूर्य्यस्य रश्मिभिर्यजमानं वहन्ति। प्रियां वाचमभिवदन्त्योऽर्चयन्त्य एष वः पुण्यः सुकृतो ब्रह्मलोकः ॥ ६ ॥ प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म्म। एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति ॥ ७ ॥ अविद्यायामन्तरे वर्त्तमानाः स्वयं धीराः पण्डितम्मन्यमानाः। जङ्घन्यमानाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः ॥ ८ ॥

अविद्यायां बहुधा वर्त्तमाना वयं कृतार्था इत्यभिमन्यन्ति बालाः। यत्कर्म्मिणो न प्रवेदयन्ति रागात्तेनातुराः क्षीण-

लोकाश्च्यवन्ते ॥ ९ ॥ इष्टापूर्त्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः । नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वेमं लोकं हीनतरञ्चाविशन्ति ॥ १० ॥ तपःश्रद्धे ये ह्युपवसन्त्यरण्ये शान्ता विद्वांसो भैक्षचर्य्यां चरन्तः । सूर्य्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः स पुरुषो ह्यव्ययात्मा ॥ ११ ॥

परीक्ष्य लोकान् कर्म्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं ॥ १२ ॥ तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय । येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यां ॥ १३ ॥ इति प्रथममुण्डके द्वितीयः खण्डः ॥ २ ॥ इति प्रथममुण्डकं समाप्तं ॥ १ ॥

तदेतत्सत्यं यथा सुदीप्तात् पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति ॥ १ ॥ दिव्यो ह्यमूर्त्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः । अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः परः ॥ २ ॥ एतस्माज्जायते प्राणो मनः सर्व्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥ ३ ॥

अग्निर्मूर्द्धा चक्षुषी चन्द्रसूर्य्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः । वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्व्वभूतान्तरात्मा ॥ ४ ॥ तस्मादग्निः समिधो यस्य सूर्य्यः

सोमात् पर्जन्य ओषधयः पृथिव्यां। पुमान् रेतः सिञ्चति योषितायां बह्वीः प्रजाः पुरुषात् सम्प्रसूताः ॥ ५ ॥

तस्मादृचः साम यजूंषि दीक्षा यज्ञाश्च सर्व्वे क्रतवो दक्षिणाश्च। संवत्सरश्च यजमानश्च लोकाः सोमो यत्र पवते यत्र सूर्य्यः ॥ ६ ॥ तस्माच्च देवा बहुधा सम्प्रसूताः साध्या मनुष्याः पशवो वयांसि। प्राणापानौ व्रीहियवौ तपश्च श्रद्धा सत्यं ब्रह्मचर्य्यं विधिश्च ॥ ७ ॥

सप्त प्राणाः प्रभवन्ति तस्मात्सप्तार्चिषः समिधः सप्त होमाः। सप्त इमे लोका येषु चरन्ति प्राणा गुहाशया निहिताः सप्त सप्त ॥ ८ ॥ अतः समुद्रा गिरयश्च सर्व्वेऽस्मात् स्यन्दन्ते सिन्धवः सर्व्वरूपाः। अतश्च सर्व्वा ओषधयो रसश्च येनैष भूतैस्तिष्ठते ह्यन्तरात्मा ॥ ९ ॥ पुरुष एवेदं विश्वं कर्म्म तपो ब्रह्म परामृतं। एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य ॥ १० ॥ इति द्वितीयमुण्डके प्रथमः खण्डः ॥ १ ॥

आविः सन्निहितं गुहाचरन्नाम महत्पदमत्रैतत् समर्पितं। एजत्प्राणन्निमिषच्च यदेतज्जानथ सदसद्वरेण्यं परं-विज्ञानाद्यद्वरिष्ठं प्रजानां ॥ १ ॥ यदर्चिमद्यदणुभ्योऽणु यस्मिन् लोका निहिता लोकिनश्च। तदेतदक्षरं ब्रह्म स प्राणस्तदु वाङ्मनः। तदेतत्सत्यं तदमृतं तद्वेद्धव्यं सोम्य विद्धि ॥२॥

धनुर्गृहीत्वौपनिषदं महास्त्रं शरं ह्युपासा निशितं सन्धीयत। आयम्य तद्भावगतेन चेतसा लक्ष्यं तदेवाक्षरं सौम्य विद्धि ॥ ३ ॥ प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते। अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥ ४ ॥

यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्व्वैः। तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ अमृतस्यैष सेतुः ॥ ५ ॥ अरा इव रथनाभौ संहता यत्र नाड्यः स एषोऽन्तश्चरते बहुधा जायमानः। ओमित्येवं ध्यायथ आत्मानं स्वस्ति वः पाराय तमसः परस्तात् ॥ ६ ॥

यः सर्व्वज्ञः सर्व्वविद्यस्यैष महिमा भुवि दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठितः। मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽन्ने हृदयं सन्निधाय तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद्विभाति ॥ ७॥ भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः। क्षीयन्ते चास्य कर्म्माणि तस्मिन्दृष्टे परावरे ॥ ८ ॥

हिरण्मये परे कोशे विरजं ब्रह्म निष्कलं। तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः ॥ ९ ॥ न तत्र सूर्य्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्व्वं तस्य भासा सर्व्वमिदं विभाति ॥ १० ॥ ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षि-

णातस्योत्तरेण। अधश्चोर्द्धञ्च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठं ॥ ११ ॥ इति द्वितीयमुण्डके द्वितीयः खण्डः ॥ २ ॥ इति द्वितीयमुण्डकं समाप्तं ॥ २ ॥

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति ॥ १ ॥ समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः। जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ॥ २ ॥ यदा पश्यः पश्यते रुक्मवर्णं कर्त्तारमीशं पुरुषं ब्रह्मयोनिं। तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥ ३ ॥

प्राणो ह्येष यः सर्व्वभूतैर्विभाति विजानन् विद्वान् भवते नातिवादी। आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः ॥ ४ ॥ सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्य्येण नित्यं। अन्तः शरीरे ज्योतिर्म्मयो हि शुभ्रो यं पश्यन्ति यतयः क्षीणदोषाः ॥ ५ ॥ सत्यमेव जयते नानृतं सत्येन पन्था विततो देवयानः। येनाक्रमन्त्यृषयो ह्याप्तकामा यत्र तत्सत्यस्य परमं निधानं ॥ ६ ॥

वृहच्च तद्दिव्यमचिन्त्यरूपं सूक्ष्माच्च तत्सूक्ष्मतरं विभाति। दूरात्सुदूरे तदिहान्तिके च पश्यत्स्विहैव निहितं गुहायां ॥७॥ न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्म्मणा वा। ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं

ध्यायमानः ॥ ८ ॥ एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश। प्राणैश्चित्तं सर्व्वमोतं प्रजानां यस्मिन् विशुद्धे विभवत्येष आत्मा ॥ ६ ॥ यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान्। तं तं लोकं जायते तांश्च कामांस्तस्मादात्मज्ञं ह्यर्च्चयेद्भूतिकामः ॥ १० ॥ इति तृतीयमुण्डके प्रथमः खण्डः ॥ १ ॥

स वेदैतत्परमं ब्रह्म धाम यत्र विश्वं निहितं भाति शुभ्रं। उपासते पुरुषं ये ह्यकामास्ते शुक्रमेतदतिवर्त्तन्ति धीराः ॥ १ ॥ कामान् यः कामयते मन्यमानः स कामभि-र्जायते तत्र तत्र। पर्य्याप्तकामस्य कृतात्मनस्तु इहैव सर्व्वे प्रविलीयन्ति कामाः ॥ २ ॥ नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनूं स्वां ॥ ३ ॥

नायमात्मा बलहीनेन लभ्यो न च प्रमादात्तपसो वाप्य-लिङ्गात्। एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधाम ॥ ४ ॥ संप्राप्यैनमृषयो ज्ञानतृप्ताः कृतात्मानो वीत-रागाः प्रशान्ताः। ते सर्व्वगं सर्व्वतः प्राप्य धीरा युक्तात्मानः सर्व्वमेवाविशन्ति ॥ ५ ॥ वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यास-योगाद्यतयः शुद्धसत्त्वाः। ते ब्रह्मलोकेषु परान्तकाले परा-मृताः परिमुच्यन्ति सर्व्वे ॥ ६ ॥

गता: कला: पञ्चदश प्रतिष्ठा देवाश्च सर्व्वे प्रतिदेवतासु। कर्म्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व्व एकीभवन्ति ॥ ७ ॥ यथा नद्य: स्यन्दमाना: समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय। तथा विद्वान्नामरूपाद्विमुक्त: परात्परं पुरुषमुपैति दिव्यं ॥ ८ ॥ स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति। नास्याब्रह्मवित्कुले भवति। तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति ॥ ९ ॥ तदेतदृचाऽभ्युक्तं क्रियावन्त: श्रोत्रिया ब्रह्मनिष्ठा: । स्वयं जुह्वत एकर्षिं श्रद्धयन्त-स्तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णं ॥ १० ॥ तदेतत् सत्यमृषिरङ्गिरा: पुरोवाच नैतदचीर्णव्रतो-ऽधीते। नम: परमऋषिभ्यो नम: परमऋषिभ्य: ॥ ११ ॥

इति तृतीयमुण्डके द्वितीय: खण्ड: ॥ २ ॥ मुण्डकोपनिषत्स-माप्ता ॥ ॐ तत्सत् ॥

श्रीगौडपादीयकारिकासहिताथर्व्ववेदीयमाण्डूक्योपनिषदारम्भ: ।

॥ हरि: ॐ॥ ॐ मित्येतदक्षरमिदꣳ सर्व्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्व्वमोङ्कार एव। यच्चान्यत्त्रिकालातीतं तदप्योङ्कार एव ॥ १ ॥ सर्व्वꣳ ह्येतद्ब्रह्मायमात्मा ब्रह्म सो-ऽयमात्मा चतुष्पात् ॥ २ ॥

जागरितस्थानो बहि:प्रज्ञ: सप्ताङ्ग एकोनविंशतिमुख: स्थूलभुग्वैश्वानर: प्रथम: पाद: ॥ ३ ॥

स्वप्नस्थानोऽन्तः प्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक् तैजसो द्वितीयः पादः ॥४ ॥

यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तं । सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः ॥५ ॥ एष सर्व्वेश्वर एष सर्व्वज्ञ एषोऽन्तर्य्याम्येष योनिः सर्व्वस्य प्रभवाप्ययौ हि भूतानां ॥ ६ ॥

अथ गौड़पादाचार्य्य कृतैतदुपनिषदर्थाविष्करणरूपश्लोकावतारणं ॥

॥ अत्रैते श्लोकाः ॥

बहिःप्रज्ञो विभुर्विश्वो ह्यन्तःप्रज्ञस्तु तैजसः ।
घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृतः ॥ १ ॥
दक्षिणाक्षिमुखे विश्वो मनस्यन्तश्च तैजसः ।
आकाशे च हृदि प्राज्ञस्त्रिधा देहे व्यवस्थितः ॥ २ ॥
विश्वो हि स्थूलभुङ्नित्यं तैजसः प्रविविक्तभुक् ।
आनन्दभुक्तथा प्राज्ञस्त्रिधा भोगं निबोधत ॥ ३ ॥
स्थूलं तर्पयते विश्वं प्रविविक्तन्तु तैजसं ।
आनन्दश्च तथा प्राज्ञं त्रिधा तृप्तिं निबोधत ॥ ४ ॥
त्रिषु धामसु यद्भोज्यं भोक्ता यश्च प्रकीर्त्तितः ।
वेदैतदुभयं यस्तु सभुञ्जानो न लिप्यते ॥ ५ ॥

प्रभवः सर्व्वभावानां सतामिति विनिश्चयः ।
सर्व्वं जनयति प्राणश्चेतोंऽशून् पुरुषः पृथक् ॥ ६ ॥
विभूतिं प्रसवन्त्वन्ये मन्यन्ते सृष्टिचिन्तकाः ।
स्वप्नमायास्वरूपेति सृष्टिरन्यैर्विकल्पिता ॥ ७ ॥
इच्छामात्रं प्रभोः सृष्टिरिति सृष्टौ विनिश्चिताः ।
कालात्प्रसूतिं भूतानां मन्यन्ते कालचिन्तकाः ॥ ८ ॥
भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे ।
देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा ॥ ९ ॥

उपनिषद् ॥

नान्तः प्रज्ञं न बहिः प्रज्ञं नोभयतः प्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञं । अदृष्टमव्यवहार्य्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ॥ ७ ॥

गौडपादीयोपनिषदाविष्कार्यं ॥

निवृत्तेः सर्व्वदुःखानामीशानः प्रभुरव्ययः ।
अद्वैतः सर्व्वभावानां देवस्तुर्य्यो विभुः स्मृतः ॥ १० ॥
कार्य्यकारणबद्धौ ताविष्येते विश्वतैजसौ ।
प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्य्ये न सिध्यतः ॥ ११ ॥
नात्मानं नापरांश्चैव न सत्यं नापि चाऽनृतं ।
प्राज्ञः किञ्चन संवेत्ति तुर्य्यं तत्सर्व्वदृक् सदा ॥ १२ ॥

द्वैतस्याग्रहणं तुल्यमुभयोः प्राज्ञतुर्य्ययोः ।
वीजनिद्रायुतः प्राज्ञः सा च तुर्य्येन विद्यते ॥ १३ ॥
स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्ननिद्रया ।
न निद्रां नैव च स्वप्नं तुर्य्ये पश्यन्ति निश्चिताः ॥ १४ ॥
अन्यथा गृह्णतः स्वप्नो निद्रातत्त्वमजानतः ।
विपर्य्यासे तयोः चीणे तुरीयं पदमश्नुते ॥ १५ ॥
अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥ १६ ॥
प्रपञ्चो यदि विद्येत निवर्त्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥ १७ ॥
विकल्पो विनिवर्त्तेत कल्पितो यदि केनचित् ।
उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते ॥ १८ ॥

उपनिषद् ॥

सोऽयमात्माऽध्यचरमोङ्कारोऽधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकार इति ॥ ८ ॥

जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्राप्तेरादिमत्त्वाद्वाप्नोति ह वै सर्व्वान् कामानादिश्च भवति य एवं वेद ॥ ९ ॥

स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रोत्कर्षादुभयत्वा-

द्वोत्कर्षति ह वै ज्ञानसन्ततिं समानश्च भवति नास्याब्रह्म-
वित्कुले भवति य एवं वेद ॥ १० ॥

सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मितेरपीतेर्वा
मिनोति ह वा इदꣳ सर्व्वमपीतिश्च भवति य एवं वेद॥ ११॥

गौडपादीयश्लोकाः ॥

विश्वस्यात्वविवक्षायामादिसामान्यमुत्कटं ।
मात्रासम्प्रतिपत्तौ स्यादाप्तिसामान्यमेव च ॥ १९ ॥
तैजसस्योत्वविज्ञाने उत्कर्षो दृश्यते स्फुटं ।
मात्रासम्प्रतिपत्तौ स्यादुभयत्वं तथाविधं ॥ २० ॥
मकारभावे प्राज्ञस्य मानसामान्यमुत्कटं ।
मात्रासम्प्रतिपत्तौ तु लयसामान्यमेव च ॥ २१ ॥
त्रिषु धामसु यत्तुल्यं सामान्यं वेत्ति निश्चितः ।
सम्पूज्यः सर्व्वभूतानां वन्द्यश्चैष महामुनिः ॥ २२ ॥
अकारो नयते विश्वमुकारश्चापि तैजसं ।
मकारश्च पुनः प्राज्ञं नामात्रे विद्यते गतिः ॥ २३ ॥

उपनिषद् ॥

अमात्रश्चतुर्थोऽव्यवहार्य्यः प्रपञ्चोपशमः शिवोऽद्वैत एव-
मोङ्कार आत्मैव संविशत्यात्मनाऽऽत्मानं य एवं वेद य एवं
वेद ॥ १२ ॥ इति माण्डूक्योपनिषन्मूलमन्त्राः समाप्तिङ्गताः ॥
ॐ तत्सत् हरिः ॐ ॥

गौडपादीयश्लोकाः ॥

ओङ्कारं पादशो विद्यात् पादा मात्रा न संशयः ।
ओङ्कारं पादशो ज्ञात्वा न किञ्चिदपि चिन्तयेत् ॥ २४ ॥
युञ्जीत प्रणवे चेतः प्रणवो ब्रह्म निर्भयं ।
प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित् ॥ २५ ॥
प्रणवो ह्यपरं ब्रह्म प्रणवश्च परः स्मृतः ।
अपूर्व्वोऽनन्तरो वाह्यो न परः प्रणवोऽव्ययः ॥ २६ ॥
सर्व्वस्य प्रणवो ह्यादिर्मध्यमान्तस्तथैव च ।
एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरं ॥ २७ ॥
प्रणवं ह्यीश्वरं विद्यात्सर्व्वस्य हृदि संस्थितं ।
सर्व्वव्यापिनमोङ्कारं मत्वा धीरो न शोचति ॥ २८ ॥
अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः ।
ओङ्कारो विदितो येन स मुनिर्नेतरो जनः ॥ २९ ॥

इति माण्डूक्योपनिषदर्थाविष्करणपरायां गौड़पादीयकारिकायां प्रथममागमप्रकरणं ॥ ॐ तत्सत् ॥

अथ गोडपादीयकारिकाया वैतथ्याख्यं द्वितीयं प्रकरणं ॥

हरिः ॐ ॥

वैतथ्यं सर्व्वभावानां स्वप्न आहुर्म्मनीषिणः ।
अन्तःस्थानात्तु भावानां संवृतत्वेन हेतुना ॥ १ ॥

अदीर्घत्वाच्च कालस्य गत्वा देशान्न पश्यति।
प्रतिबुद्धश्च वै सर्व्वस्तस्मिन् देशे न विद्यते॥ २॥
अभावश्च रथादीनां श्रूयते न्यायपूर्व्वकं।
वैतथ्यं तेन वै प्राप्तं स्वप्न आहुः प्रकाशितं॥ ३॥
अन्तस्थानात्तु भेदानां तस्माज्जागरिते स्मृतं।
यथा तत्र तथा स्वप्ने संवृतत्वेन भिद्यते॥ ४॥
स्वप्नजागरिते स्थाने ह्येकमाहुर्मनीषिणः।
भेदानां हि समत्वेन प्रसिद्धेनैव हेतुना॥ ५॥
आदावन्ते च यन्नास्ति वर्त्तमानेऽपि तत्तथा।
वितथैः सदृशाः सन्तोऽवितथा इव लक्षिताः॥ ६॥
सप्रयोजनता तेषां स्वप्ने विप्रतिपद्यते।
तस्मादाद्यन्तवत्त्वेन मिथ्यैव खलु ते स्मृताः॥ ७॥
अपूर्व्वं स्थानिधर्म्मो हि यथास्वर्गनिवासिनां।
तानयं प्रेक्षते गत्वा यथैवेह सुशिक्षितः॥ ८॥
स्वप्नवृत्तावपि त्वन्तश्चेतसा कल्पितन्त्वसत्।
वहिश्चेतोगृहीतं सद्दृष्टं वैतथ्यमेतयोः॥ ९॥
जाग्रद्वृत्तावपित्वन्तश्चेतसा कल्पितन्त्वसत्।
वहिश्चेतो गृहीतं सद्युक्तं वैतथ्यमेतयोः॥ १०॥
उभयोरपि वैतथ्यं भेदानां स्थानयोर्यदि।
क एतान् बुध्यते भेदान् को वै तेषां विकल्पकः॥ ११॥

कल्पयत्यात्मनात्मानमात्मदेवः स्वमायया ।
स एव बुध्यते भेदानिति वेदान्तनिश्चयः ॥ १२ ॥
विकरोत्यपरान् भावानन्तश्चित्ते व्यवस्थितान् ।
नियतांश्च बहिश्चित्त एवं कल्पयते प्रभुः ॥ १३ ॥
चित्तकाला हि येऽन्तस्तु द्वयकालाश्च ये बहिः ।
कल्पिता एव ते सर्व्वे विशेषो नान्यहेतुकः ॥ १४ ॥
अव्यक्ता एव येऽन्तस्तु स्फुटा एव च ये बहिः ।
कल्पिता एव ते सर्व्वे विशेषस्त्विन्द्रियान्तरे ॥ १५ ॥
जीवं कल्पयते पूर्व्वं ततो भावान् पृथग्विधान् ।
बाह्यानाध्यात्मिकांश्चैव यथाविद्यस्तथास्मृतिः ॥ १६ ॥
अनिश्चिता यथा रज्जुरन्धकारे विकल्पिता ।
सर्पधारादिभिर्भावैस्तद्वदात्मा विकल्पितः ॥ १७ ॥
निश्चितायां यथा रज्ज्वां विकल्पो विनिवर्त्तते ।
रज्जुरेवेति चाद्वैतं तद्वदात्मविनिश्चयः ॥ १८ ॥
प्राणादिभिरनन्तैश्च भावैरेतैर्विकल्पितः ।
मायैषा तस्य देवस्य ययाऽऽसम्मोहितः स्वयं ॥ १९ ॥
प्राण इति प्राणविदो भूतानीति च तद्विदः ।
गुणा इति गुणविदस्तत्त्वानीति च तद्विदः ॥ २० ॥
पादा इति पादविदो विषया इति च तद्विदः ।
लोका इति लोकविदो देवा इति च तद्विदः ॥ २१ ॥

वेदा इति च वेदविदो यज्ञा इति च तद्विदः ।
भोक्तेति च भोक्तृविदो भोज्यमिति च तद्विदः ॥ २२ ॥
सूक्ष्म इति सूक्ष्मविदः स्थूल इति च तद्विदः ।
मूर्त्त इति मूर्त्तविदो अमूर्त इति च तद्विदः ॥ २३ ॥
काल इति कालविदो दिश इति च तद्विदः ।
वादा इति वादविदो भुवनानीति तद्विदः ॥ २४ ॥
मन इति मनोविदो बुद्धिरिति च तद्विदः ।
चित्तमिति चित्तविदो धर्म्माधर्म्मौ च तद्विदः ॥ २५ ॥
पञ्चविंशक इत्येके षड्विंश इति चापरे ।
एकत्रिंशक इत्याहुरनन्त इति चापरे ॥ २६ ॥
लोकान् लोकविदः प्राहुराश्रमा इति तद्विदः ।
स्त्रीपुंनपुंसकं लैङ्गाः परापरमथापरे ॥ २७ ॥
सृष्टिरिति सृष्टिविदो लय इति च तद्विदः ।
स्थितिरिति स्थितिविदः सर्व्वे चेह तु सर्व्वदा ॥ २८ ॥
यं भावं दर्शयेद्यस्य तं भावं स तु पश्यति ।
तञ्चावति स भूत्वासौ तद्ग्रहः समुपैति तं ॥ २९ ॥
एतैरेषोऽपृथग्भावैः पृथगेवेति लक्षितः ।
एवं यो वेद तत्त्वेन कल्पयेत्सोऽविशङ्कितः ॥ ३० ॥
स्वप्नमाये यथा दृष्टे गन्धर्व्वनगरं यथा ।
तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः ॥ ३१ ॥

न निरोधो नचोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्नवै मुक्त इत्येषा परमार्थता ॥ ३२ ॥
भावैरसद्भिरेवायमद्वयेन च कल्पितः ।
भावा अप्यद्वयेनैव तस्मादद्वयता शिवा ॥ ३३ ॥
नात्मभावेन नानेदं न स्वेनापि कथञ्चन ।
न पृथङ्नापृथक्किञ्चिदिति तत्त्वविदो विदुः ॥ ३४ ॥
वीतरागभयक्रोधैर्मुनिभिर्वेदपारगैः ।
निर्विकल्पो ह्ययं दृष्टः प्रपञ्चोपशमोऽद्वयः ॥ ३५ ॥
तस्मादेवं विदित्वैनमद्वैते योजयेत् स्मृतिं ।
अद्वैतं समनुप्राप्य जडवल्लोकमाचरेत् ॥ ३६ ॥
निस्तुतिर्निर्नमस्कारो निःस्वधाकार एव च ।
चलाचलनिकेतश्च यतिर्यादृच्छिको भवेत् ॥ ३७ ॥
तत्त्वमाध्यात्मिकं दृष्ट्वा तत्त्वं दृष्ट्वा तु बाह्यतः ।
तत्त्वीभूतस्तदारामस्तत्त्वादप्रच्युतो भवेत् ॥ ३८ ॥

ॐ ॥ उपासनाश्रितोधर्म्मो जाते ब्रह्मणि वर्त्तते ।
प्रागुत्पत्तेरजं सर्व्वं तेनासौ कृपणः स्मृतः ॥ १ ॥
अतो वक्ष्याम्यकार्पण्यमजाति समतांगतं ।
यथा न जायते किञ्चिज्जायमानं समं ततः ॥ २ ॥
आत्मा ह्याकाशवज्जीवैर्घटाकाशैरिवोदितः ।
घटादिवच्च सङ्घातैर्जातावेतन्निदर्शनं ॥ ३ ॥

घटादिषु प्रलीनेषु घटाकाशादयो यथा ।
आकाशे सम्प्रलीयन्ते तद्वज्जीव इहात्मनि ॥ ४ ॥
यथैकस्मिन् घटाकाशे रजोधूमादिभिर्युते ।
न सर्वे सम्प्रयुज्यन्ते तद्वज्जीवाः सुखादिभिः ॥ ५ ॥
रूपकार्य्यसमाख्याश्च भिद्यन्ते तत्र तत्र वै ।
आकाशस्य न भेदोऽस्ति तद्वज्जीवेषु निर्णयः ॥ ६ ॥
नाकाशस्य घटाकाशो विकारावयवौ यथा ।
नैवात्मनः सदा जीवो विकारावयवौ तथा ॥ ७ ॥
यथा भवति बालानां गगनं मलिनं मलैः ।
तथा भवत्यबुद्धानामात्माऽपि मलिनो मलैः ॥ ८ ॥
मरणे सम्भवे चैव गत्यागमनयोरपि ।
स्थितौ सर्व्वशरीरेषु आकाशेनाविलक्षणः ॥ ९ ॥
सङ्घाताः स्वप्नवत्सर्व्वे आत्ममायाविसर्जिताः ।
आधिक्ये सर्व्वसाम्ये वा नोपपत्तिर्हि विद्यते ॥ १० ॥
रसादयो हि ये कोशा व्याख्यातास्तैत्तिरीयके ।
तेषामात्मा परो जीवः खं यथा संप्रकाशितः ॥ ११ ॥
द्वयोर्द्वयोर्मधुज्ञाने परं ब्रह्म प्रकाशितम् ।
पृथिव्यामुदरे चैव यथाऽऽकाशः प्रकाशितः ॥ १२ ॥
जीवात्मनोरनन्यत्वमभेदेन प्रशस्यते ।
नानात्वं निन्द्यते यच्च तदेवं हि समञ्जसं ॥ १३ ॥

जीवात्मनोः पृथक्त्वं यत्प्रागुत्पत्तेः प्रकीर्त्तितं ।
भविष्यद्वृत्त्या गौणं तन्मुख्यत्वं हि न युज्यते ॥ १४ ॥
मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदिताऽन्यथा ।
उपायः सोऽवताराय नास्ति भेदः कथञ्चन ॥ १५ ॥
आश्रमास्त्रिविधा हीनमध्यमोत्कृष्टदृष्टयः ।
उपासनोपदिष्टेयं तदर्थमनुकम्पया ॥ १६ ॥
स्वसिद्धान्तव्यवस्थासु द्वैतिनो निश्चिता दृढं ।
परस्परं विरुध्यन्ते तैरयं न विरुध्यते ॥ १७ ॥
अद्वैतं परमार्थो हि द्वैतं तद्भेद उच्यते ।
तेषामुभयथा द्वैतं तेनायं न विरुध्यते ॥ १८ ॥
मायया भिद्यते ह्येतन्नान्यथाजं कथञ्चन ।
तत्त्वतो भिद्यमाने हि मर्त्त्यताममृतं व्रजेत् ॥ १९ ॥
अजातस्यैव भावस्य जातिमिच्छन्ति वादिनः ।
अजातो ह्यमृतो भावो मर्त्त्यतां कथमेष्यति ॥ २० ॥
न भवत्यमृतं मर्त्त्यं न मर्त्त्यममृतन्तथा ।
प्रकृतेरन्यथाभावो न कथञ्चिद्भविष्यति ॥ २१ ॥
स्वभावेनामृतो यस्य भावो गच्छति मर्त्त्यतां ।
कृतकेनामृतस्तस्य कथं स्थास्यति निश्चलः ॥ २२ ॥
भूततोऽभूततो वापि सृज्यमाने समा श्रुतिः ।
निश्चितं युक्तियुक्तञ्च यत्तद्भवति नेतरत् ॥ २३ ॥

नेह नानेति चाम्नायादिन्द्रो मायाभिरित्यपि।
अजायमानो बहुधा मायया जायते तु सः ॥ २४ ॥
सम्भूतेरपवादाच्च सम्भवः प्रतिषिध्यते।
कोन्वेनं जनयेदिति कारणं प्रतिषिध्यते ॥ २५ ॥
स एष नेति नेतीति व्याख्यातं निह्नुते यतः।
सर्व्वमग्राह्यभावेन हेतुनाऽजं प्रकाशते ॥ २६ ॥
सतो हि मायया जन्म युज्यते नतु तत्त्वतः।
तत्त्वतो जायते यस्य जातं तस्य हि जायते ॥ २७ ॥
असतो मायया जन्म तत्त्वतो नैव युज्यते।
वन्ध्यापुत्रो न तत्त्वेन मायया वापि जायते ॥ २८ ॥
यथा स्वप्ने द्वयाभासं स्पन्दते मायया मनः।
तथा जाग्रद्द्वयाभासं स्पन्दते मायया मनः ॥ २९ ॥
अद्वयञ्च द्वयाभासं मनः स्वप्ने न संशयः।
अद्वयञ्च द्वयाभासं तथा जाग्रन्न संशयः ॥ ३० ॥
मनोदृश्यमिदं द्वैतं यत् किञ्चित् सचराचरं।
मनसो ह्यमनीभावे द्वैतं नैवोपलभ्यते ॥ ३१ ॥
आत्मसत्यानुबोधेन न सङ्कल्पयते यदा।
अमनस्तां तदा याति ग्राह्याभावे तदग्रहं ॥ ३२ ॥
अकल्पकमजं ज्ञानं ज्ञेयाभिन्नं प्रचक्षते।
ब्रह्म ज्ञेयमजं नित्यमजेनाजं विबुध्यते ॥ ३३ ॥

निगृहीतस्य मनसो निर्विकल्पस्य धीमतः ।
प्रचारः स तु विज्ञेयः सुषुप्तेऽन्यो न तत्समः ॥ ३४ ॥
लीयते हि सुषुप्ते तन्निगृहीतं न लीयते ।
तदेव निर्भयं ब्रह्म ज्ञानालोकं समन्ततः ॥ ३५ ॥
अजमनिद्रमस्वप्नमनामकरूपकं ।
सकृद्विभातं सर्व्वज्ञं नोपचारः कथञ्चन ॥ ३६ ॥
सर्व्वाभिलापविगतः सर्व्वचिन्तासमुत्थितः ।
सुप्रशान्तः सकृज्ज्योतिः समाधिरचलोऽभयः ॥ ३७ ॥
ग्रहो न तत्र नोत्सर्गश्चिन्ता यत्र न विद्यते ।
आत्मसंस्थन्तदा ज्ञानमजाति समतां गतं ॥ ३८ ॥
अस्पर्शयोगो वै नाम दुर्दर्शः सर्व्वयोगिभिः ।
योगिनो बिभ्यति ह्यस्मादभये भयदर्शिनः ॥ ३९ ॥
मनसो निग्रहायत्तमभयं सर्व्वयोगिनां ।
दुःखक्षयः प्रबोधश्चाऽप्यक्षया शान्तिरेव च ॥ ४० ॥
उत्सेक उदधेर्य्यद्वत् कुशाग्रेणैकबिन्दुना ।
मनसो निग्रहस्तद्वद्भवेदपरिखेदतः ॥ ४१ ॥
उपायेन निगृह्णीयाद्विक्षिप्तं कामभोगयोः ।
सुप्रसन्नं लये चैव यथा कामो लयस्तथा ॥ ४२ ॥
दुःखं सर्व्वमनुस्मृत्य कामभोगान्निवर्त्तयेत् ।
अजं सर्व्वमनुस्मृत्य जातं नैव तु पश्यति ॥ ४३ ॥

लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः ।
सकषायं विजानीयात् समप्राप्तं न चालयेत् ॥ ४४ ॥
नास्वादयेत् सुखं तत्र निःसङ्गः प्रज्ञया भवेत् ।
निश्चलं निश्चरत् चित्तं एकीकुर्य्यात् प्रयत्नतः ॥ ४५ ॥
यदा न लीयते चित्तं न च विक्षिप्यते पुनः ।
अनिङ्गनमनाभासं निष्पन्नं ब्रह्म तत्तदा ॥ ४६ ॥
स्वस्थं शान्तं सनिर्व्वाणं अकथ्यं सुखमुत्तमं ।
अजमजेन ज्ञेयेन सर्व्वज्ञं परिचक्षते ॥ ४७ ॥
न कश्चिज्जायते जीवः सम्भवोऽस्य न विद्यते ।
एतत्तदुत्तमं सत्यं यत्र किञ्चिन्न जायते ॥ ४८ ॥
इति गौडपादीयकारिकायामद्वैताख्यं तृतीयं प्रकरणं ॥३॥

॥ ॐ तत्सत् ॥

ज्ञानेनाकाशकल्पेन धर्म्मान् यो गगनोपमान् ।
ज्ञेयाभिन्नेन सम्बुद्धस्तं वन्दे द्विपदाम्बरं ॥ १ ॥
अस्पर्शयोगो वै नाम सर्व्वसत्त्वसुखो हितः ।
अविवादोऽविरुद्धश्च देशितस्तं नमाम्यहं ॥ २ ॥
भूतस्य जातिमिच्छन्ति वादिनः केचिदेव हि ।
अभूतस्यापरे धीरा विवदन्तः परस्परं ॥ ३ ॥
भूतं न जायते किञ्चिदभूतं नैव जायते ।
विवदन्तोऽद्वया ह्येवमजातिं ख्यापयन्ति ते ॥ ४ ॥

ख्याप्यमानामजातिन्तैरनुमोदामहे वयं।
विवदामो न तैः सार्द्धमविवादं निबोधत ॥ ५ ॥
अजातस्यैव धर्म्मस्य जातिमिच्छन्ति वादिनः।
अजातो ह्यमृतो धर्म्मो मर्त्यतां कथमेष्यति ॥ ६ ॥
न भवत्यमृतं मर्त्यं न मर्त्यममृतन्तथा।
प्रकृतेरन्यथाभावो न कथञ्चिद्भविष्यति ॥ ७ ॥
स्वभावेनामृतो यस्य धर्म्मो गच्छति मर्त्यतां।
कृतकेनाऽमृतस्तस्य कथं स्थास्यति निश्चलः ॥ ८ ॥
सांसिद्धिकी स्वाभाविकी सहजा अकृता च या।
प्रकृतिः सेति विज्ञेया स्वभावं न जहाति या ॥ ९ ॥
जरामरणनिर्म्मुक्ताः सर्व्वे धर्म्माः स्वभावतः।
जरामरणमिच्छन्तश्च्यवन्ते तन्मनीषया ॥ १० ॥
कारणं यस्य वै कार्य्यं कारणं तस्य जायते।
जायमानं कथमजं भिन्नं नित्यं कथञ्च तत् ॥ ११ ॥
कारणाद्यद्यनन्यत्वमतः कार्य्यमजं यदि।
जायमानाद्धि वै कार्य्यात् कारणं ते कथं ध्रुवम् ॥ १२ ॥
अजाद्वै जायते यस्य दृष्टान्तस्तस्य नास्ति वै।
जाताच्च जायमानस्य न व्यवस्था प्रसज्यते ॥ १३ ॥
हेतोरादिः फलं येषामादिर्हेतुः फलस्य च।
हेतोः फलस्य चानादिः कथं तैरुपवर्ण्यते ॥ १४ ॥

हेतोरादिः फलं येषामादिर्हेतुः फलस्य च ।
तथा जन्म भवेत्तेषां पुत्राज्जन्म पितुर्यथा ॥ १५ ॥
सम्भवे हेतुफलयोरेषितव्यः क्रमस्त्वया ।
युगपत्सम्भवे यस्मादसम्बन्धो विषाणवत् ॥ १६ ॥
फलादुत्पद्यमानः सन्न ते हेतुः प्रसिद्ध्यति ।
अप्रसिद्धः कथं हेतुः फलमुत्पादयिष्यति ॥ १७ ॥
यदि हेतोः फलात्सिद्धिः फलसिद्धिश्च हेतुतः ।
कतरत्पूर्व्वनिष्पन्नं यस्य सिद्धिरपेक्षया ॥ १८ ॥
अशक्तिरपरिज्ञानं क्रमकोपोऽथ वा पुनः ।
एवं हि सर्व्वथा बुद्धैरजातिः परिदीपिता ॥ १९ ॥
वीजाङ्कुराख्यो दृष्टान्तः सदा साध्यसमो हि सः ।
न हि साध्यसमो हेतुः सिद्धौ साध्यस्य युज्यते ॥ २० ॥
पूर्व्वापरापरिज्ञानमजातेः परिदीपकं ।
याजमानाद्धि वै धर्म्मात्कथं पूर्व्वं न गृह्यते ॥ २१ ॥
स्वतो वा परतो वापि न किञ्चिद्वस्तु जायते ।
सदसत्सदसद्वाऽपि न किञ्चिद्वस्तु जायते ॥ २२ ॥
हेतुर्न जायतेऽनादेः फलञ्चापि स्वभावतः ।
आदिर्नविद्यते यस्य तस्य ह्यादिर्न विद्यते ॥ २३ ॥
प्रज्ञप्तेः सनिमित्तत्वमन्यथा द्वयनाशतः ।
सङ्क्लेशस्योपलब्धेश्च परतन्त्रास्तिता मता ॥ २४ ॥

प्रज्ञप्तेः सनिमित्तत्वमिष्यते युक्तिदर्शनात् ।
निमित्तस्यानिमित्तत्वमिष्यते भूतदर्शनात् ॥ २५ ॥
चित्तं न संस्पृशत्यर्थं नार्थाभासं तथैव च ।
अभूतो हि यतश्चार्थो नार्थाभासस्ततः पृथक् ॥ २६ ॥
निमित्तं न सदा चित्तं संस्पृशत्यध्वसु त्रिषु ।
अनिमित्तो विपर्य्यासः कथं तस्य भविष्यति ॥ २७ ॥
तस्मान्न जायते चित्तं चित्तदृश्यं न जायते ।
तस्य पश्यन्ति ये जातिं खे वै पश्यन्ति ते पदं ॥ २८ ॥
अजातं जायते यस्मादजातिः प्रकृतिस्ततः ।
प्रकृतेरन्यथाभावो न कथञ्चिद्भविष्यति ॥ २९ ॥
अनादेरन्तवत्त्वञ्च संसारस्य न सेत्स्यति ।
अनन्तता चादिमतो मोक्षस्य न भविष्यति ॥ ३० ॥
आदावन्ते च यन्नास्ति वर्त्तमानेऽपि तत्तथा ।
वितथैः सदृशाः सन्तोऽवितथा इव लक्षिताः ॥ ३१ ॥
सप्रयोजनता तेषां स्वप्ने विप्रतिपद्यते ।
तस्मादाद्यन्तवत्त्वेन मिथ्यैव खलु ते स्मृताः ॥ ३२ ॥
सर्व्वे धर्म्मा मृषा स्वप्ने कायस्यान्तर्निदर्शनात् ।
संवृत्तेऽस्मिन् प्रदेशे वै भूतानां दर्शनं कुतः ॥ ३३ ॥
न युक्तं दर्शनं गत्वा कालस्यानियमाद्गतौ ।
प्रतिबुद्धश्च वै सर्व्वस्तस्मिन् देशे न विद्यते ॥ ३४ ॥

मित्राद्यैः सह सम्मन्त्र्य सम्बुद्धो न प्रपद्यते ।
गृहीतञ्चापि यत्किञ्चित् प्रतिबुद्धो न पश्यति ॥ ३५ ॥
स्वप्ने चावस्तुकः कायः पृथगन्यस्य दर्शनात् ।
यथा कायस्तथा सर्व्वं चित्तदृश्यमवस्तुकं ॥ ३६ ॥
ग्रहणाज्जागरितवत्तद्धेतुः स्वप्न इष्यते ।
तद्धेतुत्वात्तु तस्यैव सज्जागरितमिष्यते ॥ ३७ ॥
उत्पादस्याप्रसिद्धत्वादजं सर्व्वमुदाहृतं ।
न च भूतादभूतस्य सम्भवोऽस्ति कथञ्चन ॥ ३८ ॥
असज्जागरिते दृष्ट्वा स्वप्ने पश्यति तन्मयः ।
असत्स्वप्नेऽपि दृष्ट्वा च प्रतिबुद्धो न पश्यति ॥ ३९ ॥
नास्त्यसद्धेतुकमसत् सदसद्धेतुकन्तथा ।
सच्च सद्धेतुकं नास्ति सद्धेतुकमसत्कुतः ॥ ४० ॥
विपर्य्यासाद्यथा जाग्रदचिन्त्यान् भूतवत् स्पृशेत् ।
तथा स्वप्ने विपर्य्यासाद्धर्म्मांस्तत्रैव पश्यति ॥ ४१ ॥
उपलम्भात् समाचारादस्ति वस्तुत्ववादिनां ।
जातिस्तु देशिता बुद्धैरजातेस्त्रसतां सदा ॥ ४२ ॥
अजातेस्त्रसतान्तेषामुपलम्भाद्वियन्ति ये ।
जातिदोषा न सेत्स्यन्ति दोषोऽप्यल्पो भविष्यति ॥ ४३ ॥
उपलम्भात् समाचारान्मायाहस्ती यथोच्यते ।
उपलम्भात् समाचारादस्ति वस्तु तथोच्यते ॥ ४४ ॥

जात्याभासं चलाभासं वस्त्वाभासं तथैव च ।
अजाचलमवस्तुत्वं विज्ञानं शान्तमद्वयं ॥ ४५ ॥
एवं न जायते चित्तमेवंधर्म्मा अजाः स्मृताः ।
एवमेव विजानन्तो न पतन्ति विपर्य्यये ॥ ४६ ॥
ऋजुवक्रादिकाभासमलातस्पन्दितं यथा ।
ग्रहणग्राहकाभासं विज्ञानस्पन्दितन्तथा ॥ ४७ ॥
अस्पन्दमानमलातमनाभासमजं यथा ।
अस्पन्दमानं विज्ञानमनाभासमजं तथा ॥ ४८ ॥
अलाते स्पन्दमाने वै नाभासा अन्यतो भुवः ।
न ततोऽन्यत्र निस्पन्दान्नालातम्प्रविशन्ति ते ॥ ४६ ॥
न निर्गता अलातात्ते द्रव्यत्वाभावयोगतः ।
विज्ञानेऽपि तथैव स्युराभासस्याविशेषतः ॥ ५० ॥
विज्ञाने स्पन्दमाने वै नाभासा अन्यतो भुवः ।
न ततोऽन्यत्र निस्पन्दान्न विज्ञानं विशन्ति ते ॥ ५१ ॥
न निर्गता विज्ञानात्ते द्रव्यत्वाभावयोगतः ।
कार्य्यकारणताभावाद्यतोऽचिन्त्याः सदैव ते ॥ ५२ ॥
द्रव्यं द्रव्यस्य हेतुः स्यादन्यदन्यस्य चैव हि ।
द्रव्यत्वमन्यभावो वा धर्म्माणां नोपपद्यते ॥ ५३ ॥
एवं न चित्तजा धर्म्माश्चित्तं वापि न धर्म्मजं ।
एवं हेतुफला जातिं प्रविशन्ति मनीषिणः ॥ ५४ ॥

यावद्धेतुफलावेशस्तावद्धेतुफलोद्भवः ।
क्षीणे हेतुफलावेशे नास्ति हेतुफलोद्भवः ॥ ५५ ॥
यावद्धेतुफलावेशः संसारस्तावदायतः ।
क्षीणे हेतुफलावेशे संसारं न प्रपद्यते ॥ ५६ ॥
संवृत्या जायते सर्व्वं शाश्वतं नास्ति तेन वै ।
सद्भावेन ह्यजं सर्व्वमुच्छेदस्तेन नास्ति वै ॥ ५७ ॥
धर्म्मा य इति जायन्ते जायन्ते ते न तत्त्वतः ।
जन्ममायोपमन्तेषां सा च माया न विद्यते ॥ ५८ ॥
यथा मायामयाद्बीजाज्जायते तन्मयोऽङ्कुरः ।
नाऽसौ नित्यो न चोच्छेदी तद्वद्धर्म्मेषु योजना ॥ ५९ ॥
नाजेषु सर्व्वधर्म्मेषु शाश्वताशाश्वताभिधा ।
यत्र वर्णा न वर्त्तन्ते विवेकस्तत्र नोच्यते ॥ ६० ॥
यथा स्वप्ने द्वयाभासं चित्तं चलति मायया ।
तथा जाग्रद्द्वयाभासं चित्तं चलति मायया ॥ ६१ ॥
अद्वयञ्च द्वयाभासं चित्तं स्वप्ने न संशयः ।
अद्वयञ्च द्वयाभासं तथा जाग्रन्न संशयः ॥ ६२ ॥
स्वप्नदृक् प्रचरन् स्वप्ने दिक्षु वै दशसु स्थितान् ।
अण्डजान् स्वेदजान् वापि जीवान् पश्यति यान् सदा॥६३॥
स्वप्नदृक् चित्तदृश्यास्ते न विद्यन्ते ततः पृथक् ।
तथा तद्दृश्यमेवेदं स्वप्नदृक् चित्तमिष्यते ॥ ६४ ॥

चरन् जागरिते जाग्रद्दिक्षु वै दशसु स्थितान्।
अण्डजान् स्वेदजान् वापि जीवान् पश्यति यान् सदा॥६५॥
जाग्रच्चित्तेक्षणीयास्ते न विद्यन्ते ततः पृथक्।
तथा तद्दृश्यमेवेदं जाग्रतश्चित्तमिष्यते॥ ६६ ॥
उभे ह्यन्योन्यदृश्ये ते किन्तदस्तीति चोच्यते।
लक्षणाशून्यमुभयं तन्मते नैव गृह्यते॥ ६७ ॥
यथा स्वप्नमयो जीवो जायते म्रियतेऽपि च।
तथा जीवा अमी सर्व्वे भवन्ति न भवन्ति च॥ ६८ ॥
यथा मायामयो जीवो जायते म्रियतेऽपि च।
तथा जीवा अमी सर्व्वे भवन्ति न भवन्ति च॥ ६९ ॥
यथा निर्म्मितको जीवो जायते म्रियतेऽपि वा।
तथा जीवा अमी सर्व्वे भवन्ति न भवन्ति च॥ ७० ॥
न कश्चिज्जायते जीवः सम्भवोऽस्य न विद्यते।
एतत्तदुत्तमं सत्यं यत्र किञ्चिन्न जायते॥ ७१ ॥
चित्तस्पन्दितमेवेदं ग्राह्यग्राहकवद्द्वयं।
चित्तं निर्व्विषयं नित्यमसङ्गन्तेन कीर्त्तितं॥ ७२ ॥
योऽस्ति कल्पितसंवृत्या परमार्थेन नास्त्यसौ।
परतन्त्राभिसंवृत्या स्यान्नास्ति परमार्थतः॥ ७३ ॥
अजः कल्पितसंवृत्या परमार्थेन नाप्यजः।
परतन्त्रोऽभिनिष्पत्त्या संवृत्या जायते तु सः॥ ७४ ॥

अभूताभिनिवेशोऽस्ति द्वयं तत्र न विद्यते ।
द्वयाभावं स बुद्ध्वैव निर्निमित्तो न जायते ॥ ७५ ॥
यदा न लभते हेतूनुत्तमाधममध्यमान् ।
तदा न जायते चित्तं हेत्वभावे फलं कुतः ॥ ७६ ॥
अनिमित्तस्य चित्तस्य यानुत्पत्तिः समाऽद्वया ।
अजातस्यैव सर्व्वस्य चित्तदृश्यं हि तद्यतः ॥ ७७ ॥
बुद्ध्वा निमित्ततां सत्यां हेतुं पृथगनाप्नुवन् ।
वीतशोकं तथा काममभयं पदमश्नुते ॥ ७८ ॥
अभूताभिनिवेशाद्धि सदृशे तत्प्रवर्त्तते ।
वस्त्वभावं स बुद्ध्वैव निःसङ्गं विनिवर्त्तते ॥ ७९ ॥
निवृत्तस्याप्रवृत्तस्य निश्चला हि तदा स्थितिः ।
विषयः स हि बुद्धानां तत्साम्यमजमद्वयं ॥ ८० ॥
अजमनिद्रमस्वप्नं प्रभातम्भवति स्वयं ।
सकृद्विभातो ह्येवैष धर्म्मो धातुः स्वभावतः ॥ ८१ ॥
सुखमाव्रियते नित्यं दुःखं विव्रियते सदा ।
यस्य कस्य च धर्म्मस्य ग्रहेण भगवानसौ ॥ ८२ ॥
अस्ति नास्त्यस्ति नास्तीति नास्तीति नास्ति वा पुनः ।
चलस्थिरोभयाभावैरावृणोत्येव बालिशः ॥ ८३ ॥
कोट्यश्चतस्र एतास्तु ग्रहैर्य्यासां सदा वृतः ।
भगवानाभिरस्पृष्टो येन दृष्टः स सर्व्वदृक् ॥ ८४ ॥


प्राप्य सर्व्वज्ञतां कृत्स्नां ब्राह्मण्यं परमद्वयं ।
अनापन्नादिमध्यान्तं किमतः परमीहते ॥ ८५ ॥
विप्राणां विनयो ह्येष शमः प्राकृत उच्यते ।
दमः प्रकृतिदान्तत्वादेवं विद्वाञ्छमं व्रजेत् ॥ ८६ ॥
सवस्तु सोपलम्भञ्च द्वयं लौकिकमिष्यते ।
अवस्तु सोपलम्भञ्च शुद्धं लौकिकमिष्यते ॥ ८७ ॥
अवस्त्वनुपलम्भञ्च लोकोत्तरमिति स्मृतं ।
ज्ञानं ज्ञेयञ्च विज्ञेयं सदा बुद्धैः प्रकीर्त्तितं ॥ ८८ ॥
ज्ञाने च त्रिविधे ज्ञेये क्रमेण विदिते स्वयं ।
सर्व्वज्ञता हि सर्व्वत्र भवतीह महाधियः ॥ ८९ ॥
हेयज्ञेयाप्यपाक्यानि विज्ञेयान्यग्रयाणतः ।
तेषामन्यत्र विज्ञेयादुपलम्भस्त्रिषु स्मृतः ॥ ९० ॥
प्रकृत्याकाशवज्ज्ञेयाः सर्व्वे धर्म्मा अनादयः ।
विद्यते नहि नानात्वं तेषां क्वच न किञ्चन ॥ ९१ ॥
आदिबुद्धाः प्रकृत्येव सर्व्वे धर्म्माः सुनिश्चिताः ।
यस्यैवम्भवति क्षान्तिः सोऽमृतत्वाय कल्पते ॥ ९२ ॥
आदि शान्ता ह्यनुत्पन्नाः प्रकृत्यैव सुनिर्वृताः ।
सर्व्वे धर्म्माः समाभिन्ना अजं साम्यं विशारदं ॥ ९३ ॥
वैशारद्यन्तु वै नास्ति भेदे विचरतां सदा ।
भेदनिम्नाः पृथग्वादास्तस्मात्ते कृपणाः स्मृताः ॥ ९४ ॥

अजे साम्ये तु ये केचिद्भविष्यन्ति सुनिश्चिताः ।
ते हि लोके महाज्ञानास्तच्च लोको न गाहते ॥ ९५ ॥
अजेष्वजमसंक्रान्तं धर्म्मेषु ज्ञानमिष्यते ।
यतो न क्रमते ज्ञानमसङ्गं तेन कीर्त्तितं ॥ ९६ ॥
अणुमात्रेऽपि वैधर्म्मे जायमानेऽविपश्चितः ।
असङ्गता सदा नास्ति किमुतावरणच्युतिः ॥ ९७ ॥
अलब्धावरणाः सर्व्वे धर्म्माः प्रकृतिनिर्म्मलाः ।
आदौ बुद्धास्तथा मुक्ता बुद्ध्यन्त इति नायकाः ॥ ९८ ॥
क्रमते न हि बुद्धस्य ज्ञानं धर्म्मेषु तापिनः ।
सर्व्वे धर्म्मास्तथा ज्ञानं नैतद्बुद्धेन भाषितं ॥ ९९ ॥
दुर्द्दर्शमतिगम्भीरमजं साम्यं विशारदं ।
बुद्ध्वा पदमनानात्वं नमस्कुर्म्मो यथा बलं ॥ १०० ॥

इति गौडपादाचार्य्यकृता षट् माण्डुक्योपनिकारिका सम्पूर्णा ॥ ॐ तत् सत् ॐ ॥







कुसुमाञ्जलिः ।

—०◊०—

प्रथमः स्तवकः ।

ईशदीषदनधीतविद्यया तातमात्मसुदशाविवर्द्धयन् ।
क्षेपणाय भवजन्मकर्म्मणां कोऽपि गोपतनयो नमस्यते ॥

इष्टदेवतासङ्कीर्त्तनं ब्रह्मप्रतिपादकसच्छब्दप्रयोगात्मकञ्च मङ्गलं कुर्व्वन् ग्रन्थनामाह ।

सत्पक्षप्रसरः सतां परिमलप्रोद्बोधबद्धोत्सवो
विम्लानो न विमर्दनेऽमृतरसप्रस्यन्दमाध्वीकभूः ।
ईशस्यैष निवेशितः पदयुगे भृङ्गायमाणं भ्रम-
च्चेतो मे रमयत्वविघ्नमनघन्यायप्रसूनाञ्जलिः ॥१॥

एषः अनघोनिर्द्दोषः न्यायः समस्तरूपोपन्नलिङ्गप्रतिपादकं वाक्यं स एव कुसुमाञ्जलिः मे मम चित्तं रमयतु दुःखसामग्रीविहीनं करोतु । अनघत्वं शब्ददोषरहितत्वं विषयाशुद्धेः पूर्व्वार्द्धेनैव निरासादिति प्रकाशः । अविघ्नं यथा स्यात् ईशस्य पदयुगे पद्यते ऽनेनेति व्युत्पत्त्या पदं प्रत्यायकं तद्युगं प्रमाणतर्कस्वरूपं तत्र निवेशितः तद्विषयतया उत्पादितः । चेतः कीदृशं भृङ्गायमाणं भृङ्ग इव मकरन्दे दुःखविगमोपाये सतृष्णं भ्रमत् दुःखविगमोपायमनुसन्दधत् । प्रसूनाञ्जलिसाम्यमाह सदित्यादि सता समीचीनेन पक्षेणानुकूलेन रविकिरणादिना प्रसरोविकाशोयस्य स तथा सतां पक्षाणां दलानां विकाशोयत

थ तथेति वा सतामनुपहतप्राणानां परिमलस्य गन्धविशेषस्य मोद्बोधेन साक्षात्कारेण बद्ध उत्सव आनन्दो येन सः विमर्द्दने करपुटविमर्द्दने न विम्लानः नान्यथाभूतसंस्थानः अमृततुल्यं रसं प्रस्यन्दते इति प्रस्यन्दः एतादृशं माध्वीकं मधु तस्य भूरुत्पत्तिस्थानम् । न्यायपक्षे सति प्रामाणिके पक्षतावच्छेदकविशिष्टे पक्षे सिषाधयिषितसाध्यके धर्म्मिणि प्रसरः प्रकर्षेण सरो ज्ञानं यस्मात् । एतेनाश्रयासिद्धिस्वरूपासिद्धिबाधनिरासः । सतां विवेचकानां परि सर्वतोभावेन मलः सम्बन्धो व्याप्तिस्तस्याः मोद्बोधेन प्रमया बद्ध उत्सव आनन्दो येन । एतेन व्यभिचारव्याप्यत्वासिद्धि विरोधानां निरासः । विमर्द्दने विरोधिप्रमाणचिन्तायां न म्लानः न कार्य्यक्षमः तेन सत्प्रतिपक्षराहित्यम् ॥ अमृतं मोक्षः रस इष्यमाणं ऋद्विहित इति न्यायात् प्रस्यन्दमुत्पद्यमानं तेन मोक्षस्य साध्यता निराकृता तदेव माध्वीकं तस्य भूरुत्पत्तिस्थानम् ॥ १ ॥

नन्वीश्वरपदयुगनिवेशितस्य न्यायस्य मोक्षरूपफलसम्बन्धे मानाभावः तत्त्वज्ञानविषयात्मबोधकात्मशब्दस्य संसारनिदानमिथ्याज्ञान विषयस्यात्ममात्रपरत्वात् तन्मननस्यैव मोक्षोपायत्वादिति शङ्कायामाह ।

स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः ।
यदुपास्तिमसावत्र परमात्मा निरूप्यते ॥ २ ॥

स्वर्गापवर्गयोः स्वर्गतुल्ययोः अपवर्गयोर्जीवन्मुक्तिपरममुक्त्योः । ईश्वरमननाद्दृष्टद्वारा स्वात्मसाक्षात्कारद्वारा वा मुक्तौ हेतुः तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति श्रुतिस्तत्कारणत्वे मानम् । स्वात्मसाक्षात्कारस्य मोक्ष-

हेतुत्वे मानञ्च आत्मानञ्चेद्विजानीयादहमस्मीति पुरुषः। किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेदिति ॥ २ ॥

इह यद्यपि यं कमपि पुरुषार्थमर्थयमानाः शुद्धबुद्धस्वभाव इत्यौपनिषदाः आदिविद्वान् सिद्ध इति कापिलाः क्लेश-कर्म्मविपाकाशयैरपरामृष्टो निर्म्माणकायमधिष्ठाय सम्प्रदाय-प्रद्योतकोऽनुग्राहकश्चेति पातञ्जलाः लोकवेदविरुद्धैरपि निर्लेपः स्वतन्त्र इति महापाशुपताः शिव इति शैवाः पुरुषोत्तम इति वैष्णवाः पितामह इति पौराणिकाः यज्ञपुरुष इति याज्ञिकाः सर्व्वज्ञ इति सौगताः। निरावरण इति दिगम्बराः उपास्यत्वेन देशित इति मीमांसकाः लोकव्यवहार सिद्ध इति चार्व्वाकाः यावदुक्तोपपन्न इति नैयायिकाः किं बहुना यं कारवोऽपि विश्वकर्मेत्युपासते तस्मिन्नेवं जातिगोत्रप्रवरचरणकुल धर्म्मादिवदासंसारं सुप्रसिद्धानुभवे भगवति भवे तत्त्वसन्देह एव कुतः किं निरूपणीयं तथापि न्यायचर्च्चेयमीशस्य मननव्यपदेशभाक्। उपासनैव क्रियते श्रवणानन्तरागता। श्रुतोहि भगवान् बहुशः श्रुति स्मृतीतिहासपुराणादिषु इदानीं मन्तव्यो भवति श्रोतव्यो मन्तव्य इति श्रुतेः आगमेनानुमानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तममिति स्मृतेश्च। तदिह संक्षेपतः पञ्चतयी विप्रतिपत्तिः अलौकिकस्य परलोकसाधनस्याभावात् अन्यथापि परलोकसाधनानुष्ठानसम्भवात् तदभावावेदकप्रमाणसम्भवात् सत्वेऽपि तस्याप्रमाणत्वात् तत्साधकप्रमाणाभावाच्चेति ॥ ३ ॥

मलोद्वितीयरहितः बुद्धिबोधस्वरूपः सादौ सर्गादौ विद्वान् चिद्रूपः सिद्धः अष्टविधैश्वर्य्यवान् अविद्यास्मितारागद्वेषा-

भिनिवेशाः पञ्चक्लेशाः धर्म्माधर्म्महेतुयोगहिंसादिः जात्यायुर्भोगाविपाकाः धर्म्माधर्म्मा आशयाः निर्म्माणार्थं कायोनिर्म्माणकायः सम्प्रदायोवेदः प्रद्योतकइति प्रकाशकः वेदस्य नित्यत्वात् घटादौ कर्त्तव्येऽनुग्राहकः शिक्षयिता शिवोनिस्त्रैगुण्यः पितामहोजनकस्यापि जनकः इज्यते इति यज्ञः सर्व्वज्ञः क्षणिकसर्व्वज्ञ आवरणमविद्यारागद्वेष मोहाभिनिवेशाः उपास्यत्वेन देशितोसत्त्वादिः यावदुक्तेषु यदुपपन्नं तेनोपपन्नः चरं शाखा ।. शाब्दसिद्धावप्यनुमित्सयानुमितेर्न संशयासत्त्वं दोषाय । तुष्यत्विति न्यायेन संशयमाह तदिहेत्यादि ॥ ३ ॥

धर्म्माधर्म्मात्मकालौकिकपरलोकसाधने विप्रतिपन्नं प्रति साधनं सिद्धे च तस्मिन् तदधिष्ठातृतया ईश्वरसिद्धिः अचेतनस्य कारणस्य सचेतनाधिष्ठानेनैव कार्य्यजनकत्वात् तत्साधनायाह ।

सापेक्षत्वादनादित्वाद्वैचित्र्याद्विश्ववृत्तितः ।
प्रत्यात्मनियमाद्भुक्तेरस्ति हेतुरलौकिकः ॥४॥

अलौकिकोऽतीन्द्रियः परलोकहेतुरस्तीति प्रतिज्ञा तत्र प्रथमतः कारणसामान्यसाधनाय सापेक्षत्वादिति सापेक्षत्वं कादाचित्कत्वं तथाच कार्य्यं सहेतुकं कादाचित्कत्वात् भोजनजन्यतृप्तिवत् । ननु घटादिहेतोः सदातनत्वे घटादेरपि सदातनत्वापत्तिः तथा च तस्य कादाचित्कत्वं वाच्यम् एवं तत्कारणपरम्परापि कादाचित्की सहेतुका वाच्या इत्यनवस्थायामुक्तमनादित्वादिति वीजाङ्कुरवत् प्रामाणिकीय मनवस्था न दोषायेत्यर्थः । ननु मह्त्तैव कारणमस्तु किं वा नानाबुद्ध्यात्मिका प्रकृतिरेव तथास्त्वित्यचाह वैचित्र्यादिति कार्य्यं विचित्रकारणवत् विचित्रकार्य्यत्वात् । ननु [illegible]द्येव कारणमस्तु किमदृ

ष्टेनेत्यत आह विश्ववृत्तित इति विश्वेषां परलोकार्थिनां यागादौ प्रवृत्तितः स्वर्गादिफलकत्वज्ञानमेव यागादिप्रवृत्तिजनकं यागादेश्च तज्जनकत्वं तत्कालावस्थायिव्यापारं विना न सम्भवतीति अदृष्टसिद्धिः। नन्वदृष्टं न भोगसमानाधिकरणं किन्तु भोग्यनिष्ठत्वेनैव भोगजनकमित्यत आह प्रत्यात्मनियमादिति भुक्तेर्भोगस्य प्रतिनियतात्मवृत्तित्वात् व्यधिकरणादृष्टस्य भोगजनकत्वेऽतिप्रसङ्गात् ॥ ४ ॥

अकस्मादेव भवति न किञ्चिदपेक्ष्यं कार्य्यमिति अतएवानिमित्ततोभावोत्पत्तिः कण्टकतैक्ष्ण्यदर्शनादिति पूर्व्वपक्षसूत्रं तत्राह।

हेतुभूतिनिषेधो न स्वानुपाख्यविधिर्न च।
स्वभाववर्णना नैवमवधेर्नियतत्वतः ॥ ५ ॥

अकस्मादिति किं हेतुनिषेधपरं भवननिषेधपरम् अतिरिक्तपारमार्थिकहेतुनिषेधपरं वा अत्रोभयत्राहेतुकत्वमलीकहेतुकत्वं वा पर्य्यवस्यति स्वभावादित्यर्थपरं वा स्वं कार्य्यम् अनुपाख्यमलीकम् अवधेर्नियतत्वतः नियतावधिककार्य्यदर्शनात् अनियतावधिकत्वे च कादाचित्कत्वव्याकोप इति भावः ॥ ५ ॥

नन्वनादिश्चेत् कार्य्यकारणप्रवाहः कादाचित्कत्वान्यथानुपपत्त्या कल्प्यस्तदा वह्नित्वावच्छिन्नस्य तृणादिव्यभिचारितया तृणाद्यकारणत्वे कादाचित्कत्वव्याकोपः कारणान्तरस्य च वक्तुमशक्यत्वात् तत्र वह्न्यनुकूलैकशक्तिमत्त्वेन कारणता शक्तिश्च पदार्थान्तरं प्रतिव्यक्ति नाना अनित्ये अनित्या नित्ये नित्यैव सा शक्तिरनित्ये भावहेतुना इति तत्सिद्धान्तात्। वह्न्यनुकूला तृणारणिमणिनिष्ठा शक्तिर्नित्येति तु मतान्तरम्। न्यायमतन्तु तृणादिजन्यतावच्छेदकं वैजात्यमेव विजातीयेष्वेकजातीयकार्य्यमूलशक्ति-

कल्पने धूमादिना वह्न्यनुमानं न स्यात् न स्याच्च तृणफुत्कार-समवधानस्य निर्मथनारणि समवधानस्य प्रतिफलितरविकिरणमणिसमवधानस्य च प्रतिनियमः कारणतावच्छेदकावच्छिन्नस्यैव कारणतावच्छेदकान्तरावच्छिन्नसमवधाने कार्य्यजननस्य दृष्टत्वात् फुत्कारमणिसम्बन्धादितोऽपि वह्न्यापत्तेः । यदि च तृणफुत्कारादिसम्बन्धादिषु वह्न्यनुकूला एका शक्तिः कल्प्यते तदा नैतत् समाधानं परन्तु तार्णवह्न्यादिनिष्ठं वैजात्यं प्रत्यक्षसिद्धं दीपत्वादिति न पदार्थान्तरशक्तिकल्पनम् । अमुमर्थमाह ।

प्रवाहो नादिमानेष न विजात्येकशक्तिमान् ।
तत्त्वे यत्नवता भाव्यमन्वयव्यतिरेकयोः ॥ ६ ॥

एष कार्य्यकारणप्रवाहः नादिमान् अनादिः विजातीयेषु तृणादिषु एकशक्तिमान् न प्रवाहः अन्वयव्यतिरेकयोस्तत्त्वे नियतत्वे निर्वाह्ये यत्नवता भाव्यं यतः करणीयः वैजात्यं कल्पनीयमिति भावः । वह्निसामान्यं प्रति तु विजातीयोष्णस्पर्शवत्तेजः कारणम् ॥ ६ ॥

ननु यथा एक एव दीपः आलोककारी वर्त्तिविकारकारी घटादि प्रकाशकारी च तथा एकमेव ब्रह्म किं वा कार्य्यकारणयोरभेदात् प्रतिपुरुषं विभिन्नबुद्धेरभिन्ना प्रकृतिरेव हेतुरस्तु तथाच नादृष्टाधिष्ठातृतयेश्वरसिद्धिरित्यत्राह ।

एकस्य न क्रमः क्वापि वैचित्र्यञ्च समस्य न ।
शक्तिभेदो न चाभिन्नः स्वभावो दुरतिक्रमः ॥ ७ ॥

एकस्य कारणस्य नियम्यो न कार्य्याणां क्रमः समस्य एकजातीय कारणस्य प्रयोज्यञ्च न कार्य्याणां वैचित्र्यं वैजात्यं तथाच

क्रमिककार्य्यं निर्व्वाहकतया क्रमिककारणसिद्धिः विजातीयकार्य्यजनकतयाच विचित्रहेतुसिद्धिरित्यर्थः। शक्तिभेदादेव सजातीयादेकस्मात् कार्य्यवैजात्यमिति शङ्कां निराकुरुते शक्तिभेदोन चाभिन्न इति चो हेतौ न शक्तिभेदः अभिन्नो यतः शक्तिशक्तिमतोरभेदात् भेदे च तस्यैव कारणत्वस्वीकारे एकमात्रकारणत्वभङ्गोद्वैतापत्तिश्चेत्यर्थः। ननु स्वभावादेव एककारणस्य विचित्रकार्य्यनिर्व्वाहकत्वमित्यत्राह स्वभावो दुरतिक्रम इति एकस्मिन् कार्य्ये जनयितव्ये यः स्वभावः कार्य्यान्तर जननकाले तस्यानुवृत्तौ दहनस्यापि जलादित्वं स्यात् स्वभावस्य दुरपह्नवत्वादित्यर्थः। प्रदीपस्थले तत्तत्कार्य्यसामग्रीभेदकल्पनादिति भावः ॥७॥

ननु दण्डादिर्घटादौ हेतुरस्तु न तु यागादिः स्वर्गादिहेतुरित्यत्राह।

विफला विश्ववृत्तिर्नो न दुःखैकफलापि वा।
दृष्टलाभफला नापि विप्रलम्भोऽपि नेदृशः ॥८॥

विश्वेषां परलोकार्थिनां स्वर्गाद्यर्थं यागादौ प्रवृत्तिर्व्विफला न वा दुःखमात्रफलिका प्रवृत्तेरिष्टसाधनताधीसाध्यत्वात् न च दृष्टलाभफला पूजाख्यातिधनादिफला तन्निरपेक्षैरपि तदाचरणात्। केनचित् प्रतारकेण स्वर्गादिफलकतया यागादिकं प्रकल्प्य स्वयमनुष्ठाय वञ्चितोलोकः प्रवर्त्तते इत्यत्राह विप्रलम्भोऽपि नेदृश इति क एवं लोकोत्तरो यः परप्रतारणार्थं नानाविधक्लेशहेतुकर्म्मभिरात्मानमवसादयेत् तथाच यागादिप्रवृत्तिरेव स्वर्गादिफलकत्वे यागादेर्मानमिति ॥८॥

ननु यागादिकं स्वर्गादिहेतुरस्तु नतु तज्जन्यादृष्टं तथेत्यत्राह।

चिरध्वस्तं फलायालं न कर्म्मातिशयं विना।
सम्भोगोनिर्व्विशेषाणां न भूतैः संस्कृतैरपि ॥९॥

चिरध्वस्तं यागादिकर्म्मातिशयं तत्फलानुकूलव्यापारं विना फलाय न अलं समर्थं चिरध्वस्तकारणस्य व्यापारद्वारैव हेतुत्वं यथा अनुभवस्य संस्कारद्वारकस्य स्मृतौ। ननु भोग्यनिष्ठमदृष्टं कारणमस्तु इति जिज्ञासायामाह सम्भोगइति निर्व्विशेषाणामदृष्टरूप विशेषगुणशून्यानाम् आत्मनां सम्भोगः प्रत्यात्मनियतोभोगः संस्कृतैरपि अदृष्टवत्तया स्वीकृतैरपि भूतैर्न स्यात् भूतानां शरीरादीनां सर्व्वात्मसाधारण्यात् तददृष्टाकृष्टैरेव शरीरेन्द्रियादिभिस्तद्भोग जननादित्यर्थः ॥ ९ ॥

ननु भोग्यादिनिष्ठोधर्म्मविशेषोऽतीन्द्रियः प्रतिनियतभोगादि नियामकोऽस्तु यथा दाहादिनियामकोवह्न्यादिनिष्ठः शक्तिभेदः अन्यथा तादृशादेव करतलानलसंयोगात् सति प्रतिबन्धके दाहापत्तेः। नच मण्याद्यभावएव कारणमस्तिति वाच्यं कारणत्वस्य भावत्वव्याप्तत्वात् किन्तु शक्तिनाशं करोतीति मण्यादिः प्रतिबन्धक उच्यते तथाच शक्तिः स्वीकार्य्या इत्यताह।

भावो यथा तथाभावः कारणं कार्य्यवन्मतः।
प्रतिबन्धोविसामग्री तद्धेतुः प्रतिबन्धकः ॥१०॥

यथान्वयव्यतिरेकादिना अभावोध्वंसः कार्य्यः तथा कारणमपि कारणत्वं भावत्वव्याप्तमित्यस्याप्रयोजकत्वात्। अकिञ्चित्करस्य प्रति बन्धकत्वानुपपत्तिरित्यत आह प्रतिबन्धइति विसामग्री कारणाभावः स च प्रकृते मण्याद्यभावस्याभावोमण्यादिसत्समवधानहेतुः पुरुष एव प्रतिबन्धकः स्वार्थे कप्रत्ययेन च

अरण्यादौ प्रतिबन्धकपदप्रयोग इति भावः । मीमांसकास्तु उत्ते-जकाभावकूटविशिष्टमण्यभावत्वेन हेतुत्वे गौरवात् लाघवाच्छ-क्तिर्नित्या वह्न्यादौ कल्प्यते प्रतिबन्धके सति शक्तिकुण्ठनम् । यत्तु शक्तिः प्रथमतोवह्निकारणजन्या वह्निनिष्ठा प्रतिबन्धकेन च तस्या विनाशे उत्तेजकेन च पुनर्जननं न च शक्तेरनियत-हेतुकत्वमिति वाच्यं शक्त्यनुकूलशक्तिमत्त्वेन कारणत्वादिति तन्न वह्निनिष्ठनानाशक्तिकल्पनापेक्षया उत्तेजकाभावविशिष्ट मण्यभावस्यैकस्यैव वरं हेतुत्वौचित्यात् तथाचाकुण्ठितशक्तिरेव तत्र कारणतावच्छेदिका कल्प्यते इत्याहुः तन्न शक्तिकुण्ठने प्रतिबन्धकस्य हेतुत्वमुत्तेजकस्य कुण्ठितत्वविनाशकत्वमित्याद्य-नन्तशक्तिकल्पनापत्तेरिति दिक् ॥ १० ॥

ननु व्रीहीन् प्रोक्षति व्रीहीन् वहन्ति इत्यत्र प्रोक्षणजन्यः कालान्तरभाव्यवघातजनकोव्यापारो व्रीहिनिष्ठः कल्प्यते प्रो-क्षिता एव व्रीहयोऽवघाताय कल्पन्तइति वाक्यशेषात् । किञ्च योयद्गत फलार्थितया क्रियते स तन्निष्ठफलजनकव्यापारजनकः यागवत् किञ्च व्रीह्यादीनामापरमाण्वन्तभङ्गे व्रीह्यादिनिय-मानुपपत्तिः । एवं माषकर्षणादिना भूमिनिष्ठा कृषिजन्या श-क्तिर्निर्वाच्या ।

अत्रोत्तरम् ।

संस्कारः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिभिः ।
स्वगुणाः परमाणूनां विशेषाः पाकजादयः ॥११॥

प्रोक्षणादिभिः संस्कारोऽदृष्टं पुंसः पुंसि इष्टः स्वीकृतः प्रति व्रीहि नानाशक्तिकल्पनापेक्षया एकस्यैवादृष्टस्यात्मनिष्ठस्य प्रोक्षणादिजन्यस्य लाघवेन कल्पनात् दृष्टद्वाराभावे सति विहि-

तस्य कालान्तरभाविफलानुकूलस्य धर्म्मजनकत्वकल्पनाच संस्कृतो व्रीहिरिति प्रत्ययबलाच्च तस्य स्वरूपसम्बन्धेन व्रीहिनिष्ठत्वं कल्प्यते एतेनाभिसन्धितपयःपल्लवादावपि तत्तत्फलानुकूलमदृष्टं पुरुषादि निष्ठं व्रीहीनिति च सक्तून् प्रोक्षति इत्यादाविव प्रोक्षणादिजन्यं जलसंयोगादिरूपपरसमवेतक्रियाजन्यफलशालितया कर्म्मता । यो यद्गतफलार्थितया क्रियते स तन्निष्ठफलजनक इति च सतुनिष्ठ वधाद्यर्थक्रियमाणश्येनादौ कनिष्ठफलजनके व्यभिचारि । यवाद्युत्पत्तिनियमार्थमाह स्वगुणाः परमाणूनां पाकजादयोविशेषा विशेषकाः तेन पाकजरूपरसादिविशिष्टाः परमाणवस्तत्कार्य्यमारभन्ते । चिकित्सास्थले तु धातुसाम्यमेव भेषजपानस्य रोगादिनाशफले जनयितव्ये द्वारमितिभावः ॥ ११ ॥

ननु यत्र पाकजोन विशेषस्तत्र वाय्वादौ कथमुद्भूतस्पर्शादि करकादौ च प्रतिरुद्धं द्रवत्वमिति कथञ्च प्रतिमादौ प्रतिष्ठादेरुपयोगः तथाच प्रतिष्ठाजन्या शक्तिश्चाण्डालादिस्पर्शनाश्यामूल्यताप्रयोजिका स्वीकार्य्या इत्यताह ।

निमित्तभेदसंसर्गादुद्भवानुद्भवादयः ।
देवताः सन्निधानेन प्रत्यभिज्ञानतोऽपि वा ॥ १२॥

निमित्तभेदः अदृष्टभेदः देवताः प्रतिष्ठाविधिना सन्निधानेनाहङ्कारममकारादिना आराधनीयतामासादयन्ति प्रतिष्ठाविधिना देवतानां प्रतिमादौ अहङ्कारममकारौ चाण्डालादिस्पर्शे च तादृशाभिमानाभावः देवताचैतन्याविवादेऽपि यथार्थपूजितत्वधीश्च प्रतिष्ठितत्वधीश्च चण्डालादिस्पर्शाभावविशिष्टा पूज्यतानियामिका तत्र चोपयोगिनी प्रतिष्ठा । वस्तुतस्तु प्रति

ष्ठाकालीनयावद्दृश्यस्पर्शनादि संसर्गाभावः प्रतिष्ठाध्वंसका-लीनः पूज्यताप्रयोजकः प्रतिष्ठितं प्रपूजयेदितिक्ते न प्रतिष्ठाध्वं-सस्यैव प्राप्तेरिति दिक्॥ १२॥

ननु तुलापरीक्षादौ परीक्षाविधिना शक्तिस्तुलादौ जन्यते तथा नमनोन्नमनादिकं फलं जन्यते इत्यत आह।

जयेतरनिमित्तस्य वृत्तिलाभाय केवलम्।
परीक्ष्यसमवेतस्य परीक्षाविधयो मताः॥ १३॥

जयस्तदितरः पराजयः तन्निमित्तस्यादृष्टस्य परीक्षणीय-समवेतस्य वृत्तिलाभाय फलानुकूलसहकारिलाभाय परीक्षावि-धियो मताः स्वीकृताः। योऽहमनेन परीक्षाविधिना तुलामा-रूढः सोऽहं पापवान् निष्पापो वेति ज्ञानं सहकारि यद्वा वृत्तिलाभाय जननाय तथाच प्रतिज्ञानुरूपां शुद्धिमपेक्ष्य धर्म्मो-ऽशुद्धिमपेक्ष्याधर्म्मो जन्यते। एतेन ब्रह्मवधाकरणादिना पुण्य-स्याजननात् कथन्तस्य सहकारि तादृश ज्ञानं स्यादित्यपि परा-स्तम्॥ १३॥

सांख्यास्तु पुरुषश्चैतन्याश्रयः अकारणम् अतएव कूटस्थो-नित्यः प्रकृतिश्चाचेतना परिणामिनी नित्या एका प्रकृतेश्च प्रथमं परिणामो बुद्धिर्महत्तत्त्वं तत्राष्टौ धर्म्माः ज्ञानाज्ञानैश्वर्य्यनै-श्वर्य्यवैराग्यावैराग्य धर्म्माधर्म्मरूपाः बुद्धिसुखदुःखेच्छाद्वेषप्रयत्न-धर्म्माधर्म्मास्त्वष्टौ वा भावनायास्तैरङ्गीकारात् अनुभवस्यैव स्मृतिकाले सूक्ष्मतयावस्थानात् अचेतनायाः प्रकृतिकार्य्याया बुद्धेश्चैतन्याभिमानान्यथानुपपत्त्या स्वाभाविकचैतन्यस्वरूपः पु-रुषः सिद्धः धर्म्मधर्म्मिणोरभेदात्। तत्र प्रकृतेर्म्महान् महतोऽ-हङ्कारस्तस्माद्रूपरसगन्धस्पर्शशब्दतन्मात्राणीति मम चक्षुःकर्मा

णरसनाश्रोत्रमनांसि वाक्पाणिपादपायूपस्थानि इन्द्रियाणि तन्मात्रैः पञ्च महाभूतानि पृथिव्यप्तेजोवाय्वाकाशानि जायन्ते। तदुक्तम् । मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः । पञ्च महाभूतान्येकादशेन्द्रियाणि चेति षोडश चैतन्यस्य नित्यस्य स्वाभाविकेष्टानिष्टविषयावच्छिन्नस्वाभाव्येऽनिर्मोक्षः स्यात् प्रकृत्यधीनत्वेऽपि विषयावच्छेद्यत्वस्य प्रकृतेर्नित्यतया तथैवानिर्मोक्षप्रसङ्गः घटादेरनित्यस्यापि स्वाभाविकचैतन्यावच्छिन्नत्वे दृष्टादृष्टविभागानुपपत्तेश्च इन्द्रियमात्रापेक्षोयदि विषयचैतन्यावच्छेदस्तथापि प्रासङ्गानुपपत्ति रतोमनः स्वीकार्य्यं यत्सम्बन्धेन इन्द्रियस्य विषयीयचैतन्यावच्छेद नियामकत्वं स्वप्नदशायां व्याघ्रत्वाभिमानिनोन नरोऽहमित्यभिमानः अतस्तन्नियमाय नियतविषयाभिमानव्यापारको ऽहङ्कारोऽपि स्वीकार्य्यः जाग्रत्स्वप्नसुषुप्तिषु श्वासप्रश्वासदर्शनात् सव्यापारं यदनुवर्त्तते तद्बुद्धितत्त्वं प्रागुक्तभावाष्टकयोगि स्वीकार्य्यं तस्य ज्ञानरूप परिणामेन सम्बद्धो विषयः पुरुषस्य स्वरूपतिरोधायकः एवञ्च बुद्धि तत्त्वनाशादेव विषयावच्छेदाभावात् पुंसोमोक्षः भेदाग्रहाच्च चेतनोऽहं करोमीत्यभिमानः । तदुक्तं प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्वशः । अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते इति । सा च बुद्धिरंशत्रयवती पुरुषोपरागः विषयोपरागः व्यापारावेशश्च ममेदं कर्त्तव्यमित्यत्र ममेति चेतनपरागः बुद्धिचेतनयोर्भेदाग्रहात् अतात्त्विकः इदमिति विषयोपरागः तदुभयायत्तोव्यापारावेशो बुद्धावारोपितचैतन्यस्य विषयेण सम्बन्धः ज्ञानं ज्ञानेन सम्बन्धश्चेतनोऽहं करोमीत्युपलब्धिरित्याद्यः । अत्राह ।

कर्तृधर्म्मा नियन्तारश्चेतिता च स एव नः ।
अन्यथानपवर्गः स्यादसंसारोऽथ वा ध्रुवः ॥१४॥

कृतिसमानाधिकरणास्तावद्धर्माधर्मद्वेषेच्छाः भोगस्य कृति सामानाधिकरण्यात् एवञ्चेतिता चेतनः सः एव कृतिमानेव नोऽस्माकं मतः चेतनोऽहं करोमीतिप्रत्ययबलात् । दूषणान्तरमाहान्यथेति यदि बुद्धिर्नित्या तदा बुद्ध्युपहितात्मनः सर्व्वदावस्थानात् अनिर्मोचः स्यात् यद्यनित्या तदोत्पन्ना वाच्या अनित्यभावस्यानुत्पत्त्यभावात् तथाच तदुत्पत्तेः प्राक् तदाश्रितधर्म्मादेरप्यभावेन बुद्धितत्त्व स्यानुत्पत्तौ नियतशरीरेन्द्रियादिकार्य्यानुत्पत्तौ असंसारः स्यादित्यर्थः ॥ १४ ।

चार्व्वाकस्तु भवतु चेतनधर्मोऽदृष्टं चेतनश्च न नित्यविभुः किन्तु कायाकारपरिणतभूतविशेषः गौरोऽहं जानामीति प्रतीत्या रूपवत्त्वसिद्धेरित्यताह ।

नान्यदृष्टं स्मरत्यन्यो नैकं भूतमपक्रमात् ।
वासनासंक्रमोनास्ति न च गत्यन्तरं स्थिरे ॥१५॥

शरीरस्य चैतन्ये बाल्यदशायामनुभूतस्य यौवने स्मरणं न स्यात् चैत्रदृष्टस्य मैत्रेणास्मरणमिव । न च बाल्ययौवनयोरेकं शरीरम् अपक्रमात् विनाशात् परिमाणभेदेन द्रव्यभेदात् पूर्व्वपरिमाणनाशस्याश्रयनाशहेतुत्वात् । न च कारणेनानुभूतस्य कार्य्येण स्मरणं स्यादिति वाच्यं वासनासंक्रमाभावात् अन्यथा मात्रानुभूतस्य गर्भस्थेन स्मरणापत्तेः । ननूपादानवासनाया उपादेये संक्रमः स्यादित्यताह नच गत्यन्तरं स्थिरइति स्थिरे स्थिरपक्षे पुञ्जात् पुञ्जान्तरोत्पत्तेरभावात् करादि शरीरस्योपादानं वाच्यं विच्छिन्ने करादौ तदनुभूतस्य स्मरणं न स्यात्

खण्डशरीरे विच्छिन्नकरादेरनुपादानत्वात्। न च परमाणूनां चैतन्यं तेषाञ्च स्थिरत्वात् स्मरणं स्यादिति वाच्यं तथा सति स्मरणस्यातीन्द्रियत्वप्रसङ्गात् तन्निष्ठरूपादिवत् करपरमाण्वनुभूतस्य विच्छिन्नकरपरमाण्वसन्निधावस्मरणप्रसङ्गाच्च ॥ १५ ॥

नन्वस्तु क्षणभङ्गः तथाच पूर्व्वपूर्व्वपरमाणुपुञ्जेनोपादेयोत्तरोत्तरपरमाणुपुञ्ज इति न स्मरणानुपपत्तिरित्यत आह ॥

न वैजात्यं विना तत् स्यात् न तस्मिन्ननुमा भवेत्।
विना तेन न तत्सिद्धिर्नाध्यक्षं निश्चयं विना ॥१६॥

वैजात्यं कुर्व्वद्रूपत्वं न तत् क्षणिकत्वं स्यात् सिद्ध्यतीत्यर्थः। स्थिर एव वीजादौ सहकारिलाभाभ्यामेव कार्य्यजन्माजन्मनोरुपपत्तेः वीजत्वादिनैवाङ्कुरादिजनकतोपपत्तेः वीजव्यक्तिभेदाभावे कुतः क्षणिकत्वं स्यात् तस्मिन् जातिविशेषे च ऐन्द्रियकवृत्तावतीन्द्रियत्वेनाभ्युपगम्यमाने सत्यनुमानं न स्यात् धूमकुर्व्वद्रूपवह्नित्वादिनैव वह्न्यादेर्हेतुतया विलक्षणस्वकार्य्यजनकत्वेन सम्भावितस्य विजातीय धूमस्यैव वह्निजन्यत्वसम्भावनायां धूमसामान्ये हेतुत्वानिर्णयात् तथा च कार्य्यकारणभावरूपविपक्षबाधकतर्काधीनव्याप्तिनिर्णयस्या सम्भवेनानुमानमात्रोच्छेदप्रसङ्ग इति तेनानुमानेन विना क्षणिकत्वस्यासिद्धिः तस्यानुमानैकगम्यत्वात्। न च तत्र प्रत्यक्षमेव मानमिति वाच्यं निर्व्विकल्पकस्यैव तन्मते विषयजन्यतया प्रामाण्यं तस्य च सविकल्पकोन्नेयतया क्षणिक इति सविकल्पकस्यासिद्धावसिद्धेः। किञ्चाङ्कुरकुर्व्वद्रूपत्वं न जातिः शालित्वादिना सङ्करात् शालित्वमपहाय यवे तस्य सत्वात् शालित्वस्य कुशूलस्थे शालौ तदपहाय

सत्त्वात् कुर्व्वद्रूपे शालौ तूभयोः समावेशादिति अतएव रजता-दिव्याप्यं नानैव घटत्वं विजातीयसंस्थानवदवयवकत्वरूपमुपाधि-मादाय घट इत्यनुगतधीरिति ॥ १६ ॥

नन्वस्तु क्षणिके सन्देहः न च प्रत्यभिज्ञाबलेन स्थैर्य्यसिद्धौ कथं स इति वाच्यं सएवायं घट इत्यत्र सन्देहसत्त्वात् अतआह ।

स्थैर्य्यदृष्ट्योर्न सन्देहो न प्रामाण्ये विरोधतः ।
एकतानिर्णयो येन क्षणे तेन स्थिरे मतः ॥१७॥

स्थैर्य्ये न सन्देहस्तस्य प्रत्यभिज्ञया विषयीकरणात् न च प्रत्य-भिज्ञानरूपे तस्य तदनुव्यवसायेन निर्णयात् प्रामाण्यमात्रेऽपि न सन्देहः विरोधात् तथाहि सन्देहज्ञानस्य प्रामाण्यसन्देहे सन्देह स्याप्यसिद्धेः प्रामाण्यस्यासिद्धौ प्रामाण्यसंशयस्याप्यभावः कोटग्रनिर्णयात् । ननु प्रत्यभिज्ञायाः प्रामाण्यसंशयः लूनपुन-र्जातकेशादौ तएवामी केशा इत्यादेर्भ्रमत्वदर्शनात् तत्राह एक-तेति येन प्रमाणेन विरुद्धधर्म्मसंसर्गविरहेण क्षणिके घटे यदि तस्मिन्नेव क्षणे न नानात्वं किन्त्वभेदः तदा स्थिरपक्षेऽपि नाना-क्षणवर्त्तित्वेऽपि घटस्य न नानात्वं किन्त्वेकत्वम् एकस्य ज्ञानस्य नानाविषयसम्बन्धवत् एकस्य नानाकालसम्बन्धेऽपि अविरो-धात् तत्तत्कारणक्रमाधीनत्वात् तत्तत्कालसम्बन्धस्य ॥ १७ ॥

तदेवं परलोकसाधनमागतं तत्रेदं शङ्कते कारणत्वं स्वाभा-विक मौपाधिकं वा आद्ये नीलस्य सर्व्वान् प्रति नीलत्ववत् कारणस्य सर्व्वान् प्रत्यविशेषात् कारणत्वमपि स्यात् द्वितीये उ-पाधेरपि स्वाभाविकत्वे तद्दोषतादवस्थ्यात् औपाधिकत्वेऽनवस्था किञ्च कारणत्वस्य स्वाभाविकत्वे उत्पत्तेरारभ्य कार्य्यं स्यात् तत्राह ।

हेतुशक्तिमनादृत्य नीलाद्यपि न वस्तुसत् ।
तद्युक्तं तत्र तच्छक्तमिति साधारणं न किम् ॥१८॥

हेतुशक्तिः कारणत्वम् अनादृत्य अनिश्चित्य नीलाद्यपि न वस्तुसत् न प्रमाणिकं तथाच यत्पारमार्थिकं तत् साधारणं यथा नीलादि कारणत्वञ्च यदि न साधारणम् अतो न परमार्थसदित्यपि स्यात् दृष्टान्तस्यानितस्य नीलस्य कारणत्वस्वीकारेण सर्व्वत्राभावात् नित्यस्य नीलादेः प्रमाणागोचरत्वात् । किञ्चेत्याद्युक्तं दूषयति तद्युक्तमिति तद्युक्तं सहकारियुक्तं तत्कारणं तत्र कार्य्ये संशक्तमितिनोत्पत्तेरारभ्य कारणत्वम् । कारणत्वस्य साधारण्ये चेष्टापत्तिमाह इति साधारणं न किमिति नीलादेरपि सर्व्वसाधारण्यं यत् सर्व्वैस्तथा नीलत्वादिना व्यवह्रियमाणत्वं तादृशञ्च साधारण्यं सहकारियुक्तस्य जनकत्वमित्यस्यापि तथाव्यवहारस्य सर्व्वसिद्धात् ॥ १८ ॥

नन्वात्मनिष्ठमदृष्टं नात्मजन्यं नित्यविभोस्तस्य कालतोदेशतश्च व्यतिरेकाभावात् व्यतिरेकसहकृतान्वयस्यैव कारणताग्राहकत्वात् तद्व्यतिरेकप्रयोजकव्यतिरेकप्रतियोगित्वस्यैव कारणतात्मकत्वाच्च तथाच समवायिकारणाभावे असमवायिकारणनिमित्ताभ्यामपि न कार्य्यं जननीयं तत्प्रत्यासन्नाभ्यामेव ताभ्यां जननादित्यदृष्टस्य नित्यत्वापत्तिः तथाच न प्रतिनियतात्मदेशकालीनभोगजनकत्वं कल्प्येत इत्यत आह ।

पूर्व्वभावोहि हेतुत्वं मीयते येन केनचित् ।
व्यापकस्यापि नित्यस्य धर्म्मिधीरन्यथा नहि ॥१९॥

व्यतिरेक गर्भं न कारणत्वं किन्त्वनन्यथासिद्धनियतपूर्व्ववर्त्ति भावः । हि हेतौ यतोग्राहकेन व्यतिरेकः धर्म्मिग्राहकमानेनापि तस्य प्रमाणत्वात् इत्यतोमीयते येन केनचिद्व्यापकस्य नित्यस्यात्मनः येन केनचित् प्रमीयते अन्यथा धर्मिधीरेव न स्यात् तथाच धर्म्मिग्राहकप्रमाणसिद्धं तस्य हेतुत्वं घटादिकं प्रति कपालादेरन्वय व्यतिरेकदर्शनात् समवेतकार्य्यं प्रति द्रव्यस्य द्रव्यत्वेन कारणत्वस्य कल्पनात् पृथिव्यादिबाधे परिशेषेण ज्ञानेच्छादौ पृथिव्यादिभिन्न समवायिनः सिद्धिः वस्तुतः समवायिकारणताघटकोऽन्योन्याभावः यन्नः कपालं तन्न घटवत् योन आत्मा न तत्र ज्ञानादिरिति धीसम्भवात् एवं योन कपालश्च यस्त्वन्यविशेषेण न घट इति निमित्त कारणस्याधिकरणीभूतस्य कारणताप्यन्वयव्यतिरेकेण ग्राह्या एवञ्च मायाप्रकृत्यादिपदमेतत्परमिति न मायिकं जगदित्यादिश्रुतिविरोधः तथाचादृष्टाधिष्ठातृतया ईश्वरसिद्धिः ।

स्तवकार्थसंग्राहकश्लोकमाह ।

इत्येषासहकारिशक्तिरसमामायादुरन्नीतितोमूलत्वात् प्रकृतिःप्रबोधभयतोऽविद्येति यस्योदिता । देवोऽसौ विरतप्रपञ्चरचनाकल्लोलकोलाहलःसाक्षात्साक्षितया मनस्यभिरतिं बध्नातु शान्तोमम॥२०॥

इति प्रथमः स्तवकः ।

इति स्तवकोसमाप्तौ यस्येशस्य सहकारिशक्तिः कारणं एषा सहकारिरूपा माया असमत्वात् सर्व्वकार्य्यापेक्षणीयत्वात् दुरन्ने-

यत्वात् शाब्दख्यात्मायापदेऽहष्टे लक्षणा मूलत्वात् प्रकृतिः सैव तत्त्वज्ञान प्रतिबन्ध्यत्वात् सैवाविद्या उदिता उक्ता असौ देवोमम मनसि स्वविषयां साक्षात् साक्षात्कारि ज्ञानं बध्नातु जनयतु साक्षितया साक्षीभूय निर्णायकतया साक्षित्वं शान्तः रागादि-गुणशून्यः प्रपञ्चस्य मिथ्याज्ञानादेः कल्लोलः मिथ्याज्ञानपरम्परा तस्याः कोलाहलः किं वदन्ती सा विरता यस्मादिति ॥ २० ॥

इति प्रथमस्तवकव्याख्यानम् ।

द्वितीयः स्तवकः ।

अन्यथापि परलोकसाधनानुष्ठानसम्भवादिति द्वितीयविप्रति पत्तिः अन्यथा ईश्वरं विनापि परलोकसाधनं यागाद्यनुष्ठानं सम्भवति यागादेः स्वर्गसाधनत्वस्य वेदगम्यत्वात् नित्यनिर्दोषतया च वेदस्य प्रामाण्यं महाजनपरिग्रहाच्च प्रामाण्यस्य ग्रह इति वेदकारणतया नेश्वरसिद्धिः योगर्द्धिसम्पादितसार्वज्ञ्यकपिला-दिपूर्व्वकएव वा वेदोऽस्तु इत्यत आह ।

प्रमायाः परतन्त्रत्वात् सर्गप्रलयसम्भवात् ।
तदन्यस्मिन्ननविश्वासान्न विधान्तरसम्भवः ॥ १ ॥

शाब्दी प्रमा वक्तृयथार्थवाक्यार्थधीरूपगुणजन्या इति गुणा-धारतया ईश्वरसिद्धिः । ननु सकर्तृकेऽस्तु यथार्थवाक्यार्थधी-गुणःअकर्तृके च वेदे निर्दोषत्वमेव प्रामाण्यप्रयोजकमस्तु महा-जनपरिग्रहेण च प्रामाण्यग्रह इत्यत आह सर्गप्रलयसम्भवा-दिति प्रलयोत्तरं पूर्व्व वेदनाशादुत्तरवेदस्य कथं प्रामाण्यं महा-जनपरिग्रहस्यापि तदा अभावात् शब्दस्यानित्यत्व उत्पन्नोग-

कारइति प्रतीतिसिद्धं प्रवाहाविच्छेदरूपनित्यत्वमपि प्रलयसम्भवान्नास्तीति भावः। कपिलादय एव पूर्व्वसर्गादौ पूर्व्वसर्गाभ्यस्तयोगजन्यधर्म्मानुभवात् साक्षात्कृतसकलार्थाः कर्त्तारः सन्तु इत्यत आह तदन्यस्मिन्निति विश्वनिर्म्माणसमर्था अणिमादिशक्तिसम्पन्ना यदि सर्व्वज्ञास्तदा लाघवादेक एव तादृशः स्वीक्रियतां स एव भगवानीश्वरः अनित्यासर्व्वविषयकज्ञानवति च विश्वास एव नास्तीति वैदिकव्यवहारविलोप इति न विधान्तरसम्भवः ईश्वरानङ्गीकर्तृनये इति शेषः ॥ १ ॥

ननु सर्गप्रलयसम्भवादिति न युक्तं प्रलये मानाभावादिति अहोरात्रस्याहोरात्राव्यवहितपूर्व्वकत्वनियमात् कर्म्मणां विषमविपाकतया कालोपाधित्वस्य भोगव्याप्यत्वात् युगपददृष्टस्य च वृत्तिरोधानुपपत्तेः ब्राह्मणस्य ब्राह्मणजन्यत्वनियमात् सर्गाद्युत्पन्नस्य ब्राह्मणत्वाभावात् उत्तरकालेऽपि ब्राह्मणव्यवहारानुपपत्तेः प्रयोज्यप्रयोजकयोरभावात् सङ्केतग्रहाभावे शब्दे व्यवहारानुपपत्तेः घटादिनिर्म्माणे नैपुण्यस्य पूर्व्वदर्शनसापेक्षस्य सर्गादावभावात् घटादिसम्प्रदायोच्छेदादित्यादेर्बाधकाच्च तत्राह ।

वर्षादिवद्भवोपाधिर्वृत्तिरोधः सुषुप्तिवत् ।
उद्भिद्वृश्चिकवद्वर्णा मायावत् समयादयः ॥२॥

यथा वर्षादिनस्याव्यवहितवर्षादिनपूर्वकत्वे साध्ये राशिविशेषावच्छिन्नरविकालपूर्वकत्वमुपाधिस्तथाहोरात्रस्याव्यवहिताहोरात्र पूर्वकत्वेऽव्यवहितसंसारपूर्वकत्वमुपाधिर्भवोपाधिः संसारावच्छेदक कालोपाधिः सः एव उपाधिरित्यर्थः। सुषुप्तिकाले कतिपयव्यक्ति निष्ठभोगजनकादृष्टनिरोधवत् कालविशेषात् सम-

स्तालनां समस्ता दृष्टदोषस्तदिदमुक्तं दृत्तिरोधः सुषुप्तिवदिति। उड्डित् शाकविशेषः तस्य तण्डुलकणात् शाकविशेषबीजाच्च उद्भवः यथा वा वृश्चिकस्य गोमयाद्वृश्चिकाच्च उद्भवस्तथा काल-विशेषेऽदृष्टविशेषात् केवलात् इदानीञ्च ब्राह्मणात् ब्राह्मणो-त्पत्तिः वैजात्यस्य कार्य्यतावच्छेदकत्वान्न व्यभिचारः। यथा मा-यावी सूत्रसञ्चाराधिष्ठितदारुपुत्रकं कृत्वा दारुपुत्रं घटमानये-त्यादि नियोज्य घटानयनं सम्पाद्य बालकस्य व्युत्पत्तौ प्रयोज-कस्तथेश्वरोऽपि प्रयोज्यप्रयोजकभावापन्नं शरीरद्वयं परिगृह्य व्यवहारं कृत्वा तदानीन्तनानां शक्तिं ग्राहयति एवं घटादि-सम्प्रदायमपि स्वयं कृत्वा शिक्षयति तदिदमुक्तं मायावत् सम-यादय इति समयः शक्तिग्रहः ॥ २ ॥

बाधके निरस्ते साधकमप्याह ।

जन्मसंस्कारविद्यादेः शक्तेः स्वाध्यायकर्म्मणोः ।
ह्रासदर्शनतोह्रासः सम्प्रदायस्य मीयताम् ॥३॥

सम्प्रदायस्य वेदादिसम्प्रदायस्य ह्रासोऽनुमीयतां कुतः जन्मादेर्ह्रासदर्शनात् । प्रयोगश्च वेदादिसम्प्रदायोऽयमत्यन्तमु-च्छिद्यते ह्रसमानत्वात् प्रदीपवत् । स्वरूपासिद्ध्युद्धारायाह ज-न्मेति पूर्वं मानस्यः प्रजास्ततः पुत्रमात्रार्थितामयुक्तमैथुनजाः सम्प्रति सम्भोगकामिप्रवृत्त्यावर्जितजन्मान इति जन्मह्रासः। पूर्वं गर्भप्रभृतिषु संस्कारः ततोगर्भे ततोजननानन्तरम् इदानीं कथञ्चिदिति संस्कार ह्रासः । पूर्वं सहस्रशाखस्य वेदस्याध्ययनं तत एकस्याः शाखाया इत्यादिक्रमेण विद्याह्रासः । विद्यादेरि-त्यादिना वृत्तिधर्म्मादिसंग्रहः पूर्व्वमुञ्छशिलवृत्तयस्ततोऽयाचित-वृत्तयस्ततः कृष्यादिवृत्तयस्ततः सेवावृत्तय इति वृत्तिह्रासः।

पूर्व्वं तपोज्ञानयज्ञदानात्मकश्चतुष्पाद्धर्म्मस्ततस्त्रेतादौ एकैकह्रासः कलौ च विसंष्ठुलः स्खलद्धानैकपादिति धर्म्मह्रासः । पूर्वं यज्ञ-शेषभुजस्ततोऽतिथिशेषभुजस्ततः स्वार्थसाधितभुजस्ततोऽसत्यादि-सद्भुज इत्यपि धर्म्मह्रासः । स्वाध्यायस्याध्ययनस्य कर्म्मणोया-गादेः शक्तेः सामर्थ्यस्य ह्रासात् अध्ययनशक्तेः कारणस्य ह्रासात् विद्याशक्तेः कार्य्यस्य ह्रास इति पृथङ् निर्द्देशः । एवञ्च ब्रह्माण्ड-नाशे तदन्तर्गतप्राणिनां नाश इति प्रलय सिद्धिः । अद्यपेयां-द्यद्वैतरागजीविका कुतर्काभ्यासव्यग्रताभिसन्धि पाषण्डसंसर्गा-दिप्रतारणादिनिबन्धनान्या या वृत्तिर्यागादौ तद्वान्महाजनस्त-त्परिग्रहात् वेदप्रामाण्यमिति ॥ ३ ॥

स्तवकार्थसंग्राहकश्लोकमाह ।

कारं कारमलौकिकाद्भुतमयं मायावशात् संहरन्
हारं हारमपीन्द्रजालमिव यः कुर्व्वन्जगत्क्रीडति ।
तं देवं निरवग्रहस्फुरदभिध्यानानुभावं भवम्
विश्वासैकभुवं शिवं प्रति नमन् भूयासमन्तेष्वपि॥४॥

इति द्वितीयः स्तवकः ।

तृतीय स्तवकः ।

तदभावावेदकप्रमाणसद्भावादिति तृतीयविप्रतिपत्तिः । भू-तले घटाभाववदीश्वरस्याप्यनुपलब्धेरभावस्य ग्रहात् परमात्म-नोऽयोग्य तया योग्यानुपलब्धेरभावात् नाभावग्रहो यदि तदा शशशृङ्गस्याप्ययोग्यस्य नाभावः सिध्येदित्यत आह ।

योग्या दृष्टिः कुतोऽयोग्ये प्रतिबन्धिः कुतस्तराम् ।
क्वायोग्यं बाध्यते शृङ्गं क्वानुमानमनाश्रयम् ॥१॥

अयोग्ये परमात्मनि योग्यानुपलब्धिः कुतः सैव बाधिका या चास्ति सा न बाधिका अन्यथाकाशधर्म्माधर्म्मादिविलयापत्तेः। शृङ्गन्तु योग्यमेव तथाच कुतः प्रतिबन्धिः । अयोग्यन्तु शशशृङ्गं न बाध्यते किन्तु साधकाभावएव तत्त्वं । प्रकृते पञ्चमस्तबके साधकस्य वक्तव्यत्वात् । ननु कर्तृत्वव्यापकशरीरप्रयोजनाभिसन्धानयोरभावात् ईश्वरस्याभाभावोऽनुमेय इत्यत आह क्वानुमानमनाश्रयमिति ईश्वर स्याश्रयस्य पक्षस्यासिद्धेः सिद्धौ च धर्म्मिग्राहकमानेन अनुमान बाध एव ॥ १ ॥

ननु असत्ख्यात्युपनीत ईश्वरस्तत्र कर्तृत्वाभावः साध्य इत्यत आह ।

व्यावर्त्याभाववत्तैव भाविकी हि विशेष्यता ।
अभावविरहात्मत्वं वस्तुनः प्रतियोगिता ॥२॥

व्यावर्त्यः प्रतिक्षेप्यः तदभाववत्ता भाविकी पारमार्थिकी हि यतः विशेष्यता अभावस्याश्रयता तथा चालीकं न विशेष्यमित्यर्थः अभावविरहात्मत्वं प्रतियोगित्वमवस्तुनोनेति नालीकस्य प्रतिषेधाधिकरणत्ववत् प्रतिषेध्यत्वमपीति भावः ॥ २ ॥

ननु अयोग्यस्याप्यनुपलब्ध्या कथं नाभावग्रह इत्यत आह ।

दुष्टोपलम्भसामग्री शशशृङ्गादियोग्यता ।
न तस्यां नोपलम्भोऽस्ति नास्ति सानुपलम्भने ॥३॥

योग्यानुपलब्धिरेवाभावग्राहिका अन्यथातीन्द्रियमात्रोच्छेदापत्तेः । योग्यता च प्रतियोगिव्याप्येतरयावदुपलम्भसामग्रीसमवधानम् एवञ्च शशशृङ्गे योग्यता दुष्टा दोषघटितोपलम्भसामग्री

वाच्या तस्यां सत्यामनुपलब्धिर्न किन्तूपलब्धिरेव स्यात् अदृष्टे च सा योग्यता नास्तीति ॥ ३ ॥

न त्वात्मा किञ्चिदनभिज्ञः स्वनिष्ठकर्तृत्वानिरूपकक्षितिकोवा आत्मत्वादित्यत्राह ।

इष्टसिद्धिः प्रसिद्धेऽस्मे हेत्वसिद्धिरगोचरे ॥
नान्या सामान्यतः सिद्धिर्जातावपि तथैव सा ॥४॥

प्रसिद्धे संसार्य्यात्मनि पक्षे इष्टसिद्धिः सिद्धसाधनम् अगोचरे अज्ञाते ईश्वरे हेत्वसिद्धिः हेतोरज्ञानं आत्मत्वेन सामान्यतः सिद्धः पक्षश्चेत् तत्राप्यस्मदादिस्तदितर आत्मा वा पक्ष इति विकल्पे सिद्ध साधनं हेत्वसिद्धिर्वा । नन्वात्मत्वं जातिः पक्षस्तत्राह जातावपीति तथैव सा आत्मत्वं जातिर्न क्षितिकर्त्री इत्यत्रेष्टसिद्धिः सिद्धसाधनं हेतोश्च तत्रासत्त्वमिति हेत्वसिद्धिरित्यर्थः ॥ ४ ॥

नन्वागमादिसिद्धात्मनि अकर्तृत्वं साध्यं तत्राह ।

आगमादेः प्रमाणत्वे बाधनादनिषेधनम् ।
आभासत्वे तु सैव स्यादाश्रयासिद्धिरुद्धता ॥५॥

आगमादेः प्रमाणत्वे तत एव ईश्वरस्य कर्तृत्वादिसिद्धौ कर्तृत्वाद्यभावसाधने बाधः । आगमादेरप्रमाणत्वे सैवाश्रयासिद्धिः उद्धता उत्कटा ॥ ५ ॥

अत्र चार्व्वाकाः योग्यताविशेषणेन किं यन्न प्रत्यक्षं तन्नास्ति इत्यनुपलब्धिमात्रमेव साधकं स्यात् अनुमानविलोपश्चेष्टएव धूमदर्शनानन्तरं वह्न्यर्थप्रवृत्तिश्च सम्भावनामात्रादिति तत्राह ।

दृष्टदृष्ट्योर्न सन्देहोभावाभावविनिश्चयात् ।
अदृष्टिबाधिते हेतौ प्रत्यक्षमपि दुर्लभम् ॥६॥

सम्भावना हि सन्देहः न च दृष्टौ ... नास्ति तस्य निश्चयात्

अदृष्टौ च नास्ति अनुपलब्धौ तदभावस्यैव निर्णयात् एवमदृष्टा अनुपलब्धया हेतौ प्रत्यक्षकारणे चक्षुरादौ बाधिते सति प्रत्यक्षमपि प्रमाणं न स्यात् अनुपलब्धिकालेऽपि तस्य सत्त्वे तु व्यभिचारात् नानुपलब्धिरभावावधारणे हेतुः । एवञ्च गृहान्निर्गतश्चार्वाकः पुत्रदाराद्यभावादिकमवधार्य्य विक्रोशेत् परावृत्तोऽपि कुटुम्बं नासादयेत् तदा तेषां सत्त्वे चानुपलब्धिर्व्यभिचारिणी न हेतुः स्यादिति ॥ ६ ॥

ननु यद्यनुपलम्भमात्रं नाभावसाधकं तदा अयोग्योपाधिशङ्कया धूमादावपि व्यभिचारशङ्कया न व्याप्तिनिश्चयः स्यादिति गतमनुमानेनेत्यत आह ॥

शङ्का चेदनुमास्त्येव न चेच्छङ्का ततस्तराम् ।
व्याघातावधिराशङ्का तर्कः शङ्कावधिर्म्मतः ॥७॥

तद्देशतत्कालयोर्व्यभिचाराभावनिश्चयात् कालान्तरदेशान्तरस्थयोर्व्यभिचारशङ्का स्यात् कालान्तरदेशान्तरस्थज्ञानञ्चानुमानादेवेति सिद्धमनुमानं शङ्का न चेत् ततः शङ्काविरहे तरां सुतरामनुमानम् । ननु किं शङ्कानिवर्त्तकं तत्राह तर्कः शङ्कावधिर्म्मत इति विपक्षबाधक तर्काच्छङ्काविरह इत्यर्थः । मतः सम्मतइत्यर्थः । ननु तर्कस्य व्याप्ति मूलकत्वेऽनवस्थेत्यत आह व्याघातेत्यादि तर्कमूलव्याप्तौ न शङ्का व्याघातात् क्लृप्तकारणं विना कार्य्योत्पत्तिशङ्कायां तृप्त्यर्थं भोजनादौ पर प्रतिपत्त्यर्थञ्च शब्दप्रयोगादौ न प्रवर्त्तेतेति एवञ्च तर्कानवतारे शङ्कितोपाधिरेवाप्रयोजक इत्युच्यते । तदुक्तं यावच्चाव्यतिरेकित्वं शतांशेनापि शङ्क्यते । विपक्षस्य कुतस्तावद्धेतोर्गमनिकाबलम् । विपक्षस्य ... तावद्धेतो

गमकत्वमिति भावः ॥ व्यभिचारशङ्का च उपाधिशङ्काधीना। तदुक्तम् अन्ये पर प्रयुक्तानां व्याप्तीनामुपजीवकाः। तैर्दृष्टैरपि नैवेष्टा व्यापकांशावधारणेति। अन्ये केचन हेतवः परप्रयुक्तानां व्याप्तीनामुपजीवकाश्चाश्रयाः तथाहि उपाध्यवच्छिन्नहेतुनिष्ठा व्याप्तिः हेतुतावच्छेदकावच्छिन्न हेतुवृत्तितया ज्ञायते अतएव उप समीपवर्त्तिनि स्वसमानाधिकरणे स्वधर्मं व्याप्तिम् आदधाति बोधयतीति उपाधिशब्दो जवाकुसुमादि साधारणः तेः सोपाधिभिर्दृष्टैरपि पक्षे व्यापकांशस्यावधारणा निश्चयोनेष्यते साधारणधर्मेण साध्यसंशयजननादित्यर्थः ॥ ७ ॥

ननूपमानमीश्वरे बाधकं स्यात् अत्रोपमानस्यातिरिक्तप्रमाणस्यानभ्युपगमात् न बाधकमिति वैशेषिकादयः तत्र सादृश्यपदार्थान्तरस्य ग्राहकमुपमानमिति केचित् सादृश्यं न द्रव्यं गुणः कर्म्म वा गुणसमवेतत्वात् न सामान्यं सप्रतियोगिकत्वात् सामान्यादिवृत्तित्वाच्च नाभावः सप्रयियोगिकत्वेनाप्रत्ययात् तच्च न प्रत्यक्षगम्यमिन्द्रियपातमात्रेणाप्रतीतेः। नापि प्रतियोगिज्ञानसहकृतमिन्द्रियं ग्राहकमिति वाच्यं गोसदृशोगवयइति ज्ञानानन्तरं सा गौर्गवयसदृशीत्यसन्निकृष्टगोविशेष्यकग्रहस्याप्रत्यक्षत्वात् नाप्यनुमानगम्यं लिङ्गाप्रतिसन्धानेऽपि ज्ञायमानत्वात् न शब्दगम्यं तस्यासार्व्वत्रिकत्वादिति तत्राह।

परस्परविरोधे हि न प्रकारान्तरस्थितिः।
नैकतापि विरुद्धानामुक्तिमात्रविरोधतः ॥ ८ ॥

न प्रकारान्तरस्थितिः नोभयात्मकत्वं हि यतः परस्परविरोधान्नैकतापि न भावाभावात्मकत्वमपि विरुद्धानामिति हेतु-

गर्भविशेषणं परस्परविरोधिरूपत्वात् विरोधमेव प्रतिपादयति उक्तिमात्रविरोधतः । नाभाव इत्युक्ते च भावत्वप्रतीतेः कथमभावता न भाव इत्युक्ते चाभावत्वप्रतीतेर्न भावत्वम् । अयमभिप्रायः साहृश्यं भावोऽभावो वा उभयकोव्यतिरिक्तस्याप्रसिद्धेः अभावत्वे सप्तमपदार्थत्वं भावत्वे गुणत्वे च द्रव्यत्वं निर्गुणत्वे सामान्यवत्त्वे च गुणान्यते कर्मत्वं तदन्यत्वे गुणत्वं निर्गुणत्वे निःसामान्यभावत्वेऽसमवेतत्वे च समवायत्वं समवेतत्वे च नैकाश्रितत्वे सामान्यत्वं एकाश्रितत्वे विशेषत्वम् एवं शक्तिसंख्यादयः पदार्था निराकार्य्याः ॥८॥

ननु भवतु साहृश्यं समान धर्म्मएव तद्ग्राहकमेवोपमानं मानान्तरं स्यादित्यताह ।

साधर्म्म्यमिव वैधर्म्म्यं मानमेवं प्रसज्यते ।
अर्थापत्तिरसौ व्यक्तमिति चेत् प्रकृतं न किम् ॥९॥

अयं गोविसहृश इति ज्ञानानन्तरं सा गौरेतद्विसहृशीति धीः प्रमाणान्तरादेवास्तु अयैतस्य तद्वैधर्म्म्यं तस्मिन्नेतद्वैधर्म्म्यं विनानुपपन्नमित्यर्थापत्तिरेवेति गोसाहृश्यं गवयस्य गोर्गवयसाहृश्यं विनानुपपन्नमित्यर्थापत्तिरेवेति न मानान्तरं साहृश्यग्राहकं मन्तव्यमिति ॥ ९ ॥

वैशेषिकादिभिरुपमाने दूषिते नैयायिकः प्राह ।

सम्बन्धस्य परिच्छेदः संज्ञायाः संज्ञिना सह ।
प्रत्यक्षादेरसाध्यत्वादुपमानफलं विदुः ॥ १० ॥

फलमित्यनन्तरं इतीत्यध्याहार्य्यं संज्ञायागवयादिसंज्ञायाः संज्ञिना गवयत्वादिविशिष्टेन सह सम्बन्धस्य शक्तेः परिच्छेद

निश्चयः उपलार्न्स्य मानान्तरस्य फलमुपमितिः प्रत्यक्षादेरसाध्यत्वात् इन्द्रिय लिङ्गशब्दानामसामर्थ्यात् ॥ १० ॥

ननु गोसदृशोगवयपदवाच्य इत्यतिदेशवाक्यादेव शक्तिधीरस्तु गवयत्वविशिष्टोधर्मी गवयपदवाच्योगोसदृशत्वादित्यनुमानाद्वास्तु तत्राह ।

साहश्यस्यानिमित्तत्वान्निमित्तस्याप्रतीतितः ।
समयोदुर्ग्रहः पूर्वं शब्देनानुमयापि वा ॥ ११ ॥

समयः गवयत्वादिजातिपुरस्कारेण शक्तिरूपसम्बन्धः स च दुर्ग्रहः शब्दादनुमानाद्वा न सम्भवति गवयत्वस्य तेन पुंसा अगृहीतत्वात् । न च साहश्यमेव प्रवृत्तिनिमित्ततया गृह्यतां तस्य गुरुत्वेनाप्रवृत्तिनिमित्तत्वात् ॥ ११ ॥

ननु प्रथमतोगवयत्वस्याप्रतीतत्वेऽपि यदा गवयत्वं प्रत्यक्षं तदा गोसदृशोगवयपदवाच्य इत्यतिदेशवाक्याल्लक्षणया गवयत्वं परामृष्यते तेन रूपेण शक्तिधीरस्तु तत्राह ।

श्रुतान्वयादनाकाङ्क्षं न वाक्यं ह्यन्यदिच्छति ।
पदार्थान्वयवैधुर्यात्तदाक्षिप्तेन सङ्गतिः ॥१२॥

गोसादृश्यसामानाधिकरण्येन गवयपदवाच्यत्वविषयकज्ञानजनकतया शब्दस्य गवयत्वादिना शक्तिबोधे नाकाङ्क्षा अन्वयस्य पर्य्यवसानात् यत्र पदार्थाएवान्वयविधुराः केनापि रूपेणान्वयायोग्याः तत्र तदाक्षिप्तेन तेन लक्षणीयार्थेन सङ्गतिरन्वयः गङ्गायां घोष इत्यादौ ॥ १२ ॥

ननु गवयपदं सप्रवृत्तिनिमित्तकं साधुपदत्वादिति सामान्यतोदृष्टमनुमानमितरप्रवृत्तिनिमित्तकत्वबाधे गवयत्वस्य प्रवृत्तिनिमित्तत्वमवगाहतामिति चेन्न व्यापकतावच्छेदकरूपेणैवानु-

मितेर्व्यापकविषयकत्वात् गवयपदं गवयत्वप्रवृत्तिनिमित्तकम् इतराप्रवृत्तिनिमित्तकत्वे सति सप्रवृत्तिनिमित्तकत्वादिति व्यतिरेकि च साध्याप्रसिद्ध्या न सम्भवति व्यतिरेकव्याप्तप्रतिसन्धानेऽपि गवयत्वाश्रयो गवयपदवाच्य इति धियोऽनुभवसिद्धत्वाच्च उपमानं प्रमाणान्तरम् । धिक्करभमतिदीर्घग्रीवमतिकठोरकण्टकाशिनमपसदं पशूनामित्यादि वाक्यार्थज्ञानानन्तरं तादृशपिण्डदर्शने करभपदवाच्यताग्रहोऽप्युपमानादेवेति । उपमानन्तु शक्तिमात्रपरिच्छेदकतया नेश्वरे बाधकमिति भावः । शब्दस्तु नेश्वरे बाधकत्वेन शङ्कनीयः अनुमानानतिरेकात् इति वैशेषिकाः । पदश्रवणानन्तरं पदार्थस्मरणे एते पदार्थाः परस्परं संसर्गवन्तः आकाङ्क्षायोग्यतादिमत्पदस्मारितत्वात् दण्डेन गामभ्याजेतिपदस्मारितपदार्थवत् इत्यनुमानात् संसर्गसिद्धेः किञ्च एतानि पदानि स्मारितपदार्थसंसर्गप्रमापूर्वकाणि आकाङ्क्षादिमत्पदत्वात् इत्यनुमानात् तत्सिद्धेः ज्ञानज्ञानस्य तद्विषयविषयकत्वनियमादित्यताह ।

अनैकान्तः परिच्छेदे सम्भवे च न निर्णयः ।
आकाङ्क्षासत्तया हेतुर्योग्यासत्तिरबन्धना ॥१३॥

अत्र पदार्थपञ्चकानुमाने संसृष्टा एवेति यदि संसर्गवत्त्वं साध्यते सम्भावितसंसर्गका इति संसर्गस्वरूपयोग्यत्वं वा आद्ये पयसा सिञ्चतीत्यादावनैकान्तः द्वितीये न संसर्गनिर्णयः अन्वयप्रयोजकरूप वत्त्वरूपयोग्यतायाः हेतुविशेषणीकृतत्वेन सिद्धसाधनाच्च द्वितीये प्रयोगे आकाङ्क्षासत्तया इति आकाङ्क्षा हि समभिव्याहृतपदस्मारितपदार्थजिज्ञासा घटमित्युक्ते आनयस्वेति आनयेत्युक्ते घटं पटं वेति जिज्ञासादयः । ननु योग्यतासहितासत्तिरेव हेतुरस्तु तत्राह योग्यासत्तिरबन्धना इति

व्याप्तिशून्या अयमेति पुत्रोराज्ञः पुरुषोऽपसार्य्यतामित्यत्र निराकाङ्क्षयोराजपदपुरुषपदयोर्व्यभिचारात् ॥ १३ ॥

प्राभाकरास्तु वेदस्यापौरुषेयतया तत्र वक्तृज्ञानानुमानासम्भवात् शब्दः प्रमाणं लोके तु आप्तोक्तत्वज्ञानमपेक्षितं तथाचायं वक्तास्मप्रयुक्तवाक्यार्थयथार्थज्ञानवान् भ्रमाद्यजन्यवाक्यार्थज्ञानजन्यवाक्य प्रयोक्तृत्वात् इत्यनुमानाद्वक्तृज्ञानावच्छेदकतया संसर्गसिद्धौ उत्तर कालं वा एते पदार्थाः परस्परं संसृष्टाः वक्तृयथार्थज्ञानविषयत्वात् इत्यनुमानात् साक्षाद्वाक्यार्थसिद्धेः क्लृप्तसामर्थ्यात् शब्दात् पुनरन्वय धीरित्यनुवादकोलौकिकः शब्दोन प्रमाणमिति प्राहुस्तन्नाह ।

निर्णीतशक्तेर्वाक्याद्धि प्रागेवार्थस्य निर्णये ।
व्याप्तिस्मृतिविलम्बेन लिङ्गस्यैवानुवादिता ॥१४॥

वेदेऽवधारितसामर्थ्याच्छब्दाल्लोकस्थलेऽपि प्रागर्थनिर्णये लिङ्गस्यैवानुवादकत्वं व्याप्तिस्मृतिविलम्बेनानुमानस्य शब्दापेक्षया विलम्बितधीजनकत्वात् ॥ १४ ॥

नन्वाप्तोक्तत्वस्य संशये व्यतिरेके च शब्दे ज्ञानानुपपत्त्या निर्णयो हेतुर्वाच्यः। आप्तोक्तत्वञ्च प्रकृतवाक्यार्थगोचरयथार्थधीजन्यत्वमिति वाक्यार्थधीः प्रथमतोऽनुमानादेव वाच्या इत्यत आह ।

व्यस्तपुंदूषणाशङ्कैः स्मारितत्वात् पदैरमी ।
अन्विता इति निर्णीते वेदस्यापि न तत् कुतः॥१५॥

आप्तोक्तत्वनिश्चयस्य हेतुत्वे मानाभावः बाधकप्रमाविरहरूप योग्यताज्ञानविलम्बादयोग्येऽन्वयधीविलम्बसम्भवात् अन्यथा वेदेऽपि पौरुषेयत्वधीर्हेतुरस्तु तथाच तत्रापि अमी वैदिका

र्था अन्विताः परस्परसंसृष्टाः व्यस्तपुंदूषणाद्यङ्कैः पदैः स्मारितत्वात् इत्यनुमानात् संसर्गे निर्णीते तदनुवादकत्वं वेदस्यापि न कुतः । यत्तु पदं न करणं किन्तु पदार्थ एव अतएव पदार्थकरणकाच्च वाक्यार्थज्ञानात् कविकाव्यादिकं द्वारमित्यत्र द्वारोपस्थितावपि पदार्थनिष्ठाकाङ्क्षाविरहेणान्वयाबोधः शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्य्यत इति न्यायात् अतएव पदानामवच्छेदकत्वं पदजन्योपस्थितिं विना पदादन्वयाबोधात् । तदुक्तं शाब्दस्यादभिधातृत्वात् तात्पर्य्योपगमादपि । पदानामेव सा शक्तिर्व्वरमभ्युपगम्यताम् । अभिधातृत्वात् पदार्थोपस्थापकत्वात् इति गुरुमतमपास्तं पदानामित्यत्र आप्तानामिति प्रक्षेपेणापि आप्तस्यावच्छेदकत्वापातात् तथाचावश्यस्वीकार्य्यपदार्थोपस्थितौ पदमन्यथासिद्धं न करणमिति तन्न पदार्थानामतीतादिरूपतया अकारणत्वात् पदार्थस्मरणस्यापि निर्व्यापारतया अकरणत्वात् पदज्ञानस्यैव करणत्वात् पदार्थस्मृतेर्व्यापारत्वात् कविकाव्यादिस्थले च मानसज्ञानं हेतुरिति ॥ १५ ॥

ननु शब्दोऽतिरिच्यतां प्रमाणं स एव बाधकोऽस्तु तथाहि प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्व्वशः । अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते इति गीतां पठन्ति । प्रकृतेर्बुद्धितत्त्वस्य गुणैः सत्त्वादिभिः क्रियमाणानि कर्म्माणि मोहादहं कर्त्तेति चेतनो मन्यते तेनाभिमानिकं न पारमार्थिकं कर्तृत्वं न च सर्व्वज्ञस्याभिमानोऽपि विशेषदर्शनात् कर्त्तेति हन्तीति न शङ्की इत्यत्राह ।

न प्रमाणमनाप्तोक्तिर्नादृष्टे क्वचिदाप्तता ।
अदृश्यदृष्टौ सर्व्वज्ञोन च नित्यागमः क्षमः ॥ १६ ॥

अयं हि सर्व्वकर्तृत्वाभावावेदकः शब्दः अनाप्तोक्तश्चेन्न प्रमाणम् आप्तोक्तश्चेदेतदर्थगोचरज्ञानवतोनित्यसर्व्वविषयकज्ञानवत्त्वम् इन्द्रियाद्यभावात् आगमस्य च नित्यत्वं दूषितमेव प्रागिति वेदकारो नित्यः सर्व्वज्ञः सिद्ध्यति ॥ १६ ॥

नन्वसत्त्वबोधकागमानां का गतिस्तत्राह ।

नचासौ क्वचिदेकान्तः सत्वस्यापि प्रवेदनात् ।
निरञ्जनावबोधार्थान च सन्नपि तत्परः ॥१७॥

असावागमोनासत्वमात्रपर एव सत्यास्यपि ब्रह्मणोमत्तः सर्व्वं प्रवर्त्तते इत्यादिभिः प्रतिपादनात् द्वयोश्च न मुख्यार्थत्वं विरोधात् विनिगमकचिन्तायां विशेषगुणशून्यात्मस्वरूपस्य ध्येयत्वतात्पर्य्यकत्वं बाधकश्रुतीनां साधकश्रुतीनाञ्च कार्य्यकारणभावादितर्कमूलकानुमान साचिव्येन मुख्यार्थत्वात् ॥ १७ ॥

ननु यद्यसौ सर्व्वज्ञः स्यात् अनुपदिश्यापि प्रवर्त्तयेदित्युपदेशानुपपत्तिरेव ईश्वरे बाधिका नह्ययमनुपदिश्य स्वयं प्रवर्त्तयितुं न जानाति सर्व्वज्ञत्वानुपपत्तेः अर्थापत्तिश्च मानान्तरं तत्राह ।

हेत्वभावे फलाभावात् प्रमाणेऽसति न प्रमा ।
तदभावात् प्रवृत्तिर्न कर्म्मवादेऽप्ययं विधिः ॥१८॥

प्रमाणेऽसति न प्रमा प्रमाणरूपहेत्वभावे फलाभावात् प्रमाविरहात् प्रमाविरहे च न प्रवृत्तिः कारणाभावात् प्रमाकरणञ्चाग्निष्टोमेनेत्यादिविधिरेव इति नोपदेशव्यर्थता अन्यथा क-

श्रीनादेऽप्ययं विधिः अदृष्टादेव प्रवृत्तेरुपपत्तेः वेदस्यानर्थक्यापत्तिः नवार्थापत्तिर्मानान्तरम् ॥ १८ ॥

तमेवाह ।

अनियम्यस्य नायुक्तिर्नानियन्तोपपादकः ।
न मानयोर्विरोधोऽस्ति प्रसिद्धे वाप्यसौ समः ॥१९॥

जीवी देवदत्तो गेहे नास्तीति ज्ञानानन्तरं वहिरस्तीति धीरुदाहरणं तत्रानियम्यस्याव्याप्यस्य नायुक्तिर्नानुपपत्तिः अनियन्ता अव्यापकोनोपपादकः व्यापकव्यतिरेकेण व्याप्यस्यैव व्यतिरेकात् तादृशानुपपत्तिज्ञाने व्यतिरेकव्याप्तिधीरेव । यदपि क्वचिदस्ति गेहे नास्तीतिज्ञानानन्तरं विरोधज्ञानेऽविरोधाय गेहान्यविषयता क्वचिदस्तीत्यस्येत्यर्थापत्तिरिति तदपि न ननु वास्तवोमानयोर्विरोधः तथा सत्येकं मानं भज्येत विरोधज्ञानस्य तु विषयभेदव्यवस्थापकत्वमनुमानविधयैव तथाहि विरोधोभिन्नविषयकः एकविषयतायां विरुद्धत्वे सति प्रमाणसिद्धत्वादिति अन्यथा धूमोऽप्यनुपपद्यमानो वह्निं गमयेदित्यर्थापत्तिरिति प्रसिद्धमनुमानं न स्यात् अर्वाग्भागावच्छेदेन वह्न्यनुपलम्भः धूमश्च वह्निसाधनमिति विरोधेऽपरभागावच्छेदेन वह्निव्यवस्थापनमप्यर्थापत्तिरेव स्यात् अनुमानाभावेऽपि व्याप्तिग्राहकमानस्य वह्निसाधकत्वमर्थापत्तेरित्यनुमानविलोपः स्यादिति अनुपलब्धिश्च नेश्वरे बाधिकेति योग्यादृष्टिरित्यादि नोक्तम् ॥ १९ ॥

वस्तुतोऽनुपलब्धिर्मानान्तरमेव नेत्याह ।

प्रतिपत्तेरपारोक्ष्यादिन्द्रियस्यानुपक्षयात् ।
अज्ञातकरणत्वाच्च भावावेशाच्च चेतसः ॥२०॥

यत्राज्ञातानुपलब्धिः कारणं तत् प्रत्यक्षं, ज्ञातानुपलब्धिज-न्याभावज्ञानस्यानुमानत्वात् । जन्यापरोक्षज्ञानस्य इन्द्रियजन्य-त्वात् अपरोक्षत्वञ्च ज्ञानकरणकान्यत्वं, घटादिप्रत्यक्षइव घटा-भावाध्यक्षेऽपीन्द्रियस्यान्यानुपक्षीणत्वात् *करणत्वमधिकरणप्रत्य-क्षाभावेऽपि शब्दादिध्वंसस्य, वायौ रूपाभावस्य ग्रहात् अधिक-रणग्रहेऽप्यनुपक्षयात् । अज्ञातकरणजन्यज्ञानत्वेन इन्द्रियजन्यत्वा-नुमानाच्च । भावावेशाच्च चेतसोमनसः अक्षादादिवाह्यानुभ-वस्य भावभूतकरणसचिवमनोजन्यत्वनियमात् नानुपलब्धिः क-रणं किन्त्विन्द्रियमेवेति ॥ २० ॥

साधकान्तरमाह ।

प्रतियोगिनि सामर्थ्याद्व्यापाराव्यवधानतः ।
अक्षाश्रयत्वाद्दोषाणामिन्द्रियाणि विकल्पनात् ॥ २१ ॥

इन्द्रियाणि करणमिति साध्यं, प्रतियोगिग्राहकत्वात् यथा-नुमानं घटस्येव तदभावस्यापि ग्राहकं तदिन्द्रियमपि । ननु प्रतियोगिग्राहकत्वमतन्त्रम् अनन्यथासिद्धत्वस्योपाधित्वात् आ-श्रयग्रहेणान्यथासिद्धेरित्यत हेतुः व्यापाराव्यवधानतइति व्या-पारेणाधिकरणप्रत्यक्षेण इन्द्रियस्यान्यथासिद्ध्यभावात् अन्यथा संयोगेन चक्षुरादिकमन्यथासिद्धं भावग्रहेऽपि स्यात् । किञ्चाभा-वभ्रमस्य दुष्टकरणजन्यत्वमवश्यं दोषश्चेन्द्रियादिनिष्ठएव अनुपल-ब्धेर्दोषाभावात्, पित्तादिना इन्द्रियस्यैव दुष्टत्वात् तदिदमुक्तम् अक्षाश्रयत्वाद्दोषाणामिति । अधिकरणाभावयोर्विशिष्टधीर्नेन्द्रि-यजा अभावधीत्वात् नानुपलब्धि करणजा भावधीत्वादतोविशि-ष्टग्राहीन्द्रियं स्वीकार्यं तदिदमुक्तं विकल्पनात् विशिष्टविषयक-ज्ञानात् ॥ २१ ॥

 * अज्ञातानुपलब्धिसहकृतमिन्द्रियमित्यर्थः

नन्वनुपलब्ध्या घटाभावस्य ज्ञानं ततश्च घटाभाववद्भूतलमिति ज्ञानं घ्राणजसौरभोपनयानन्तरं सुरभि चन्दनमिति चाक्षुषवत् इत्यभावग्राहिकानुपलब्धिः कारणतया वाच्या निर्विकल्पकविषयी कृत एव इन्द्रियेण सविकल्पकविषयतया गृह्यते तथा दर्शनात् अभावेनेन्द्रियप्रत्यासत्तेरभावात् कथं वा प्रत्यक्षं विशेषणतायाः सम्बन्धान्तरगर्भत्वात् अवश्यक्लृप्तकारणताकानुपलब्धेरेव करणत्वं नेन्द्रियस्य त्वत्राह ।

अवच्छेदग्रहध्रौव्यादध्रौव्ये सिद्धसाधनात् ।
सम्बन्धान्तरेऽनवस्थानान्न चेदन्योऽपि दुर्घटः ॥२२॥

अवच्छेदग्रहस्य=प्रतियोगिग्रहस्याभावप्रत्यक्षहेतुत्वात् नियमतः सविकल्पकज्ञानसामग्रीसत्त्वान्न निर्विकल्पकत्वं घटादिग्रहे तु निर्विकल्पकमेव प्रथमतः । विशिष्टज्ञानहेतुविशेषणज्ञानाभावात् प्रतियोग्यनुपस्थितस्याभावस्य भानाभ्युपगमे तु अभावस्यापि निर्विकल्पकविषयतेति सिद्धसाधनम् । सम्बन्धान्तरेऽनवस्थानात् स्वरूपमेवाभावस्याधिकरणेन सम्बन्धः वैशिष्ट्यस्याभावासम्बन्धस्याङ्गीकृतस्यापि सम्बन्धधारायामनवस्थानात् स्वरूपसम्बन्धस्वीकारस्यावश्यम्भावात् इन्द्रियसम्बद्धविशेषणतया घटाभावादिप्रत्यक्षे सन्निकर्षतया कल्पनात् नचेदेवं तदानुपलब्धिकारणतापक्षेऽपि अन्यप्रकारो दुर्घटः तथाहि सर्वैरेव प्रमाणैः परम्परया निर्विकल्पकविषय एव गृह्यतेऽनुमानादावपि वह्न्यादेः पूर्वं कदाचिन्निर्विकल्पकस्वीकारात् घटाभाववद्भूतलमित्यादि विशिष्टप्रत्ययबलात् अभावेनाधिकरणस्य प्रामेर्भवतापि स्वीकारात् ॥२२॥

स्तवकार्थसंग्राहकश्लोकमाह ।

प्रत्यक्षादिभिरेभिरेवमधरो दूरे विरोधोदयः
प्रायो यन्मुखवीक्षणैकविधुरैरात्मापि नासाद्यते ।
तं सर्वानुविधेयमेकमसमस्वच्छन्दलीलोत्सवम्
देवानामपि देवमुद्भवदतिश्रद्धाः प्रपद्यामहे ॥२३॥

इति तृतीयः स्तवकः ।

यस्येश्वरस्य मुखनिरीक्षणैकविधुरैर्धर्मिग्राहकमानबाधितैः प्रत्यक्षादिभिरात्मैव नासाद्यते विरोधोदयोयतोऽधरः अतएव दूरे,सर्वमनुविधेयं वश्यं यस्येति असमा स्वच्छन्दा चेतनान्तराप्रयोज्याया लीला सैवोत्सवोयस्य स तथा दुःखाभावैकनिदानत्वादतएव उद्भवदतिश्रद्धाः देवानामपि देवं स्तुत्यं प्रपद्यामहे ॥ २३ ॥

इति तृतीयस्तवकव्याख्यानम् ।



चतुर्थः स्तवकः ।

सत्वेऽपि तस्याप्रमाणत्वात् इति तुरीयविप्रतिपत्तिः ॥ ईश्वरो न मानं तज्ज्ञानस्यागृहीतग्राहित्वाभावेन प्रमात्वाभावात् ईश्वरस्य प्रमाकर्तृत्वं प्रमाकरणत्वञ्च नास्तीति अप्रमाणपुरुषस्य वचः कः श्रद्दध्यादित्यत्राह ।

अप्राप्तेरधिकप्राप्तेरलक्षणमपूर्व्वदृक् ।
यथार्थोऽनुभवोमानमनपेक्षतयेष्यते ॥१॥

अपूर्वदृक्त्वम् अगृहीतग्राहित्वं न प्रमालक्षणं धारावहनबुद्धव्याप्तेः इदं रजतमितिभ्रमातिव्याप्तेश्च । भ्रमते लक्षणमाह यथार्थ इति अनपेक्षतयेति स्मृतेर्जनकानुभवसमानविषयतया

अनुभव स्मृतौ
तत्प्रामाण्याधीनप्रामाण्यकतया तत्र सापेक्षत्वात् न प्रमाव्यवहारस्तान्त्रिकाणामिति ॥ १ ॥ ज्ञाततारव्यः

ननु धारावाहिके नाव्याप्तिः ज्ञानेन हि विषयनिष्ठो धर्म्मः कश्चिज्जननीयः अन्यथा ज्ञानस्य विषयनियमो न स्यात् तथा च तमादायागृहीतग्राहित्वमेव किञ्च स धर्म्मस्तदुपादानज्ञानजन्यो न वा आद्ये उपादानज्ञानस्य उपादानविषयतानियमार्थं धर्म्मान्तरस्वीकारे तत्राप्येवमनवस्था द्वितीये कार्य्यत्वं हेतुः तत्रैव उपादानज्ञानजन्यत्वे व्यभिचारीति नेश्वरस्य क्षित्यादिकर्तृतया सिद्धिरित्यत आह ।

स्वभावनियमाभावादुपकारोऽपि दुर्घटः ।
सुघटत्वेऽपि सत्यर्थेऽसति का गतिरन्यथा ॥ २ ॥

स्वभावविशेष एव विषयतानियामकः अन्यथा ज्ञातताधानेऽपि नियमानुपपत्तिः इति स्वभाव एव नियामकस्तत्रेति किञ्च वर्त्तमान विषये तदुत्पत्तावपि अविद्यमाने विषये ज्ञाततायाः उपादानविरहात् अनुत्पत्तौ विषयतानियमानुपपत्तिरिति स्वभाव एव तत्र नियामक इति ॥ २ ॥

ननु क्रियया कर्म्मणि किञ्चिज्जननीयमिति व्याप्तेर्ज्ञानक्रिययापि विषयनिष्ठो धर्मो जननीय इत्यत आह ।

अनैकान्तादसिद्धेर्वा न च लिङ्गमिह क्रिया ।
तद्वैशिष्ट्यप्रकाशत्वान्नाव्याप्त्यानुभवोऽधिके ॥ ३ ॥

क्रिया यदि धात्वर्थस्तदा शरेण गगनं युनक्ति इत्यत्र संयोगेन गगननिष्ठकिञ्चिदजननात् अनैकान्तः, यदि करणव्यापारः क्रिया तदापीन्द्रियसंयोगादिना घटादिनिष्ठकिञ्चिदजननात् व्यभिचारः, अथ क्रिया स्पन्दस्तदा ज्ञानस्य स्पन्दानात्मकत्वाद

सिद्धिः । ननु ज्ञातोघटः साक्षात्कृतोघट इत्यादि प्रत्यक्षमेव ज्ञाततायां मानमित्यत्राह तद्वैशिष्ट्येऽति सर्वत्र विशिष्टज्ञानं विशेषणविशेष्यतदुभयसम्बन्धविषयः स च सम्बन्धः क्वचित् संयोगादिः क्वचित् स्वरूपं तदिह घटे ज्ञानमित्यत्रेव घटज्ञानयोः स्वरूप एव सम्बन्धः ज्ञातो घटइत्यत्रापि भासते अन्यथा दृष्टोघटः कृतोघट इत्यत्र दृष्टताकृततयोरप्यापत्तेः ॥ ३ ॥

स्वभावसम्बन्धादुपपत्तिस्तुल्या तदुच्यते ।

अर्थेनैव विशेषोहि निराकारतया धियाम् ।
क्रिययैव विशेषाहि व्यवहारेषु कर्मणाम् ॥४॥

यथा घटादीनां ज्ञाने विशिष्टधीः, यथा च क्रिययैव कर्मणां घटादीनां व्यवहारेषु विशिष्टबुद्ध्यादिषु विशेषस्तथा ज्ञातोघट इत्यादौ ज्ञानेनैव घटादौ विशिष्टधीर्न धर्मान्तरादिति ॥ ४॥

ननु तथापि नेश्वरज्ञानं प्रमा प्रमाणजन्यत्वाभावात् एवमीश्वरोन प्रमाता न वा प्रमाणं प्रमाकर्तृत्वकरणत्वयोरभावादताह ।

मितिः सम्यक्परिच्छित्तिस्तद्वत्ता च प्रमातृता ।
तदयोगव्यवच्छेदः प्रामाण्यं गौतमे मते ॥५॥

यथार्थानुभवत्वं प्रमात्वमजन्यत्वेऽपीश्वरज्ञानस्याविरुद्धं, प्रमातृत्वं प्रमासमवायित्वम् एतच्च अकारणत्वेऽपि प्रमाया ईश्वरस्य सिद्धम्, एवं प्रमया सहायोगव्यवच्छेदेन अभेदे तृतीया सम्बन्धितयेश्वरस्य प्रमाणत्वं न तु करणत्वमपि तच्च नियामकमिति मन्त्रायुर्वेदवत् तत् प्रामाण्यमाप्तप्रामाण्यादिति सूत्रे ईश्वरस्य प्रामाण्यमुक्तं नचेश्वरस्य पञ्चमप्रमाणत्वापत्त्या विभागव्याघातः प्रमाकरणाभिप्रायेण विभागसम्भवात् । नचेश्वरज्ञानस्य भ्रम

विषयकत्वे भ्रमविषयावगाहित्वे च भ्रमत्वापत्तिरिति वा व्यधिकरणप्रकारकत्वाभावेना प्रमात्वाभावात् भ्रमनिष्ठशुक्ति विशेष्यकत्वं रजतत्वप्रकारकत्वञ्च सदेव तदवगाहितया ईश्वर नस्य प्रमात्वाच्चेतः ॥ ५ ॥

स्तवकार्थसंग्राहकश्लोकमाह ।

साक्षात्कारिणि नित्ययोगिनि परद्वारानपेक्षस्थितौ
भूतार्थानुभवे निविष्टनिखिलप्रस्ताविवस्तुक्रमः ।
लेशादृष्टिनिमित्तदृष्टिविगमप्रभ्रष्टशङ्कातुषः
शङ्कोन्मेषकलङ्किभिःकिमपरैस्तन्मेप्रमाणंशिवः॥६॥

इति चतुर्थः स्तवकः ।

भूतार्थानुभवे यथार्थानुभवे साक्षात्कारिणि प्रत्यक्षे निविष्टोविषयीभूतोनिखिलप्रस्ताविवस्तूनां नानापदार्थानां क्रमोयस्य स तदनुभवविषयसकलविश्वक इत्यर्थः नित्ययोगिनि सदातनअतएवेन्द्रियाणां द्वाराणामनपेक्षा स्थितिर्यस्य लेशतोऽप्यंशतोअदृष्टिर्विशेषादर्शनं तन्निमित्तिका या दृष्टिः रागद्वेषमोहादितद्विगमेन प्रभ्रष्टः शङ्कातुषः वेदाप्रामाण्यशङ्कालेशोयस्मादित्प्रमाणं शिवः एवम्भूते तत्राप्रामाण्यशङ्कापकलङ्कवद्भिः पषण्डैः किं कर्त्तव्यमित्यर्थः ॥ ६ ॥

इति तुरीयस्तवककारिकाव्याख्यानम् ।

पञ्चमः स्तवकः ।

तत्साधकप्रमाणाभावात् इति पञ्चमविप्रतिपत्तिः नन्वीश साधकप्रमाणमेव नास्तीत्यत्राह ।

कार्य्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः ।
वाक्यात्सङ्ख्याविशेषाच्च साध्योविश्वविद्व्ययः ॥१॥

क्षित्यादि सकर्तृकं कार्य्यत्वात् घटवत् सकर्तृकत्वञ्च उपादान गोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वम्। आयोजनं कर्म्म एवञ्च सर्गाद्यकालीनद्व्यणुकारम्भकपरमाणुद्वयसंयोगजनकं कर्म्म चेतन प्रयत्नपूर्व्वकं कर्म्मत्वात् अस्मदादिशरीरक्रियावत्। धृतीति ब्रह्माण्डादि पतनप्रतिबन्धकीभूतप्रयत्नवदधिष्ठितं धृतिमत्त्वात् वियति विहङ्गम धृतकाष्ठवत् धृतिश्च गुरुत्ववतां पतनाभावः। धृत्यादेरित्यादिपदात् नाशपरिग्रहः' ब्रह्माण्डादि प्रयत्नवद्विनाश्यं,विनाशित्वात् पाट्यमानपटवत्। पदात् पद्यतेऽनेनेतिव्युत्पत्त्यापदं व्यवहारः पटादिसम्प्रदाय व्यवहारः स्वतन्त्रपुरुषप्रयोज्यः व्यवहारत्वात् आधुनिकलिप्यादिव्यवहारवत्। प्रत्ययतः प्रामाण्यात् वेदजन्यज्ञानं कारणगुणजन्यं प्रमात्वात् प्रत्यक्षादिप्रमावत्। श्रुतेर्वेदात्,वेदः पौरुषेयोवेदत्वात् आयुर्वेदवत्। किञ्च वेदः पौरुषेयोवाक्यत्वात् भारतवत् वेदवाक्यानि पौरुषेयाणि वाक्यत्वात् अस्मदादिवाक्यवत्। ,संख्याविशेषात् द्व्यणुकपरिमाणं संख्याजन्यं परिमाणप्रचयाजन्यत्वे सति जन्यपरिमाणत्वात् तुल्य परिमाणकपालद्वयारब्धघटपरिमाणात् प्रकृष्टमाहशकपालद्वयारब्ध घटपरिमाणवत् अणुपरिमाणञ्च न परिमाणजनकं नित्यपरिमाणत्वात् अणुपरिमाणत्वाद्वा एवञ्च सर्गादौ द्व्यणुकपरिमाणहेतुपरमाणुनिष्ठ द्वित्वसंख्या च नास्मदाद्यपेक्षाबुद्धिजा अतस्तदानीन्तनापेक्षाबुद्धिरीश्वरस्यैवेति। विश्वविदव्ययइति विशिष्टस्याव्ययत्वं तेन नित्यसर्व्वविषयकज्ञानसिद्धिः॥१॥

नतु शरीरविशिष्टस्य कर्तृतया विशेषणबाधात्सकोविशिष्टबाध इति,कर्तृजन्यत्वव्यापकशरीरजन्यत्वाभावात् कर्तृजन्यत्वाभाव इति सत्प्रतिपक्षता च। यद्वा कर्त्ता शरीर्य्येव इति व्याप्तिविरोधिनी यद्वा व्याप्त्या यथादर्शनप्रवृत्तया शरीरी कर्त्तावश्य प-

॥ क्षित्यङ्कुरादिकं विशिष्टकर्तृकम्॥

नेयः पक्षधर्म्मितया च क्षित्यादावशरीरीति साध्याप्रसिद्धिः विशेषणविशेष्यविरोधश्च यद्वा शरीरजन्यत्वाद्युपाधिना व्याप्यत्वासिद्धिरिति कार्य्यहेतौ पञ्च दोषास्तत्राह ।

न बाधोऽस्योपजीव्यत्वात्, प्रतिबन्धो न दुर्बलैः ।
सिद्ध्यसिद्ध्योर्विरोधो न नासिद्धिरनिबन्धना ॥२॥

ईश्वरे धर्म्मिणि शरीरबाधात् कर्तृत्वबाधो न, अधिकरणज्ञानं विना अभावज्ञानासम्भवात्, अस्य=कार्य्यत्वस्य धर्म्मिसाधकस्याधिकरणज्ञानजनकतया अवश्यापेक्षणीयत्वेन बलवत्त्वात् एवञ्च न विशेषणबाधात्मको विशिष्टबाधः प्रत्यक्षात्मकः। ईश्वरो न कर्त्ता शरीरत्वात् इत्यनुमानबाधोऽपि नेत्यर्थः। क्षित्यादि न सकर्तृकं शरीराजन्यत्वात् इति न प्रतिबन्धकं सत्प्रतिपक्षहेतोः शरीरांशवैयर्थ्यात् व्याप्यत्वासिद्ध्या दुर्बलत्वात्। तृतीयेऽपि कार्य्यत्वव्याप्तेः पक्षधर्म्मत्व सहकारात् विपक्षबाधकतर्कावताराच्च बलवत्त्वेनोपन्यस्तायाः कर्त्ता शरीर्य्येवेति व्याप्तेर्दुर्बलतया न प्रतिबन्धः। चतुर्थे च यदि पक्षधर्म्मतया अशरीरी उपस्थितस्तदा न विरोधः कर्तृत्वस्याशरीरत्वसमानाधिकरणस्योपलम्भात् तदनुपस्थाने तु न विरोधः विरोधाश्रयस्यासिद्धेः पञ्चमे च विपक्षबाधकतर्कसत्त्वात् तदभावनिबन्धनाज्ञानरूपासिद्धिर्व्याप्यत्वासिद्धिर्न शरीरजन्यत्वोपाधेरपि विपक्षबाधकाभावेनापास्तत्वात् ॥ २ ॥

ननु यदीश्वरः कर्त्ता स्यात् शरीरी स्यादिति प्रतिकूलतर्कावतारस्तत्राह ।

तर्काभासतयान्येषां तर्काशुद्धिरदूषणम् ।
अनुकूलस्तु तर्कोऽत्र कार्य्यलोपो विभूषणम् ॥३॥

प्रतिकूलतर्कास्तावदीश्वरासिद्ध्या आश्रयासिद्धा इत्याभासाः कर्त्तारं विना कार्य्यं न स्यादिति तर्कस्तु विभूषणं सहकारः

अहं सर्व्वस्य प्रभवोमत्तः सर्वं प्रवर्त्तते इत्यागमश्चात्र। आर्षं धर्म्मोपदेशञ्च वेदशास्त्राविरोधिना। यस्तर्केणानुसन्धत्ते स धर्म्मं वेदनेतर इति तर्कानुगृहीतस्यागमस्य बलवत्त्वम् ॥ ३ ॥

ननु कार्य्यत्वं प्रयत्नजन्यत्वेऽप्रयोजकम् अत आह।

स्वातन्त्र्ये जडताहानि र्नादृष्टं दृष्टघातकम्।
हेत्वभावे फलाभावोविशेषस्तु विशेषवान् ॥४॥

नहि कर्त्तारं हेतुं विना कार्य्यं, परमाणोरेव यत्नवत्त्वेऽचैतन्यानुपपत्तिः अचेतनस्य चेतनप्रेरितस्यैवजनकत्वात् अदृष्टस्य दृष्टकारण सहकारेणैव फलजनकत्वम्। नच चेष्टायामेव भोक्तृप्रयत्नोहेतुः नतु क्रियासामान्ये इति चेष्टायां विशेषप्रयत्नस्य हेतुत्वेऽपि क्रियासामान्ये प्रयत्नसामान्यस्य कारणत्वानपायात् अन्यथा वीजविशेषस्याङ्कुरविशेषे जनकत्वेनाङ्कुरसामान्यं प्रति वीजत्वेन हेतुताया अपि विलोपापत्तेः ॥४॥

ननु धृत्यादीनां प्रयत्नजन्यत्वे किं मानमित्यत आह।

कार्य्यत्वान्निरुपाधित्वमेवं धृतिविनाशयोः।
विच्छेदेन पदस्यापि प्रत्ययादेश्च पूर्ववत् ॥५॥

धृतिविनाशयोः प्रयत्नजन्यत्वान्निरुपाधित्वं विच्छेदेनान्तराप्रलयेन शादशाद्यभावात् अर्व्वाग्दर्शी नाद्यव्यवहारमूलं व्यवहारानभिज्ञत्वादिति सर्गाद्यकालीनघटादिव्यवहारप्रवर्त्तकः पुरुषः सिद्ध्यति। एवं प्रत्ययादेर्वेदजन्यधीप्रामाण्यादेरपि निरुपाधित्वम् अथवा कार्य्यत्वादिकमन्यया व्याख्यायते। कार्य्यं तात्पर्य्यं तात्पर्य्यविषय एव शब्दप्रामाण्यमिति तात्पर्य्यं हि यस्य वेदे स एवेश्वरः। आयोजनं व्याख्यानं वेदास्तदर्थविद्याख्याताः महाजनपरिगृहीतवाक्यत्वात् अव्याख्यातत्वे पदार्थानवगमेऽननुष्ठानापत्तेः एकदेशदर्शिनश्च व्याख्यायां नाश्वासः एवं धृतिधीरगं

इत्यादेरिति आदिग्रहणात् अनुष्ठानसंग्रहः एवमीश्वरादिपदार्थतया ईश्वरसिद्धिः । तदुक्तम् उद्देश एव तात्पर्य्यं व्याख्या विश्वदृशः सती । ईश्वरादिपदं सार्थं लोकवृत्तानुसारतः । उद्देश इच्छाविशेषः एवम् अहं सर्व्वस्य इत्याद्यवच्छं पदं स्वतन्त्रोच्चारयितृपरं लोकस्थले सतात्पर्य्यकशब्दस्यैव प्रमाणत्वात् । य एव लौकिकास्त एव वैदिका इति लौकिकाश्वादिपदवदलौकिकेऽपीयमेव व्यवस्था प्रत्ययतः विधिप्रत्ययात् आप्ताभिप्रायोविध्यर्थः यस्याभिप्रायः स एवेश्वरः ॥५॥

प्रवृत्तिः कृतिरेवात्र सा चेच्छातो यतश्च सा ।
तज्ज्ञानं विषयस्तस्य विधिस्तज्ज्ञापकोऽथवा ॥६॥

विधिजन्यज्ञानात् प्रवृत्तिरिष्यते सा इच्छातश्चिकीर्षातः चिकीर्षा च कृतिसाध्यत्वेष्टसाधनताज्ञानात् तज्ज्ञानस्य विषयः कार्य्यत्वम् इष्ट साधनत्वञ्च विधिरिति प्राचां मतं स्वमतमाह तज्ज्ञापकोऽथवेति इष्टसाधनत्वानुमापक आप्ताभिप्रायोविधिप्रत्ययार्थः॥६॥

प्रवृत्तिप्रयोजकेच्छाहेतुज्ञानविषयं परिशेषयति ।

इष्टहानेरनिष्टाप्तेरप्रवृत्तेर्विरोधतः ।
असत्वात् प्रत्ययत्यागात् कर्तृधर्म्मा न सङ्गरात् ॥७॥

स्पन्दस्य कर्तृधर्म्मस्य प्रवृत्तिप्रयोजकत्वे आत्मानं विजानीयादित्यत्राप्रवृत्तिप्रसङ्गात् ग्रामं गच्छतीत्यतः प्रवृत्त्यापत्तेः । यत्नस्य विधित्वे दोषमाह अप्रवृत्तेः आख्यातान्तरेण यत्ने बोधितेऽपीष्टसाधनत्वाप्रतिसन्धाने अनिष्टसाधनत्वज्ञाने वाऽप्रवृत्तेः इच्छाया विधित्वे दोषमाह विरोधतइति इच्छाया विधित्वे इच्छये तज्ज्ञानं जननीयं इच्छाया ज्ञानेन चेच्छा जननीया इत्यन्योन्याश्रयः तदिदमुक्तं विरोधतइति । नन्विच्छाज्ञानं लिङा जननीयम्

[illegible]चाह असत्वादिति इच्छाज्ञाने [illegible] [illegible]स्वरूपसदि-

च्छाभावात् प्रवृत्तिर्न स्यात् इच्छायाः स्वरूपसत्त्वा एव प्रवृत्तिहेतुत्वात् । नच लिङ्श्रवणकाले इच्छा स्वरूपसतीत्यर्थः । ननु लिङेव इच्छाजनिका इत्यत्राह प्रत्ययत्यागादिति इच्छाकारणत्वेन गृहीतस्य प्रत्ययस्य ज्ञानस्य कारणस्य त्यागापत्तेः व्यभिचारादित्यर्थः । लिङ्श्रुतिकाले सुखत्वादिप्रकारकधीजन्येच्छा लिङर्थ इत्यत्राह सङ्करादिति इष्टसाधनताज्ञानस्य उपायेच्छाहेतोरवश्यं स्वीकारात् तत्र कारणान्तराभावात् लिङ्पदमेव कारणमतः फलेच्छाज्ञानं न प्रवृत्तिहेतुः तद्विनापि प्रवृत्तिसम्भवात् तथाच सङ्करादिष्टसाधनत्वज्ञानरूपसाधनसञ्चारत्वात् इच्छाज्ञानस्येच्छाजनकत्वे मानाभावेन तस्य लिङ्पदजन्यत्वे मानाभावाच्चेति ॥७॥ ननु यत्नज्ञानमेव प्रवर्त्तकमस्तु आख्यातान्तरस्य न यत्नवाचकम् अनुकूलव्यापारमात्र एव आख्यातशक्तेः रथोगच्छतीत्यादौ तथा कल्पनात् तत्राह ।

कृताकृतविभागेन कर्तृरूपव्यवस्थया ।
यत्न एव कृतिः पूर्व्वा परस्मिन् सैव भावना ॥८॥

घटः कृतोऽङ्कुरोन कृत इति व्यवहारवत् कुलालादिः कर्त्ता न कारकान्तरमिति कृञधात्वर्थोऽपि कृतिः । ननु यत्नपदस्य पर्य्यायता स्यादतआह पूर्व्वेति परस्मिन्नुत्तरकालवर्त्तिनि फले विद्यमाने सैव कृतिरेव पूर्व्वा साधनीभूता भावना फलानुकूलयत्न एवाख्यातार्थः यद्वा फलानुकूल व्यापारधात्वर्थं प्रत्ययजनिका पूर्व्वा परस्मिन् पूर्व्वापरीभूतवत्त्वे सति कृतिराख्यातार्थः । तथाच प्रयत्नवत्त्वमनुकूलत्वं पूर्व्वापरीभूतवत्त्वमिति त्रयमर्थः ॥८॥

ननु धातुना यत्नः प्रतीयते आख्यातस्य च अनुकूलव्यापारार्थकत्वम् आक्षेपादेव च यत्नलाभ इत्यतआह ।

भावनैव हि यत्नात्मा सर्व्वाख्यातस्य गोचरः ।

तया विवरणध्रौव्यादाक्षेपाद्युपपत्तितः ॥९॥

तया कृत्या तद्वाचकपदेन पचति पाकं करोतीति विवरणात् तत्र शक्तिः अनुकूलव्यापारस्य यत्नाक्षेपकत्वात् वर्त्तमानपाकानुकूलव्यापारस्याचेतनेऽपि भावात् ओदनमिति कर्मपदोत्तरं पचति भुङ्क्ते वेति जिज्ञासा च कर्मणः कृतिव्याप्यत्वप्रतिसन्धानेन यथा पचतीत्यनन्तरं कर्मादौ जिज्ञासा ॥९॥ ननु कर्त्तुरपि विवरणात् तत्रापि शक्तिराख्यातस्य स्यात् तत्राह।

आक्षेपलभ्ये संख्येये नाभिधानस्य कल्पना।
संख्येयमात्रलाभे तु साकाङ्क्षेण व्यवस्थितिः ॥१०॥

आख्यातवाच्यया संख्यया आश्रयस्य आक्षेपादेव लाभान्न कर्त्तरि शक्तिकल्पना प्रथमान्तपदोपस्थाप्यत्वे सति आख्यातार्थविशेष्यत्वमाक्षेपलभ्यत्वं भुक्त्वा इत्यादौ क्त्वान्तार्थान्तर्य्यवारणाय विशेष्यदलम्। सुप्यते इत्यादौ वर्त्तमानत्वविशेष्यत्वं स्वापस्यापीति सत्यन्तदलम्। चैत्रस्तण्डुलं पचतीत्यत्र द्वितीयार्थकर्मतावरुद्धत्वात् तण्डुलस्य न तत्र भावनाकाङ्क्षेति भावना शुद्धप्रातिपदिकार्थान्वयिनी अतएव यं यं भावनान्वेति तं तं संख्यापीत्येकपदोपात्तभावनान्वयबलात् कर्त्रादि संख्याभिधान एव च प्रथमेति एवं कर्म्मापि नाख्यातपदवाच्यम् ॥१०॥

नन्वस्तु कर्म्मधर्म्मो विधिस्तत्राह।

अतिप्रसङ्गान्न फलं नापूर्वं तत्त्वहानितः।
तदलाभान्न कार्य्यञ्च न क्रियाप्यप्रवृत्तितः ॥११॥

कर्म्म स्वर्गादि तद्धर्म्मः कार्य्यत्वं यदि विधिस्तत्राह अतिप्रसङ्गान्न फलं स्वर्गे कार्य्यत्वज्ञाने सति स्वर्गासाधनेऽपि प्रवृत्त्यापत्तेः यदि कर्म्मापूर्वं तद्धर्म्मः कार्य्यत्वं विध्यर्थस्तत्राह नापूर्वं तत्त्व-

ज्ञानितः शाब्दबोधपूर्व्वं नोपस्थितमित्यतएवापूर्व्वं पूर्वमुपस्थितौ एव न तत्त्वम् । अनुपस्थितौ च कथं तत्र शक्तिधीः । ननु कार्य्यत्व रूपेण शक्तिधीः शाब्दबोधे तु योग्यतया अपूर्वस्य कार्य विशेषस्य भानं तत्राह तदलाभाच्च कार्य्यञ्चेति नित्यनिषेधापूर्व-योरलाभ प्रसङ्गात् तत्र फलकामस्य नियोज्यस्याभावात् । यद्वा ननु कार्य्यत्वेनोपलक्षितायामपूर्वव्यक्तौ शक्तिग्रहः गन्धवत्त्वेनो-पलक्षितायां पृथिवीत्वविशिष्टायां व्यक्तौ पृथिवीपदस्येव इत्य-त्राह तदलाभात् अपूर्वत्वविशिष्टापूर्वव्यक्त्यनुपस्थितेः गन्धवत्त्वे-नापि हि पृथिवीत्व विशिष्टस्य स्मरणमनुमानं वा सम्भवति प्रागनुभवात् प्रकृते तथात्वेऽपूर्वत्वव्याघातादित्यर्थः । ननु कर्म्म यागादि तद्धर्म्मः कार्य्यत्वं विधिरित्यत्राह न क्रियापीति अनिष्ट-साधनताधीकाले प्रवृत्त्यदर्शनात् । अत अपिना नापूर्वमपि उक्त दोषादित्यर्थः ॥११॥

ननु करणं शब्दः तद्धर्मोऽभिधा तज्ज्ञानं प्रवर्त्तकमतएवाहुः अभिधां भावनामाहुरन्यामेव लिङादयः । अर्थात्मभावनात्वन्या सर्वाख्यातस्य गोचरः । अभिधा यागप्रवृत्तिकार्य्यमिति धीः शब्दादाख्याताच्च उपादानादुत्पत्त्यनुकूलक्रियारूपेयमित्यत्राह ।

असत्त्वादप्रवृत्तेश्च नाभिधापि गरीयसी ।

बाधकस्य समानत्वात् परिशेषोऽपि दुर्लभः ॥१२॥

अभिधायां मानाभावात् अभिधाशब्दतोऽभिधाज्ञाने अप्रवृत्तेः गरीयसी उचिता लिङर्थतयेति शेषः । ननु अन्यस्य लिङर्थत्वे बाधात् परिशेषेणाभिधा लिङर्थइत्यत्राह बाधकस्येति प्रकृतेऽपि बाधकसम्भवात् ॥१२॥

ननु करणस्य यागादेर्धर्म्मो इष्टसाधनत्वं विध्यर्थोऽस्तु तत्राह ।

हेतुत्वादनुमानाच्च मध्यमादौ वियोगतः ।

अन्यत्र क्लृप्तसामर्थ्यान्निषेधानुपपत्तितः ॥१३॥

विध्यर्थस्य इष्टसाधनताया हेतुत्वात् लिङ्गतयोपन्यासात्। नच स्वस्य स्वलिङ्गत्वमिति अग्निकामो दारुणी मथ्नीयादित्युक्ते कुत इत्याकाङ्क्षायां वक्तारो वदन्ति यतो दारुद्वयमथनमग्निसाधन-मित्यर्थवादादिष्टसाधनताबोधानन्तरमपि विधेरनुमानात् यदि चानुमितेनापि विधिना इष्टसाधनत्वमेव बोध्यं तदा तदनुमान-वैयर्थ्यं तरति मृत्युं तरति ब्रह्महत्यामित्यादौ मृत्युब्रह्महत्या-सन्तरणकामोऽश्वमेधेन यजेतेति वाक्यानुमानस्य सर्वसम्मतत्वात् मध्यमादौ वियोगतः मध्यमोत्तमपुरुषलिङ इष्टसाधनतावियो-गात् कुर्याः कुर्यामित्यत्राज्ञादिकं प्रतीयते आज्ञाभिप्राय एव इति प्रथमपुरुषोऽपि इच्छार्थः अन्यत्र क्लृप्तसामर्थ्यात् अध्येषणार्थे लिङ इच्छावाचकत्वकल्पनात् निषेधानुपपत्तितः न कलञ्जं भक्षयेदित्यनिष्टसाधनत्वस्य निषेधस्य बाधितत्वात् बलवदनिष्टा-ननुबन्धित्वञ्च न विध्यर्थः श्येनेनाभिचरन् इत्यादौ असम्भवात् अप्रवर्त्तमानपुरुषस्य बलवद्द्वेष विषयत्वात् बलवद्द्वेषविषय-दुःखजनकत्वसामान्याभावस्य बाधितत्वादिति॥१३॥ स्वमतमाह।

विधिर्वक्तुरभिप्रायः प्रवृत्त्यादौ लिङादिभिः ।
अभिधेयोऽनुमेया तु कर्त्तुरिष्टाभ्युपायता ॥१४॥

प्रवृत्तिनिवृत्तिविषय आप्ताभिप्रायः लिङादिभिः प्रत्ययैरभि-धेयः इष्टसाधनता त्वनुमेया । वस्तुतस्तु ईश्वरेच्छायाः सर्वविष-यकत्वात् निषेधविरोधः बलवदनिष्टाननुबन्धित्वेनेच्छायाः घटकत्वे गौरवमिति प्राचीनमतमेव साधीयः ॥१४॥

श्रुतेरित्यस्य व्याख्यान्तरमाह ।

इत्थमेव च वेदोऽयं परमेश्वरगोचरः ।

स्वार्थद्वारैव तात्पर्य्यं तस्य स्वर्गादिवद्विधौ ॥१५॥

सर्वत्र वेदभागे ईश्वरः प्रतिपादितः यज्ञोवै विष्णुः पश्यत्यचक्षुरित्यादिश्रुतिषु एतस्याक्षरस्य प्रशासने गार्गि द्यावापृथिवी विधृते तिष्ठत इत्यादिषु न तु सिद्धतया अमीषामन्यत्र तात्पर्यं यथा स्वर्ग नरकादिबोधकानां तथा ईश्वरमुपासीतेति विधेरेकवाक्यतया तेषां तन्मतेऽपि प्रामाण्यमेव अन्यथा स्वर्गादिपदानामपि स्वार्थे प्रामाण्यं न स्यात् तदेतदुक्तं स्वार्थप्रतिपादनद्वारा एव विधौ सिद्धार्थतात्पर्य्यात् वाक्याद्वैदिकप्रशंसानिन्दावाक्यानि प्रशंसानिन्दाज्ञानपूर्वकाणि प्रशंसानिन्दावादवाक्यत्वात् परिणतिसुरसमाम्रफलमित्यादिवत् ॥१५॥

संख्याविशेषादित्यस्य व्याख्यान्तरमाह।

स्यामभूवं भविष्यामीत्यादौ संख्या प्रवक्तृगा।
समाख्यापि च शाखानां नाद्यप्रवचनादृते ॥१६॥

वैदिकोत्तमपुरुषेण स्वतन्त्रोच्चारयितुः संख्या वाच्या स ऐक्षत एकोऽहं बहु स्यामित्यादि बहुत्वम् उत्तमपुरुषश्रुतेः। संख्यापदार्थ मन्यमाह समाख्येत्यादि सर्वासां शाखानां हि काठककालापकाद्याः संख्याः संख्याविशेषाः श्रूयन्ते ते च नाध्ययनमात्रनिबन्धनाः अध्येतृणामानन्त्यात् अनादावन्यैरपि तदध्ययनात् तस्मादतीन्द्रियार्थदर्शी भगवानेव ईश्वरः कारुणिकः सर्गादावस्मदाद्यदृष्टाकृष्टकाठकादिशरीरविशेषमधिष्ठाय यां यां शाखामुक्तवान् तस्याः शाखायास्तन्नाम्ना व्यवदेश इति सिद्धमीश्वरमननं मोक्षहेतुः ॥१६॥ यस्येश्वरे न विश्वासस्तं प्रत्याह।

इत्येवं श्रुतिनीतिसंप्लवजलैर्भूयोभिराक्षालिते
येषां नास्पदमादधासि हृदये ते शैलसाराशयाः।

किन्तु प्रस्तुतविप्रतीपविधयोऽप्युच्चैर्भवच्चिन्तकाः
काले कारुणिकत्वयैव कृपयाते तारणीया नराः ॥१७॥

इतिशब्दः स्वरूपे एवं शब्दः प्रकारार्थः शैलसारः लोहम-तिकठिनशिला वा । प्रस्तुते ईश्वरे विप्रतीपविधयः प्रतिकूलकराः तादृशा अपि उच्चैरतिशयेन काले भवच्चिन्तकाः शङ्काकलङ्क-शून्याः कार्य्याः ॥१७॥

अस्माकन्तु निसर्गसुन्दर चिराच्चेतोनिमग्नं त्वयि
त्यक्तानन्दनिधौ तथापि तरलं नाद्यापि सन्तृप्यते ।
तन्नाथ त्वरितं विधेहि करुणां येन त्वदेकाग्रतां
याते चेतसि नाप्नुवाम शतशो याम्याः पुनर्यातनाः ॥१८॥

त्यक्ता तन्नं सन्तृप्यत इति कर्म्मकर्त्तरि ।

इत्येष नीतिकुसुमाञ्जलिरुज्ज्वलश्री
र्यद्वासयेदपि च दक्षिणवामकौ द्वौ ।
नो वा ततः किमपरेशगुरोर्गुरुस्तु
प्रीतोऽस्त्वनेन पदपीठसमर्पणेन ॥१९॥

इति पञ्चमःस्तवकः ।

नो वासयेत्ततः किमस्माकम् । इति श्रीहरिदासभट्टाचार्य्यविर-चितकुसुमाञ्जलिकारिकाव्याख्यानं समाप्तम् ।





॥ श्रीः ॥

॥ योगसूत्रम् ॥

श्रीमद्भगवत्पतञ्जलिप्रणीतम् ॥

महामहोपाध्यायश्रीमदनन्तदेवकृतकाशिकराजकीय-
प्रधानपाठालयपदवीपरीक्षोपयुक्तयोग-
चन्द्रिकाभिधव्याख्यया सहितम् ॥

तत्पाठालयाध्यक्षवरश्रीयुतठाकुररघुवीरसाहेब-
महाशयानुज्ञया तत्रत्याध्यापकेन

द्विवेदहरिनाथशर्मणा

पठनपाठनाद्युपयुक्तटिप्पण्या समलङ्कृत्य, संस्कृत्य

श्रीशिवचन्द्रसिंहेन

दानापुरस्थ सेन्ट्रलप्रेसनामके यन्त्रालये
मुद्रयित्वा प्रकाशितम् ।

संवत् १९४०

प्रथम बार १०००]   [मूल्य ।) आना

॥ श्रीः ॥

॥ योगसूत्रम् ॥

श्रीमद्भगवत्पतञ्जलिप्रणीतम् ॥

महामहोपाध्यायश्रीमदनन्तदेवकृतकाशिकराजकीय-
प्रधानपाठालयपदवीपरीक्षोपयुक्तयोग-
चन्द्रिकाभिधव्याख्यया सहितम् ॥

तत्पाठालयाध्यक्षवरश्रीयुतडाक्तरथिबोसाहेब-
महाशयानुज्ञया तत्रत्याध्यापकेन

द्विवेदहरिनाथशर्मणा

पठनपाठनाद्यत्युपयुक्तटिप्पण्या समलङ्कृत्य, संस्कृत्य

श्रीशिवचन्द्रसिंहेन
दानापुरस्थ सेन्ट्रलप्रेसनामके यन्त्रालये
मुद्रयित्वा प्रकाशितम् ।

संवत् १९४०

॥ श्रीः ॥

सचन्द्रिकयोगसूत्रस्य

प्रथमः पादः ॥

अथ योगानुशासनम् ॥ १ ॥ योगश्चित्तवृत्तिनिरोधः ॥ २ ॥ [1]तदा द्रष्टुः स्वरूपेऽवस्थानम् ॥ ३ ॥ वृत्तिसारूप्यमितरत्र ॥ ४ ॥ वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः ॥ ५ ॥

गुरुं प्रणम्य सूत्रार्थचन्द्रिका क्रियते मया ।
अनन्तेनेश्वरप्रीत्यै सच्चिदानन्दरूपिणम् ॥ १ ॥

अथ शब्दोऽधिकारवाची योगो नाम समाधानम् । अनुशिष्यते व्याख्यायते येन तत् ॥ १ ॥ सत्त्वपरिणामरूपस्य चित्तस्य या वृत्तयस्तासां निरोधो बहिर्मुखताविच्छेदादन्तर्मुखतया स्वकारणे लयः ॥ २ ॥ तस्मिन्समाधिनिरोधकाले द्रष्टुः पुरुषस्य स्वरूपे चिन्मात्रे अवस्थानं स्थितिर्भवति ॥ ३ ॥ इतरत्र योगादन्यस्मिन् काले वक्ष्यमाणलक्षणवृत्तिभिः सारूप्यं तद्रूपत्वम् ॥ ४ ॥ चित्तस्य परिणामविशेषाः पञ्चमिताः क्लेशैराक्रान्ताः, तद्भिन्नाः ॥ ५ ॥

---

१ चित्तपदं व्याचष्टे । तदेति सूत्रद्वयेन । ततश्च यस्मिन्नेकाग्रतया परिणते स्वरूपे प्रतिष्ठितो भवति यस्मिंश्च विषयाकारतया परिणते तदाकार इव भवति पुरुषो यथा चलत्सु जलतरङ्गेषु चलश्चन्द्रस्तच्चित्तमिति सूत्रद्वयस्य पर्यवसितोऽर्थः ॥

प्रमाणविपर्ययविकल्पनिद्रास्मृतयः ॥ ६ ॥ प्रत्यक्षानुमानागमाः प्रमाणानि ॥ ७ ॥ विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् ॥ ८ ॥ शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ॥ ९ ॥ अभावप्रत्ययालम्बना वृत्तिर्निद्रा ॥ १० ॥ अनुभूतविषयासंप्रमोषः स्मृतिः ॥ ११ ॥ [1] अभ्यासवैराग्याभ्यां तन्निरोधः ॥ १२ ॥

एताः पञ्च वृत्तयः तासां व्याख्या सूत्राणि ॥ ६ ॥ [2] बाह्यवस्तूनि इन्द्रियद्वारेण चित्तस्योपरागादर्थस्य विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षम् । अनुमानं नाम गृहीतसंबन्धाद्धेतोः पक्षे साध्यस्य सामान्यात्मना निश्चयः । आप्तस्य ईश्वरस्य वाक्यं वेदः ॥ ७ ॥ अतथाभूतेऽर्थे तथोत्पद्यमानं ज्ञानं विपर्ययः संशयोऽपि अतद्रूपप्रतिष्ठत्वान्मिथ्याज्ञानम् ॥ ८ ॥ शब्दजज्ञानानुपतनशीलः वस्तुनस्तथात्वमनपेक्षमाणो निश्चयो विकल्पः ॥ ९ ॥ अभावप्रत्यय आलम्बनं यस्या वृत्तेः सा निद्रा ॥ १० ॥ अनुभूतस्य विषयस्य योऽयमसंप्रमोषः संस्कारद्वारेण बुद्धावारोहः सा स्मृतिः ॥ ११ ॥ वक्ष्यमाणलक्षणाभ्यामभ्यासवैराग्याभ्यां चित्तवृत्तीनां यत्प्रतिहननं स निरोधः ॥ १२ ॥

---

१ सप्तभिः सूत्रैः सलक्षणवृत्तिभेदादिनिरूपणेन वृत्तिपदं व्याख्याय सोपायं निरोधपदार्थमाह । अभ्यासेति पञ्चभिः ॥

२ स्पष्टत्वात्सूत्रमव्याख्यायापि प्रसिद्धत्वात्सूत्रकारेणावशिष्टमपि प्रत्यक्षादिलक्षणं मन्दबुद्धिज्ञानसौकर्यार्थं पूरयति । बाह्येति । प्रमाणसामान्यलक्षणं तु अविसंवादि विज्ञानं प्रमाणमिति ॥

तत्र स्थितौ यत्नोऽभ्यासः ॥ १३ ॥ स तु दीर्घकालनैरन्तर्य्य-सत्कारसेवितो दृढभूमिः ॥ १४ ॥ दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् ॥ १५ ॥ तत् परं पुरुषख्यातेर्गुणवैतृष्ण्यम् ॥ १६ ॥ [1] वितर्कविचारानन्दास्मितानुग [2] मात्संप्रज्ञातः ॥ १७ ॥

वृत्तिरहितस्य चित्तस्य स्वरूपनिष्ठः परिणामः स्थितिः, तस्यां यत्न उत्साहः पुनःपुनस्तथात्वेन चेतसि निवेशनमभ्यासः ॥ १३ ॥ बहुकालं नैरन्तर्येणादरातिशयेन च सेव्यमानो दृढभूमिः स्थिरो भवति ॥ १४ ॥ इहैवोपलभ्यमानः शब्दादिर्देवलोकादावानुश्रविकः, तयोः परिणामविषयत्वदर्शनाद्विगतेच्छस्य वशीकारसञ्ज्ञा वैराग्यमुच्यते ॥ १५ ॥ गुणवैतृष्ण्यरूपमुत्कृष्टं वैराग्यं[3] पुरुषविवेकख्याते [4] र्भवति ॥ १६ ॥ वितर्कादिचतुष्टयभेदेन [5]सम्यक् प्रकर्षेण ज्ञायते भाव्यस्य रूपं येन सः [6] ॥ १७ ॥

---

१ समाधिं विभजते । वितर्केति द्वाभ्याम् । तत्र सवितर्कसविचारसानन्दसास्मितभेदेन संप्रज्ञातसमाधिश्चतुर्विध इति प्रथमस्य स्पष्टोऽर्थः ॥

२ रूपानुग । पा० २ ॥

३ एतदेव निरोध पदेन समाधिपदेन वा व्यवह्रियते ॥

४ गुणेभ्यः पुरुषस्य यो विवेकस्तस्य ख्यातेरुत्पादादित्यर्थः ॥

५ संप्रज्ञातशब्दस्यावयवार्थमाह । सम्यगिति ॥

६ चतुर्विध इति शेषः ॥

विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः [1] ॥ १८ ॥ [2] भवप्रत्ययो विदेहप्रकृतिलयानाम् ॥ १९ ॥ श्रद्धावीर्य्यस्मृतिसमाधिप्रज्ञापूर्व्वक इतरेषाम् ॥ २० ॥ तीव्रसंवेगानामासन्नः ॥ २१ ॥ मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः ॥ २२ ॥

विरम्यतेऽनेन स चासौ प्रत्ययश्च तस्याभ्यासः पुनःपुनश्चेतसि निवेशनं तत्पूर्वं यस्य तादृशः संस्कारशेषः असंप्रज्ञात इत्यर्थः। तत्र या का चिद्वृत्तिरुल्लसति तस्या नेतिनेतीतिश्रुत्या निरासः कार्यः। तत्र व्युत्थानाद्याः संस्काराः समाधिप्रारम्भाद्यैः संस्कारैर्हन्यन्ते ॥ १८ ॥ विदेहप्रकृतिलयानां वितर्कादीनां समाधिः भवप्रत्ययः संसार एव कारणं यस्य [3] ॥ १९ ॥ अन्येषां श्रद्धादिपूर्वकः, चेतसः प्रसाद उत्साहः स्मृतिरेकाग्रता प्रविवेकः एतत्पूर्वको भवति। सविकल्पसमाधेरभ्यासाद्गुणवैतृष्ण्यरूपाद्वैराग्यादसंप्रज्ञातः ॥ २० ॥ संस्कारस्तीव्रो येषां तेषां समाधिलाभः शीघ्रं भवति ॥ २१ ॥ मृद्वादिसंवेगभेदाद्योगिनोऽपि भिन्नाः [4] तेषां समाधिलाभो दीर्घकालादिभेदेन भवतीत्यर्थः ॥ २२ ॥

१ विशेषोऽन्यः। पा० २॥

२ संक्षेपत उक्तमपि कृत्स्नमर्थं विस्तरेणोपपादयितुमारभते। भवेत्यादिना ग्रन्थेन। तत्राधिकारिभेदेन भिद्यात् समाधिलाभोपायांस्तावद्विशदयति पञ्चभिः॥

३ विदेहानां प्रकृतिलयानां च समाधिलाभो जन्मनैव कारणान्तरनिरपेक्ष इति स्पष्टोऽर्थः॥

४ मृदूपाया मृदुसंवेगा मध्यसंवेगास्तीव्रसंवेगाश्च। एवं मध्योपाया अधिमात्रोपायाश्चेति नवेत्यर्थः॥

ईश्वरप्रणिधानाद्वा ॥ २३ ॥ क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ॥ २४ ॥ तत्र निरतिशयं सर्वज्ञबीजम्[1] ॥ २५ ॥ स एष पूर्वेषामपि[2] गुरुः कालेनानवच्छेदात् ॥ २६ ॥ तस्य वाचकः प्रणवः ॥ २७ ॥ तज्जपस्तदर्थभावनम् ॥ २८ ॥

सुगमोपायोऽयं भक्तिविशेषः ईश्वरे सर्वक्रियाणामर्पणं वा ॥ २३ ॥ अविद्यादयः क्लेशाः, कर्माणि जात्यायुर्भोगाः, आफलविपाकात् चित्ते शेरत इत्याशया वासनास्ताभिर्न संस्पृष्टः अन्येभ्यः पुरुषेभ्यो विशिष्टः, ईशनशीलः ॥ २४ ॥ तस्मिन्भगवति सर्वज्ञत्वस्य यद्बीजं सर्वस्य मूलत्वाद्बीजमिव बीजं तत्र निरतिशयं काष्ठां प्राप्तम्[3] ॥ २५ ॥ स ब्रह्मादीनामपि गुरुरुपदेष्टा[4] यतः स कालेन नावच्छिद्यते अनादित्वात्, तेषां पुनरादिमत्त्वादस्ति कालेनावच्छेदः ॥ २६ ॥ सुगमोपायमाह। ईश्वराभिधायक ओंकारः ॥ २७ ॥ तस्य प्रणवस्य जपः प्रणववाच्यस्य ईश्वरस्य भावनं पुनःपुनश्चेतसि निवेशनमेकाग्रताया उपायः ५ ॥ २८ ॥

१ सर्वज्ञत्वबीजम् । पा० २ ॥

२ स सर्वेषामपि । पा० २ ॥

३ तथा च ज्ञानादयश्चित्तधर्मास्तारतम्येन परिदृश्यमाना यत्र निरतिशयपरत्वमासीदन्ति स ईश्वर इति तत्र प्रमाणं दर्शितम् ॥

४ एतेनेश्वरस्य प्रभावः प्रदर्शितः ॥

५ एतेनेश्वरोपासनं प्रदर्शितम् ॥

ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च ॥ २९ ॥ व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः ॥ ३० ॥ दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः ॥ ३१ ॥ [1] तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः ॥ ३२ ॥

तस्माज्जपात्तदर्थभावनाच्च विषयप्रातिकूल्येन अञ्चति याद्दक् शक्तिस्तस्या अधिगमो ज्ञानं भवति वक्ष्यमाणान्तरायशक्तिप्रतिबन्धश्च भवतीत्यर्थः [2] ॥ २९ ॥ व्याधिर्ज्वरादिः, स्त्यानमकर्मण्यता, उभयकोट्यालम्बनं विज्ञानं संशयः, प्रमादोऽनवधानता, आलस्यं कायचित्तयोर्गुरुत्वम्, अविरतिर्विषयासक्तिः, भ्रान्तिदर्शनं विपर्ययज्ञानम्, अलब्धभूमिकत्वं समाधिभूमेरलाभः, अनवस्थितत्वं चित्तस्य समाधावप्रतिष्ठा, एते नव विघ्नानीत्युच्यन्ते ॥ ३० ॥ तत्र दुःखं चित्तस्य राजसः परिणामो बाधनलक्षणः, दौर्मनस्यं करणैः सह मनसो दौःस्थ्यम्, अङ्गमेजयत्वं सर्वाङ्गवेपथुः, प्राणो यत्र बाह्यवायुमाचामति स श्वासः, यत्कोष्ठ्यं वायुं निश्वसिति स प्रश्वासः, एते विक्षेपैः सह भवन्तीति अभ्यासवैराग्याभ्यां निरोद्धव्याः ॥ ३१ ॥ तेषां विक्षेपाणां निषेधार्थं कस्मिंश्चिदभिमते तत्त्वे अभ्यासः ॥ ३२ ॥

१ सोपद्रवविक्षेपनिराकरणस्योपायान्तरमाह । तदिति ॥
२ एतेनेश्वरोपासनायाः फलं प्रदर्शितम् ॥

[1] मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम् ॥ ३३ ॥ प्रच्छर्दनविधारणाभ्यां वा प्राणस्य ॥ ३४ ॥ [2] विषयवती वा प्रवृत्तिरुत्पन्ना स्थितिनिबन्धिनी ॥ ३५ ॥

मैत्रीं सौहार्दं सुखितेषु, करुणां कृपां दुःखितेषु, मुदितां हर्षं पुण्यवत्सु, उपेक्षाम् औदासीन्यमपुण्यवत्सु भावयेत्, एवं मैत्र्यादिपरिकर्मणा चित्तं प्रसीदति रागद्वेषनिरासे सुखेन समाधेः प्रादुर्भावो भवत्यैकाग्रता च ॥ ३३ ॥ प्रच्छर्दनं नाम यत्नौद्यस्य वायोः प्रयत्नविशेषाद्बहिर्निःसारणं विधारणं मात्राप्रमाणेन प्राणस्यायामो गतिविच्छेदः ॥ ३४ ॥ विषया दिव्यगन्धाद्या विद्यन्ते फलत्वेन यस्यां सा संविन्मनसः स्थैर्यं करोतीत्यर्थः ॥ ३५ ॥

1 इदानीं चित्तस्य समाधियोग्यतासंपत्तिलक्षणसंस्कारोपयोगीनि बाह्यानि परिकर्माणि निरूपयति । मैत्रीत्यादिसूत्रैः । तत्र रागद्वेषयोरेव प्राधान्येन चित्तविक्षेपहेतुतया तयोः समूलमुन्मूलने प्रशान्तमनसो भविष्यत्येव चित्तस्यैकाग्रतेति प्रथमस्य भावः । द्वितीयस्य तु सर्वासामिन्द्रियवृत्तीनां प्राणवृत्त्यधीनत्वात्तन्निग्रहमभ्यस्यतः सुकर एवेन्द्रियवृत्तिनिग्रह इति । यद्वा दुष्टेन्द्रियवृत्तीनां पापप्रयोज्यतया पापनाशं प्रति सकलागमसिद्धहेतुभावेन तेन कारणविघटनद्वारैव सूपपादः कार्यानुत्पाद इति तात्पर्यम् ॥

2 उपायप्रदर्शनमुखेनोपेयस्य संप्रज्ञातसमाधेर्भूमिकामपि प्रदर्शयति । विषयेति द्वाभ्याम् । एते च रागद्वेषादिविलयादनुत्तरकालोत्पत्तिके वेदितव्ये । मनसः स्थितिनिबन्धिनीतिपाठो भाष्यसम्मतोऽपि भोजराजकृतवृत्त्यसम्मतः ॥

विशोका वा ज्योतिष्मती ॥ ३६ ॥ [1] वीतरागविषयं वा चित्तम् ॥ ३७ ॥ स्वप्ननिद्राज्ञानालम्बनं वा ॥ ३८ ॥ यथाभिमतध्यानाद्वा [2] ॥ ३९ ॥ परमाणुपरममहत्त्वान्तोऽस्य वशीकारः ॥ ४० ॥

ज्योतिःशब्देन सात्त्विकः प्रकाश उच्यते सोऽतिशयवान् यस्यां सा ज्योतिष्मती प्रवृत्तिरुत्पन्ना विशोका विगतशोका सुखमयसत्त्वाभ्यासवशाच्चेतःस्थितिकर्त्री ॥ ३६ ॥ परित्यक्तविषयाभिलाषं चित्तं मनसः स्थितिनिबन्धनं भवतीति ॥ ३७ ॥ प्रत्यस्तमितबाह्यवृत्तेर्मनोमात्रेणैव यत्र भोक्तृत्वमात्मनः स स्वप्नः । निद्रा तदालम्बनं ज्ञानं चेतसः स्थितिहेतुः ॥ ३८ ॥ यथाभिमतवस्तुनि बाह्ये आभ्यन्तरे नाडीचक्रादौ वा भाव्यमाने चेतसः स्थितिहेतुर्भवति ॥ ३९ ॥ एभिश्चित्तस्थैर्यं भावयतो योगिनः सूक्ष्मभावनद्वारेण परमाण्वन्तो वशीकारः परमाणुपर्यन्ते सूक्ष्मे आकाशादिस्थूले चेतसोऽप्रतिघातो भवति [3] ॥ ४० ॥

१ उपायप्रदर्शनद्वारेणैव संप्रज्ञातसमाधिविषयमुपक्षिपति । वीतेति द्वाभ्याम् ॥ स्वप्ननिद्रालम्बनं वेतिपाठो भाष्यासम्मतोऽपि भोजराजकृतवृत्तिसम्मतः कस्मिंश्चित्पुस्तक उपलभ्यते । चन्द्रिकापि तदनुसारेण सुयोजेति बोध्यम् ॥

२ अयंभावः प्रथममेव विविधविषयव्याप्तचेतस ईश्वरप्रणिधानाद्यसंभवेन यथाभिमते वस्तुन्येव चेतसः स्थैर्याभ्यासः संभवति अभ्यस्तचित्तस्थैर्येण च सुकर एवेश्वरप्रणिधानादिर्न पुनरसद्विषयानुध्यानस्य समाधिलाभोपायत्वमिति ॥

३ एतेन फलं प्रदर्शितम् ॥

क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु[1] तत्स्थतदञ्जनतासमापत्तिः ॥ ४१ ॥ [2] शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का समापत्तिः ॥ ४२ ॥ स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का ॥ ४३ ॥

क्षीणा वृत्तयो यस्य तस्य चेतसः स्फटिकमणेरिव ग्रहीतृग्रहणग्राह्येषु तत्स्थं तदेकाग्रता, तदञ्जनता तन्मयत्वं तद्रूपपरिणामो भवतीत्यर्थः ॥ ४१ ॥ शब्दः, अर्थो जात्यादिः, ज्ञानं बुद्धिवृत्तिः, विकल्पः एते यस्यां भासन्ते सा सवितर्का ॥ ४२ ॥ शब्दार्थस्मृतिप्रविलये स्पष्टग्राह्याकारप्रतिभासतया स्वरूपशून्या इव निर्वितर्का समापत्तिः ॥ ४३ ॥

---

१ अस्मितेन्द्रियविषयेषु। भूमिकाक्रमेण तु ग्राह्यग्रहणग्रहीतृष्विति बोद्धव्यम्, यतः प्रथमं ग्राह्यनिष्ठस्ततो ग्रहणनिष्ठस्ततोऽस्मितामात्ररूपो ग्रहीतृनिष्ठः समाधिरिति ॥

२ पूर्वं सम्प्रज्ञातासंप्रज्ञातभेदेन समाधेर्द्वैविध्यं सवितर्कादिभेदेन च संप्रज्ञातसमाधिचातुर्विध्यं प्रत्यपादि, इदानीन्तु तमेव समाधिं समापत्तिपदेन, तद्भेदौ च सबीजनिर्बीजपदाभ्यां, संप्रज्ञातसमाधिभेदांश्चतुरः सवितर्कनिर्वितर्कसविचारनिर्विचारपदैश्च व्यवहरन्नुपसंहरंश्च समाधिपादं, तल्लक्षणं फलं विषयं च प्रदर्शयितुमुपक्रमते। क्षीणेत्यादिना पादान्तेन ग्रन्थेन। ततश्च सानन्दसास्मितयोरेव पूर्वोक्तयोः समाध्योर्निर्वितर्कनिर्विचारपदाभ्यां क्रमेण व्यवहार इति स्पष्टं भवति ॥

एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता[१] ॥४४॥ सूक्ष्मविषयत्वं चालिङ्गपर्यवस्थानम् ॥ ४५ ॥ [२] ता एव सबीजः समाधिः ॥ ४६ ॥ [३] निर्विचारवैशारद्ये अध्यात्मप्रसादः ॥ ४७ ॥ [४] ऋतम्भरा तत्र प्रज्ञा ॥ ४८ ॥

एतयैव सवितर्कया निर्वितर्कया, सविचारा निर्विचारा च व्याख्याता, सूक्ष्मतन्मात्रेन्द्रियादिर्विषयो यस्याः सा, पूर्वा स्थूलविषया ॥ ४४ ॥ सविचारनिर्विचारयोः समापत्त्योर्यत्सूक्ष्मविषयत्वं तदलिङ्गपर्यवसानं, न क्वचिल्लीयते न वा किं चिल्लिङ्गति गमयतीत्यलिङ्गं प्रधानं तत्पर्यन्तं सूक्ष्मविषयत्वम् ॥ ४५ ॥ ता एवोक्तलक्षणाः समापत्तयः सह बीजेनावलम्बनेन वर्त्तन्त इति सबीजः संप्रज्ञातसमाधिरुच्यत इत्यर्थः सर्वासां सालम्बनत्वात् ॥ ४६ ॥ निर्विचारायाः प्रकृष्टाभ्यासवशाद्वैशारद्ये नैर्मल्ये सति अध्यात्मप्रसादः समुपजायते, चित्तस्यैतदेव वैशारद्यं कियत् स्थितौ दार्ढ्यम् ॥ ४७ ॥ ऋतं सत्यं बिभर्त्ति कदाचिदपि न विपर्ययेणाच्छाद्यते सा ऋतम्भरा तस्मिन्सति भवति, तस्माच्च प्रज्ञालोकात्सर्वं यथावत्पश्यन्योगी प्रकृष्टं योगं प्राप्नोति ॥ ४८ ॥

१ एतत्तुल्यन्यायेनैव सविचारा निर्विचारा च बोद्धव्ये त्यर्थौ नत्वेतद्रूपैव सेति तात्पर्य्यम् ॥

२ उक्तानां समापत्तीनां प्रकृते प्रयोजनमाह । ता एवेति ॥

३ अन्यासां समापत्तीनां निर्विचारसमापत्तिफलकत्वान्निर्विचारायाः फलमाह । निर्विचारेति ॥

४ चित्तवैशारद्यस्य फलमाह । ऋतम्भरेति ॥

[1] श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात् ॥ ४९ ॥ [2] तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी ॥ ५० ॥ [3] तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः ॥ ५१ ॥

॥ इति पतञ्जलि सूत्रे योगशास्त्रे प्रथमः पादः ॥

श्रौतमागमज्ञानम्, अनुमानमुक्तलक्षणं ताभ्यां या जायते प्रज्ञा सा सामान्यविषया, इयं निर्विचारवैशारद्यसमुपेता ताभ्यां विलक्षणा विशेषविषयत्वात्, अस्यां हि सूक्ष्मव्यवहितविप्रकृष्टा विषयाः स्फुटं भासन्ते अतस्तस्यां यत्नो विधेयः ॥ ४९ ॥ तया प्रज्ञया जनितो यः संस्कारः सोऽन्यान् व्युत्थानजान् समाधिजांश्च संस्कारान् प्रतिबध्नाति ॥ ५० ॥ तस्यापि निरोधे तस्य संप्रज्ञातस्य निरोधे प्रविलये सति सर्वासां चित्तवृत्तीनां स्वकारणे प्रविलयाद्या संस्कारमात्रादृत्तिरुदेति तस्यां नेतिनेतीति पर्युदसनान्निर्बीजः समाधिराविर्भवति यस्मिन्सति पुरुषः शुद्धो भवति ॥ ५१ ॥

॥ इति योगचन्द्रिकायां प्रथमः पादः ॥

१ श्रौतानुमानप्रज्ञाभ्याम् उक्तप्रज्ञायां वैलक्षण्यमाविष्करोति। श्रुतेति ॥
२ उक्तपदोक्तप्रज्ञायाः फलमाह। तज्ज इति ॥
३ इदानीं मुख्यमसंप्रज्ञातसमाधिमाह। तस्यापीति ॥

तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः ॥ १ ॥ [1] समाधिभावनार्थः क्लेशतनूकरणार्थश्च ॥ २ ॥ अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः [2] ॥ ३ ॥ [3] अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम् ॥ ४ ॥

समाहितचित्तस्य योगमभिधाय व्युत्थितचित्तस्य योगः कथं सिद्ध्यतीति तत्साधनप्रतिपादनाय क्रियायोगमाह । तपः कृच्छ्रादि, स्वाध्याय ॐकारपूर्वकमन्त्राणां जप; सर्वक्रियाणां समर्पणमेतानि क्रियायोगः ॥१॥ उक्तलक्षणसमाधिभावनार्थो वक्ष्यमाणक्लेशशिथिलीकरणार्थश्च ॥ २ ॥ वक्ष्यमाणलक्षणा अविद्यादयस्तापं जनयन्तः क्लेशशब्दवाच्या भवन्ति ॥ ३ ॥ अविद्या अनात्मन्यात्माभिमानः सा क्षेत्रं प्रसवभूमिरुत्तरेषामस्मितादीनां प्रत्येकं सुप्तादिभेदेन चतुर्विधानां, तत्र ये क्लेशाश्चित्तभूमौ स्थिताः प्रबोधाभावे स्वकार्यं नारभन्ते ते प्रसुप्ताः, तनवः सूक्ष्माः [4], विच्छिन्नाः परस्परमितरोत्कर्षे उच्छिन्नाः [5], ये स्वं स्वं कार्यमभिनिर्वर्तयन्ति ते उदारास्तेषाम् ॥ ४ ॥

१ उक्तक्रियायोगस्य फलमाह । समाधीति ॥
२ पञ्च क्लेशा इति भाष्यसंमतः पाठः ॥
३ चतुर्णामितरेषामविद्यामूलकत्वं प्रत्येकं चतुर्विधत्वं च स्पष्टयत्यविद्येति ॥
४ स्वप्रतिपक्षभावनया शिथिलीकृतकार्यसंपादनशक्तयः ॥
५ बलवता क्लेशेनाभिभूतशक्तयः ॥

अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या॥५॥ दृग्दर्शनशक्त्योरेकात्मतेवास्मिता[1] ॥६॥ सुखानुशयी[2] रागः॥७॥ दुःखानुशयी द्वेषः ॥८॥ स्वरसवाही विदुषोऽपि तन्वनुबन्धोऽस्मि[3] निवेशः ॥९॥

अतस्मिंस्तदिति प्रतिभासोऽविद्येत्यविद्यालक्षणम्, घटकायदुःखशरीरेषु नित्यशुचिसुखात्मत्वाभिमानः अविद्या ॥५॥ दृक्शक्तिः पुरुषो दर्शनशक्तिरन्तःकरणस्य सात्त्विकः परिणामस्तयोर्भोक्तृभोग्यत्वेन भिन्नत्वेऽपि एकताभिमानोऽस्मिता ॥६॥ सुखमनुशेत इति सुखानुशयी रागः सुखसाधने गर्द्धः सोऽयं रागलक्षणः क्लेशः ॥७॥ उक्तलक्षणदुःखाभिज्ञस्यानुस्मृतिपूर्वकं तत्साधनेष्वनभिलाषिता निन्दात्मको द्वेषलक्षणः क्लेशः॥८॥ पूर्वजन्मानुभूतवासनाबलाज्जायमानो मरणदुःखानुभवः शरीरादिभिर्मम वियोगो माभूदिति सर्वेषामभिनिवेशः ॥९॥

---

१ वस्तुतः कर्त्तत्वाद्यभाववति कर्त्तृत्वादिप्रकारको विपर्ययविशेषोऽविद्येति तात्पर्यार्थः। अस्मितादीनां क्लेशसाधनत्वात् क्लेशशब्दवाच्यता, अविद्यायास्तु एतत्सर्वकारणत्वात् ॥

२ सुखानुस्मरणपूर्वकः। गर्द्ध इति चाभिप्यते। गर्द्धस्याविशेषात्सुखविषयकस्तत्साधनविषयको वा स एव राग इति फलितार्थः। एवमुत्तरसूत्रस्थःप्यनभिलाष इत्याद्याभिप्रायार्थोऽवगन्तव्यः ॥

३ विदुषोऽपि तथा रूढोऽभीति भाष्यवाचस्पत्यसंमतः पाठः ॥

[1] ते प्रतिप्रसवहेयाः सूक्ष्माः ॥१०॥ ध्यानहेयास्तद्वृत्तयः[2] ॥११॥ [3] क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः ॥ १२ ॥ सति मूले तद्विपाको जात्यायुर्भोगाः [4] ॥ १३ ॥

ते सूक्ष्माः क्लेशाः प्रतिलोमपरिणामेन हेयास्त्यक्तव्याः ॥ १० ॥ तेषां वृत्तयः सुखाद्यात्मा ध्यानेन चित्तैकाग्र्येण हेयाः ॥ ११ ॥ अविद्यादिक्लेशमूला वासना अस्मिन् जन्मनि अनुभवनीया जन्मान्तरे वा ॥ १२ ॥ अविद्यादौ सति कर्मणां विपाकः फलं जात्यायुर्भोगाः, ब्राह्मणत्वादिर्जातिः, चिरकालं कायसंबन्ध आयुः, भोगा विषयाः ॥ १३ ॥

१ सर्वेषामुक्तक्लेशानां द्वैविध्यं प्रहाणोपायद्वयं च व्यवस्थितमाह। ते इति द्वाभ्याम्। सूक्ष्मा इत्यस्य वासनारूपतयाऽवस्थिता इत्यर्थः॥

२ तेषामारब्धकार्याणां क्लेशानां स्थूलानामिति यावत् सुखदुःखमोहात्मिका वृत्तय इत्यर्थः। आभ्यां सूत्राभ्यां स्थूलक्लेशानां स्वल्पायासपरिहार्यत्वं सूक्ष्माणां च महायासपरिहार्यत्वं फलितम्॥

३ क्लेशानां स्वरूपादिकमुक्त्वा कर्माशयस्य तत्प्रदर्शयितुमाह। क्लेशेति। तत्र कर्माशय इति स्वरूपं प्रदर्शितं कर्मणां वासनात्मकत्वात्। क्लेशमूल इत्यनेन तु कारणं दर्शितं सर्वेषां कर्मणामविद्यादिमूलकत्वात्। दृष्टादृष्टेत्यनेन तु फलं प्रदर्शितमिति विवेकः॥

४ सञ्चितकर्मवासना विपाकं प्राप्य जात्याद्यात्मकं स्वीयं कार्यं जनयन्तीति तात्पर्यार्थः॥

१ ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात् ॥ १४ ॥ परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः ॥ १५ ॥ हेयं दुःखमनागतम् २ ॥ १६ ॥

ते पूर्वोक्ताः पुण्यापुण्यहेतुत्वात् ह्लादपरितापौ सुखदुःखे तत्फला भवन्ति । एतच्च सर्वसाधारणम् ॥ १४ ॥ योगिनस्तु ज्ञातक्लेशादिविवेकस्य सकलमेव भोगसाधनं परिणामतापसंस्कारदुःखैः सविषान्नवदादावन्ते मध्ये भोगकालेऽपि प्रतिकूलवेदनीयमेव ॥ १५ ॥ भूतस्य व्यतिक्रान्तत्वादनुभूयमानस्य च त्यक्तुमशक्यत्वादनागतमेव संसारदुःखं हातव्यम् ॥ १६ ॥

१ तेषां जात्यादीनां पुण्यकर्मवासनापरिपाकजन्मनां ह्लादजनकत्वं पापकर्मवासनापरिपाकजन्मनां तु परितापजनकत्वं, परं विवेकिनामैकान्तिकात्यन्तिकदुःखनिवृत्तिमीहमानानां सत्कर्मवासनापरिपाकोत्पन्नजात्यादयोऽपि परितापफला एव न ह्लादफला इति स्पष्टयति । त इति द्वाभ्याम् । ततोत्तरसूत्रे परिणामदुःखेन तापदुःखेन संस्कारदुःखेन गुणवृत्तिविरोधाच्च सर्वमेव दुःखमित्यन्वयः । परिणामदुःखमुपभुज्यमानविषयसजातीयाभिलष्यमाणविषयाऽप्राप्तिदुःखम् । तापदुःखमुपभुज्यमानसुखसाधनपरिपन्थिविषयकद्वेषदुःखम् । संस्कारदुःखं विषयसंनिधानजनितसुखादिजन्यानवस्थितसंस्कारसंवेद्यं दुःखम् । गुणवृत्तिविरोधः सत्त्वरजस्तमसां सुखदुःखमोहात्मिका या वृत्तयस्तासां परस्परमभिभाव्याभिभावकभावः । इदमत्र तात्पर्यं सत्कर्मवासनापरिपाकफलसुखानुभवकालेऽपि पूर्वोक्तदुःखानामनुच्छेदात्तान्यपि दुःखसंस्पृष्टतया दुःखान्येवेति ॥

२ अनागतदुःखहानिस्तु दुःखस्य सामग्रीविघटनद्वारा प्रागभावपरिरक्षणम् ॥

द्रष्टृदृश्ययोः संयोगो हेयहेतुः ॥ १७ ॥ प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम् ॥ १८ ॥ [1] विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि ॥ १९ ॥ [2] द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः ॥ २० ॥

द्रष्टा चिद्रूपः पुरुषो दृश्यं बुद्धितत्त्वम्, तयोर्विवेकाख्यातिपूर्वको योऽसौ संयोगो भोक्तृभोग्यत्वेन सन्निधानं स हेयस्य दुःखस्य संसारस्य हेतुः कारणम् ॥ १७ ॥ दृश्यस्य स्वरूपं कार्यं प्रयोजनं चाह। प्रकाशेति। प्रकाशः सत्त्वरूपः, क्रिया प्रवृत्तिरूपा रजः, स्थितिर्नियमरूपा तमः, एतद्रूपम्। भूतानीन्द्रियाणि आत्मा स्वरूपं यस्य कार्यमुक्तम् ॥ भोगोऽपवर्गः संसारनिवृत्तिस्तावर्थः प्रयोजनं यस्य दृश्यस्य ॥ १८ ॥ गुणानां पर्वाणि अवस्थाविशेषाश्चत्वारो ज्ञातव्याः, विशेषा भूतेन्द्रियाणि, अविशेषास्तन्मात्रान्तःकरणं, लिङ्गमात्रं बुद्धिः, अलिङ्गमव्यक्तम्, अव्यक्तस्य सर्वत्रान्वयित्वेन ज्ञानादवश्यं ज्ञातव्यानि ॥ १९ ॥ द्रष्टृस्वरूपमाह। द्रष्टा पुरुषो दृशिस्वरूपश्चेतनामात्रस्वरूपः स शुद्धोऽपि प्रत्ययानुपश्यः, प्रत्यया विषयोपरक्तज्ञानानि तानि अनुपश्यतीति, अव्यवधानेन सन्निधानमात्रेण बुद्धावुपरागे सति पुरुषस्य द्रष्टृत्वमिति ॥ २० ॥

१ दृश्यपरिणामरूपाणां तदवस्थानामज्ञातानां हातुमशक्यत्वात्प्रथमन्तद्धानाय तदवस्थास्तत्त्वतो बोधयति। विशेषेति। गुणेत्यस्य सत्त्वरजस्तमसामवस्था इत्यर्थः ॥

२ हेयं निरूप्योपादेयं निरूपयति। द्रष्टेति ॥

तदर्थ एव दृश्यस्यात्मा ॥ २१ ॥ [1] कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात् ॥ २२ ॥ [2] स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः ॥ २३ ॥ [3] तस्य हेतुरविद्या ॥ २४ ॥ [4] तदभावात्संयोगाभावो हानं तद्दृशेः कैवल्यम् ॥ २५ ॥

उक्तलक्षणस्य दृश्यस्यात्मा स्वरूपं तदर्थः पुरुषभोक्तृत्वसम्पादनमेव प्रयोजनमस्य ॥ २१ ॥ यद्यपि विवेकख्यातिपर्यन्ताद्भोगसंपादनात्कमपि कृतार्थं पुरुषं प्रति तन्नष्टं, तथापि सर्वपुरुषसाधारणत्वादन्यान्प्रत्यनष्टव्यापारमवतिष्ठते, अतस्तदविनाशित्वेकमुक्तौ न सर्वमुक्तिप्रसङ्गः॥२२॥ स्वशक्तिर्दृश्यस्वभावः स्वामिशक्तिर्द्रष्टुः स्वरूपं तयोर्द्वयोर्या स्वरूपोपलब्धिस्तस्याः कारणं यः संयोगः स च स्वरूपान्नातिरिक्तो नित्यव्यापकयोः संयोगादिसम्बन्धासंभवाद्भोक्तृभोग्यरूपः स्वरूपसम्बन्ध एव ॥ २३ ॥ या पूर्वोक्ता अविद्या सा तस्य संयोगस्य हेतुर्भवति ॥ २४ ॥ तस्या ज्ञानेनोन्मूलिताया अविद्याया योऽभावस्तस्मिन्सति तत्कार्यसंयोगस्याप्यभावः तदेव तद्धानं तद्दृशेः पुरुषस्य कैवल्यमिति ॥ २५ ॥

१ ननु दृश्यस्य पुरुषभोगसंपादनमात्रफलकतया संपादितपुरुषभोगस्य तस्य प्रयोजनाभावादेव व्यापारविरतौ सर्वेषां पुरुषाणां शुद्धतया बन्धराहित्यात्संसारस्यैवोच्छेदप्रसङ्ग इत्याशङ्क्याह । कृतार्थमिति ॥

२ दृश्यद्रष्टारौ निरूप्य तयोः संबन्धं निरूपयति । स्वेति । संयोग इत्यस्य संयोग इव दृश्यद्रष्टृस्वरूपः संबन्ध इत्यर्थः ॥

३ संयोगस्य कारणमाह । तस्येति ॥

४ तद्धानमाह । तदिति । तद्दृशेरित्यस्य स्थाने तच्चपदेश इति पाठं भवदेवो मन्यते ॥

[१] विवेकख्यातिरविप्लवा हानोपायः ॥ २६ ॥ तस्य सप्तधा[२] प्रान्तभूमौ प्रज्ञा ॥ २७ ॥ [३] योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः ॥ २८ ॥

पुरुषगुणभेदविवेकस्य या ख्यातिः प्रख्या अविप्लवा विगतोऽन्तरा व्युत्थानरूपो विप्लवो यस्याः सा हानस्य दृश्यपरित्यागस्योपायः ॥ २६ ॥ विवेकख्यातेः स्वरूपमाह। तस्योत्पन्नविवेकज्ञानस्य ज्ञातव्यविवेकरूपा प्रज्ञा सा प्रान्तभूमौ सालम्बनसमाधिभूमिपर्यन्तं सप्तप्रकारा भवति, ते प्रकारा ज्ञातं मया ज्ञेयमित्यादयः ॥ २७ ॥ वक्ष्यमाणयोगाङ्गानुष्ठानादाविवेकख्यातेरशुद्धिक्षये चित्तसत्त्वावरणरूपाऽशुद्धिक्षये या ज्ञानदीप्तिः सात्त्विकः परिणामो विवेकख्यातिपर्यन्तः स तस्याः ख्यातेर्हेतुः ॥ २८ ॥

१ एतावता प्रबन्धेन संयोगस्य रूपं कारणं कार्यं चाभिहितम्, अथ हानोपायकथनद्वारोपादेयोपादानकारणमाह। विवेकेति। हानोपाय इत्यस्य दृश्यहानोपाय इत्यर्थः। विनिवृत्तकर्तृत्वाद्यभिमानाया अभिभूतरजस्तमोमलाया अन्तर्मुखबुद्धेश्चिच्छायासंक्रान्तिर्विवेकख्यातिस्तस्यां च सत्यां भवत्येव कैवल्यमिति तस्या उपादेयोपादानत्वं सिद्धमेवेति बोध्यम् ॥

२ ज्ञातं मया ज्ञेयं न ज्ञातव्यं किञ्चिदास्ते १ क्षीणा मे क्लेशा न मे क्षेतव्यमस्ति २ ज्ञानमधिगतं मया ३ लब्धा मया विवेकख्याति ४ रिति चतुःप्रकारा कार्यविमुक्तिः। चरितार्था मे बुद्धिः १ हताधिकारा गुणा गिरिशिखरनिपतिता ग्रावाण इव न पुनः स्थितिं यास्यन्ति २ स्वात्मीभूतो मे समाधिस्तस्मिंश्च सति स्वरूपमात्रनिष्ठोऽहमिति ३ त्रिप्रकारा चित्तविमुक्तिस्तान्सप्त प्रकारानाह। सप्तधेति। तस्येत्यस्योत्पन्नविवेकख्यातेरित्यर्थः। प्रान्तभूमिप्रज्ञा। पाठोऽयं भाष्ये भावागणेशवृत्तौ च ॥

३ विवेकख्यातेरुत्पत्तौ निमित्तमाह। योगाङ्गेति। ज्ञानदीप्तिरुत्तरोत्तरवृद्धं दृश्यमानः सात्त्विकः परिणामः ॥

यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि [1] ॥ २९ ॥ अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः ॥ ३० ॥ एते, जातिदेशकाल [2] समयानवच्छिन्नाः सार्वभौमा महाव्रतम् ॥ ३१ ॥ शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः ॥ ३२ ॥

कानि तानि योगाङ्गानीत्यपेक्षायां तान्याह। यमनियमेति सूत्रेण। तेषां व्याख्या अग्रिम सूत्राणि ॥ २९ ॥ तानि क्रमेण दर्शयति। अहिंसेत्यादिना। तत्र प्राणवियोगहेतुर्व्यापारो हिंसा तदभावोऽहिंसा। सत्यं वाङ्मनसयोर्यथार्थत्वम्। अस्तेयं परस्वापहरणाभावः। ब्रह्मचर्यमुपस्थसंयमः। अपरिग्रहो भोगसाधनानामस्वीकरणमेते पञ्च यमाः ॥ ३० ॥ तेषां विशेषमाह। एतइति। जातिर्ब्राह्मणत्वादिः, देशस्तीर्थादिः, कालश्चतुर्दश्यादिः, समयो ब्राह्मणप्रयोजनादिरेतैरनवच्छिन्ना अहिंसादयः सार्वभौमा महाव्रतमित्युच्यन्ते सर्वासु चित्तभूमिषु भवाः ॥ ३१ ॥ शौचं द्विधा मृज्जलादिभिर्बाह्यमान्तरं मैत्र्यादिभिश्चित्तप्रसादनं सन्तोषस्तुष्टिः शेषाः प्राग्व्याख्याता, एते नियमाः ॥ ३२ ॥

१ एष्वङ्गेषु धारणादीन्यन्तरङ्गाण्यङ्गानि, यमादीनि तु हिंसादिवितर्कोन्मूलनद्वारा समाधेरङ्गानि। एतेषां च पूर्वपूर्वस्योत्तरोत्तरोपकारकत्वमपि बोध्यम् ॥

२ ते तु जातिदेशकाल। पा०क०। जाति देशकाल। पा०क०। तत्राहिंसादीनां जात्यवच्छेदो ब्राह्मणं न हनिष्यामीत्यादिः, देशावच्छेदस्तीर्थे न हनिष्यामीत्यादिः, कालावच्छेदश्चतुर्दश्यां न हनिष्यामीत्यादिः, समयावच्छेदो देवाद्यर्थव्यतिरेकेण न हनिष्यामीत्यादिः, अनवच्छेदो न हनिष्यामीत्यादिः ॥

वितर्कबाधने प्रतिपक्षभावनम् ॥ ३३ ॥ वितर्का हिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम्[1] ॥ ३४ ॥ अहिंसाप्रतिष्ठायां तत्संनिधौ वैरत्यागः[2] ॥ ३५ ॥ सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम् ॥ ३६ ॥

कथमेषां योगाङ्गत्वमित्याह । वक्ष्यमाणवितर्कादिप्रतिपक्षभावने सति योगः सुकरो भवति, एते वितर्कादिबाधकाः ॥ ३३ ॥ के वितर्कादयस्तानाह । पूर्वोक्तहिंसाद्या वितर्कादयः कृतकारितानुमोदितभेदेन त्रिधा । कारणमाह । लोभक्रोधमोहपूर्वका इति, पुनस्त्रैविध्यं मृदुमध्याधिमात्राः, तेषां फलमाह । दुःखाज्ञानानन्तफलाः ॥ ३४ ॥ तेषां यमनियमादीनामभ्यासोत्कर्षाद्याः सिद्धयो भवन्ति ता आह । तत्संनिधाविति । तस्याऽहिंसां भावयतः संनिधौ सहजविरोधिनामप्यहिनकुलादीनां वैरत्यागः ॥ ३५ ॥ सत्याभ्यासोत्कर्षस्य फलमाह । सत्येति । सत्यप्रतिष्ठायां यागादिक्रियाफलाश्रयत्वं नाम अकृत्वापि यागादिक्रियास्तद्वचनादन्यस्यापि स्वर्गादिफलदानसामार्थ्यमायाति । किंपुनः स्वस्य वक्तव्यम् ॥ ३६ ॥

१ वितर्कादीनां स्वरूपं भेदं कारणं प्रकारं फलं च क्रमेण दर्शयति वितर्केति । तत्र हिंसादय इति स्वरूपस्य प्रदर्शनं, कृतकारितानुमोदितेति भेदस्य, लोभक्रोधमोहेति कारणस्य, मृद्विति प्रकारस्य, दुःखेति फलस्य ॥

२ अहिंसाप्रतिष्ठायामिति क्वचिन्नापि दृश्यते ॥

अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम् ॥ ३७ ॥ ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः ॥ ३८ ॥ अपरिग्रहस्थैर्ये जन्मकथंतासम्बोधः ॥ ३९ ॥ शौचात्स्वाङ्गजुगुप्सा परैरसंसर्गः ॥ ४० ॥ [1] सत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च ॥ ४१ ॥

अस्तेयं यदाऽभ्यस्यति योगी तदा तस्य प्रकर्षान्निरभिलाषस्यापि तस्य सर्वतो रत्नान्युपतिष्ठन्ति ॥ ३७ ॥ यः किल ब्रह्मचर्यमभ्यस्यति तस्य तत्प्रकर्षान्निरतिशयं वीर्यं सामर्थ्यमाविर्भवति। वीर्यनिरोधो हि ब्रह्मचर्यं तस्य प्रकर्षाच्छरीरेन्द्रियमनःसु वीर्यं प्रकर्षमागच्छति ॥ ३८ ॥ साधनपरिग्रह एव परिग्रहो न किंतु शरीरपरिग्रह एव परिग्रहस्तस्मिन्सति बहिर्मुखवृत्तौ न प्रज्ञोद्भवः, अपरिग्रहस्थैर्ये जन्मकथन्ता कथमित्यस्य भावः कथन्ता जन्मनः कथन्ता तस्याः सम्बोधः सम्यग्ज्ञानं जन्मान्तरे कोऽहमासमित्यादि सर्वं जानातीत्यर्थः ॥ ३९ ॥ यः किल शौचं भावयति तस्य कारणपर्यालोचनात्स्वाङ्गेष्वपि जुगुप्सा घृणा जायते नात्राग्रहः कार्योऽशुचित्वात्तस्य परैः कायवद्भिः सह संसर्गाभाव उपजायते ॥ ४० ॥ शौचफलमाह। सत्त्वं प्रकाशात्मकं तस्य शुद्धीरजस्तमोभ्यामनभिभवः, सौमनस्यं मानसी प्रीतिः, ऐकाग्र्यं चेतसः स्थैर्यम्, इन्द्रियजयो विषयपराङ्मुखत्वेनात्मन्यवस्थापनमात्मदर्शने चित्तस्य समर्थत्वमेते क्रमेण प्रादुर्भवन्ति ॥ ४१ ॥

1. शौचस्यैव फलान्तरमाह। सत्त्वेति। सैकाग्र्येतेन्द्रिय। पां० २ ॥

सन्तोषादनुत्तमसुखलाभः ॥ ४२ ॥ कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः ॥ ४३ ॥ स्वाध्यायादिष्टदेवतासंप्रयोगः ॥ ४४ ॥ समाधिसिद्धिरीश्वरप्रणिधानात् ॥ ४५ ॥ स्थिरसुखमासनम् ॥ ४६ ॥ १ प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम् ॥ ४७ ॥

सन्तोष फलमाह। सन्तोषप्रकर्षे योगिनस्तथाविधमान्तरं सुखमाविर्भवति यस्य बाह्यसुखं शतांशेनापि न समम् ॥ ४२ ॥ तपसः फलमाह। तपः समभ्यस्यमानं चेतसः क्लेशादिलक्षणाशुद्धिक्षयद्वारेण कायेन्द्रियाणां सिद्धिमुत्कर्षमादधाति, इन्द्रियाणां सूक्ष्मव्यवहितादिदर्शनसामर्थ्यं कायस्याणुत्वमहत्त्वादि यथेच्छं संपद्यते ॥ ४३ ॥ स्वाध्यायफलमाह। मन्त्रजपादिलक्षणे स्वाध्याये प्रकृष्यमाणे इष्टया देवतया संप्रयोगः सा देवता प्रत्यक्षीभवतीत्यर्थः ॥ ४४ ॥ ईश्वरप्रणिधानफलमाह। ईश्वरे योऽयं भक्तिविशेषस्तस्मात् समाधेराविर्भावो भवति, यस्मात्स ईश्वरः प्रसन्नः सन्नन्तरायक्लेशानपहृत्य समाधिमुद्बोधयति ॥ ४५ ॥ आसनमाह। आस्यतेऽनेनेतिआसनं पद्मस्वस्तिकादि। तद्यदा स्थिरं निष्कम्पं सुखमनुद्वेजनीयं तदा योगाङ्गम् ॥ ४६ ॥ उपायमाह। तदासनं प्रयत्नशैथिल्येनाकाशेनाकाशगतानन्तसमापत्त्या च स्थिरम्, अनन्तआनन्त्येतिपाठद्वये अर्थद्वयं, प्रथमपाठे शेषसमापत्तिः, द्वितीये आकाशसमापत्तिः ॥ ४७ ॥

१ आसनस्थिरत्वसुखत्वयोः कारणमाह। प्रयत्नेति ॥

ततो द्वन्द्वानभिघातः ॥ ४८ ॥ तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः ॥ ४९ ॥ स तु बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः ॥ ५० ॥ बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः ॥ ५१ ॥ ततः क्षीयते प्रकाशावरणम् ॥ ५२ ॥ धारणासु च योग्यता मनसः ॥ ५३ ॥

फलमाह । तस्मिन्नासनजये सति योगी द्वन्द्वैः शीतोष्णादिभिर्नाभिहन्यत इति ॥ ४८ ॥ आसनस्थैर्ये सति प्राणायामोऽनुष्ठेयः श्वासप्रश्वासयोर्गतिविच्छेदलक्षणः, विच्छेदो धारणम् ॥ ४९ ॥ तस्यैव विभज्य रूपं कथयति । स तु बाह्यवृत्तो रेचकोऽन्तर्वृत्तिः पूरकोऽन्तः स्तम्भवृत्तिः कुम्भकस्त्रिविधोऽयं देशेन द्वादशाङ्गुलप्रमाणेन, कालेन षट्त्रिंशन्मात्रादिना, सङ्ख्यया इयतो वारान् कृत इति भेदेनोपलक्षितो दीर्घसूक्ष्मसञ्ज्ञोभवति ॥ ५० ॥ त्रीन् प्राणायामानभिधाय चतुर्थमाह । बाह्येति । द्वादशान्तादिर्बाह्यो हृदयादिरान्तरस्तौ द्वावाक्षिप्य पर्यालोचयतः स्तम्भो भूयोगतिविच्छेदः स चतुर्थः पूर्वस्मादेतस्य निरोध एव विशेषः ॥ ५१ ॥ फलमाह । तस्मात्प्राणायामात् प्रकाशचित्तसत्त्वगम्यं यदावरणं क्लेशरूपं तत्क्षीयत इत्यर्थः ॥ ५२ ॥ फलान्तरमाह । वक्ष्यमाणा धारणास्तासु प्राणायामैः क्षीणदोषं मनो यत्र धार्यते तत्र स्थिरं भवति न विक्षेपं भजते ॥ ५३ ॥

स्वस्वविषयसंप्रयोगाभावे चित्तस्य[1] स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः ॥ ५४ ॥ ततः परमा वश्यतेन्द्रियाणाम् ॥ ५५ ॥

इति पातञ्जले सूत्रे योगशास्त्रे द्वितीयः साधनपादः ॥ २ ॥

प्रत्याहारमाह। इन्द्रियाणां विषयाभिमुख्येन वर्त्तनं यत्तत्परित्यज्य स्वरूपमात्रेऽवस्थानम्। इन्द्रियाणि स्वविषयेभ्यः प्रतीपमाह्रियन्तेऽस्मिन्निति प्रत्याहारः, तस्मिन्सति इन्द्रियाणि चित्तस्वरूपमात्रानुकारीणि सन्ति ॥ ५४ ॥ प्रत्याहारफलमाह। अभ्यस्यमाने हि प्रत्याहारे तथा वश्यान्यायत्तानीन्द्रियाणि संपद्यन्ते यथा बाह्यविषयाभिमुखतां नीयमानान्यपि न यान्तीत्यर्थः। तदेवं पादार्थो यमादिभिः प्राप्तबीजभाव आसनादिभिरङ्कुरितः प्रत्याहारेण कुसुमितो ध्यानधारणासमाधिभिः फलिष्यतीत्यर्थः ॥ ५५ ॥

इति योगचन्द्रिकायां द्वितीयः साधनपादः ॥ २ ॥

1 स्वविषयासंप्रयोगे चित्तस्य। पा० २॥

[1] देशबन्धश्चित्तस्य धारणा ॥ १ ॥ तत्र प्रत्ययैकतानता[2] ध्यानम् ॥ २ ॥ तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ॥ ३ ॥ [3] त्रयमेकत्र संयमः ॥ ४ ॥

धारणामाह ॥ देशे नाभिचक्रादौ चित्तस्य बन्धो विषयान्तरपरिहारेण यत् स्थिरीकरणं सा चित्तस्य धारणेत्युच्यते, यमनियमासनप्राणायामप्रत्याहारसिद्ध्युत्तरं निर्बाधे देशे ऋजुकायेन जितद्वन्द्वेन संप्रज्ञातसमाधेरभ्यासाय चेतसः स्थिरीकरणं कर्त्तव्यम् ॥ १ ॥ ध्यानमाह । तत्र तस्मिन्देशे यत्र चित्तं धृतं तत्र प्रत्ययस्य ज्ञानस्य या एकतानता विसदृशपरिणामपरिहारद्वारेण यदेव धारणायामालम्बनीकृतं तदालम्बनतयैव निरन्तरमुत्पत्तिः सा ध्यानमुच्यते ॥ २ ॥ समाधिमाह । तदेव ध्यानं यथार्थमात्रनिर्भासमर्थाकारसमावेशादुद्भूतार्थरूपं न्यग्भूतज्ञानस्वरूपत्वेन स्वरूपशून्यतामिवापद्यते स समाधिरित्युच्यते । सम्यगाधीयत एकाग्रीक्रियते यत्र मनः स समाधिः ॥ ३ ॥ योगाङ्गत्रयस्य तान्त्रिकीं सञ्ज्ञामाह । एकस्मिन्विषये ध्यानधारणासमाधिलक्षणं त्रयं प्रवर्त्तमानं संयमसञ्ज्ञया शास्त्रे व्यवह्रियते ॥ ४ ॥

१ पूर्वमुक्तेष्वङ्गेषु धारणादीनां विशेषेण स्वरूपादि दर्शयितुं प्रारभते । देशेति ॥
२ तत्र तत्प्रत्ययैकतानता--इति भवदेवसम्मतः पाठः ॥
३ तत्त्रय--इति पा० क० । स च न भाष्यभवदेवभावागणेशभोजराजसम्मतचन्द्रिकासम्मतः ॥

तज्जयात्प्रज्ञालोकः ॥ ५ ॥ तस्य भूमिषु विनियोगः ॥ ६ ॥ त्रयमन्तरङ्गं पूर्वेभ्यः ॥ ७ ॥ तदपि बहिरङ्गं निर्बीजस्य ॥ ८ ॥ व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो [1] निरोधपरिणामः ॥ ९ ॥

तस्य संयमस्य जयादभ्यासेन साम्योत्पादनात् प्रज्ञाया ज्ञातव्यविवेकरूपाया आलोकः प्रसरो भवति ॥ ५ ॥ तस्योपयोगमाह । तस्य संयमस्य भूमिषु स्थूलसूक्ष्मालम्बनभेदेन स्थितासु चित्तवृत्तिषु विनियोगः कार्यः, अधरां जित्वोत्तरां जयेत् ॥ ६ ॥ पूर्वेभ्यो यमादियोगाङ्गेभ्यः पारंपर्येण समाधेरुपकारकेभ्यो धारणादि योगाङ्गत्रयं संप्रज्ञातस्य समाधेरन्तरङ्गं, समाधिस्वरूपनिष्पादनात् ॥ ७ ॥ तस्यापि समाध्यन्तरापेक्षया बहिरङ्गत्वमाह । तदपीति । निर्बीजस्य निरालम्बनस्य समाधेस्तदपि योगाङ्गत्रयं बहिरङ्गं पारंपर्येणोपकारकत्वात् ॥ ८ ॥ व्युत्थानं क्षिप्तादिभूमित्रयं निरोधः प्रकृष्टसत्त्वस्येतसः परिणामः, ताभ्यां जातौ यौ संस्कारौ तयोर्यथाक्रममभिभवप्रादुर्भावौ यदा भवतस्तदा निरोधलक्षणचित्तस्योभयवृत्तित्वादन्वयो यः स निरोधपरिणाम इत्युच्यते ॥ ९ ॥

[1] निरोधस्य यः क्षणस्तस्मिन्नेव चित्तेऽन्वयोऽर्थादुक्ताभिभवप्रादुर्भावयोरेव स निरोधपरिणाम इत्युच्यत इत्यर्थः ॥

[1] तस्य प्रशान्तवाहिता संस्कारात् ॥ १० ॥ [2] सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः ॥ ११ ॥
[3] शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः ॥ १२ ॥

तस्य चेतस उक्तान्निरोधसंस्कारात्प्रशान्तवाहिता भवति सदृशप्रवाहपरिणामि चित्तं भवतीत्यर्थः ॥ १० ॥ चित्तस्य सर्वार्थता विक्षेपो धर्मं एकाग्रतापि धर्मस्तयोर्यथाक्रमं क्षयोदयावभिभवप्रादुर्भावौ उद्रिक्तसत्त्वस्य चित्तस्याऽन्वयितयाऽवस्थानं समाधिपरिणाम इत्युच्यते, पूर्वस्मादस्यायं विशेषो व्युत्थानसंस्कारस्य न्यग्भाव उत्तरस्य निरोधसंस्कारस्योद्भव इह तु क्षयोदयाविति सर्वार्थतारूपस्य विक्षेपस्यात्यन्ततिरस्कारादनुत्पत्तिरेकाग्रतोद्भवः ॥ ११ ॥ समाहितचित्तस्यैको वृत्तिविशेषः शान्तोऽपरस्तूदितो वर्त्तमानो द्वावपि समाहितचित्तत्वेन तुल्यावेकरूपालम्बनत्वेन सदृशौ उभयत्रापि समाहितचित्तस्यान्वयित्वेनावस्थानमेकाग्रतापरिणाम इत्युच्यते ॥ १२ ॥

---

१ निरोधपरिणामस्य फलमाह । तस्येति । निरोधपरिणामचित्तस्येत्यर्थः ॥
२ निरोधपरिणाममुक्त्वा समाधिपरिणाममाह । सर्वार्थेति ॥
३ तृतीयमेकाग्रतापरिणाममाह । शान्तेति । ततः पुनः शान्तोदितौ । पा० क० । ततः शान्तोदितौ-इतिभागस्तेषमत्रिसमातः पाठः ॥

एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः १ ॥१३॥ शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी ॥१४॥ क्रमान्यत्वं परिणामान्यत्वे हेतुः २ ॥ १५ ॥

एतेन त्रिविधोक्तचित्तपरिणामेन भूतेषु स्थूलसूक्ष्मेषु इन्द्रियेषु बुद्धिकर्मभेदेन स्थितेषु धर्म्मलक्षणावस्थाभेदेन त्रिविधः परिणामो व्याख्यातोऽवगन्तव्यः। अवस्थितस्य धर्मिणः पूर्वधर्मनिवृत्तौ धर्मान्तरापत्ति धर्मपरिणामः। भविष्यत्त्वं विहाय वर्त्तमानत्वस्य वर्त्तमानत्वं विहायातीतत्वस्य स्वीकारो लक्षणपरिणामः। कोमलत्वादिकं विहाय कठिनत्वादेः स्वीकारोऽवस्थापरिणामः। यतश्चलगुणवृत्तिर्नापरिणममाना क्षणमप्यस्ति ॥ १३ ॥ धर्मिलक्षणमाह। शान्ताः कृतस्वस्वव्यापारा उदिताः स्वं स्वं व्यापारं कुर्वन्ति, अव्यपदेश्याः शक्तिरूपेण स्थितास्तेषां शक्तिर्धर्मस्तन्त्रिविधं धर्मं योऽनुवर्त्तते स्वीकरोति स धर्मीत्युच्यते। यथा सुवर्णमनेकभूषणाकारं भवति ॥ १४ ॥ धर्माणामुक्तानां यः क्रमस्तस्य यत्प्रतिक्षणमन्यत्वं परिणामस्यान्यत्वे नानाविधत्वे हेतुर्ज्ञापकं भवति यथा मृदो घटादिः ॥ १५ ॥

१ चित्तपरिणामवद्भूतानामिन्द्रियाणां च धर्मपरिणामो लक्षणपरिणामोऽवस्थापरिणामश्चोहनीयः परिणामत्वेन साधर्म्यात्। परिणामो व्याख्यात इति भोजवृत्तिसम्मतः पाठः ॥

२ अत्र सूत्रे क्रमपदेन क्रमिकाविर्भावका धर्मादयः प्रागुक्ता गृह्यन्ते ततश्च क्रमिकधर्मादिभेदात्परिणममानधर्मिभेद इति भावार्थः। यद्वा कथमेकस्य धर्मिणोऽनेके परिणामा इत्याशङ्क्य क्रमान्यत्वेन कालभेदात्सम्भवत्येकस्यानेकपरिणामयोगितेति समाहितमिति काल एवात्र क्रमशब्देनाभिधित्सितः ॥

परिणामत्रयसंयमादतीतानागतज्ञानम् ॥ १६ ॥ शब्दार्थप्रत्ययानामितरेतराध्यासात्सङ्करस्तत्प्रविभाग[1] संयमात्सर्वभूतरुतज्ञानम् ॥ १७ ॥ संस्कारसाक्षात्करणात्पूर्वजातिज्ञानम् ॥ १८ ॥ प्रत्ययस्य परचित्तज्ञानम् ॥ १९ ॥

इदानीं संयमस्य सिद्धीः प्रतिपादयति धर्मलक्षणावस्थाभेदेन यत् परिणामत्रयमुक्तं तत्र संयमात्तस्मिन्विषये पूर्वोक्तसंयमकरणादतीतानागतज्ञानं योगिनश्चेतसः शुद्धसत्त्वप्रकाशत्वाद्भूतादि सर्वं जानन्ति ॥ १६ ॥ शब्दो वर्णध्वनिरूपः, अर्थो जातिगुणक्रियादिः प्रत्ययो ज्ञानमेषामितरेतराध्यासाद्बुद्ध्येकरूपतासम्पादनात् सङ्कीर्णत्वं तेषां प्रविभागं विधाय तस्मिन् प्रविभागे यः संयमं करोति तस्य सर्वेषां मृगपश्वादीनां यद्रुतं शब्दस्तस्य ज्ञानमुत्पद्यते ॥ १७ ॥ द्विविधा वासनासंस्काराः केचित्स्मृत्युत्पादनफलाः केचिज्जात्यायुर्भोगहेतवो धर्माधर्माख्यास्तेषु संयमं यदा करोति भावनयैव पूर्ववृत्तानुसन्धानादुद्बुद्धसंस्कारः सर्वमतीतं पूर्वजन्मानुभूतजात्यादिकं प्रत्यक्षेण पश्यति ॥ १८ ॥ प्रत्ययस्य परचित्तस्य केन चिन्मुखरागादिलिङ्गेन गृहीतस्य यदा संयमं करोति तदा परकीयचित्तस्य ज्ञानमुत्पद्यते सरागं विरागं वेति ॥ १९ ॥

1. स्तद्विभाग-इति भवदेवसम्मतः पाठः ॥

न तच्चालम्बनं तस्याविषयीभूतत्वात्[1] ॥ २० ॥ कायरूपसंयमात्तद्ग्राह्य[2]शक्तिस्तम्भे चक्षुःप्रकाशासंयोगे[3]ऽन्तर्द्धानम् ॥ २१ ॥

अस्यैव विशेषमाह । तच्च परस्य यच्चित्तं तत्सालम्बनं स्वकीयालम्बनेन सहितं न शक्यते ज्ञातुमालम्बनस्य केन चिल्लिङ्गेनाविषयीकृतत्वाद्यच्च न गृहीतं तत्र संयमं कर्त्तुमशक्यत्वान्न भवति चित्तधर्मज्ञानं, यदि तु सालम्बनं गृहीतं तदा चित्तधर्मज्ञानं भवत्येव तत्संयमस्य कर्त्तुं शक्यत्वात् ॥ २० ॥ कायस्य यद्रूपं तस्य संयमाद्रूपस्य चक्षुर्ग्राह्यत्वरूपशक्त्याःस्तम्भे प्रतिबन्धे चक्षुःप्रकाशः सत्त्वधर्मस्तस्यासंयोगे तद्ग्रहणाभावे योगिनोऽन्तर्द्धानं भवति न केन चिद्दृश्यते ॥ २१ ॥

---

१ न च सालम्बनमिति क्वचित्पाठः स च भोजवृत्त्यसम्मतः । न केवलं परचित्तज्ञानमेवापि तु परकीयचित्तविषयस्यापि प्रणिधानाऽधिक्ये भवति योगिनो ज्ञानमिति भावार्थः । अक्षरार्थस्तु सविषयस्य परचित्तस्य ज्ञानविषयत्वासंभवान्निरालम्बनस्यैव ज्ञानमिति, अत च प्रयत्नमेवेति शेषः । केचित्तु परचितस्यानुमानादिनापि ज्ञानसम्भवात्तज्ज्ञाने का योगिनो विशेषसिद्धिरत आह । न तदिति । अयमर्थः यद्यपि सुखरागादिलिङ्गेन सरागं विरागं वा परचित्तमिति शक्नोतीतरोऽप्यध्यवसितुं परं विशेषतः परचित्तविषयज्ञापकलिङ्गालाभेन योगिन एव तज्ज्ञानं नान्यस्येति । भावागणेशवृत्तौ त्वेतत्सूत्रमेव नास्ति ॥

२ संयमाद्ग्राह्य इति पा० क० ॥

३ संप्रयोगे इति पा० क० ॥

एतेन शब्दाद्यन्तर्धानमुक्तम्[1] ॥ २२ ॥ सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरान्तज्ञानमरिष्टेभ्यो वा ॥२३॥ मैत्र्यादिषु बलानि[2] ॥२४॥

एतेन रूपाद्यन्तर्धानोपायप्रदर्शनेन शब्दादीनां श्रोत्रादिग्राह्याणामन्तर्धानमुक्तं वेदितव्यम् ॥ २२ ॥ सिद्ध्यन्तरमाह । यत्पूर्वकृतं कर्म तद् द्विविधमेकं फलजननायोपक्रमेण कार्यकरणाभिमुख्येन सह वर्तत इति सोपक्रममपरमुक्तरूपविपरीतं निरुपक्रमं तस्मिन् द्विविधे कर्मणि यः संयमं करोति किं शीघ्रविपाकं किं चिरविपाकमिति एवं ध्यान दार्ढ्यादपरान्तज्ञानमुत्पद्यते अपरान्तं शरीरवियोगस्तज्ज्ञानममुष्मिन् देशे काले वा शरीरवियोगो भविष्यतीति । अरिष्टेभ्यो वा आध्यात्मिकादीनि त्रिविधान्यरिष्टानि पिहितकर्णकालिककौष्ठ्यवायुघोषाश्रवणविकृतपुरुषदर्शनस्वर्गादिपदार्थ-दर्शनानि तेभ्यः शरीरवियोगकालं जानाति । अयोगी संशयेन योगी निश्चयेन जानातीति उभयोर्भेदः ॥ २३ ॥ मैत्र्यादिषु विहितो यः संयमस्तस्य बलानि मैत्र्यादीनां सम्बन्धीनि प्रादुर्भवन्ति । मैत्र्याद्युत्कर्षे सर्वस्य मित्रत्वादिकं प्रतिपद्यते ॥ २४ ॥

१ भावागणेशेनैतत्सूत्रं मन्यते । भाष्येऽप्यव्याख्यातत्वाद् भाष्यरूपमेवैतत् । भोजराजेन तु व्याख्यातम् ॥

२ सर्वत्र मैत्र्यादिभावनायां सर्वसत्त्वेष्वात्मीयत्वं प्रादुर्भवतीति भावः ॥

बलेषु हस्तिबलादीनि[1] ॥ २५ ॥ प्रवृत्त्यालोकन्यासात्सूक्ष्मव्यवहितविप्रकृष्टज्ञानम् ॥२६॥ भुवनज्ञानं सूर्ये संयमात् ॥२७॥ चन्द्रे ताराव्यूहज्ञानम् ॥ २८ ॥ ध्रुवे तद्गतिज्ञानम् ॥ २९ ॥ [2] नाभिचक्रे कायव्यूहज्ञानम् ॥ ३० ॥ कण्ठकूपे क्षुत्पिपासानिवृत्तिः ॥ ३१ ॥

हस्त्यादिसम्बन्धिषु बलेषु कृतसंयमस्य तद्बलानि हस्त्यादिबलानि आविर्भवन्तीत्यर्थः ॥२५॥ विषयवतीज्योतिष्मतीरूपप्रवृत्तौ य आलोकः प्रकाशस्तस्य सर्वविषयेषु न्यासात्तेषां भावनादन्तःकरणेन्द्रियेषु सूक्ष्मव्यवहितविप्रकृष्टनिधिरसायनादेर्ज्ञानमुत्पद्यते ॥ २६ ॥ सूर्ये यः संयमं करोति तस्य भूर्भुवादिसप्तभुवनज्ञानमुत्पद्यते ॥ २७ ॥ चन्द्रे संयमात्ताराणां व्यूहः सन्निवेशस्तज्ज्ञानमुत्पद्यत इत्यर्थः ॥ २८ ॥ ध्रुवे ज्योतिष्प्रधाने निश्चले कृतसंयमस्य तारादीनां गत्यादिज्ञानमुत्पद्यते इयं तारा, अयं ग्रहः, इयत्कालेन गच्छतीति ॥ २९ ॥ षोडशारे नाभिचक्रे कृतसंयमस्य काये यो व्यूहो विशिष्टरसनाड्याद्यवस्थानं तस्य ज्ञानमुत्पद्यते ॥ ३० ॥ कण्ठे गले कूपो जिह्वामूलं जिह्वामूले गर्त्ताकारप्रदेशस्तत्स्पर्शात्प्राणादीनां क्षुधाद्या भवन्ति तस्मिन् कृतसंयमस्य क्षुत्पिपासादयो निवर्त्तन्ते ॥ ३१ ॥

१ पूर्वोक्तमेव विशदयति । बलेष्विति । यत्र क्वचिद्धस्तिबले वायुवेगे सिंहवीर्ये वाऽऽत्मीयत्वं भावयतस्तद्युक्तत्वमाविर्भवति योगिन इत्यर्थः ॥

२ बाह्याः सिद्धीः प्रतिपाद्याभ्यन्तराः प्रतिपादयितुमुपक्रमते । नाभीति ॥

कूर्मनाड्यां स्थैर्यम् ॥३२॥ मूर्द्धज्योतिषि सिद्धदर्शनम् ॥३३॥ प्रातिभाद्वा सर्वं सर्वनिमित्तानपेक्षम्[1] ॥ ३४ ॥ हृदये चित्तसंवित् ॥ ३५ ॥ सत्त्वपुरुषयोरत्यन्तासङ्कीर्णयोः प्रत्ययाविशेषाद् भोगः परार्थान्यस्वार्थे[2] संयमात्पुरुषज्ञानम् ॥ ३६ ॥

कण्ठकूपस्याधस्ताद्दृढ़ा कूर्माख्या नाड़ी तस्यां कृतसंयमस्य चेतसः स्थैर्यमुत्पद्यते ॥ ३२ ॥ शिरःकपाले ब्रह्मरन्ध्राख्यं छिद्रं प्रकाशत्वाज्ज्योतिस्तस्मिन् कृतसंयमस्य सिद्धानां दर्शनं भवति ॥ ३३ ॥ यथार्थं प्रागुत्पद्यमानं ज्ञानं प्रतिभा तस्यां संयमे क्रियमाणे तारकं ज्ञान मुदेति संयमान्तरानपेक्षः सर्वं जानातीत्यर्थः ॥ ३४ ॥ हृदयपुण्डरीकान्तःकृतसंयमस्य स्वपरचित्तज्ञानमुत्पद्यते स्वपरचित्तगतं सर्वंजानातीत्यर्थः ॥ ३५ ॥ सत्त्वं प्रकाशसुखात्मकः प्राधानिकः परिणामः पुरुषो भोक्ता तयोश्चेतनाचेतनत्वादत्यन्तासंकीर्णत्वं तयोः प्रत्ययस्याविशेषाद् भेदेनाप्रतिभासनाद्या सुखसंवित्सा भोगः स पुरुषनिमित्तत्वात्परार्थः तदन्यः स्वार्थः पुरुषस्वरूपमात्रालम्बनः परित्यक्ताऽहङ्कारे सत्त्वे चिच्छायासंक्रमस्तत्र कृतसंयमस्य पुरुषज्ञानमुत्पद्यते ॥ ३६ ॥

१ सर्वनिमित्तानपेक्षमिति भाष्येऽव्याख्यातत्वात्तदसंमतमपि भोजराजेन व्याख्यातम् । मनोसात्तजन्यमविसंवादि प्रागुत्पद्यमानं ज्ञानं प्रतिभा । विवेकख्यातेः पूर्वभावि ज्ञानं तारकं प्रातिभम्, यथोदेष्यति सवितरि प्राक् प्रभयैव निखिलप्रकाश एवं तारकेणैव निखलविषयप्रकाश इति भावः ॥

२ प्रत्ययाविशेषो भोगः परार्थात् स्वार्थ—इति भाष्यसंमतः पाठः ॥

ततःप्रातिभश्रावणवेदनादर्शास्वादवार्त्ता जायन्ते ॥ ३७ ॥ ते समाधावुपसर्गा व्युत्थाने सिद्धयः ॥ ३८ ॥ बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च [1] चित्तस्य परशरीरावेशः ॥ ३९ ॥

अस्य फलमाह । ततः पुरुषसंयमाद् व्युत्थितस्यापि ज्ञानानि जायन्ते, तत्र प्रातिभं पूर्वोक्तं ज्ञानं, श्रावणं श्रोत्रेन्द्रियजं, वेदना स्पर्शनेन्द्रियजमादर्शश्चक्षुरिन्द्रियजं ज्ञानमास्वादो रसनेन्द्रियजं ज्ञानं वार्त्ता गन्धसंवित् सर्वत्र दिव्यत्वं विवक्षितमेतानि भवन्ति ॥ ३७ ॥ ते प्राक् प्रतिपादिताः फलविशेषाः समाधावुपद्रवा विघ्ना व्युत्थाने विशिष्टफलदायकत्वात् सिद्धयो भवन्तीत्यर्थः ॥ ३८ ॥ व्याप्यात्मचित्तयोर्नियतकर्मणा शरीरान्तर्यद्वेदनं सम्बन्धस्तस्य कारणं धर्माधर्माख्यं यदा शिथिलं भवति तस्माच्चित्तस्य यः प्रचारो हृदयादिविषयाभिमुख्येन प्रसरस्तस्य ज्ञानाच्चित्तवहनाड्यादि यो जानाति स परशरीरं सजीवं मृतं वा प्रविशति सर्वं सूक्ष्मं तदनु मधुकरराजमिव मधुमक्षिकाः कर्मनाशाद्योगी सर्वत्र व्यवहरतीत्यर्थः ॥ ३९ ॥

[1] प्रचर संवेदनाच्च—इति भवदेवसंमतः पाठः ॥

उदानजयाज्जलपङ्ककण्टकादिष्वसङ्ग उत्क्रान्तिश्च ॥ ४० ॥

समानजयात्प्रज्वलनम्[1] ॥ ४१ ॥ श्रोत्राकाशयोः सम्बन्धसंयमाद्दिव्यं श्रोत्रम् ॥ ४२ ॥

हृदयान्मुखनासिकाद्वारेण वायोः प्रणयनात् प्राण इत्युच्यते । नाभिप्रदेशात्पादाङ्गुष्ठपर्यन्तमपनयनादपानो नाभिप्रदेशं परिवेष्ट्य समन्तान्नयनात्समानः कृकाटिकादेशादाशिरोवृत्तेरुन्नयनादुदानः व्याप्य नयनात्सर्वशरीरव्यापी व्यान उदानस्य संयमद्वारेण जयादितरेषां वायूनां निरोधादूर्ध्वगामित्वेन जले नद्यादौ कर्दमे कण्टकादिषु वा न सज्जते अतिलघुत्वात्तूलपिण्डवज्जलादौ मज्जितोऽपि उद्गच्छतीत्यर्थः अयमुत्क्रान्तिशब्दार्थः ॥ ४० ॥ अग्निमावेष्ट्य स्थितस्य वायोः समानाख्यस्य जयाद्वशीकारादग्नेस्तेजसा प्रज्वलन्निव योगी भातीत्यर्थः ॥ ४१ ॥ श्रोत्रेन्द्रियाकाशयोः सम्बन्धो देशदेशिभावस्तस्मिन् कृतसंयमस्य योगिनो दिव्यं श्रोत्रं प्रवर्तते युगपत्सूक्ष्मव्यवहितविप्रकृष्टशब्दग्रहणसमर्थं भवतीत्यर्थः ॥ ४२ ॥

1 जयाज्ज्व—इति भाष्यभवदेवसंमतः पाठः । क्वचिद्भोजवृत्तावप्येतादृश एव पाठः ॥

कायाकाशयोः सम्बन्धसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनम् ॥ ४३ ॥ बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः ॥ ४४ ॥ स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद् भूतजयः ॥ ४५ ॥

कायः शरीरं तस्याकाशेनावकाशदानाद्यः संबन्धस्तत्र संयमं विधाय लघुनि तूलादौ समापत्तिस्तन्मयी भावलक्षणा तां च विधाय प्राप्तात्यन्तलघुभावो योगी प्रथमं भुवि यथा रुचि संचरन् क्रमेणोर्णाभितन्तुजालेन संचरमाणः आदित्यरश्मिभिश्च विहरन् यथेच्छमाकाशेन गच्छति ॥ ४३ ॥ शरीराद्बहिर्या मनोवृत्तिः सा महाविदेहा नाम विगतशरीराहङ्कारदार्ढ्यद्वारेणोच्यते ततस्तस्यां कृतसंयमात् प्रकाशावरणक्षयः सात्त्विकचित्तस्य यः प्रकाशस्तस्य यदावरणं क्लेशादि तत्क्षयः प्रविलयो भवति ॥ ४४ ॥ एवं बहिरान्तरीः सिद्धीः प्रतिपाद्य समाध्युपयोगिनीराह । पञ्चानां भूतानां पञ्च स्थूलत्वादयो धर्मास्तत्र कृतसंयमस्य भूतजयो भवति । भूतानां दृश्यमानं विशिष्टं रूपं स्थूलं स्वरूपं कार्यं गन्धस्नेहोष्णताप्रेरणावकाशदानलक्षणम् । सूक्ष्मं तन्मात्राणि । अन्वयिनो गुणाः सर्वत्रोपलभ्यन्ते अर्थवत्त्वं नाम गुणेषु भोगापवर्गसंपादनाख्या शक्तिरेवं पञ्चसु उक्तलक्षणावस्थाभिन्नेषु प्रत्यवस्थं संयमं कुर्वन् योगी भूतजयी भवति ॥ ४५ ॥

ततोऽणिमादिप्रादुर्भावः कायसम्पत्[1]तद्धर्मानभिघातश्च ॥ ४६ ॥ रूपलावण्यबलवज्रसंहननानि[2] कायसंपत् ॥ ४७ ॥ ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिन्द्रियजयः ॥ ४८ ॥

तस्य फलमाह। अणिमा अणुत्वापत्तिः महिमा महत्त्वं लघिमा लघुत्वप्राप्तिर्गरिमा गुरुत्वप्राप्तिः प्राप्तिरङ्गुल्यग्रेण चन्द्रादिस्पर्शनशक्तिः प्राकाम्यमिच्छानभिघातः शरीरान्तःकरणेश्वरत्वमीशित्वं सर्वतः प्रभविष्णुत्वं वशित्वं सर्वभूतानि तदुक्तं नातिक्रामन्ति त एते अणिमाद्याः समाध्युपयोगिभूतजयाद्योगिनः प्रादुर्भवन्ति एता महासिद्धय इत्युच्यन्ते कायसंपत् वक्ष्यमाणा तां प्राप्नोति तद्धर्मानभिघातश्च तस्य कायस्य ये धर्माः रूपादयस्तेषामनभिघातो नाशो नास्ति अस्य रूपस्याग्निवाय्वादिना दाहशोषादिकं न भवतीत्यर्थः ॥ ४६ ॥ कायसंपदमाह । रूपलावण्यबलानि प्रसिद्धानि वज्रसंहननं वज्रवत्कठिना संहतिरस्य शरीरे भवतीत्यर्थं इति कायस्याविर्भूतगुणसम्पत् ॥ ४७ ॥ इन्द्रियजयमाह । ग्रहणं विषयाभिमुखी वृत्तिः स्वरूपं सामान्येन प्रकाशकत्वम् अस्मिता अहङ्कारानुगमः अन्वयार्थवत्त्वे पूर्ववत् । एतेषामिन्द्रियाणामवस्थापञ्चके संयमं कृत्वेन्द्रियजयी भवति ॥ ४८ ॥

१ संपद्धर्मा—इति पा० क०॥
२ संहननत्वानि—इति पा० क०। संहननत्वादीनि। इतिभवदेवसंमतः पाठः॥

ततो मनोजवित्वं विकरणभावः प्रधानजयश्च ॥४९॥ सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च ॥ ५० ॥ तद्वैराग्यादपि दोषबीजक्षये कैवल्यम् ॥ ५१ ॥ [1]स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात् ॥ ५२ ॥

शरीरस्य मनोवद्गतिलाभो मनोजवित्वं कायनिरपेक्षाणामिन्द्रियाणां वृत्तिलाभो विकरणभावः सर्ववशित्वं प्रधानजयः एताः सिद्धयो जितेन्द्रियस्य प्रादुर्भवन्ति ॥ ४९ ॥ अन्तःकरणजयमाह । सत्त्वान्तःकरणे कृतसंयमस्य या उत्पद्यते सत्त्वपुरुषयोः ख्यातिर्गुणानां शिथिलीभावस्तन्माहात्म्यात्तत्र स्थितस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च समाधिर्भवति । इयं विशोका नाम सिद्धिः ॥ ५० ॥ एतस्यां विशोकायां सिद्धौ यदा वैराग्यमुत्पद्यते तदा दोषाणां रागादीनां यद्बीजमविद्यादयस्तस्य क्षये निर्मूलत्वे कैवल्यमात्यन्तिकी दुःखनिवृत्तिः ॥ ५१ ॥ तत्र समाधौ स्थित्युपायमाह । प्रधानजयस्य मधुमतीति संज्ञा तस्यां कृतसंयमस्य स्वामिनो देवा उपनिमन्त्रयितारो भवन्ति दिव्यस्त्र्यादिना तस्मिन्नुपनिमन्त्रणे नानेन सङ्गः कर्त्तव्यो नापि स्मयः सङ्गस्मयकरणे समाध्यनुत्साहोऽनिष्टप्रसङ्गः स्यात् ॥ ५२ ॥

१ स्थान्युपनिमन्त्रणे—इति पाठो भोजभवदेवभावागणेशवृत्तिषु । अग्रे—सङ्गस्मया—इति पा० क० ॥

क्षणतत्क्रमयोः संयमाद् विवेकजं ज्ञानम् ॥५३॥ जातिलक्षणदेशै रन्यतानवच्छेदात्तुल्ययोस्ततः प्रतिपत्तिः ॥ ५४ ॥ तारकं सर्वविषयं सर्वथा विषयमक्रमं चेति विवेकजं ज्ञानम् ॥ ५५ ॥ सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यम् ॥ ५६ ॥

इति पातञ्जले सूत्रे योगशास्त्रे तृतीयो विभूतिपादः ॥ ३ ॥

क्षणानां यः क्रमः पौर्वापर्येण परिणामस्तत्र संयमात् प्रागुक्तं विवेकजं ज्ञानमुत्पद्यते सूक्ष्मक्षणादिज्ञानात्सूक्ष्ममहदादीनां ज्ञानं भवति ॥ ५३ ॥ पदार्थानां भेदहेतवो जातिलक्षणदेशा भवन्ति तत्र जात्या भेदो यथायं गौरयं महिष इति । जात्या तुल्ययोर्लक्षणेन-भेदो यथायं गौः शुक्लोऽयमरुण इति, देशाद् यथा तुल्यपरिमाणयो-रामलकयोर्भिन्नदेशावस्थितयोर्यत्र भेदो न ज्ञायते तत्रापि कृतसंयमस्य ज्ञानमुपजायते उभयोर्भेदप्रतिपत्तिर्भवत्येव ॥ ५४ ॥ उक्तसंयमबलादन्त्य-भूमिकोत्पन्नं ज्ञानं संसारोत्तारणात्तारकमित्युच्यते सर्वाणि महदा-दीनि विषया यस्येति सर्वविषयं तत्त्वानां स्थूलाद्यवस्थाविषयत्वात् सर्वथा विषयमतीतादिविषयत्वात् अक्रमं नाम भात्यपि विद्यमानत्वेन पश्यति ॥ ५५ ॥ उक्तलक्षणयोः सत्त्वपुरुषयोः शुद्धिसाम्येऽपि सत्त्वस्य कर्तृत्वनिवृत्त्या स्वकारणे लयः पुरुषस्योपचरितभोगनिवृत्त्या कैवल्यं मोक्षो भवतीत्यर्थः ॥ ५६ ॥

इति योगचन्द्रिकायां तृतीयो विभूतिपादः ॥ ३ ॥

१ रन्यतानवच्छे—इति भवदेवसंमतः पाठः ॥

जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः ॥ १ ॥ जात्यन्तरपरिणामः प्रकृत्यापूरणात्[1] ॥ २ ॥ [2]निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत् ॥ ३ ॥

कैवल्याख्यं चतुर्थपादमाह । तत्र सिद्धीनामनेकजत्वं सूचयति काश्चन जन्मत एव यथा कपिलादीनाम्, औषधिसिद्धयः पारदादयः मन्त्रसिद्धिराकाशगमनादि । तपःसिद्धिर्विश्वामित्रादीनां समाधिजाः प्राक् प्रतिपादिताः ॥ १ ॥ योऽयमस्मिञ्जन्मनि जात्यन्तरपरिणामः स प्रकृत्यापूरणात् पाश्चात्यजन्मप्रकृतयोऽस्मिन् जन्मनि विकारानापूरयन्ति ॥ २ ॥ निमित्तं धर्मादि तन्न प्रयोजकं प्रकृतीनां परिणामे कुतस्तस्य धर्मादेर्व्यापार इत्याह । वरणभेद इति । ततोऽनुष्ठीयमानधर्मादेर्वरणभेदो, वरणमावरकमधर्मादि तस्यैव विरोधित्वाद्भेदः क्षयः क्रियते । यथा क्षेत्रिकः कृषीबल, केदारात्केदारान्तरे जलानयनार्थं प्रतिबन्धावरणभेदमात्रं करोति तद्वत् ॥ ३ ॥

---

१ भाष्यभोजभवदेवभावागणेशवृत्तिषु, प्रकृत्यापूरात्—इत्येव पाठः। ततश्च नन्दीश्वरादीनामिहैव परिदृश्यमानस्य जात्यादिपरिणामस्य जन्मान्तरीयसमाधिजन्यत्वमव्याहतम् ॥

२ ननु धर्मादीनां लोकप्रसिद्धं हेतुत्वमनुपपन्नमतआह० निमित्तमप्रयोजकमिति । प्रतिबन्धकाभावसंपादकतयैव धर्मादीनां लोकप्रसिद्धहेतुत्वोपपत्तिरिति तात्पर्यम् ॥

निर्माणचित्तान्यस्मितामात्रात्[1] ॥ ४ ॥ प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषाम् ॥ ५ ॥ तत्र ध्यानजमनाशयम् ॥ ६ ॥ कर्माशुक्लाकृष्णं[2] योगिनस्त्रिविधमितरेषाम् ॥ ७ ॥

योगी अनेकशरीराणि युगपत्सृजतीत्याह । योगिनः स्वयं निर्मितेषु कायेषु यानि चित्तानि तानि मूलकारणादस्मितामात्रात् प्रसरन्ति अग्निविस्फुलिङ्गा इव ॥ ४ ॥ चेतसां प्रवृत्तिभेदे व्यापारनानात्वे एकं योगिनश्चित्तं प्रयोजकमधिष्ठातृत्वेन प्रेरकं तेन न भिन्नं तत्त्वम् ॥ ५ ॥ जन्मप्रभवाच्चित्तात्समाधिप्रभवस्य वैलक्षण्यमाह । ध्यानजं समाधिजं यच्चित्तं तज्जन्मजादिषु पञ्चसु मध्ये अनाशयं कर्मवासनारहितमित्यर्थः ॥ ६ ॥ शुभफलदं यागादिकर्म शुक्लमशुभफलदं ब्रह्महत्यादि कृष्णमुभयसङ्कीर्णं शुक्लकृष्णं तत्र शुक्लं दानादिमतां कृष्णं नारकिणां शुक्लकृष्णं मनुष्याणां योगिनां संन्यासवतामशुक्लाकृष्णं क्रियमाणं कर्म फलत्यागानुसन्धानेनानुष्ठानान्न किञ्चित्फलमारभते ॥ ७ ॥

---

१ अयं आद्यजन्तभावल्युडन्तनिर्माणशब्दस्य चित्तपदेन सप्तमीति योगविभागादिना सप्तम्यन्तस्य, षष्ठ्यर्थे वा समासः । बाहुलकात्कर्मणि वा ल्युट् । तदनुसारेण चन्द्रिकायामपि क्वचित् स्वयं निर्मितानि यानि चित्तानीत्येव पाठः ॥

२ कर्माशुक्लाकृष्णं — इति भाष्यसंमतः पाठः ॥

¹ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम् ॥ ८ ॥

जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृतिसंस्कारयोरेकरूपत्वात् ॥ ९ ॥

अस्यैव कर्मणः फलमाह ॥ द्विविधवासनामध्ये जात्यायुर्भोगफलाः पूर्वं कृतनिर्णयाः । यास्तु स्मृतिफलास्ततः कर्मणो यादृक् शरीरमारब्धं देवादि तस्य विपाकस्य या अनुगुणा अनुरूपा वासनास्तासामेव तस्मादभिव्यक्तिर्वासनानां भवति ॥ ८ ॥ आसां कार्यकारणभावानुपपत्तिं निराकरोति इह कां चिद्योनिमनुभूय यदा योन्यन्तरसहस्रव्यवधानेन तामेव पुनर्योनिं प्रतिपद्यते तत्र या वासनाः प्रकटीभूताः आसंस्तास्तथाविधव्यञ्जकाभावात्तिरोभूताः पुनस्तादृक्शरीरलाभे प्रकटीभवन्ति॥ जातिदेशकालव्यवधानेऽपि तासां स्वानुरूपस्मृत्यादिफलसाधने आनन्तर्यं नैरन्तर्यं कुतः स्मृतिसंस्कारयोरेकरूपत्वात् ॥ ९ ॥

१ कर्मणः कर्मविपाकानुरूपाणामेव वासनानामभिव्यक्तिरिति योगिनामप्युक्तमकृष्णं तस्याऽप्युक्तकृष्णैव वासनाऽभिव्यक्ता भवति इतरेषां शुक्ला कृष्णा शुक्लकृष्णा वेति भावः ॥

तासामनादित्वमाशिषो [1] नित्यत्वात् ॥ १० ॥ हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषामभावे तदभावः ॥ ११ ॥ अतीतानागतं स्वरूपतोऽस्त्यध्वभेदा[2]द्धर्माणाम् ॥ १२ ॥ ते व्यक्तसूक्ष्मा गुणात्मानः ॥ १३ ॥

वासनानां यदा प्रथममेवानुभवस्तदा किं स सनिमित्त उतानिमित्त इति शङ्कामपनयति तासां वासनानामनादित्वं न विद्यते आदिर्यस्य तस्य भावस्तत्त्वं कुत इत्यत आह । आशिषो नित्यत्वात् येयमाशीर्महामोहरूपा सुखसाधनं मे भूयान्न कदा चित्तेन वियोग इत्येवं रूपसङ्कल्पो वासनाकारणं तस्य नित्यत्वात् ॥ १० ॥ आसां हानोपायमाह । वासनानामन्तरानुभवो हेतुस्तस्याप्यनुभवस्य रागादयस्तेषामविद्येति साक्षात्पारम्पर्येण च हेतुः फलं शरीरादि आश्रयो बुद्धिसत्त्वमालम्बनं यदेवानुभवस्य तैरनन्तानां वासनानां संगृहीतत्वात्तेषामभावे वासनाऽभावः ॥ ११ ॥ सतामभावासंभवादसतां चोत्पत्त्यसंभवात्तैर्धर्मैर्विपरिणममानो धर्मी एकरूपो धर्मास्त्वनेके तस्माद्धर्माणामतीतानागताद्यध्वभेदस्तस्मादपवर्गपर्यन्तमेकमेव चित्तं धर्मि ॥ १२ ॥ धर्मधर्मिणो व्यक्तसूक्ष्मसत्त्वादिगुणपरिणामरूपाः ॥ १३ ॥

१ भाष्यभवदेवभावागणेशवृत्तिषु--त्वं चाशिषो--इति पाठः ॥

२ स्वरूपतोऽध्वभेदा--इति पा० क० ॥ स्वरूपं नास्त्यध्वभेदा--इति पा० क० भोजवृत्तौ ॥

परिणामैकत्वाद्वस्तुतत्त्वम् ॥ १४ ॥ वस्तुसाम्ये चित्तभेदात्तयोर्विविक्तः[1] पन्थाः ॥ १५ ॥ [2]तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातम् ॥ १६ ॥ सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामात् ॥ १७ ॥

धर्म्यैकत्वमाह । यद्यपि गुणास्त्रयस्तथापि तेषां मङ्गाङ्गित्वाद्वस्तुनस्तत्त्वमेकत्वम् । यथेयं पृथिवीत्यादिवत् ॥ १४ ॥ वस्तुनो ज्ञानैकत्वे कथमेतदित्याह । तयोर्ज्ञानज्ञेययोर्विविक्तः पन्थाः कथं वस्तुसाम्ये चित्तभेदात् स्त्र्यादिवस्त्वेकत्वे प्रमातॄणां सुखादिनानारूपचित्तपरिणामात् ॥ १५ ॥ चित्तं कथं युगपत्सर्वार्थान्न गृह्णातीत्याशङ्क्य परिहरति । तस्यार्थस्योपरागादाकारसमर्पणाच्चित्ते बाह्यवस्तु ज्ञातमज्ञातञ्च भवतीत्यर्थः ॥ १६ ॥ पुरुषस्य परिणामित्वमाशङ्क्य परिहरति । याश्चित्तवृत्तयस्तास्तत्प्रभोस्तस्य चित्तस्य ग्रहीतुः पुरुषस्य सदा सर्वकालमेव ज्ञेयाः तस्य चिद्रूपतयाऽपरिणामात् ॥ १७ ॥

१ विभक्तः—इति भाष्यसंमतः पाठः ॥ वस्तुसाम्ये एकस्मिन्नपि वस्तुनि, चित्तभेदात् नानाविधज्ञानात्, तयोः ज्ञानविषययोः, विविक्तः पन्थाः भेद इत्यर्थः, विषयाणां ज्ञानस्वरूपत्वे अनेकपुरुषविदितज्ञानभास्यत्वमेकस्य धर्मिणोऽनुपपन्नं स्यादिति ज्ञानाद्भिन्ना एव विषया इति भावः ॥

२ भाष्यभास्वत्योर्मध्ये वृत्त्योस्तु—नचैकचित्ततन्त्रं वस्तु तदप्रमाणकं तदा किं स्यात् । इतिमेकं सूत्रं ततस्तदुपेति सम्प्रदायम् ॥

न तत्स्वाभासं दृश्यत्वात् ॥१८॥ एकसमये चोभयानवधारणम् ॥१९ चित्तान्तरदृश्ये[1] बुद्धिबुद्धेरतिप्रसङ्गः स्मृतिसंकरश्च ॥ २० ॥ चितेरप्रतिसंक्रमायास्तदाकारापत्तौ[2] स्वबुद्धिसंवेदनम् ॥२१॥

ननु चित्तं स्वप्रकाशमस्तु किंग्रहीत्रन्तरकल्पनेनेत्याशङ्कां परिहरति। तच्चित्तं स्वाभासं स्वप्रकाशकं न भवति किन्तु पुरुषवेद्यं कुतो दृश्यत्वात् ॥ १८ ॥ बुद्धेरसंवेदने रागादयो नोपपन्ना इत्याशङ्कां निरसितुमाह एकस्मिन्काले उभयस्य स्वरूपस्य अर्थस्य चावधारयितुमशक्यत्वाच्चित्तं न स्वप्रकाशम् ॥ १९ ॥ तर्हि बुद्ध्यन्तरेणास्तु ग्रह्यमित्याशङ्क्याह। यदि बुद्धिर्बुद्ध्यन्तरेण वेद्येत तस्या अपि बुद्धित्वाद्बुद्ध्यन्तरमित्यनवस्थानादर्थप्रत्यक्षं न स्यात्, स्मृतीनां रूपादिस्मृतीनां संकरश्च किंविषयिणी स्मृतिरिति न ज्ञायते ॥ २० ॥ सिद्धान्तमाह । न विद्यते प्रतिसंक्रमोऽन्यत्र गमनं यस्याः साऽप्रतिसंक्रमा तस्याश्चितेः पुरुषस्य सदैकरूपत्वात् सन्निधौ बुद्धिस्तदाकारतामापद्यते चिच्छक्तिर्बुद्धिर्विशिष्टतया संपद्यते यदा तदा बुद्धेः स्वस्यात्मनो वेदनं भवतीत्यर्थः ॥ २१ ॥

१ भावागणेशवृत्तौ—चित्तान्तरग्राह्य, इति पाठः ॥
२ तदा रागापत्तौ—इति पा० क० ॥

द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम् ॥ २२ ॥ तदसंख्येयवासनाभिः चित्रमपि[1] परार्थं संहत्यकारित्वात् ॥ २३ ॥ विशेषदर्शिन[2] आत्मभावभावनानिवृत्तिः[3] ॥ २४ ॥

द्रष्टा पुरुषस्तेनोपरक्तं तदाकारतामिव प्राप्तं, दृश्येनोपरक्तं विषयाकारपरिणामं यदा भवति तदा तदेव सर्वार्थग्रहणसमर्थं जायते ॥ २२ ॥ द्रष्टरि प्रमाणमाह । तदेव चित्तं संख्यातुमशक्याभिर्वासनाभिश्चित्रमपि नानारूपमपि परार्थं परस्य स्वामिनो भोक्तुर्भोगापवर्गलक्षणार्थं साधयति, कुतः संभूय मिलित्वार्थक्रियाकारित्वात् यथा गृहादिः ॥ ॥ २३ ॥ इदानीं कैवल्यं निर्णेतुं दश सूत्राणि । एवं सत्त्वपुरुषयोरन्यत्वे साधिते यस्तयोर्विशेषं पश्यति अहमस्मादन्य इत्येवंरूपं तस्य ज्ञातचित्तस्वरूपस्य चित्ते यात्मत्वभावना सा निवर्त्तते चित्तमेव कर्तृ ज्ञातृ भोक्तृ इत्यभिमानो निवर्त्तते ॥ २४ ॥

१ तदसंख्येयं वासनाभिश्चित्रमपि—इति भवदेवसंमतः पाठः ॥
२ विशेषदर्शिनि—इति भवदेवसंमतः पाठः॥
३ विनिवृत्तिः—इति पाठः क्वचित् ॥

तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तम् ॥२५॥ तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः ॥ २६ ॥ हानमेषां क्लेशवदुक्तम् ॥२७॥

तस्मिन्सति किं भवतीत्याह। तदेति। यदस्याज्ञाननिम्नं बहिर्मुखं विषयभोगफलं चित्तमासीत्तदिदानीं विवेकनिम्नं विवेकमार्गमन्तर्मुखं कैवल्यप्राग्भारं कैवल्यफलं कैवल्यप्रारम्भं वा संपद्यत इति ॥ २५ ॥ अस्मिंश्च विवेकवाहिनि चित्ते येऽन्तरायाः प्रादुर्भवन्ति तेषां हेतुप्रतिपादनद्वारेण त्यागोपायमाह। तच्छिद्रेष्विति। तस्मिन्समाधौ स्थितस्य छिद्रेष्वन्तरालेषु यानि प्रत्ययान्तराणि व्युत्थानरूपाणि ज्ञानानि तानि प्राक्तनेभ्यो व्युत्थानानुभवजेभ्यः संस्कारेभ्योऽहं ममेत्येवंरूपाणि क्षीयमाणेभ्योऽपि प्रभवन्ति अतः कारणोच्छित्तिद्वारेण तेषां हानं कर्त्तव्यमित्युक्तं भवति ॥ २६ ॥ हानोपायः पूर्वमेवोक्त इत्याह। हानमिति। यथा क्लेशानामविद्यादीनां हानं पूर्वमुक्तं तथा संस्काराणामपि कर्त्तव्यम् यथा ते ज्ञानाग्निना प्लुष्टा दग्धबीजकल्पा न पुनश्चित्तभूमौ प्ररोहं लभन्ते तथा संस्कारा अपि ॥ २७ ॥

प्रसंख्यानेऽप्यकुसीदस्य[1] सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः ॥ २८ ॥ ततः क्लेशकर्मनिवृत्तिः ॥ २९ ॥ तदा सर्वावरणापेतस्य[2] ज्ञानस्यानन्त्याज् ज्ञेयमल्पम् ॥ ३० ॥

एवं प्रत्ययान्तरानुदयेन स्थिरीभूते समाधौ यादृशस्य योगिनः समाधिप्रकर्षप्राप्तिर्भवति तथाविधमुपायमाह । प्रसंख्यानं यावतां तत्त्वानां यथाक्रमं व्यवस्थितानां परस्परविलक्षणस्वरूपपरिभावनं तस्मिन्सत्यकुसीदस्य फलमलिप्सोः प्रत्ययान्तराणामनुदये सर्वप्रकारविवेकख्यातेः परिशेषाद्धर्ममेघः समाधिर्भवति प्रकृष्टमशुक्लाकृष्णं धर्मम्परपुरुषार्थसाधकं मेहति सिञ्चतीति धर्ममेघः । अनेन प्रकृष्टस्य धर्मस्यैव ज्ञानहेतुत्वमित्युपपादितं भवति ॥ २८ ॥ तस्माद्धर्ममेघात्किं भवतीत्यत आह । तत इति । क्लेशानामविद्यादीनामभिनिवेशान्तानां कर्मणां च शुक्लादिभेदेन त्रिविधानां ज्ञानोदयात् पूर्वपूर्वकारणनिवृत्त्या निवृत्तिर्भवतीत्यर्थः ॥ २९ ॥ निवृत्तेषु किं भवतीत्यत आह । तदेति ॥ आव्रियते चित्तमेभिरित्यावरणानि क्लेशास्तेभ्योऽपेतस्य तद्विरहितस्य ज्ञानस्य शरद्गगनप्रतिमस्यानन्त्यादनवच्छेदाज्ज्ञेयमल्पं गणनास्पदं भवति अक्लेशेनैव सर्वञ्जानातीत्यर्थः ॥ ३० ॥

१ कुसीदशब्दस्तालव्यमध्यो दन्त्यमध्यो वा । भवदेववृत्तौ—सर्वथा—इति नैवास्ति ॥
२ सर्वावरणमलापेत—इति पा० क० ॥

कृतार्थानां[1] परिणामक्रमसमाप्तिर्गुणानाम् ॥ ३१ ॥ क्षणप्रतियोगी परिणामापरान्तनिर्ग्राह्यः क्रमः ॥३२॥

ततः किमित्यत आह। कृतार्थानामिति। कृतो निष्पादितो भोगापवर्गलक्षणः पुरुषार्थो यैस्ते कृतार्था गुणाः सत्त्वरजस्तमांसि तेषां परिणामः आपुरुषार्थसमाप्तेरानुलोम्येन प्रातिलोम्येन चाऽङ्गाऽङ्गिभावस्थितिलक्षणस्तस्य योऽसौ क्रमो वक्ष्यमाणस्तस्य परिसमाप्तिर्निष्ठा न पुनरुद्भवतीत्यर्थः ॥ ३१ ॥ क्रमस्योक्तस्य लक्षणमाह। क्षणोऽल्पीयान कालस्तस्य योऽसौ प्रतियोगी एकक्षणविलक्षणः परिणामोऽपरान्तनिर्ग्राह्यः अनुभूतेषु क्षणेषु पश्चात्सङ्कलनाबुद्ध्यैव यो गृह्यते स क्षणानां क्रम उच्यते। न ह्यननुभूतेषु क्षणेषु क्रमः परिज्ञातुं शक्यः ॥ ३२ ॥

१ ततः कृतार्थानां—इति भाष्यभावागणेशसंमतः पाठः॥

पुरुषार्थशून्यानां[1] प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति ॥ ३३ ॥

इति श्रीपतञ्जलिसूत्रे योगशास्त्रे चतुर्थः कैवल्यपादः ॥ ४ ॥

इदानीं फलभूतस्य कैवल्यस्यासाधारणं स्वरूपमाह । पुरुषार्थेति । समाप्तभोगापवर्गलक्षणपुरुषार्थानां गुणानां यः प्रतिप्रसवः प्रतिलोमपरिणामस्य समाप्तौ विकारानुद्भवो यदि वा चितिशक्तेर्वृत्तिसारूप्यनिवृत्तौ स्वरूपमात्रेणावस्थानं तत्कैवल्यमुच्यते । न केवलमस्मद्दर्शने क्षेत्रज्ञः कैवल्यावस्थायामेवं भूतो दर्शनान्तरेष्वपि विमृश्यमाण एवंरूप एवावतिष्ठते यस्माच्छास्त्रान्तरेष्वेवमेव निश्चयस्तस्मादिदमेव युक्तं वृत्तिसारूप्यपरिहारेण स्वरूपप्रतिष्ठा चितिशक्तेः कैवल्यमिति । तदेवं सिद्धान्तरेभ्यो विलक्षणा सर्वसिद्धिमूलभूता समाधिसिद्धिः सैव साधनीयेति ॥ ३३ ॥ सूत्रार्थवृत्तिमालोच्य कृतेयं पदचन्द्रिका ॥[2] अनन्तेनेश्वरप्रीत्यै चार्पिता शिवपादयोः ॥ १ ॥ इति योगचन्द्रिकायां चतुर्थः कैवल्यपादः ॥ ४ ॥ कल्याणमस्तु ॥

१ शून्यानां गुणानां — इति पा० क० ॥
२ पदचन्द्रिकेतिग्रन्थस्य नाम, योगचन्द्रिकेति तु प्रसिद्ध्यनुसारात्, पादान्तेषु तथा लेखात् ॥

श्री गणेशाय नमः

